Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri.

49

86

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

14

86

49

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनर्घराघवं

नाम

नाटकम् ।

महाकविश्रीमुरारिमिश्रविरचितम् ।

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

विरचितया व्याख्यया

समलङ्कृतम् ।

द्वितीयसंस्करणम् ।

कलिकातानगरे

सरस्वतीयन्त्रे

मुद्रितम् ।

ई १८८९ ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২ নং রমানাথমজুমদারের ষ্ট্রীট্
কলিকাতা।

প্রিণ্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৫ নং আমহার্ষ্ট ষ্ট্রীট্
কলিকাতা।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनर्घराघवम् ।

प्रथमोऽङ्कः ।

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः
कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।
याभ्यामर्घविबोधसुग्धमधुरश्रीरर्धनिद्रायितो
नाभीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृतः ॥१॥

ग्रन्थारम्भे प्रारिप्सितपरिसमाप्तिकामो ग्रन्थकृद् विशिष्टदेवतोपासनरूपं मङ्गलं नान्दीव्याजेनाचरति । निष्प्रत्यूहमिति । निष्प्रत्यूहं प्रत्यूहस्य विघ्नस्य अभावस्य निष्प्रत्यूहं निर्विघ्नं तस्मै विघ्नाभावायेत्यर्थः कौमोदकीलक्ष्मणः कौमोदक्याख्यनिजगदाचिह्नस्य गदाधरस्येति यावत् भगवतः विष्णोः कोकस्य चक्रवाकस्य प्रीतिः आनन्दः चकोरस्य पक्षिविशेषस्य पारणम् उपवासान्नभोजनं पिपासानिवारणार्थं पानमिति भावः तयोः पटुनी समर्थे उपयोगिनी इति यावत् ये ज्योतिष्मती तेजस्वी ते विद्येते ययोः तथोक्ते चक्रवाकस्य दिवसे स्त्रिया अविरह इति तदानन्दोपयोगी सूर्यः चकोरस्य रजन्यां चन्द्रिकापाने परिहृष्टिरिति तत्पारणोपयोगी चन्द्र इति प्रसिद्धेः । सूर्यचन्द्ररूपे इति यावत् लोचने नेत्रे उपास्महे आराधयामः । याभ्यां लोचनाभ्यां नाभी पल्वलमिव अल्पं सर इव नाभेर्गभीरत्वात् सरःसाम्यम् । तस्य यत् पुण्डरीकं श्वेताम्भोजं पुण्डरीकं सिताम्भोजमित्य-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

विरमति महाकल्पे नाभीपथैकनिकेतन-
स्त्रिभुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूः ।
किमधिकरणा कीदृक्कस्य व्यवस्थितिरित्यसा-
वुदरमविशद्द्रष्टुं तस्मै जगन्निधये नमः ॥ २ ॥

मरः । तस्य सुकुलः अर्द्धविकसिता कलिता अर्द्धविबोधेन अर्द्धप्रकाशेन सूर्यरूपलोचनप्रभायोगादिति भावः मुग्धमधुरा अतिमनोहारिणी श्रीः शोभा यस्य तथोक्तः तथा अर्द्धनिद्रायितः अर्द्धांशे निद्रां गतः अप्रकाशित इति यावत् चन्द्ररूपलोचनप्रभायोगादिति भावः सूर्योदये पुण्डरीकविकासस्य चन्द्रोदये च तन्निमीलनस्य कविसमयसिद्धत्वादिति भावः अतएव कम्बोः शङ्खस्य शम्भुः स्यात् कम्बुरस्त्रियामित्यमरः । सपत्नीकृतः सदृशीकृतः । भगवतश्चरणादिकमपहाय लोचनोपासनं प्रन्यक्षति तदीयशुभदृष्टिपातनार्थमिति द्रष्टव्यम् । उपमालङ्कारः । तदुक्तं दर्पणे । साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमाद्वयोरिति । शार्दूलविक्रीडितं वृत्तम् । सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥१॥

विरमतीति । महाकल्पे महाप्रलये विरमति निवर्त्तमाने अतिक्रामतीत्यर्थः सति पुनःसर्गेकाकाले इति भावः नाभी एव पन्था भगवदुदरप्रवेशमार्ग इति भावः एकम् अद्वितीयं निकेतनं निलयः यस्य तथोक्तः त्रिभुवनमेव पूः तस्याः त्रिलोकीनगर्या इत्यर्थः शिल्पी निर्माता असौ आत्मभूः ब्रह्मा कस्य पदार्थस्य कीदृक् व्यवस्थितिः व्यवस्था सा च किमधिकरणा किमाश्रया कस्मिन्नाधारे कः पदार्थः किं रूपेण व्यवस्थित इति यावत् इति प्रतिक्षणं द्रष्टुं यस्य उदरम् अविशत् तस्मै जगतां निधये कुक्षिस्थसमस्तभुवनायेत्यर्थः नारायणायेति यावत् नमः । हरिणीवृत्तं, नसमरसला गः षड्वेदैर्हयैर्हरिणी नतेति लक्षणात् ॥ २ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नान्द्यन्ते) (क)

सूत्रधारः । अलमतिविस्तरेण । भो भो लवणोदवेला-वनालीतमालतरुकन्दलस्य त्रिभुवनमौलिमण्डनमहानील-मणेः कमलाकुचकलशकेलिकस्तूरिकापत्राङ्कुरस्य भगवतः पुरुषोत्तमस्य यात्रायामुपस्थानीयाः (ख) सभासदः, कुत-

---

(क) नान्द्यन्ते इति नन्दयति देवादीनिति नान्दी रङ्गविघ्नोप-शान्त्यर्थं नटैः क्रियमाणमङ्गलाचरणविशेषः । तदुक्तं दर्पणे, यत्रान्य-वस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥ प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि । तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये ॥ आशीर्वचनसंयुक्ता स्तुतिर्यस्यात् प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ अत्राष्टपदा नान्दी । तथाच । मङ्गलशङ्खचन्द्राब्जकोककैरवहंसिनी । पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥ इति दर्पणकारः ।

(ख) भो भोः सभासद ! इति अध्याहार्यम् । लवणोदेति लवणम् उदकं यस्य स लवणोदः लवणसमुद्रः तस्य वेला तीरभूमिः वेला तत्तीरनीरयोरित्यमरः । तत्र या वनावली वनराजिः तस्यां तमाल-तरुः तापिञ्छवृक्षः तस्य कन्दलस्य काण्डभूतस्य तत्प्रदेशस्थितस्येति भावः । त्रिभुवनेति त्रिभुवनस्य मौलिर्मस्तकं तस्य मण्डनाय अलङ्क-रणाय महान् नीलमणिः नीलकान्तरत्नं तस्य । कमलेति कमलायाः लक्ष्म्याः कुचौ स्तनौ कलशाविव कुम्भाविव तयोः यः केलिः क्रीडनं विलासविशेषः तस्य कस्तूरिकापत्राणि मृगनाभिचित्रितपत्राकाररचना-विशेषाः तेषाम् अङ्कुरस्य प्ररोहस्य मूलस्येति यावत् भगवतो विहा-रार्थमेव तत्कुचरञ्जनरञ्जनादिति भावः । भगवतः ऐश्वर्यादिसर्व-शक्तिमतः । तदुक्तम्, ऐश्वर्यस्य समस्तस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेति । पुरुषोत्तमस्य विष्णोः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विद्वीपादागतेन कलहकन्दलनाम्ना (ग) कुशीलवेन रौद्रबी-भत्सभयानकाद्भुतरसभूयिष्ठं (घ) कमपि प्रबन्धमभिन-यता (ङ) नित्यं किलायमुद्वेजितो (च) लोकः। तत्कस्यचि-दभिमतरसभावभाजः प्रेक्षणकस्य प्रयोगानुज्ञया (छ) नाट्यवेदोपाध्यायबहुरूपान्तेवासी मध्यदेशीयः (ज) सुच-

---

यात्रायाम् उत्सवे। उपस्थानीयाः उपस्थिताः उपपूर्वकात् तिष्ठतेः कर्त्तरि अनीयप्रत्ययः।

(ग) कलहकन्दलनाम्ना कलहस्य कन्दलः प्रकाण्डः तत्स्वरूप इत्यर्थः नाम यस्य तथोक्तेन कलहकन्दनाम्नेति पाठे कलहस्य कन्दः मूलं नाम यस्य तथाभूतेन।

(घ) रौद्रेति रौद्रः उग्ररूपः बीभत्सः विकृतरूपः भयानकः दारुणरूपः अद्भुतः आश्चर्यरूपः ते रसाः भूयिष्ठाः प्रचुराः यत्र तथाविधम्। उक्तञ्च दर्पणे। रौद्रः क्रोधस्थायिभावो रक्तो रुद्रा-धिदैवतः। आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्॥ जुगुप्सास्थायि-भावस्तु बीभत्सः कथ्यते रसः। नीलवर्णो महाकालदैवतोऽयमुदा-हृतः॥ भयानको भयस्थायिभावः कालाधिदैवतः। अद्भुतो विस्मय-स्थायिभावो गन्धर्वदैवत इति।

(ङ) प्रबन्धं नाटकम्। अभिनयता नाट्येन प्रकटयता।

(च) उद्वेजितः विरक्तीकृतः।

(छ) अभिमतरसभाजः अभिमतं मनोऽनुकूलं रसं भजते इति तथोक्तस्य मधुररसशालिन इत्यर्थः प्रेक्षणकस्य प्रकृष्टम् ईक्षणं दर्शनं यस्य यत्र वा तत्तस्य नाटकस्येत्यर्थः प्रयोगानुज्ञया अभिनयानुमत्या।

(ज) नाट्यवेदेति नाट्यवेदस्य नाट्यशास्त्रस्य उपाध्यायः उपदेष्टा यः बहुरूपः तन्नामा कविरित्यर्थः तस्य अन्तेवासी शिष्यः। मध्य-देशीयः मध्यदेशभव इत्यर्थः। भरतपुत्रः नटपुत्रः भरता इत्यपि नटा इति धरणिः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रितो नाम भरतपुत्रोऽहमनुगृह्णे (झ) । यतः ।

प्रीतिर्नाम सदस्यानां प्रिया रङ्गोपजीविनः ।

जित्वा तदपहर्तारमेष प्रत्याहरामि ताम् ॥ ३ ॥

(आकाशे कर्णं दत्त्वा) । किं ब्रूथ । 'वैदेशिको भवानसमग्रपात्रः (ञ) कथमीदृशो कर्मणि प्रगल्भते'(ट) इति । (विहस्य । सप्रश्रयं(ठ)मञ्जलिं बद्ध्वा) । हन्त भोः, किमेवमुदीर्य्यते (ड) । भवद्विधानामाराधनी वृत्ति(ढ)रेव मे पात्राणि समग्रयिष्यति (ण) । यतः ।

(झ) अनुगृह्णे अनुगृहीतोऽस्मि ।

प्रीतिरिति । सदस्यानां सभ्यानां प्रीतिः सन्तोषो नाम रङ्गनृत्यव्यापारं तत्क्षेत्रं वा उपजीवतीति तथोक्तस्य जनस्य मनेति शेषः प्रिया अनुकूला सदस्यप्रीतिरेव मादृशस्य हितायेति भावः । एषः अहं तस्याः प्रीतेः अपहर्त्तारं पूर्वोक्तं कलहकन्दलाख्यं लोकविरक्तिकरं जित्वा तां प्रीतिं प्रत्याहरामि प्रत्यानयामि पुनस्तान् सदस्यान् प्रीतान् करोमीति यावत् । एतेन सीताहर्त्तारं रावणं जित्वा पुनः सीताप्रत्यानयनं रामस्येति ध्वनितम् । अनुष्टुब्वृत्तम् ॥ ३ ॥

(ञ) वैदेशिकः विदेशभवः । अतएव असमग्रपात्रः असम्पूर्णपात्रोचितसामग्रीसमाधान इति यावत् देशीयैर्यथा सर्वं संगृह्णते विदेशीयैस्तथा नेति भावः ।

(ट) प्रगल्भते धृष्यते ।

(ठ) सप्रश्रयं सविनयम् ।

(ड) उदीर्य्यते कथ्यते ।

(ढ) आराधनी अनुरञ्जनी । वृत्तिः व्यापारः ।

(ण) पात्राणि नटान् । समग्रयिष्यति सम्यक् नेपथ्यादिशालिनीः करिष्यतीत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यान्ति न्यायप्रवृत्तस्य तिर्य्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥४॥

(पुनराकाशे कर्णं दत्त्वा) । किं ब्रूथ । 'तर्हि प्रहितेयमस्माभिः पत्रिका' इति ।

(प्रविश्य नटः पत्रिकां ददाति । सूत्रधारो गृहीत्वा वाचयति) ।

'यत्र सर्वपुरुषार्थरहस्यनिःस्यन्दिनि
चेतःशुक्तिकया निपीय शतशः शास्त्रामृतानि क्रमा-
द्वान्तैरच्चरमूर्त्तिभिः सुकविना मुक्ताफलैर्गुम्फिताः ।
उन्मीलत्कमनीयनायकगुणग्रामोपसंवलान-
प्रौढाहङ्कृतयो लुठन्ति सुहृदां कण्ठेषु हारस्रजः ॥५॥
तस्मै वीराद्भुतारम्भगम्भीरोदात्तवस्तवे ।

यान्तीति । तिर्य्यञ्चः पशुपक्षिजातीया अपि न्यायप्रवृत्तस्य सदाचारमनुसरत इति यावत् जनस्य सहायताम् अनुकूलतां यान्ति गच्छन्ति । अपन्थानम् अन्यायमार्गं गच्छन्तं तु जनं सोदरः अपि विमुञ्चति त्यजति । एतेन रामस्य वानरसहायत्वं रावणस्य विभीषणत्यागश्च ध्वन्यते ॥ ४ ॥

यत्रेति । सर्वे पुरुषार्थाः धर्मार्थकामभोक्षाः तेषां रहस्यं गोपनीयं तत्त्वं तस्य निःस्यन्दः क्षरणं तद्वतीत्यर्थः । तदुक्तं सङ्गीतकल्पतरौ । देवर्षिक्षितिपालपूर्वचरितान्यालोच्य धर्मोदयस्तद्भावाश्रितभूमिकाभिनवने स्वादर्थसिद्धिः परा । सङ्गीताद्भुतचित्तवृत्तितरला यस्या भवत्यङ्गना ज्ञानं शङ्करसेवयेति कथितं नाट्यं चतुर्वर्गदमिति । यत्र सन्दर्भे चेतः एव शुक्तिका तया क्रमात् शतशः शतं शतं शास्त्राणि उपदेशगर्भाणि शासनानि एव अमृतानि निपीय सादरं पीत्वा समालोच्येति यावत् वान्तैः उद्गीर्णैः मुक्ताफलैः मुक्तं त्यक्तम् अफलम् असारवस्तु येषु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जगदानन्दकन्दाय संदर्भाय त्वरामहे' ॥६॥

(विमृश्य सहर्षस्मितम् (त) ।) मारिष ! रामायणमिति शृणोमि

तथाभूतैः अक्षराण्येव मूर्त्तयः आकाराः येषां तैः गद्यपद्यमयैर्वाक्यैरिति भावः सुकविना गुम्फिताः विरचिताः उन्मीलतां प्रस्फुरतां कमनीयानां हृद्यानां नायकगुणानां, त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही । दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् जेतेत्युक्तलक्षणस्य नायकस्य गुणाः, शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यं तेजसी । ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणा इत्युक्तलक्षणाः तेषां ग्रामस्य समुदायस्य उपसंयत्तानेन सम्बन्धेन सद्भावेनेति यावत् प्रौढा । उद्भटा अहङ्कृतिः रचनोत्कर्षजनिताभिमानः यासु तथाविधाः हरन्तीति हाराः मनोहारिण्यः स्रज इव माला इव अक्षरमाला इति यावत् सुहृदां सुष्ठु हृदयशालिनां सामाजिकानामित्यर्थः कण्ठेषु लुठन्ति । अन्यान्यपि मौक्तिकानि शुक्तिकासु वल्लभः पानीयं पीत्वा क्रमेण ततो वान्तानि सुचतुरपुरुषेण गुम्फितानि कमनीयमध्यमणिसंयुतानि सूत्रेण ग्रथितानि सत्पुरुषाणां कण्ठेषु लुठन्तीति द्रष्टव्यम् । नायको नेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः । वीराद्भुतयोः रसयोः आरम्भेन उद्योगेन ताडकावधधनुर्भङ्गादिरूपेणेति भावः गम्भीरं दुरवगाहम् उदात्तम् उत्तानं वस्तु यत्र तथाभूताय जगताम् आनन्दस्य कन्दाय मूलाय सन्दर्भाय नाटकायेति यावत् त्वरामहे सत्वरा भवामः । युग्मम् । शार्दूलविक्रीडितमनुष्टुब् च वृत्तम् ॥ ५ ॥ ६ ॥

(त) विमृश्य विचिन्त्य । सहर्षस्मितं सहर्षं सानन्दं स्मितं मन्दहासविशेषः यस्मिन् तत् यथा तथा आहेति अध्याहार्यक्रियाविशेषणम् । स्मितलक्षणमुक्तं यथा । ईषत् प्रफुल्लितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः । अदृष्टदन्तमुखसैरुत्तमानां स्मितं भवेदिति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्रभवतः कवित्वावतारप्रथमतीर्थस्य (थ) वल्मीकजन्मनो मुनेः सरस्वतीनिर्यासो यशःशरीर(द)मिक्ष्वाकूणाम् ।

नटः । अथ किम् ।

सूत्रधारः । तत्प्रतिबद्धप्रबन्धानुबन्धिनी परिषदाज्ञा(ध) ।

नटः । (विहस्य) । अहो, सकलकविसार्थसाधारणी खल्वियं वाल्मीकीया सुभाषितनीवी (न) ।

सूत्रधारः । मारिष ! किमुच्यते ।

अपि कथमसौ रक्षोराजस्तताप जगत्त्रयी-
मपि कथमभूदिक्ष्वाकूणां कुले गरुडध्वजः ।
अपि कथमसौ दैव्यो वाचः स्वतः प्रचकाशिरे
सुचरितपरीपाकः सर्वः प्रबन्धकृतामयम् ॥७॥

(थ) तत्रभवतः पूज्यस्य पूज्यस्तत्रभवानत्रभवानित्यमरः । कवित्वेति कवित्वेन काव्यकर्तृत्वेन अवतारः कवित्वावतारः तस्य प्रथमः आद्यः तीर्थः पात्रं प्रथमं कवित्वपदवीमारूढस्येति यावत् ।

(द) सरस्वतीनिर्यासः वाग्देवीनिस्यन्दः । यशःशरीरं कीर्त्तिरूपं शरीरं भौतिकन्तु शरीरं क्षीयते न तथेति भावः ।

(ध) तदिति तेन वाल्मीकिना प्रतिबद्धः विरचितः यः प्रबन्धः रामायणमिति यावत् तदनुबन्धिनी तदनुसारिणी । परिषदाज्ञा सभ्यानामादेशः । परिषदा रामायणानुबन्धिना केनचित् प्रबन्धेन वयं प्रीणनीया इति आज्ञप्तमिति भावः ।

(न) सकलेति सकलानां कविसार्थानां कविसमुदायानां साधारणी संवादिनी सर्वकविसम्मतेत्यर्थः वाल्मीकीया वाल्मीकसम्बन्धिनी । सुभाषितनीवी सुष्ठु वाक्यविन्यासग्रन्थिरित्यर्थः ।

अपीति । असौ रक्षोराजः राक्षसेश्वरः रावणः कथं केन प्रकारेण जगत्त्रयीं त्रिलोकीं तताप सन्तापितवान् अपि च्छयं प्रश्न-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्र तावन्निरूपयामि (प) रूपकमभिरूप(फ)मीक्षणम्। (मुहूर्तमिव स्थित्वा, अत्यन्तमभिनीय, सोल्लासम्)। अस्ति मौद्गल्य-गोत्रसम्भवस्य महाकवेर्भट्टश्रीवर्धमानतनूजन्मनस्तन्तुमती-नन्दनस्य (ब) सुरारेः कृतिरभिनवमनर्घराघवं नाम नाटकम् (भ)। तत् प्रयुञ्जानाः सामाजिकानुपाञ्जहे (म)। (विचिन्त्य सहर्षम्)। अहो, रमणीया खल्वियं सामग्री परिषदाराधनस्य (य)। यतः।

वाचकम्। इक्ष्वाकूणां कुले गरुडध्वजः विष्णुः कथं केन प्रकारेण अभूत्। कथं वाल्मीके दैव्यः देवसम्बन्धिन्यः वाचः कथं स्वतः आत्मना प्रचकाशिरे प्रादुर्भूता इत्यर्थः। अयं सर्वः राक्षसराजादि-कृतलगत्त्रयसन्तापनादिरूपः प्रबन्धकर्तां काव्यरचयितॄणां सुच-रितस्य सुकृतस्य परिपाकः परिणामः परिपच्यते इति परिपाकः फलं वा, कर्मणि घञ्प्रत्ययः। प्रबन्धकर्तां सुकृतवशेनैव तत्तत् सर्वं चित्ते आविर्भवतीति भावः। हरिणीवृत्तं, नसमरसला गः षड्वेदै-र्हयैर्हरिणी मतेति तल्लक्षणात् ॥७॥

(प) निरूपयामि निर्धारयामि।

(फ) अभिरूपं सर्वजनप्रियम्।

(ब) वर्धमानतनूजन्मनः वर्धमानपुत्रस्य तन्तुमती नाम काचित् रमणी तस्या नन्दनस्य तद्गर्भजस्य।

(भ) अनर्घः पूज्यः अमूल्यो वा राघवो रामो यत्र तथोक्तम्। तत् नाटकम्।

(म) प्रयुञ्जानाः अभिनयन्तः। सामाजिकान् सहृदयान्। उपा-ञ्जहे आराधयामः।

(य) सामग्री उपकरणम्। परिषदाराधनस्य सभ्यसन्तोषस्य।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

महर्घ्या रसपाठगीतिगतिषु प्रत्येकमुत्कर्षिणो
मौद्गल्यस्य कवेर्गभीरमधुरोद्गारा गिरां व्यूतयः ।
धीरोदात्तगुणोत्तरो रघुपतिः काव्यार्थबीजं मुनि-
र्वाल्मीकिः फलति स्म यस्य चरितस्तोत्राय दिव्या गिरः ॥८॥

अयं तु प्राचेतसीयं कथावस्तु बहुभिः प्रणीतमपि प्रयुञ्जानो नापराध्यति श्रोत्रियपुत्रः (र) । पश्य ।

महर्घ्या इति । मम वर्ग्याः सम्प्रदायभुक्ता जनाः रसपाठः रसयुक्तः पठ्यते इति पाठः सन्दर्भः तस्य गीतिः सङ्गीतं तस्या गतिषु पद्धतिषु प्रत्येकम् एकैकम् उत्कर्षिणः उत्कर्षवन्तः । मौद्गल्यस्य मौद्गल्यवंशीयस्य मुरारेः गभीरः अर्थगुरुः मधुरः मनोहरः उद्गारः उक्तिः याश्च तथाभूताः गिरां वाचां व्यूतयः रचनाः । धीरोदात्तस्य नायकभेदस्य गुणैः अविकत्थनत्वादिभिः । तदुक्तं दर्पणे । अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः । स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथित इति उत्तरः । भूयान् रघुपतिः रामः काव्यार्थस्य बीजं मूलम् । वाल्मीकिः यस्य रघुपतेः चरितस्तोत्राय चरितकीर्त्तनाय दिव्याः गिरः वाचः फलति स्म उत्पादयामास उद्भावयामासेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥८॥

(र) प्राचेतसीयं प्रचेताः वरुणः, प्रचेता वरुणः पाशीत्यमरः । तस्यापत्यं पुमान् प्राचेतसः वाल्मीकिः तस्य इदं तत्सम्बन्धि तत्प्रणीतं वा कथावस्तु कथारूपमितिवृत्तं बहुभिः कालिदासभवभूत्यादिभिः प्रणीतमपि विरचितमपि । प्रयुञ्जानः अभिनयमार्गेण विरचयन् । श्रोत्रियपुत्रः वेदविद्ब्राह्मणतनयः, श्रोत्रियश्छान्दसौ समावित्यमरः । न अपराध्यति न दोषमर्हतीत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यदि चुक्षं पूर्वैरिति जहति रामस्य चरितं
गुणैरेतावद्भिर्जगति पुनरन्यो जयति कः ।
स्वमात्मानं तत्तद्गुणगरिमगम्भीरमधुर-
स्फुरद्वाग्ब्रह्माणः कथमुपकरिष्यन्ति कवयः ॥९॥

उपक्रममाणश्च स कविः स्वनिर्भासशब्दब्रह्माणमाचार्यं प्राचेतसं गिरं च देवतामेवमुपश्लोकितवान् (ल) ।

तमृषिं मनुष्यलोकप्रवेशविश्रामशाखिनं वाचाम् ।

यदीति । पूर्वैः प्राचीनैः पण्डितैः वाल्मीकिप्रभृतिभिः चुक्षं विरचितम् इति हेतोः रामस्य चरितं मत्प्रणीतमिति शेषः यदि जहति त्यजन्ति लोका इति शेषः तदा तत्तद्गुणानां माधुर्यौजः-प्रसादादीनां गरिम्णा गम्भीरम् अर्थगुरु मधुरं हृद्यं यथा तथा स्फुरत् वाग्ब्रह्म शब्दरूपं ब्रह्म येषां तथाभूताः रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा । गुणा माधुर्यौजोऽथ प्रसाद इति ते त्रिधेति दर्पणे । कवयः काव्यप्रणेतारः स्वम् आत्मानं निजस्वरूपं कथं केन प्रकारेण उपकरिष्यन्ति प्रतिपत्तिरूपामुपकृतिं नेष्यन्ति ? नैव नेतुं शक्ष्यन्तीत्यर्थः । कश्च अन्यः पुमानिति शेषः जगति एतावद्भिः गुणैः पूर्वोक्तैः काव्यगुणैरित्यर्थः जयति सर्वोत्कर्षेण वर्त्तते न कोऽपीत्यर्थः तस्मात् तथाविधगुणसम्पन्नं काव्यं चरितस्य पूर्वकविभिः चुक्षत्वेऽपि समादरणीयमिति तात्पर्यार्थः । शिखरिणी-वृत्तं, रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणीति तल्लक्षणात् ॥९॥

(ल) उपक्रममाणः आरभमाणः । स्वनिर्भासेति स्वस्मिन् निर्भासते स्वतः स्फुरतीति तथोक्तं शब्दब्रह्म यस्य तथाभूतम् । आचार्यं गुरुं काव्यप्रणेतृणामिति भावः प्राचेतसं वाल्मीकिं गिरं देवतां वाग्देवीमित्यर्थः । उपश्लोकितवान् श्लोकेन स्तुतवानित्यर्थः ।

तमिति । वाचां मनुष्यलोके यः प्रवेशः समागमः तस्मिन्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुरलोकादवतारप्रान्तरखेदच्छिदं वन्दे ॥ १० ॥
धातुश्चतुर्मुखीकण्ठशृङ्गाटकविहारिणीम् ।
नित्यं प्रगल्भवाचालामुपतिष्ठे सरस्वतीम् ॥११॥

नटः । (सहर्षम् ।) भाव ! तत् प्रस्तूयताम् । अस्य हि मौद्गल्यानां ब्रह्मर्षीणामन्वयमूर्धन्यस्य (व) मुरारिनामधेयस्य बालवाल्मीकेर्वाङ्मयममृतविन्दुनिष्यन्दि कन्दलयति (य) कौतुकं मे ।

विश्रामशाखी श्रमापहतरुः तं सुरलोकात् स्वर्गात् यः अवतारः अवतरणं तस्मिन् प्रान्तरे शून्यवर्त्मनीत्यर्थः यः खेदः निरवलम्बनतया क्लेशः तं छिनत्तीति तथोक्तं आश्रयदानात् तत्क्लेशापहारिणमिति यावत् तं प्रसिद्धम् ऋषिं वाल्मीकिमित्यर्थः वन्दे प्रणमामि ॥ १० ॥

धातुरिति । धातुः ब्रह्मणः चतुर्णां मुखानां समाहारः चतुर्मुखी मुखचतुष्टयमित्यर्थः तस्याः कण्ठाः एव शृङ्गाटकानि चत्वारः पन्थानः, शृङ्गाटकचतुष्पथे इत्यमरः । तेषु विहारिणीं सततसञ्चारिणीं प्रगल्भा च वाचाला च तां समुद्भतवाग्वादिनीमित्यर्थः सरस्वतीं नित्यं सततम् उपतिष्ठे मन्त्रेणाराधयामीत्यर्थः मन्त्रकरणकोपपूर्वकात्तिष्ठतेरात्मनेपदम् ॥ ११ ॥

(व) मौद्गल्यानां मौद्गल्यवंशीयानाम् । अन्वयमूर्धन्यस्य वंशश्रेष्ठस्येति भावः ।

(य) बालवाल्मीकेः नवावतारवाल्मीकेः । वाङ्मयं काव्यम् अमृतविन्दुनिष्यन्दि सुधाबिन्दुवर्षीत्यर्थः । कन्दलयति जनयति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सूत्रधारः । मारिष ! स्थाने (प) भवतः कुतूहलमीदृशमेवैतत् । तथाहि ।

तत्तादृगुज्ज्वलककुत्स्थकुलप्रशस्ति-
सौरभ्यनिर्भरगभीरमनोहराणि ।
वाल्मीकिवागमृतकूपनिपानलक्ष्मी-
मेतानि बिभ्रति मुरारिकवेर्वचांसि ॥१२॥

(प) स्थाने योग्यविषये । युक्तं वा युक्ते द्वे साम्यतं स्थाने इत्यमरः ।

तदिति । तत् प्रसिद्धं तादृशम् अनन्यसाधारणमिति यावत् उज्ज्वलं दीप्यमानं यत् ककुत्स्थकुलं, पुरा परञ्जयो नाम कश्चित् इक्ष्वाकुवंशीयः नृपतिरासीत् । तमेकदा देवाः समागम्य असुरजयाय अनुरुरुधुः । स च तानब्रवीत् यदि शतक्रतुः वृषरूपः मां संग्राम-भूमिं नयति तदाहं तेषामसुराणां जयाय यास्यामीति । देवाश्च शक्रमुपेत्य तथैवोचुः । स च देवेन्द्रः वृषरूपमास्थाय तं राजानमसुर-जयार्थं रणभूमिमनयत् । स राजा तस्य वृषरूपस्येन्द्रस्य ककुदि समास्थाय असुरान् जिगाय । ततश्चास्य ककुत्स्थ इति तद्वंशी-यानाञ्च काकुत्स्था इति प्रसिद्धिरिति पुराणवार्त्ता । तस्य या प्रशस्तिः चरितकीर्त्तनेन प्रशंसा तस्याः सौरभ्यस्य सुयशसः निर्भरेण अतिशयेन गभीराणि महान्ति मनोहराणि च एतानि मुरारिकवेः वचांसि वाल्मीकेः वागेव रामायणमेवेत्यर्थः अमृतकूपं तस्य निपानं तद-मृतपानार्थं तत्समीपकृतं क्षुद्रं सरः तस्य लक्ष्मीं शोभां, निपानञ्चा-ल्पसर इत्यमरः । बिभ्रति भजन्ते । अतान्यस्य धर्मं कथमन्यो वह-त्विति निपानस्य मुरारिवचसश्च बिम्बप्रतिबिम्बभावात् निदर्शनालङ्कारः । तदुक्तं दर्पणे । सञ्जवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित् । यत्र

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये गीयते) ।

दिणयरकिरणुक्केरो पिआअरो कोऽवि जीअलोअस्स ।
कमलमउलंकवालीकिअमहुअरकड्ढणविअडढो ॥१२॥

सूत्रधारः । (आकर्ण्य ।) कथमुपक्रान्त(स)मेव नर्त्तकैः, यदियं दशरथोत्सङ्गा(ह)द्रामभद्राकर्षिणी विश्वामित्रस्य प्रावेशिकी ध्रुवा (च) । (पुरोऽवलोक्य ससंभ्रमम्) । अये, कथमत्रैव तत्रभवतः कमलयोनिजन्मनो मुनेरायतनात् (क)

विम्बानुविम्बत्वं बोधयेत् सा निदर्शनेति । वसन्ततिलकं वृत्तं, ज्ञेयं वसन्ततिलकं तभजा जगौ ग इति तल्लक्षणात् ॥१२॥

दिनकरेति । दिनकरकिरणोत्करः प्रियाकरः कोऽपि जीवलोकस्य । कमलमुकुलाङ्कपालीकृतमधुकरकर्णणविदग्धः ॥ इति संस्कृतम् । अस्यार्थः । दिनकरस्य सूर्यस्य किरणोत्करः तेजोराशिः तत्स्वरूप इत्यर्थः जीवलोकस्य संसारस्य प्रियाकरः हितकरः कोऽपि अनिर्वचनीयः पुरुष इति भावः कमलमुकुलेन पद्मकलिकया अङ्कपालीकृतः क्रोड़ीकृतः यः मधुकरः भ्रमरः तस्य कर्णणे तत्क्रोड़ात् हरणे इति यावत् विदग्धः दक्षः ॥ १२ ॥

(स) उपक्रान्तं प्रारब्धम् ।

(ह) दशरथोत्सङ्गात् दशरथक्रोड़ात् ।

(च) प्रावेशिकी प्रवेशसूचिका ध्रुवा गीतिविशेषः । सा च पञ्चधा । तदाह भरतः । ध्रुवा तु गीतिभेदोऽयमिति, प्रावेशिकी निष्क्रामणी परिक्रामण्यवस्थितिः । उत्थापनी तु पञ्चम्या ध्रुवा नाट्यार्थसिद्धये । तत्र प्रावेशिकी ज्ञेया प्रवेशे गानयोगत इति च ।

(क) कमलयोनिजन्मनः ब्रह्मपुत्रस्य मुनेः वशिष्ठस्येत्यर्थः । आयतनात् आश्रमात् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रतिनिवृत्तेन ऋत्विजा (ख) वामदेवेन किमपि तद्वाचिक(ग)मभिधीयमानो महाराजो दशरथस्तिष्ठति। तदेहि। न द्वयोस्तृतीयेन भवितव्य(घ)मित्यावामप्यनन्तरकरणीयाय (ङ) सज्जीभवावः। (इति निष्क्रान्तौ)।

प्रस्तावना (च)।

(ततः प्रविशति यथोपदिष्टो दशरथो वामदेवश्च।)

दशरथः। अहो, बहुधा श्रुतमपि भगवतो वशिष्ठस्यानुशासनं (छ) नवं नवमिव प्रमोदयति माम्।

वामदेवः।

मधुकैटभदानवेन्द्रमेदःप्लवविस्रा विषमैव मेदिनीयम्।

(ख) ऋत्विजा पुरोहितेन।

(ग) वाचिकं सन्देशवचनं, सन्देशवाग् वाचिकं स्यादित्यमरः।

(घ) द्वयोः परस्परं कथयतोरिति शेषः तृतीयेन जनेनेति शेषः। न भवितव्यं न तत्र गन्तव्यमिति यावत् षट्कर्णो भिद्यते मन्त्र इति मन्त्रभेदादिति भावः।

(ङ) अनन्तरकरणीयाय अतःपरं कर्त्तव्यानुष्ठानाय।

(च) प्रस्तावना प्रस्तावयति सूचयति अनयेति व्युत्पत्तिः। तदुक्तं दर्पणे। नटी विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते। चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सेति।

(छ) अनुशासनम् उपदेशवचनम्।

मधुकैटभेति। मधुश्च कैटभश्च तयोः दानवेन्द्रयोः मेदसां वसानां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अधिवास्य यदि स्वकैर्यशोभिश्चिरमेनामुपभुञ्जते नरेन्द्राः ॥१४॥

दशरथः । (सविमर्षमितम्) । सखे वामदेव !

तस्याज्ञयैव परिपालयतः प्रजां मे
कर्णोपकण्ठपलितङ्करणी जरेयम् ।
यद्गर्भरूपमिव मामनुशास्ति सर्व-
मद्यापि तन्मयि गुरुर्गुरुपक्षपातः ॥१५॥

वामदेवः । महाराज ! किमुच्यते । समानवृत्तेरपि क्वचि-
देव कस्यचित्तारामैत्रकम् (ज) । तथाहि, स तत्रभवान्

स्वान्मेदस्तु वपा वसेत्यमरः । स्नुवेन पूरणेन विश्वा आसमन्तवती, विश्वं स्वादामगन्धि यदित्यमरः । अतएव इयं मेदिनी मेदोयोगादिति भावः पृथिवी विषमैव अभोग्यैवेत्यर्थः दुर्गन्धादिति भावः अत्र वासे लोकानां शरीरेषु विविधदुष्कृतयोगात् दुर्गन्ध एव वासते इति भावः । यदि नरेन्द्राः राजानः स्वकैः स्वकीयैः यशोभिः सुचरितैरिति भावः एनां मेदिनीम् अधिवास्य संस्कृत्य, संस्कारो गन्धमाल्याद्यैः यः स्यात्तदधिवासनमित्यमरः । चिरं सततमिति भावः भुञ्जते तदैव भङ्क्ष्यमिति शेषः । अस्यां सुचरितैरेव वस्तव्यमिति तात्पर्यम् ॥ १४ ॥

तस्येति । तस्य गुरोः आज्ञयैव आदेशेनैव प्रजां परिपालयतः मे मम इयं जरा वार्द्धकं कर्णोपकण्ठयोः पलितङ्करणी जराजनितशोक्लजननीत्यर्थः कर्णान्तिकवर्त्तिनः केशनिचयाः परिपक्वा इति भावः । आशैशवं वार्द्धकं यावत् तदाज्ञयैव प्रजाः पालयामीति निष्कर्षः । अद्यापि गर्भरूपमिव शिशुं स्वपुत्रमिव मां सर्वम् अनुशास्ति उपदिशतीति यत् तत् मयि गुरुर्महान् पक्षपातः स्नेहः । वसन्ततिलकं वृत्तम् ॥ १५ ॥

(ज) समानवृत्तेरिति समाना साधारणी वृत्तिः व्यापारः अनुशासनरूप इत्यर्थः यस्य तथाभूतस्येत्यर्थः सर्वेषु जनेषु समदर्शिन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

साधारणो रघूणां गुरुर्भवन्नपि विशेषदृष्टिस्ते।
नामोदयति कमिन्दुः कुमुदं पुनरस्य सर्वस्वम् ॥१६॥

दशरथः। वामदेव! मम हि गुरुवचनश्रवणतृष्णामङ्कुशीकरोति (झ) श्रोत्रवृत्तिरिन्द्रियान्तरानुसारिणी (ञ) हृदयमहागजस्य। तन्न किञ्चिदपर(ट)मवशिष्यते।

वामदेवः। महाराज! निःशेषमभिहितम्। इमां तु

इति भावः कस्यचित् जनस्य कचिदेव जने तारामैत्रकं स्वतःसिद्धा चक्षुःप्रीतिः, नक्षत्रयोगकृता प्रीतिर्वा। अक्षिपुत्रश्च नक्षत्रे तारोक्ता वालयोषितीति विश्वः।

साधारण इति। रघूणां रघुवंशीयानां साधारणः तुल्यरूपः गुरुः भवन्नपि ते तव त्वयीत्यर्थः सम्बन्धविवक्षया षष्ठी। विशेषदृष्टिः अत्यन्तमनुरागीत्यर्थः। तथाहि, इन्दुश्चन्द्रः कं कमलं न आमोदयति न प्रीणयति? सर्वमेव आमोदयीत्यर्थः पुनः किन्तु कुमुदम् अस्य इन्दोः सर्वस्वं परमप्रियमिति भावः। प्रतिवस्तूपमालङ्कारः। तदुक्तं दर्पणे। प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मसामान्यो यत्र निर्दिश्यते पृथगिति। आर्याछन्दः, यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये पञ्चदश चतुर्थके सार्येति तल्लक्षणात् ॥ १६ ॥

(झ) गुरुवचनेति गुरुवचनस्य श्रवणे या तृष्णा लालसा ताम्। अङ्कुशीकरोति अङ्कुशः हस्तिशासनदण्डविशेषः तं करोति।

(ञ) इन्द्रियान्तरानुसारिणः इन्द्रियान्तरं श्रोत्रव्यतिरिक्तं चक्षुरादिकम् अनुसरति अनुधावतीति तथोक्तस्य।

(ट) अपरं वक्तव्यमिति शेषः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सर्वसन्देशसंग्रहकारिकां कारिका(ठ)मतिप्रयत्नेन भगवान् भवन्तमनुस्मारयति (ड) ।

दशरथः । (सादरम्) । अवहितोऽस्मि । किमाज्ञापयति ।

वामदेवः ।

हुतमिष्टं च तप्तं च धर्मश्चायं कुलस्य ते ।
गृहात् प्रतिनिवर्तन्ते पूर्णकामा यदर्थिनः ॥२९॥

दशरथः । सहर्षम् । सुष्ठु शिरसि कृतमाचार्यवचनम् । किञ्च ।

अद्यास्मद्गोत्रमहत्तरः क्रतुभुजामद्यायमाद्यो रवि-
र्यज्वानो वयमद्य ते भगवती भूरद्य राजन्वती ।
अद्य त्वं बहु मन्यते सहचरैरस्माभिराखण्डलो
येनैतावदनन्यतीर्पतिरपि स्वेनानुगृह्णाति नः ॥१८॥

(ठ) सर्वेति सर्वेषां सन्देशानां वाचिकानां संग्रहः संक्षेपः तस्य कारिकां कारिणीं कारिकां श्लोकं, कारिका तु कृतौ श्लोके इति विश्वः ।

(ड) अनुस्मारयति स्मृतिपथं नेतुमनुस्मरणमीत्यर्थः ।

हुतमिति । अर्थिनः याचकाः पूर्णकामाः सफलमनोरथाः सन्तः गृहात् प्रतिनिवर्तन्ते प्रतिगच्छन्ति इति यत् एतत् ते तव कुलस्य वंशस्य हुतं होमः देवोद्देशेन अग्नौ हव्यप्रक्षेपः, इष्टम् अग्निहोत्रादिकः क्रतुः, तप्तं तपश्चरणम् अयं धर्मश्च अवश्यकर्त्तव्यः कार्य्यविशेषश्च । अनुष्टुब्वृत्तम् ॥१७॥

अद्यदिति । अद्य अस्माकं गोत्रस्य वंशस्य महत्तरः अतिमहान् आदिपुरुष इत्यर्थः रविः सूर्यः क्रतुभुजां देवानाम् आद्यः श्रेष्ठः अभूदिति शेषः । अद्य ते वयं यज्वानः विधिना कृतयज्ञाः अभूमेति शेषः, यज्वा तु विधिनेष्टवानित्यमरः । अद्य भगवती भूः पृथिवी राज-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वामदेवः । राजर्षे ! सहजानुभावगम्भीरमहिमानो (ढ) यूयमेव तादृशाय यशसे (ण) । वयं तु केवलमुपदेष्टारः ।

उन्मुद्रयति हि कुमुदाकरमशरन्निशानिशातनिस्तुषोऽपि तुषारकिरणः ।

स पुनः किमुच्यते भगवान्द्वितीयपरमेष्ठी वशिष्ठः ॥ १९॥

न्वती शोभनराजशालिनीत्यर्थः, सुराणि देवे राजन्यानित्यमरः । अथ आखण्डलः इन्द्रः अस्माभिः सहपरैः स्वं स्वप्रतिपाल्यं त्रिलोकीराज्यमिति यावत् वह्न मन्यते समधिकमाद्रियते इत्यर्थः । येन हेतुना अरुन्धतीपतिः वशिष्ठोऽपि स्वेन आत्मना स्वयमित्यर्थः नः अस्मान् एतावत् समधिकमिति भावः अनुगृह्णाति उपदेशदानेनेति शेषः । शार्दूलविक्रीडितं वृत्तम् ॥१८॥

(ढ) सहजेति सहजः स्वाभाविकः यः अनुभावः प्रभावः तेन गम्भीरः दुरवगाहः महिमा माहात्म्यं येषां तथाविधाः ।

(ण) यशसे तत्तत्सुकृतानुष्ठानजनितकीर्त्तये प्रभवथेति शेषः ।

उन्मुद्रयतीति । शरदः शरत्कालस्य निशा रात्रिः तया निशातः उत्तेजितः तथा निस्तुषः निरावरणः निर्मल इति यावत् स न भवतीति अशरन्निशानिशातनिस्तुषः अपि वर्षाकालीनोऽपीति भावः तुषारकिरणः शीतरश्मिः चन्द्रः कुमुदाकरं कैरवनिचयं तदाधारजलाशयं वा उन्मुद्रयति हि विकाशयत्येव । सः पुनः द्वितीयपरमेष्ठी अपरो ब्रह्मा वशिष्ठः किम् उच्यते किं कथ्यते ? कुः पृथिवी तस्याः मुदः आनन्दस्य आकरः आश्रयः तं भवन्तमिति भावः उन्मुद्रयतीति किं वक्तव्यमिति भावः । शीतरश्मेस्तु कदाचित् मलिनता कदाचिन्निर्मलता च अस्य तु भगवतः सदैव निर्मलत्वमित्याशयेन द्वितीयपरमेष्ठीत्युक्तम् । कुमुदाकरं वृत्तम्, एकादशभिर्वर्णैरष्टादशभिः क्रमादुभौ पादौ । तत् कुमुदाकरवृत्तं चरणौ तु दशाक्षरौ यस्येति तल्लक्षणात् ॥१९॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

इदं वो याज्यानामुदितमुदितं यत् कुलमभू-
द्यदिष्टं वा कुर्वन्नकृत सगरः पूर्तमुदधिम् ।
असौ पूर्वेषां ते सुचरितपताका यदमर-
स्रवन्ती कृत्स्नोऽयं त्रिभुवनगुरोस्तस्य विभवः ॥२०॥

किञ्च ।

कौशिकस्वीकृतस्यापि यदाज्ञातिक्रमादभूत् ।
त्रिशङ्कोरुपभोगाय न द्यौरपि न भूरपि ॥२१॥

(प्रविश्य ।)

प्रतीहारी । जयतु जयतु देवः । देव! भगवान् कौशिको द्वारमध्यास्ते ।

इदमिति । याज्यानां यजमानानां वः युष्माकम् इदं कुलम् उदितम् उदितम् अतिशयेन उदितं वर्द्धितमित्यर्थः उदितं मुदितञ्चेति उदितमुदितं वा अभूत् इति यत् इष्टं यज्ञं कुर्वन् सगरः उदधिं समुद्रं पूर्त्तं खातं, पूर्त्तं त्रिषु पूरिते स्यात् क्लीवं खातादिकं मतमिति मेदिनी । अकृत कृतवानिति यत् असौ अमरस्रवन्ती सुरनदी, स्रवन्ती निम्नगापगेत्यमरः । ते तव पूर्वेषां पूर्वपुरुषाणां सुचरितपताका सुकृतस्य वैजयन्तीस्वरूपेत्यर्थः इति यत् अयं कृत्स्नः समग्रः तस्य त्रिभुवनगुरोः वशिष्ठस्य विभवः प्रभावः । वशिष्ठप्रभावेणैव तव पूर्वपुरुषाः तादृशानि महान्ति कर्माणि साधयामासुरिति तात्पर्यम् । शिखरिणीवृत्तम् ॥२०॥

कौशिकेति । यस्य आज्ञातिक्रमात् आदेशलङ्घनात् हेतोः कौशिकेन विश्वामित्रेण स्वीकृतस्य त्वां सशरीरं स्वर्गं प्रेषयिष्यामीति अङ्गी-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशरथः । (ससंभ्रमम् ।) किं कौशिकः ।

वामदेवः । अहं तमुपेत्य श्रौतेन (त) विधिना पुरस्कृत्य (थ) प्रवेशयामि तपोनिधिम् । इति प्रतीहार्या सह निष्क्रान्तः ।

दशरथः । (सहर्षम् ।)

यः क्षत्रदेहं परितक्ष्य टङ्कैस्तपोमयैर्ब्राह्मणमुच्चकार ।
परोरजोभिः स्वगुणैरगाधः स गाधिपुत्रोऽपि गृहानुपैति ॥२२॥

(ततः प्रविशति वामदेवोपदिश्यमानवर्त्मा विश्वामित्रः ।)

विश्वामित्रः । सखे वामदेव ! त्वमधुनैव वशिष्ठाश्रमादागतोऽसि । कच्चित् कुशली तावदरुन्धतीनाम्ना पतिव्रतामयेन ज्योतिषा सहचरितधर्मा (द) तत्रभवान् मैत्रावरुणिः (ध) ।

ततस्तापि त्रिशङ्कोः तदाख्यनरपतेः द्यौरपि स्वर्गोऽपि न भूरपि भूमिरपि उपभोगाय आश्रयाय न अभूत् । अनुष्टुब्वृत्तम् ॥२॥

(त) श्रौतेन श्रुतिवेदः तद्विहितेन ।

(थ) पुरस्कृत्य परितोष्य ।

य इति । यः तपोमयैः टङ्कैः पाषाणास्त्रभेदैः, टङ्कः पाषाणदारण इत्यमरः । क्षत्रदेहं परितक्ष्य तनूकृत्य खण्डीकृत्येत्यर्थः ब्राह्मणं ब्रह्मसम्बन्धि उच्चकार उच्चैः कृतवान् अत्यन्तब्रह्मतेजःपूर्णं चकारेत्यर्थः परोरजोभिः रजोगुणात् परैः स्वगुणैः निजैः सात्त्विकैः गुणैरित्यर्थः अगाधः अतलस्पर्शः दुरवगाह इत्यर्थः स गाधिपुत्रः विश्वामित्रः अपि गृहान् मामेति शेषः उपैति आगच्छति । महाभाग्यं ममेति भावः ॥२२॥

(द) सहचरितः सहानुष्ठितः धर्मः येन तथाभूतः सस्त्रीको धर्ममाचरेदिति शास्त्रादिति भावः ।

(ध) मैत्रावरुणिः मित्रश्च वरुणश्च तयोरपत्यं पुमान् मैत्रा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वामदेवः । विशेषेण (न) पुनरद्य याज्यकुलमुपतिष्ठमाने (प) चिरन्तनप्रणयिनि कौशिके ।

विश्वामित्रः । सखे वामदेव ! चिरेण दशरथो द्रष्टव्य इति सर्वमनोरथानामुपरि वर्तामहे ।

वामदेवः । सविनयम् । भगवन् कुशिकनन्दन ! धन्यः खल्वयं राजा सावित्रो (फ) यमेवमनुरुध्यन्ते (ब) भवन्तोऽपि ।

विश्वामित्रः । सखे ! धन्य एवायम् ।

नमन्नृपतिमण्डलीमुकुटचन्द्रिकादुर्दिन-
स्फुरच्चरणपल्लवप्रतिपदोक्तदोःसम्पदा ।
अनेन सहजेतरां तुरगमेधमुक्तभ्रम-
त्तुरङ्गखुरचन्द्रकप्रकरदन्तुरा मेदिनी ॥२३॥

यरुणिः । पुरा ब्रह्मजनितं देहमपहाय तपस्यतोर्मित्रावरुणयोस्तेजसा उर्वशीगर्भसम्भूत इति पुराणम् ।

(न) विशेषेण कुशलीति शेषः ।

(प) याज्यकुलं यजमानस्य दशरथस्य कुलं गृहमित्यर्थः उपतिष्ठमाने समगच्छतीत्यर्थः ।

(फ) सावित्रः सूर्यवंशीयः ।

(ब) अनुरुध्यन्ते अभिनन्दन्ति ।

नमदिति । नमन्ती प्रणिपतन्ती या नृपतिमण्डली राजचक्रं तस्या मुकुटानां किरीटानां चन्द्रिकया ज्योत्स्नया प्रभयेति यावत् दुर्दिनं समाच्छन्नं यथा तथा स्फुरन् राजन् यच्चरणपल्लवः तेन प्रतिपदं पदे पदे प्रतिवर्णमिति वा उक्ता कथिता प्रकटितेति यावत् दोःसम्पद् बाहुबलसम्पद्भिः यच्च तथोक्तेन सहजेति भावः अनेन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(पुरोऽवलोक्य सहर्षम् ।)

चिरादक्षोर्जाड्यं शमयति समस्तासुरवधू-
कचाकृष्टिक्रीडाप्रसभसुभगश्चारुकभुजः ।
त्रिलोकीङ्गालजोज्ज्वलसहजतेजा मनुकुल-
प्रसूतिः सूत्रामणो विजयसहकृत्वा दशरथः ॥२४॥

सखे वामदेव! इयमनेन पीयूषतुषारसीकरासारवर्षिक-भुजनसंवादकौतुकमेघलेखा पौरस्त्येनेव मरुता लोणी नाथेन सहस्रशिखरीक्रियते (भ) ।

दशरथेन मेदिनी पृथिवी तुरगमेधेषु अश्वमेधेषु शुक्लानाम् अभिमन्त्र विसृष्टानां भ्रमतां सर्वासु दिक्षु विचरतां तुरङ्गाणां खुरचन्द्रकप्रकरः चन्द्रकलाकारखुरसमूहः तेन दन्तुरा उन्नतानता व्याप्तेति यावत् सहजेतराम् अतिशयेन सहजे कृतेत्यर्थः । पृथ्वीवृत्तं, जसौ जसयला वसुयहयतिश्च पृथ्वी गुरुरिति तल्लक्षणात् ॥ २३ ॥

चिरादिति । समस्तानाम् असुराणां या वध्वः अङ्गनाः तासां कचाकृष्ट्या केशाकर्षणेन या क्रीडा तया प्रसभं सततं सुभगश्चारुकौ प्रीतिदौ भुजौ बाहू यस्य तथोक्तः, त्रिलोक्यां जङ्गालं प्रसरदिति भावः उज्ज्वलं सहजं स्वाभाविकं तेजः प्रतापः यस्य तथाभूतः, मनुकुले प्रसूतिः उद्भवः यस्य तथाविधः मनुवंशीय इत्यर्थः सूत्रामणः इन्द्रस्य, सूत्रामा गोत्रभिद् वज्रीत्यमरः । विजये असुराणामिति शेषः सहकृत्वा सहकारी दशरथः चिरात् बहुकालात् परं अक्षोः नेत्रयोः जाड्यं जड़तां गमयति चक्षुषी विकासयतीत्यर्थः आनन्देनेति भावः । शिखरिणीवृत्तम् ॥ २४ ॥

(भ) पीयूषेति पीयूषमस्तमेव तुषारं हिमं तस्य सीकराः कणाः तेषाम् आसारवर्षिणी धाराम्राविणी, भुजनानां संवादे मिथोभाषणे यत् कौतुकम् आनन्दः तस्य मेघलेखा घनश्रेणी पौरस्त्येन पूर्वदिग्-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वामदेवः । भगवन् ! अद्य खलु दिलीपकुलकुशलकर्म-कल्पलतानामङ्कुरग्रन्थिभि(म)रुदीर्य्यन्ते किसलयानि (य)। ःयदत्रभवानपि त्रिभुवनसनातनगुरु(र)रेवमस्मै नरेन्द्राय स्पृहयति (ल)।

(इति परिक्रामतः ।)

दशरथः । (सहर्षं ससंभ्रमासनादुत्थायोपसृत्य च ।) भगवन् कुशिकनन्दन ! ऐक्ष्वाकः पङ्क्तिरथोऽभिवादयते (व)।

विश्वामित्रः । स्वस्ति भवते (श) सपरिवाराय ।

(इति सर्वे यथोचितमुपविशन्ति ।)

दशरथः । (सप्रश्रयम् ।) भगवन्विश्वामित्र ! कच्चित्कान्तारभाजां भवति परिभवः कोऽपि शौवापदो वा प्रत्यूहेन क्रतूनां न खलु मखभुजो भुञ्जते वा हवींषि ।

भवेन भरुता वायुना इव लोकनाथेन नृपतिना दशरथेनेत्यर्थः। सहस्रशिखरीक्रियते सहस्रशृङ्गवती क्रियते। दशरथसाक्षात्कार-करणकौतुकं भूयसा परिवर्धते इति भावः।

(म) दिलीपेति दिलीपस्य कुलं वंशः तस्य कुशलकर्माणि कुशलानि एव कल्पलताः कल्पतरवः तासाम् अङ्कुराः प्ररोहाः तेषां ग्रन्थिभिः पर्वभिः।

(य) किसलयानि नवपल्लवाः। उदीर्य्यन्ते उद्भाव्यन्ते।

(र) यत्रभवान् पूज्यः। त्रिभुवनेति त्रिभुवनस्य सनातनः चिरन्तनः गुरुः आचार्य्यः विश्वामित्र इत्यर्थः।

(ल) स्पृहयति आकाङ्क्षति।

(व) पङ्क्तिरथः दशरथः अभिवादयते प्रणमति।

(श) स्वस्ति शुभं भूयादिति शेषः।

कच्चिदिति। कान्तारभाजाम् अरण्यवासिनां कोऽपि शौवापदः

CC-0, Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

क्रतुं वा कश्चिदन्तर्वसति वसुमतीदक्षिणः सप्ततन्तु-
र्यत्संप्राप्तोऽसि किंवा रघुकुलतपसामीदृशोऽयं विवर्त्तः ॥२५॥

विश्वामित्रः । (विहस्य ।)

जनयति त्वयि वीर ! दिशां पती-
नपि गृहाङ्गनमात्रकुटुम्बिनः ।
रिपुरिति श्रुतिरेव न वास्तवी
प्रतिभयोन्नतिरस्तु कुतस्तु नः ॥२६॥

श्वापदव्रतः परिभवः भवति वा कश्चित् किम् ? मखभुजो यज्ञा-
र्थिनो देवाः, सप्ततन्तुर्मखः क्रतुरित्यमरः । प्रत्यूहेन विघ्नेन क्रतूनां
यज्ञानां हवींषि न खलु नैव भुञ्जते वा ? वसुमती पृथिवी दक्षिणा
यस्य तथाविधः सप्ततन्तुः यज्ञः कर्त्तुम् अन्तः मनसि वसति वा
कश्चित् ? यत् यतः संप्राप्तः समागतः असि । किंवा रघुकुलतपसाम्
ईदृशः अयं विवर्त्तः परिपाकः ? रघुवंशीयानां तपःप्रभावेणैव
भवादृशानां गृहागमनं सम्भवतीति भावः । स्रग्धरावृत्तं, स्रग्धरा यानां
त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति तल्लक्षणात् ॥२५॥

जनयतीति । हे वीर ! त्वयि दिशां पतीनपि दिक्पालानपि
नृपतीनपि वा गृहाङ्गनमात्रे त्वदीयगृहप्राङ्गण एव कुटुम्बिनः
सपरिवारावस्थितानिति यावत् सततयज्ञानुष्ठानात् भयाद्वेति भावः
जनयति कुर्वति सति रिपुः शत्रुः विघ्नकृदिति भावः अस्माकमिति
शेषः इति श्रुतिरेव वास्तवी तात्त्विकी न विघ्नकृतां नामापि न
श्रूयते इति भावः । नः अस्माकं तु प्रतिभयस्य शत्रुभ्यः त्रासस्य
उन्नतिः वृद्धिः कुतः अस्तु भवतु ? न कुतोऽपि भयस्यावकाश इति
भावः । द्रुतविलम्बितं वृत्तं, द्रुतविलम्बितमाह नभौ भरावि-
ति तल्लक्षणात् ॥ २६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपि च ।

दत्तेन्द्राभयविभ्रमाद्भुतभुजासम्भारगम्भीरया
त्वद्वृत्त्या शिथिलीकृतस्त्रिभुवनत्राणाय नारायणः ।
अन्तस्तोषतुषारसौरभमयश्वासानिलापूरण-
प्राणोत्तुङ्गभुजङ्गतल्पमधुना भद्रेण निद्रायते ॥२७॥

दशरथः । (सवैलक्ष्यस्मितम् (य) ।) भगवन्विश्वामित्र ! अभ्यमित्रीणस्य तत्रभवतः सुनासीरस्य नासीरपूरकेण पदातिपरमाणुना (स) मयापि कदाचिदुद्धृतं धनुर्यन्मूलो(ह)ऽयमलीकलोकप्रवादो भवन्तमाप्याययति (च) ।

दत्तेति । दत्तम् इन्द्राय अभयं येन तादृशः विभ्रमः विलासः यस्य तथाभूतः अतएव अद्भुत अलौकिकः यः भुजयोः सम्भारः बाहुबलमित्यर्थः तेन गम्भीरया उद्भटया तव वृत्त्या व्यापारेण आचरणेनेत्यर्थः हेतुना त्रिभुवनस्य त्राणाय परिरक्षणार्थं परिरक्षणे इति यावत् शिथिलीकृतः उपेक्षमाण इति भावः नारायणः अधुना अन्तस्तोषेण आन्तरसन्तोषेण तुषारः शीतलः सौरभमयः शोभनगन्धपूर्णः यः श्वासानिलः तेन आपूरणं परिपोषणं यस्य तथाभूतेन प्राणेन तदाख्यवायुना उत्तुङ्गः समुन्नतः स्फीत इत्यर्थः यः भुजङ्ग एव शेष एव तल्पः शय्या यत्र तत् यथा तथा भद्रेण सुखेन निद्रायते स्वपिति । शार्दूलविक्रीडितं वृत्तम् ॥ २७ ॥

(य) सवैलक्ष्यस्मितं सलज्जमन्दहासम् ।

(स) अभ्यमित्रीणस्य अमित्रान् शत्रून् अभिगतस्य सुनासीरस्य इन्द्रस्य, दृढाश्वाः सुनासीरः पुरुहूतः पुरन्दर इत्यमरः । नासीरपूरकेण सैन्याग्रगामिनेत्यर्थः, नासीरोऽग्रगन्तरीति विश्वः । पदातिपरमाणुना क्षुद्रपदातिनेत्यर्थः ।

(ह) यन्मूलः यन्निबन्धनः ।

(च) आप्याययति प्रीणयति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः । (सोत्साहस्मितम् ।) सखे !

त्रैलोक्याभयलग्नकेन भवता वीरेण विस्मारित-
स्तज्जीमूतमुहूर्तमण्डनधनुःपाण्डित्यमाखण्डलः ।
किञ्चाजस्रमखार्पितेन हविषा सम्फुल्लमांसोल्लस-
त्सर्वाङ्गीणवलीविलुप्तनयनव्यूहः कथं वर्त्तते ॥२८॥

वामदेवः । महाराज भूकश्यप ! यथाह भगवान् कौशिकः (क) । स्वयमनेकधा सुधर्मायामध्यचीकृत(ख)मह-मपि ब्रवीमि ।

त्रैलोक्येति । अखण्डल इन्द्रः त्रयाणां लोकानां समाहारः त्रिलोकी सा एव त्रैलोक्यं तस्य अभये निर्भयतायां लग्नकः प्रतिभूः तेन वीरेण भवता तत् प्रसिद्धं जीमूते मेघे मुहूर्त्तं क्षणिकं मण्डनम् अलङ्करणभूतं यत् धनुः तस्मिन् पाण्डित्यं कौशलं विस्मारितः । निश्चयोजनत्वात्तद्धनुर्पहणस्येति भावः । किञ्च अजस्रम् अनवरतं मखेषु यज्ञेषु अर्पितेन दत्तेन हविषा हवनीयद्रव्येण सम्फुल्लेन प्रवृद्धेन मांसेन उल्लसन्ती उद्भवन्ती या सर्वाङ्गीणा सर्वाङ्गव्यापिनी वली तया विलुप्तः विनष्टः समाच्छन्न इति यावत् नयनव्यूहः सहस्र नयनानीति भावः यस्य तथाभूतः सन् कथम् अतिकष्टेन वर्त्तते । हविर्भुक्त्वात् सततहविर्भोजने लालसाधिक्यात् अजस्रहविर्भोजनेन शरीरस्थौल्यं तेन वलीनां समुद्भवः वलीभिश्च नेत्राणां समाच्छादन-मिति महतैवापरिहार्य्येण क्लेशेन तिष्ठतीति निष्कर्षः । शार्दूल-विक्रीडितं वृत्तम् ॥ २८ ॥

(क) भूकश्यप ! भुवि पृथिव्यां कश्यपमुनेरयतार इत्यर्थः विष्णु-जनकत्वादिति भावः । भगवान् विश्वामित्रः यथा आह ब्रवीति तत्तथेति शेषः ।

(ख) सुधर्मायां सुष्ठु धर्मः यस्यामिति तदाख्यायां देवसभाया-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्वय्यर्धासनभाजि किन्नरगणोद्गीतैर्भवद्विक्रमै-
रन्तःसंभृतमत्सरोऽपि भगवानाकारगुप्तौ कृती ।
उन्मीलद्भवदीयदक्षिणभुजारोमाञ्चविद्योचर-
द्बाष्पैरेव विलोचनैरभिनयत्यानन्दमाखण्डलः ॥२९॥

दशरथः । (सस्मितम् ।) वामदेव! त्वमपि भगवन्तं गाधि-नन्दनमनुप्रविष्टो(ग)ऽसि ।

एतस्मै समराङ्गनप्रणयिने तिष्ठेत कः प्रज्वल-
द्दम्भोलिद्युतिमण्डलोद्भटभुजस्तम्भाय जम्भारये ।

मित्यर्थः । अनेकधा बहुवारम् अध्यक्षीकृतं प्रत्यक्षीकृतं दृष्टमित्यर्थः ।

त्वयीति । त्वयि अर्द्धासनभाजि आसनार्द्धासीने सति किन्नराणां देवयोनिविशेषाणां गणैः उद्गीतैः उच्चैः गान्धारग्रामेण गीतैः भवतः विक्रमैः असुरपराजयव्यापारैरिति यावत् अन्तः मनसि संभृतः संजनितः मत्सरः विद्वेषः येन तथाभूतोऽपि मां परित्यज्य एनं मर्त्यमुपस्तुवन्नीति ईर्ष्याकुलितचित्तोऽपीति यावत् आकारस्य मत्सरचिह्नस्य गुप्तौ संवरणे कृती कुशलः भगवान् परमैश्वर्यवान् आखण्डलः इन्द्रः उन्मीलद्भिः गानश्रवणात् विकसद्भिः भवदीयदक्षिणभुजाया तव दक्षिणबाहोः इन्द्रस्य वामभागावस्थितत्वादिति भावः रोमाञ्चैः विद्वानि अतएव उच्चरन् उद्गच्छन् बाष्पः जलं येभ्यः तथाभूतैः विलोचनैः नेत्रैः आनन्दं सङ्गीतश्रवणजमिति भावः अभिनयति प्रकाशयति । शार्दूलविक्रीडितं वृत्तम् ॥ २९ ॥

(ग) अनुप्रविष्टः अनुसारीत्यर्थः ।

एतस्मा इति । प्रज्वलता दम्भोलिः वज्रं तस्य द्युतिमण्डलेन प्रभानिचयेन उद्भटौ दारुणौ भुजावेव स्तम्भौ यस्य तथाभूताय समराङ्गनप्रणयिने संग्रामक्षेत्रवर्त्तिने इत्यर्थः एतस्मै जम्भारये जम्भ-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निर्यद्भिर्बहिरेष रोषदहनज्योतिःस्फुलिङ्गैरिव
स्वैरज्यद्भिरपीक्षणैः समतनोदाग्नेयमस्त्रं द्विषाम् ॥३०॥

विश्वामित्रः । (सगौरवं दशरथबाहुमाहत्य ।) राजर्षे वशिष्ठ-शिष्य !

संवृत्तोऽयं यदि तव भुजच्छायया सम्प्रतीन्द्रो
निर्विघ्नश्रीरियमभिनवा कीदृशी ते प्रशस्तिः ।
इक्ष्वाकूणां लिखितपठिता खर्वधूगण्डपीठ-
क्रीडापत्रप्रकरमकरीपाशुपाल्यं हि वृत्तिः ॥३१॥

शत्रवे इन्द्राय कः तिष्ठेत ? कः आत्मानं प्रकाशयेत् एतत्समीपे कश्चिदेवेत्यर्थः न कोऽपीत्यर्थः । एषः इन्द्रः वह्निः निर्यद्भिः निर्गच्छद्भिः रोषः क्रोध एव दहनः अग्निः तस्य ज्योतिषां स्फुलिङ्गै-रिव कणैरिव, त्विषु स्फुलिङ्गोऽग्निकण इत्यमरः । रज्यद्भिः रक्ततां गच्छद्भिः स्वैः निजैः ईक्षणैः नेत्रैरपि द्विषां शत्रूणां प्रतीति शेषः आग्नेयम् अस्त्रम् समतनोत् विस्तारितवान् ववर्षेत्यर्थः । शार्दूल-विक्रीडितं वृत्तम् ॥ ३० ॥

संवृत्त इति । यदि अयम् इन्द्रः तव भुजच्छायया बाहुबलाश्रयेण सम्प्रति निर्विघ्नश्रीः संवृत्तः सञ्जातः तदा इयं ते अभिनवा नूतना प्रशस्तिः प्रशंसा सुख्यातिरित्यर्थः कीदृशी ? नेयं तव अभिनवा प्रशस्तिरपि तु कुलक्रमागतैवेत्याह इक्ष्वाकूणामिति । खर्वधूनां सुर-सुन्दरीणां गण्डपीठेषु कपोलभागेषु यः क्रीडापत्रप्रकरः विलासार्थं विरचितपत्रावलीसमूहः तत्र या मकरी मकराख्यजलजन्तुस्त्री चित्रि-तेति भावः तस्याः पाशुपाल्यं रक्षेति यावत् वृत्तिः व्यापारः इक्ष्वाकूणां लिखितपठिता लिखिता पठिता च प्रसिद्धैवेति यावत् । मन्दा-क्रान्तावृत्तं, मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तो गयुग्मिति तल्ल-क्षणात् ॥ ३१ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशरथः । भगवन् सर्वाङ्गुतनिधे ! (घ) भगवन्तमनुगन्तु-मुक्तिप्रत्युक्तिकया के वयम् (ङ) । एवं किल त्रिशङ्कुसंकीर्त्त-नोपाख्यानपारदृश्वानः (च) पौराणिकाः कथयन्ति ।

त्रासोत्कम्पत्रिदशपरिषन्मौलिमाणिक्यमाला-
बालादित्यप्रकरकिरणस्मेरपादारविन्दे ।
प्राचीमेतां भुवनरचनामन्यथा निर्मिमाणे
कार्पण्योक्तीस्त्वयि रचितवानन्तरायं महेन्द्रः ॥२२॥

(विहस्य ।)

(घ) सर्वाङ्गुतनिधे ! सर्वाश्चर्याश्रय ।

(ङ) अनुगन्तुम् अनुसर्त्तुम् । उक्तिप्रत्युक्तिकया वचनप्रतिवचनेनेत्यर्थः । वयं के ? न केऽपीत्यर्थः न समर्था वयमिति भावः ।

(च) त्रिशङ्कुरिति त्रिशङ्कोः संकीर्त्तनं यत् उपाख्यानं तस्य पारदृश्वानः पारगामिनः तदभिज्ञा इति यावत् ।

त्रासेति । त्रासेन भयेन उत्कम्पः उच्चैः कम्पः यस्याः तथाभूता या त्रिदशपरिषत् देवसन्दं तस्य मौलिषु किरीटेषु या माणिक्यमाला माणिक्याख्यरत्नविशेषस्रज एव बालादित्यप्रकरकिरणाः नवोदितसूर्यसमूहप्रभाः तैः स्मेरं पादारविन्दं चरणकमलं यस्य तथाभूते एतां प्राचीं पूर्वतनीं भुवनरचनां जगत्सृष्टिम् अन्यथा अन्येन प्रकारेण निर्मिमाणे कुर्वाणे त्वयि महेन्द्रः कार्पण्योक्तीः दीनवचनप्रयोगान् अन्तरायं विघ्नं सृष्टेरिति शेषः रचितवान् कृतवान् । पुरा द्वितीयां सृष्टिं कर्त्तुमुद्यतं विश्वामित्रं भयोद्विग्ना देवाः समुपेत्य पादपतनेन दैन्यवचसा च शमयामासुरिति पुराणवार्त्ता । मन्दाक्रान्ताछन्दः ॥ २२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जवादाराद्धुं त्वामुपनमति वर्गे दिविषदा-
मपव्यस्तो मन्दैरजनि रथहंसैः कमलभूः।
नियच्छामो जिह्वां न तव चरितेभ्यः किमुत ते
सुधासध्रीचीनामतिपतति वाचामवसरः ॥३३॥

(अञ्जलिं बद्ध्वा।) भगवन्! प्रसीद तावत्। उत्तरोत्तरेषां महोत्सवानां (छ) कदाचिदपि न तृप्यन्ति पुंसां हृदयानि, यदियं त्वदुपस्थानसुलभसम्भावनातिप्रसङ्गसङ्गीतनर्त्तकी(ज) मे चित्तवृत्तिर्नियोगानुग्रहाय स्पृहयति। अपि च।

एताभिस्तव कौतुकोक्तिभिरपि त्रैविद्यमूर्त्तेरिव
त्वष्टस्यामरशिल्पिना दिनकृतोऽवच्छेदवेदाक्षरैः।

जवादिति। दिविषदां देवानां वर्गे गणे त्वाम् आराद्धुं सन्तोषयितुं जवात् उपनमति उपगच्छति सति कमलभूः ब्रह्मा मन्दैः मन्थरगामिभिः रथहंसैः रथयोजितहंसैः अपव्यस्तः अत्युत्कण्ठित इत्यर्थः अजनि संवृत्तः त्वराधिक्यादिति भावः। वयं तव चरितेभ्यः जिह्वां न नियच्छामः न निवारयामः किमुत किं वक्तव्यं नैव तव चरितवर्णने निवर्त्तामहे इत्यर्थः किन्तु सुधासध्रीचीनां सुधासङ्चरीणां ते तव वाचाम् अवसरः समयः अतिपतति अस्माकं वचनानि अतिक्रम्य प्रसरति किमागमनं श्रोतुमिच्छामीति भावः। शिखरिणीवृत्तम् ॥ ३३ ॥

(छ) उत्तरोत्तरेषाम् उत्तरोत्तरवर्त्तिनां महोत्सवानामिति करणे षष्ठी।

(ज) त्वदिति तव उपस्थानेन उपस्थित्या सुलभः स्वयमुपनत इत्यर्थः यः सम्भावनातिप्रसङ्गः समादरातिशयः तस्य सङ्गीते सङ्कीर्त्तने नर्त्तकी नटी।

एताभिरिति। यद्यपि वयम् एताभिः पूर्वोक्ताभिः कौतुको-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पूताः स्मो वयमद्य यद्यपि तदप्याज्ञामपि स्यामहो
वोढुं विष्टिरनर्घता रघुकुले कल्पान्तमुन्मीलतु ॥३४॥

विश्वामित्रः । (विहस्य ।) ऐन्दुमतेय ! (भ) किमन्यन्नियोज्यम् (ञ) ।

निर्मुक्तशेषधवलैरचलेन्द्रमन्थ-
संक्षुब्धदुग्धमयसागरगर्भगौरैः ।
राजन्निदं बहुलपक्षदलन्मृगाङ्क-
च्छेदोज्ज्वलैस्तव यशोभिरशोभि विश्वम् ॥३५॥

क्लिभिः परिहासवचनैः अमरशिल्पिना विश्वकर्मणा त्वदस्य यन्त्रे समारोप्य उद्घपितस्य त्रयाणां वेदानां समाहारः त्रिवेदी सा एव त्रैविद्यं तत् मूर्त्तिर्यस्य तथाभूतस्य त्रयीमयशरीरस्येत्यर्थः दिनकरः सूर्य्यस्य अवच्छेदा एव खण्डभूतान्येव यानि वेदाक्षराणि तैरिव पूताः स्मः पवित्रीकृता भवामः पुरा सौरं तेजोऽसहमानया सूर्य्यपत्न्या संज्ञया पिता विश्वकर्माभिहितः सूर्य्यं यन्त्रोल्लिखितं कृत्वा किञ्चित् हीनतेजसमकरोदिति पुराणम् । तदपि तथापि आज्ञां भवतः आदेशं वोढुं सम्पादयितुं विष्टिः कर्मकरः स्याम् भावेयम्, विष्टिः कर्मकरे त्रिष्विति मेदिनी । अहो अनर्घता अमूल्यता असाधारण्यमित्यर्थः अर्थिकामपूरणे इति भावः कल्पान्तम् आप्रलयं रघुकुले उन्मीलतु प्रसरतु । शार्दूलविक्रीडितं वृत्तम् ॥ ३४ ॥

(भ) ऐन्दुमतेय ! इन्दुमतीतनय ।

(ञ) नियोज्यम् आदेष्टव्यं वक्तव्यमिति यावत् ।

निर्मुक्तेति । हे राजन् ! निर्मुक्तः निर्मोकरहितः, निर्मुक्तो मुक्तकञ्चुक इत्यमरः । यः शेषः अनन्तनागः तद्वत् धवलानि तैः अचलेन्द्रः मन्दरगिरिः तेन मन्थः विलोड़नं तेन संक्षुब्धः सम्मर्दितः यः दुग्धमयसागरः क्षीरोदः तस्य गर्भवत् गौराणि तैः बहुलपक्षे कृष्णपक्षे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पुनरिदानीमपि

यशःस्तोमानुच्चैरुपचिनु चकोरप्रणयिनी-
रसज्ञापाण्डित्यच्छिदुरगणिधामभ्रममरान् ।
अपि त्वत्तेजोभिस्तमसि शमिते रक्षतु दिशा-
मसौ यात्रामैत्रीं नभसि नितरामम्बरमणिः ॥३६॥

किन्तु कतिपयरात्रमायुधसध्रीचा (ट) रामभद्रेण सन्निहि-

दलन् उन्मीलन् यः मृगाङ्कच्छेदः चन्द्रखण्डं तद्वत् उज्ज्वलानि तैः । वहुलपक्षणं शुक्लपक्षापेक्षया चन्द्रस्य स्मृहणीयत्वद्योतनायेति बोध्यम् । तव यशोभिः विश्वं जगत् अशोभि अलङ्कृतम् । वसन्ततिलकं वृत्तम् ॥ ३५ ॥

यश इति । चकोरप्रणयिनीनां चकोरीणां या रसज्ञा जिह्वा, रसज्ञा रसना जिह्वेत्यमरः । तस्याः पाण्डित्यं चन्द्रिकापानचातुर्यमिति यावत् । उक्तञ्च, चकोर्य्य एव चतुराश्चन्द्रिकापानकर्मणीति । तस्य छिदुरः भेदकः मृगिधामभ्रममरः चन्द्रकिरणभ्रान्त्यतिशयः येषु तान् भ्रान्तिभानलङ्कारः । तदुक्तं दर्पणे । सान्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितेति । उच्चैः महतः यशःस्तोमान् यशोराशीन् उपचिनु वर्द्धय । तथा तव तेजोभिः प्रतापैः किरणैश्च तमसि अन्धकारे दुःखे च शमिते शान्तिं गमितेऽपि असौ अम्बरमणिः सूर्य्यः नभसि आकाशे दिशां यात्रामैत्रीं गमनेन मित्रतां नितरां केवलं रक्षतु । तवैव तेजसा तत्कार्य्ये साधिते तस्य उदयस्य निरर्थकत्वेऽपि केवलमिदानीं दिक्षु भ्रमणं पूर्वमैत्रीरक्षणार्थमिति तात्पर्य्यम् । शिखरिणीवृत्तम् ॥ ३६ ॥

(ट) आयुधसध्रीचा आयुधसहचरेण अस्त्रधारिणेत्यर्थः ।

(ठ) सन्निहितेति सन्निहितम् उपस्थितं वैतानव्रतं यज्ञकर्म येषां तथोक्तानाम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तवैतानव्रताना(ठ)मस्माकमाश्रमपदं सनाथीकरिष्यते (ड) ।

अपि च ।

मध्येकृत्य घनं धिनोति जलधिः खैरम्बुभिर्मेदिनीं
हन्ति खैः किरणैस्तमिस्रमरुणं कृत्वान्तराले रविः ।
त्वं रामान्तरितय पालय निजैरेव प्रतापैः प्रजा-
मीदृक्कोऽपि परोपकारसुहृदामेष स्वभावो हि वः ॥३७॥

किञ्च ।

दृष्टः साक्षादसुरविजयी नाकिनां चक्रवर्त्ती
माल्यो न्यायः कथयति यथा वारुणी दण्डनीतिः ।

(ड) सनाथीकरिष्यते सरक्षकं करिष्यति रक्षिष्यते इत्यर्थः ।

मध्येकृत्येति । जलधिः समुद्रः घनं मेघं मध्येकृत्य द्वारीकृत्येति यावत् खैः अम्बुभिः जलैः मेदिनीं पृथ्वीं धिनोति तर्पयति । रविः सूर्यः अरुणं खसारथिम् अन्तराले मध्ये कृत्वा खैः किरणैः तमिस्रं तिमिरं हन्ति नाशयति । त्वञ्च रामेण अन्तरितः रामान्तरितः रामं मध्ये कुर्वन्नित्यर्थः निजैरेव प्रतापैः प्रजां पालय । परोपकारे सुष्ठु हृद् येषां तथाभूतानां वः युष्माकम् ईदृक् एवंविधः कोऽपि अनिर्वचनीयः एषः स्वभावः हि प्रकृतिरेव । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । तदुक्तं दर्पणे । सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते । साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा मत इति । शार्दूलविक्रीडितं वृत्तम् ॥ ३७ ॥

दृष्ट इति । नाकिनां देवानां चक्रवर्त्ती इन्द्रः असुरविजयी असुराणामेव जेता न तु अधर्मस्येति भावः, त्वन्तु असुरविजयी अधर्मविजयी चेति । असुरविजयीत्यनेन तस्य भ्रातृभ्रातृपुत्रादिहन्तृत्वं तेन च तस्य दुष्कृतिनो राज्यं पापवल्लभमिति व्यज्यते तव तु न तथेति । यद्वा असुरविजयित्वात् सर्वदैव संग्रामस्थितस्य तस्य प्रजापा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पातालेन्द्रादहिभयमथास्त्येव नित्यानुषक्तं
तन्नः पुण्यैरजनि भवता वीर ! राजन्वती भूः ॥३८॥

दशरथः । (सविषादमात्मगतम्) । कथमिदमस्माकं सकललोकशोकशङ्कूद्धरणशीलशीतलेभ्यः कौशिकप्रसादेभ्यो रामभद्रप्रवासवैमनस्यमुत्पत्स्यते (ढ) । दृष्टं ब्रानिःशेषानन्दनिः-

---

लने नैव दृष्टिरिति व्यज्यते तव तु न तथेति । किञ्च असुराणां विजयः असुरकर्तृकविजय इत्यर्थः सः अस्यास्तीति तथोक्तः असुरैर्विजित इत्यर्थः देवीमाहात्म्यादिषु महिषासुरादिभिर्बहुशस्तथा दर्शनात् । अतस्तस्य प्रजारक्षणाक्षमत्वात् तद्राज्ये स्थितिर्न युक्ता । त्वं न कदापि विजित इति च व्यज्यते । वारुणो वरुणसम्बन्धिनी दण्डनीतिः दुष्टानां निग्रहाय विरचितं नीतिशास्त्रं यथा यादशीत्यर्थः मात्स्यः मत्स्यसम्बन्धी न्यायः व्यवहारः तथा कथयति प्रकाशयति । वरुणो हि जलाधिपतिः तत्प्रजाश्च मत्स्यादयो जलचराः तेषां व्यवहारः सजातीयदुर्बलभक्षकत्वं, तथाच वरुणस्य दण्डनीतेः साधूनामल्पधनानां महाधनैर्बलवद्भिर्निग्रह इति फलं न तु तत्त्वतो दुष्टनिग्रहणमिति तद्राज्ये स्थितिर्न युक्तेति व्यज्यते । अथ किञ्च पातालेन्द्रात् वासुकेः अहिभयं सर्पभयं नित्यानुषक्तं सततसम्बद्धम् अस्त्येव । सर्पभयमित्यस्य सर्पेभ्यः भयं सर्पाणां भयमिति चार्थः । तथाच पाताले राजा वासुकिः तत्प्रजाश्च सर्पाः तैः सह वासो मृत्युरेव । तदुक्तं, ससर्पे च गृहे वासो मृत्युरेव न संशय इति । सर्पाणाञ्च राज्ञः वासुकेर्भयं कदाचान् गरुडाय प्रदास्यतीति तत्र युक्तास्तत्र वास इति व्यज्यते । हे वीर ! तत् तस्मात् अस्माकं पुण्यैः सुकृतैः भवता भूः पृथिवी राजन्वती शोभनराजशालिनी अजनि जाता । तव राज्ये न कश्चिदपि प्रजानां क्लेश इति भावः । मन्दाक्रान्ताछन्दः ॥ ३८ ॥

(ढ) सकलेति सकलानां लोकानां शोकः शङ्कुः हृदयनिहितं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्यन्दिनीनामपीन्दुकरकन्दलीनां कमलवनीमीलनं कलङ्क-स्थानम् (ण) । (विमर्श) । का गतिः (त) ।

कूर्मराजभुजगाधिपगोत्र-
ग्रावदिक्करिभिरेकधुरीणः ।
मां प्रसूय कथमस्तु विगीतो
हा परार्थविमुखो रघुवंशः ॥३९॥

शल्यमिति भावः तस्य उद्धरणं शीलं स्वभावो येषां तथाभूताः शीतलाः सौम्याश्च तेभ्यः । कौशिकप्रसादेभ्यः विश्वामित्रानुग्रहेभ्यः । राम-भद्रेति रामभद्रस्य प्रवासेन वैमनस्यं विमनस्कत्वं विषाद इत्यर्थः समेति शेषः । उत्पत्स्यते उद्भविष्यति ।

(ण) वा अथवा । निःशेषेति निःशेषः सातिशय इत्यर्थः य आनन्दः तस्य निःस्यन्दिनीनां वर्षिणीनाम् । इन्दुकरकन्दलीनां चन्द्रकिरण-निचयानाम् । कमलवनीनिमीलनं पद्मवनसङ्कोचनं कलङ्कस्थानं कलङ्क-करमित्यर्थः । सर्वदुःखहरस्याख मदीयदुःखजननं जगदानन्दिनश्चन्द्रस्य पद्मनिमीलनमिवेति तात्पर्यम् ।

(त) गतिः उपायः ।

कूर्मेति । कूर्मराजः कमठपतिः शेषस्य धारक इति भावः भुजगा-धिपः अनन्तनागः गोत्रपाषाणः कुलपर्वताः दिक्करिणः दिग्गजाः तैः एकधुरीणः समानधुरन्धरः रघुवंशः मां प्रसूय कथं परार्थविमुखः परकार्यसाधने पराङ्मुखः सन् विगीतः निन्दितः अस्तु भवतु हा इति खेदे । कूर्मराजादयः सदैव तत्तदयत्नकार्यकारित्वेन यथा परार्थसाधनपराः रघुवंशोऽपि तथा किन्तु यदि रामप्रदानेऽहं पराङ्मुखो भवामि तदा रघुवंशे मयैव कलङ्कः पातितः स्यादिति भावः ॥ ३९ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः । (सस्मितम्) । राजर्षे ! ममकारो हि राजपुत्रेषु राज्ञामुपलालनक्लेशाय केवलम् । उपयोगस्तु प्रजानाम् (ग) । यथैतत् ।

कष्टा वेधव्यथा कष्टो नित्यमुद्वहनक्लमः ।

श्रवणानामलङ्कारः कपोलस्य तु कुण्डलम् ॥४०॥

दशरथः । भगवन् ! परमनुगृहीता वयमेवं तत्रभवता सम्भाव्यमानाः (ङ) । किं पुनरक्षतास्त्रः चीरकण्ठो (घ) वत्सोऽयमिति मुग्धो(न)ऽस्मि ।

विश्वामित्रः । (विहस्य) । सखे ! तत्रभवन्तं मैत्रावरुणिं ऋषिं पुरोधाय चरितब्रह्मचर्य्यव्रतस्य (प) धनुर्वेदसंस्कारा-

---

(ग) ममकारः ममत्वबुद्धिरित्यर्थः, ममेत्यव्ययम् । उपलालनेति उपलालनं सन्तर्पणेन शरीरपोषणं तेन क्लेशः तस्मै । उपयोगः उपकारः । राज्ञां ममत्वबुद्ध्या निजपुत्रोपलालनं केवलं क्लेशकरं न तु किञ्चिदपि स्वोपकारकं परन्तु भाविप्रजापालनार्थमिति भावः ।

दृष्टान्तेनैतत् समर्थयति कष्टेति । श्रवणानां श्रोत्राणां वेधव्यथा वेधजनिता पीडा कष्टा तथा नित्यं सततम् उद्वहने क्लमः क्लान्तिः परिश्रम इत्यर्थः कष्टः । तु किन्तु कुण्डलं कपोलस्य गण्डदेशस्य अलङ्कारः शोभाजनकमित्यर्थः ॥४०॥

(ङ) सम्भाव्यमानाः आदरेणाभ्यर्थ्यमाना इत्यर्थः ।

(घ) अक्षतास्त्रः अभिन्नधनुर्वेद इत्यर्थः । चीरकण्ठः दुग्धपोष्य इति यावत् ।

(न) मुग्धः किंकर्त्तव्यतायां विमूढः ।

(प) पुरोधाय पुरोहितं कृत्वा चरितेति चरितम् अनुष्ठितं ब्रह्मचर्य्यव्रतं येन तस्य भूतस्य वशिष्ठेनोपनीतस्येति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्तावदस्य कृशाश्वप्रसादादस्त्रायतन्ते (फ) ।

दशरथः । (सविनयोपरोधम्) । भगवन् ! उच्छ्वसित(ब)मपि रघुराजबीजिनां त्वदायत्तमेव, किमुत कार्मुकविद्यासंप्रदायः । यद्वा सहस्रकिरणकुलैकपक्षपातेनैव (भ) सहस्रं वत्सरान् भगवन्तं कृशाश्वमुपासीनो दिव्यास्त्रमन्त्रोपनिषदमध्यगीष्ठाः (म)

विश्वामित्रः । अलं च ते रामभद्रेऽपि बालोऽयमित्यलीकसंभावनया (य) । दिवसधिव्योस्तिमिरतिरस्करिणीं तरणिरणुतरोऽपि तेजसा तिरस्करोति (र) ।

(फ) कृशाश्वस्य मम गुरोरिति भावः प्रसादात् अनुग्रहात् । आयतन्ते आयत्ताः । धनुर्वेदसंस्कारो मयैवास्य सम्पादनीय इति भावः ।

(ब) उच्छ्वसितं जीवनम् । रघुराजेति रघुराजः बीजी आदिपुरुषः प्रधानपुरुषो वा येषां तथोक्तानां रघुवंशीयानामित्यर्थः ।

(भ) यद्वा मन्ये । सहस्रेति सहस्रकिरणस्य सूर्यस्य कुलं वंशः तस्मिन् एकः अद्वितीयः पक्षपातः स्नेहः तेन ।

(म) दिव्यास्त्रेति दिव्यानि अस्त्राणि तेषां मन्त्रोपनिषदं मन्त्ररहस्यम् । अध्यगीष्ठाः अधीतवानसीत्यर्थः ।

(य) बालोऽयं शिशुरयम् । अलीकसम्भावनया वृथामननेन ।

(र) तरणिः सूर्यः, द्युमणिस्तरणिर्मित्र इत्यमरः । अणुतरोऽपि कतिपुद्रोऽपि तेजसा किरणेन प्रतापेन च दिवसधिव्योः द्यावाभूम्योः तिमिरमेव तिरस्करिणीं जवनिकां तां तिरस्करोति अपनयति निरस्यतीत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इयरवः । (स्वगतम्) । भगवन् कुशिकवंशकेतो ! कस्य तन्त्रिनी (ल) तादृशी जिह्वा यस्त्वामपि ब्रुवाणमधरोत्तरेणा-भिसंधत्ते (व) । (अपवार्य्य) । (श) वामदेव ! एवमत्रभवान् कौशिको ब्रवीति ।

वामदेवः । राजर्षे ! किमत्र प्रष्टव्या वयम् ।

कौशिकोऽर्थी भवान् दाता रक्षणीयो महाक्रतुः ।
रक्षिता रामभद्रश्चेदनुमन्यामहे वयम् ॥४१॥

अपि च ।

जगतीभारखिन्नानां विश्रामो भवतामयम् ।
यद्यथाकामसंपत्तिप्रीतार्थिमुखदर्शनम् ॥४२॥

किं च विशेषेण ।

पूरयितुमर्थिकामान् मैत्रावरुणेन गोत्रगुरुणा ते ।
संदिशता संदिष्टः समाधिदृष्टोऽयमेवार्थः ॥४३॥

(ल) तन्त्रिनी स्वच्छा परिष्कृतेति यावत्, तन्त्रिनं विरले स्तोके स्वच्छेऽपि वाच्यलिङ्गमिति विश्वः ।

(व) अधरोत्तरेण अधरः वादः उत्तरः प्रतिवादः तेन वादप्रति-वादेनेत्यर्थः । अभिसन्धत्ते बाधते पराजयते इति यावत् ।

(श) अपवार्य्य, रहस्यन्तु यदन्यस्य पराङ्मुखं प्रकाश्यते । नाट्य-धर्मसमायोगात् स्वगतं तदपवारितमिति स्वयोक्तमपवारितं स्वगत-मित्यर्थः ।

कौशिक इति । कौशिकः विश्वामित्रः अर्थी याचकः । भवान् दाता, महाक्रतुः महायज्ञः रक्षणीयः, रामभद्रः रक्षिता चेत् वयम् अनुमन्यामहे अनुमोदामहे । अनुष्टुब्वृत्तम् ॥ ४१ ॥

पूरयितुमिति । अर्थिनां याचकानां कामान् पूरयितुं सफल-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशरथः । वामदेव ! एवमेतत् ।

ध्यानमयदृष्टिपातप्रमुषितकालाध्वविप्रकर्षेषु ।
विषयेषु नैष्ठिकानां सर्वपथीना मतिः क्रमते ॥४४॥

(विमृश्य) ।

क्रियाणां रक्षायै दशरथमुपस्थाय विमुखे
मुनौ विश्वामित्रे भगवति गते संप्रति गृहान् ।
तपोलेशक्लेशादुपशमितविघ्नप्रतिभये
प्रवृत्ते यष्टुं वा रघुकुलकथैवास्तमयते ॥४५॥

वितम् सन्दिशता वाचिकं प्रेषयता ते तव शीलवृद्धा कुलाचार्येण मेलावरुणेन वशिष्ठेन अयमेवार्थः विश्वामित्राय रामप्रदानरूप-विषय इत्यर्थः समाधिदृष्टः योगबलेन प्रत्यक्षीकृतः अतएव सन्दिष्टः सन्मुखेन वाचिकतया प्रेषित इत्यर्थः । आर्याछन्दः ॥४३॥

ध्यानेति । नैष्ठिकानां निष्ठायाभिनां सिद्धिमतामित्यर्थः सर्व-पथीना सर्वमार्गसञ्चारिणी मतिः बुद्धिः ध्यानमयेन दृष्टिपातेन ज्ञान-योगेनेत्यर्थः प्रकर्षेण मुषितः अपहृतः निराकृत इत्यर्थः कालस्य अतीतानागतरूपस्य अध्वनः मार्गस्य च विप्रकर्षः दूरत्वं येषां तथा-भूतेषु विषयेषु वस्तुषु क्रमते दृष्टिं याति । आर्याछन्दः ॥४४॥

क्रियाणामिति । क्रियाणां यज्ञानामिति यावत् रक्षायै रक्षणाय दशरथम् उपस्थाय उपाय भगवति मुनौ विश्वामित्रे विमुखे पराङ्मुखे अलब्धकामे इति भावः गृहान् आश्रमान् गते तथा तपोलेशस्य स्वल्पतपसः क्लेशात् व्ययात् उपशमितं निरस्तं विघ्नेभ्यः प्रतिभयं त्रासः येन तथाभूते यष्टुं यज्ञं सम्पादयितुं प्रवृत्ते वा रघुकुलस्य कथैव अर्थिनां कामनापूरकत्ववार्त्तैव अस्तम् अवते गच्छति । शिखरिणीछन्दः ॥४५॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(मुनिं प्रति) । जगद्गुरो गाधिनन्दन !

त्वं चेद्दीक्षियमाणो मे रामभद्रं प्रतीक्षसे ।

तन्नः पतिव्रतावृत्तमियं चरतु मेदिनी ॥४६॥

(नेपथ्याभिमुखः) । कः कोऽत्र भोः !

(प्रविश्य) ।

दौवारिकः । किमाज्ञापयति देवः ।

दशरथः । आह्वयतां रामभद्रः ।

वामदेवः । लक्ष्मणश्च ।

दशरथः । (स्मितम्) । ऋषे ! पृथक्प्रयत्नापेक्षी नायमर्थः (ष) । न खलु प्रकाशमन्तरेण (स) तुहिनभानुरुज्जिहीते ।

त्वमिति । त्वं दीक्षियमाणः दीक्षां प्रवेक्ष्यन् चेत् यदि रामभद्रं प्रतीक्षसे प्रत्यपेक्षकं करोषि, तत् तदा नः अस्माकम् इयं मेदिनी पृथिवी पतिव्रतावृत्तम् एकपतिकाया नियमं प्रवासे मलिना क्षयेत्यादिरूपमिति यावत् चरतु अनुतिष्ठतु । राम एवास्याः पतिः तस्य त्वया सहगमने प्रवासित्वात् अस्याः प्रोषितभर्तृकतया तदुचितमालिन्यादिकं भवति, तथा च इयं भूमिः रामविरहेण नितरां व्यथिष्यते तत् सत्वरं रामः प्रत्यर्पणीय इति भावः । अनुष्टुब्वृत्तम् ॥ ४६ ॥

(ष) पृथगिति अयम् अर्थः लक्ष्मणाह्वानरूप इत्यर्थः । पृथक् द्वितीयमित्यर्थः प्रयत्नं प्रयासं न अपेक्षते इति तथोक्तः । रामाह्वानेनैव लक्ष्मणस्यापि आह्वानस्य सिद्धेरिति भावः ।

(स) प्रकाशं प्रकाशते इति प्रकाशः किरणः तं यद्वा प्रकाशयतीति प्रकाशः अरुणः तम् अन्तरेण विनेत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(दौवारिको निष्क्रान्तः) ।

ततः प्रविशतो रामलक्ष्मणौ ।

रामः । (सहर्षम्) ।

सुराधीशक्रोधाज्जगदपरथा कर्तुमपरे
पुराणब्रह्माणो भुवनपितरः सप्त च कृताः ।
धृतास्तुष्टेनामी बहिरपि च वैश्वानरपथात्
कथा पौराणी यच्चरितमिति ह स्म प्रथयति ॥४७॥

कथं सोऽपि भगवान् विश्वामित्रः स्वयमस्माभिरुपचरिष्यते (ह) । (इति परिक्रमन् पुरोऽवलोक्य हर्षातिशयं रूपयन्) । नूनं विनयनम्रयोस्तातवामदेवयोस्तृतीयः प्रशान्तपावनीयाकृतिः (च) स भगवान् विश्वामित्रो भविष्यति ।

सुराधीशेति । सुराणाम् अधीशः इन्द्रः तस्मिन् क्रोधः तिरश्चोः स्वशिष्यस्य स्वर्गाद् भ्रंशनजनित इति भावः तस्मात् हेतोः जगत् अपरथा अन्यविधं कर्तुम् अपरे सप्त भुवनपितरः जगत्स्रष्टारः पुराणब्रह्माणः कृताश्च सृष्टास्च तथा तुष्टेन इन्द्रादीनां प्रणिपातात् परितुष्टेन अक्रोधेनेति भावः सता अमी सप्त भुवनपितरः वैश्वानरपथात् अग्निपथात् आकाशीयप्रदेशविशेषात् यत्र ब्रह्मपुत्राः सप्तर्षयः सन्तीति भावः बहिः अन्यस्मिन् प्रदेशे इत्यर्थः धृताः स्थापिताः । इति पौराणी पुरातनी कथा यस्य चरितं प्रथयति स्म विस्तारयति स्म । हेति पादपूरणार्थमव्ययम् । शिखरिणीवृत्तम् ॥ ४७ ॥

(ह) उपचरिष्यते सेविष्यते ।

(च) प्रशान्तेति प्रशान्ता सौम्या पावनीया पवित्रताजननी आकृतिर्यस्य तथोक्तः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (साश्चर्यं स्मितम्) । आर्य !

अयमयमीदृशप्रशमविश्वसनीयतनु-
र्भुवनभयङ्करीः कथमधत्त रुषोऽपि मुनिः ।
स्थितमिदमेव वा मृदुमनोज्ञतुषारतमा-
स्तमसि सति ज्वलन्ति सहसैव महौषधयः ॥४८॥

रामः । वत्स लक्ष्मण ! एवं दुरवगाहगम्भीराश्चित्रीयन्ते (क) महान्तः । अपि च ।

व्रतविहतिकरीभिरप्सरोभिः
सह जगदस्य निगृह्णतो गृणन्ति ।
नमदमरशिरःकिरीटरोचि-
र्मुकुलितरोषतमांसि चेष्टितानि ॥४९॥

अयमिति । अयमयमिति संभ्रमे द्विरुक्तिः । अयं मुनिः विश्वामित्रः ईदृशेन प्रशमेन प्रकृष्टया शान्त्या विश्वसनीया अवञ्चनीया तनुः शरीरं यस्य तथाभूतः अपि भुवनानां भयङ्करीः रुषः क्रोधान् कथम् अधत्त धृतवान् येन स्थितस्य जगतो विध्वंसनं द्वितीयस्य जगतः सृष्टिश्च प्रारब्धेति भावः । वा अथवा इदमेव स्थितं स्थितिः मर्यादेत्यर्थः यत् मृदवः कोमलाः मनोज्ञा मनोहारिण्यः तुषारतया अतिशैत्या इत्यर्थः महौषधयः तमसि अन्धकारे तदाख्ये गुणे च सति सहसैव ज्वलन्ति दीप्यन्ते । कोकिलकं वृत्तं, हयऋतुसागरैर्यतियुतं यदि कोकिलकमिति तल्लक्षणात् ॥ ४८ ॥

(क) दुरवगाहेति दुरवगाहाः दुर्ज्ञेयाः गम्भीराः गभीरमतयश्च । चित्रीयन्ते चमत्कुर्वन्ति ।

व्रतेति । व्रतस्य तपसः विहतिं विघ्नं कुर्वन्तीति तथोक्ताभिः अप्सरोभिः सह जगत् भुवनं निगृह्णतः भक्षीकर्तुमुद्यच्छत इत्यर्थः;

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वामदेवः । (सहर्षं दृष्ट्वा) । कथमागतो रामभद्रः । (मुनिं प्रति) । भगवन् !

ब्रह्मज्योतिर्विवर्त्तस्य चतुर्धा देहयोगिनः ।
ऋष्यशृङ्गचरोदंशः प्रथमोऽयं महाभुजः ॥५०॥

विश्वामित्रः । (सहर्षसंभ्रमवलोक्य) । वामदेव ! किमुच्यत आरण्यकेषु (ख) किमपि प्रकृष्टतमं ब्राह्मण्यमृष्यशृङ्गस्य । न केवलममुना वत्सेन ब्रह्मर्षिर्विभाण्डकः पुत्रवतां धुरमारोपितः, दशरथोऽपि ।

दशरथः । भगवन् ! एवमेवैतत् ।

ये मैत्रावरुणं पुरोहितवतो वंशे मनोर्जज्ञिरे
तास्ता वैनयिकीः क्रिया विदधिरे येषां च युष्मादृशः ।

अस्य मुनेः चेष्टितानि चरितानि नमतां प्रणिपततां अमराणां शिरःकिरीटानि मौलिमुकुटानि तेषां रोचिर्भिः प्रभाभिः चरणपतिताभिरिति भावः मुकुलितम् उपशमितं रोषः क्रोध एव तमः अन्धकारः येषु तथाभूतानि गृणन्ति स्तुवन्ति पौराणिका इति शेषः । पुष्पिताग्रावृत्तम् । अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रेति तल्लक्षणात् ॥४९॥

ब्रह्मेति । अयं महाभुजः चतुर्धा चतुर्भागेन देहयोगिनः प्रतिपन्नदेहस्य ब्रह्मज्योतिः ब्राह्मं तेजः तस्य विवर्त्तस्य परिणामभूतस्य ऋष्यशृङ्गचरोः ऋष्यशृङ्गस्तताग्नेरुत्पितस्येति भावः प्रथमः आद्यः अंशः भागः राम इत्यर्थः । अनुष्टुब्वृत्तम् ॥ ५० ॥

(ख) आरण्यकेषु तापसेषु मध्ये इत्यर्थः ।

ये इति । मैत्रावरुणं वशिष्ठं पुरोहितवतः पुरतः स्थापयतः पुरोहितं कुर्वत इत्यर्थः; मनोः वंशे ये राजानः जज्ञिरे जाताः युष्मा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तेषामञ्चलमेष ते दशरथः संप्रत्यसौ ये पुन-
र्जातास्ते ध्रुवमृष्यशृङ्गतपसामैश्वर्यमिक्ष्वाकवः ॥५१॥

(रामलक्ष्मणावुपसर्पतः ।)

दशरथः । वत्सौ ! भगवानेष निःशेषभुवनमहनीयो (ग) महामुनिः कौशिकः प्रणम्यताम् ।

रामलक्ष्मणौ । (उपसृत्य) । भगवन् विश्वामित्र ! सावित्रौ (घ) रामलक्ष्मणावभिवादयेते (ङ) ।

विश्वामित्रः । वत्सौ आयुष्मन्तौ भूयास्ताम् । (इति भुजाभ्यां गृहीत्वा रामं निर्वर्ण्य च सवक्रमानम् । आत्मगतम् ।)

वशिष्ठोक्तैर्मन्त्रैर्दधति जगतामाभ्युदयिकीं
धुरं संप्रत्येते दिनकरकुलीनाः क्षितिभुजः ।
गृहे येषां रामादिभिरपि बलाभिश्रितसृभिः
स्वयं देवो लक्ष्मीस्तनकलशवारीगजपतिः ॥५२॥

दृशः महर्षय इति शेषः येषां मनुवंश्यानां तास्ताः वैनयिकीः विनयाधानहेतुभूताः क्रियाः शिक्षादानादिका इत्यर्थः विदधिरे कृतवन्तः एषः ते तव दशरथः तेषां मनुवंशीयानाम् अञ्चलं प्रान्तदेशः शेष इत्यर्थः । गच्छति ये पुनः इक्ष्वाकवः रामादय इति भावः जाताः ते ध्रुवं निश्चयेन ऋष्यशृङ्गतपसाम् ऐश्वर्यं सम्पत्तिरित्यर्थः ॥५१॥

(ग) निःशेषेति निःशेषस्य समस्तस्य भुवनस्य महनीयः पूजनीयः ।

(घ) सावित्रौ सूर्यवंश्यौ ।

(ङ) अभिवादयेते प्रणमतः ।

वशिष्ठोक्तैरिति । एते दिनकरकुलीनाः सूर्यवंशीयाः क्षितिभुजः राजानः वशिष्ठेन उक्तैः मन्त्रैः मन्त्रणाभिः जगताम् आभ्युदयिकीम् अभ्युदयः मङ्गलं तत्साधनीमित्यर्थः धुरं राज्यभारं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपि च ।

त्वं तास्ताः स्मृतवानृषो दशतयीस्त्वत्प्रीतये यज्वभिः
स्वाहाकारमुपाहितं हविरिह त्रेताग्निराचामति ।
त्वां क्षीरोदजलेशयं क्रतुलिहः पृथ्वीमवातीतर-
न्नुद्वृत्ता दशकन्धरप्रभृतयो निग्राहितास्त्वया ॥५३॥

वामदेवः । (सस्मितम्) । वत्सौ! अयमत्रभवान् भवन्तौ नेतुमागतः ।

रामलक्ष्मणौ । यदभिरुचितं भवते ताताय च ।

दधति धुर्वन्तीत्यर्थः । सस्मति येषां राज्ञां ऽहे लक्ष्मीराः स्तनकलशः कुचकुम्भ एव वारी गजबन्धनयन्त्रविशेषः, वारी तु गजबन्धनी-त्यमरः । तत्र बद्ध इति शेषः गजपतिः गजेन्द्रः लक्ष्मीकान्त इत्यर्थः देवः नारायणोऽपि रामादिभिः चतसृभिः कलाभिः अंशैः स्वयम् अवतीर्ण इति शेषः । शिखरिणीवृत्तम् ॥ ५२ ॥

सस्मति ब्रह्मस्वरूपेण रामं स्तौति त्वमिति । हे रामेत्यध्याहार्यं त्वं तास्ताः दशतयी दशसंख्याकाः ऋचः ब्रह्मस्तुतिरूपा ऋग्वेदोक्ता गाथा इति यावत् स्मृतवान् ? स्मरसि किमित्यर्थः । इह जगति त्रेताग्निः, गार्हपत्यो दक्षिणाग्निर्हवनीयस्त्रयोऽग्नयः । अग्नित्रयमिदं त्रेतेत्युक्तरूपस्त्रिविधोऽग्निः यज्वभिः याज्ञिकैः, यज्वा तु विधिनेष्टवानित्यमरः । तव प्रीतये उपहितं दत्तं स्वाहाकारं स्वाहेति यन्त्रकरणमित्यर्थः हविः हव्यम् आचामति भक्षयति । क्रतुलिहः यज्ञायिनः देवाः क्षीरोदजलेशयं क्षीरसागरशायिनं त्वां पृथ्वीम् अवातीतरन् अवतारयामासुः । त्वया उद्वृत्ताः सन्तुष्टताः दशकन्धरप्रभृतयः रावणादयः निग्राहिताः निग्रहीतव्याः विनाशयितव्या इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ५३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(दशरथस्तौ सस्नेहमादाय भगवन् कौशिक इत्यर्धोक्तं मन्यूत्पीडनिष्टम्भमाणकण्ठो (च) वामदेवस्य सुखमीक्षते ।)

वामदेवः । इमौ तौ रामलक्ष्मणौ । (इत्यर्पयति ।)

(विश्वामित्रः सादरं गृह्णाति ।)

(नेपथ्ये शङ्खध्वनिः ।)

(वामदेवो निमित्तमनुमोदमानो दशरथस्तुष्यति ।)

(पुनर्नेपथ्ये)

वैतालिकः (छ) । सुखाय माध्यन्दिनी (ज) सन्ध्या भवतु देवस्य (झ) । सम्प्रति हि

किरति मिहिरे विष्वग्रीचः करानतिवामनी
स्थलकमठवद्देहच्छाया जनस्य विचेष्टते ।
गजपतिमुखोन्नीर्णैराप्यैरपि त्रसरेणुभिः
शिशिरमधुरामेणाः कच्छस्थलीमधिशेरते ॥५४॥

(च) मन्यूत्पीडेति मन्युः शोकः, मन्युशोकौ शुक् स्त्रियामित्यमरः । तस्य उत्पीडेन अतिशयेन निष्टम्भमाणः रुध्यमानः कण्ठो यस्य तथोक्तः ।

(छ) वैतालिकः वन्दी । वैतालिका बोधकरा बन्दिनः स्तुतिपाठका इत्यमरः ।

(ज) माध्यन्दिनी मध्याह्नकालिकी ।

(झ) देवस्य दशरथस्य ।

किरतीति । मिहिरे सूर्ये विष्वग्रीचः सर्वतः सञ्चारिण इत्यर्थः करान् मयूखान् किरति वर्षति सति जनस्य लोकस्य अतिवामनी अतिखर्वा देहच्छाया स्थलकमठवत् स्थलस्थितकूर्मवत् विचेष्टते भवति । मध्याह्ने छाया अतिह्रस्वा पादमध्ये उद्भवते इति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपि चेदानीं पटीरतरुकोटरकुटीरमध्यासीनाः (ञ)

प्रत्यक्षरस्रुतसुधारसनिर्विषाभि-
राशीर्भिरभ्यधिकभूषितभोगभाजः ।
गायन्ति कञ्चुकविनिर्झुतलोमहर्ष-
स्वेदोर्मयस्तव गुणानुरगेन्द्रकन्याः ॥५५॥

एणाः हरिणाः गजपतीनां कुम्भैः उद्गीर्णैः उत्क्षिप्तैः आर्द्रैः जलीयैः तत्परेणुभिः, आलानस्थले भागौ यत्किञ्चित् दृश्यते रजः । प्रथमं तत्प्रमाणानां तत्परेणुं प्रचक्षते इत्युक्तपरिमाणविशेषपरिमितैर्जलैरित्यर्थः शिशिरा शीतला अतएव मधुरा मनोहारिणी तां कच्छस्थलीं जलभूयिष्ठदेशं, जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध इत्यमरः । अधिशेरते आश्रित्य स्थपतीत्यर्थः । हरिणीवृत्तं, नसमरसला गः षड्वेदैर्हयैर्हरिणी मतेति तल्लक्षणात् ॥५४॥

(ञ) पटीरेति पटीरतरुश्चन्दनवृक्षः, पटीरश्चन्दनतराविति मेदिनी । तस्य कोटरं गह्वरमेव कुटीरं क्षुद्रगृहं तत् अध्यासीनाः आश्रिताः ।

प्रत्यक्षरेति । प्रत्यक्षरम् अक्षरे अक्षरे गानस्येति भावः स्रुतः क्षरितः यः सुधारसः तेन निर्विषाभिः विषमूर्च्छाभिः, सुधारसः विषहरौषधमिति प्रसिद्धिः । आशीर्भिः दंष्ट्राभिः, आशीररगदंष्ट्रायामित्यमरः । अभ्यधिकं यथा तथा भूषितो यो भोगः फणदेशः, भोगः सुखे स्त्र्यादिस्थितावहेश फणकाययोरित्यमरः । तं भजन्ते इति तथोक्ताः उरगेन्द्रकन्याः भुजङ्गकुलार्थ्यः कञ्चुकैः निर्मोकैः विनिर्झुताः गोपिताः लोमहर्षाः गानरसास्वादजनितानन्दादिति भावः स्वेदोर्मयः घर्मनिचयाः गानश्रमजनिता इति भावः यासां तथाभूताः सन्तः तव गुणान् गायन्ति कीर्त्तयन्ति । वसन्ततिलकं वृत्तम् ॥५५॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः । रुखे दशरथ ! प्रियमपि तथ्य(ट)माह वैतालिकः ।

मन्दोद्भूतैः शिरोभिर्मणिभरगुरुभिः प्रौढरोमाञ्चदण्ड-
स्फायन्निर्मोकसन्धिप्रसरदविगलत्सम्मदस्वेदपूराः ।
जिह्वायुग्माभिपूर्णाननविषमसमुद्गीर्णवर्णाभिरामं
वेलाशैलाङ्कभाजा भुजगयुवतयस्त्वद्गुणानुद्गृणन्ति ॥५६॥

(सविनयविलक्षितं च ।) राजर्षे ! प्रत्यासीदति (ठ) दीक्षा-

(ट) तथ्यं सत्यम् ।

मन्दोद्भूतैरिति । वेला समुद्रतीरं, वेला तत्तीरनीरयोरित्यमरः । तत्र यः शैलः पर्वतः तस्य अङ्कभाजः उत्सङ्गवर्त्तिन्यः भुजगयुवतयः भुजङ्गाः मणिभरेण शिरोरत्नभरेण गुरुभिः दुर्वहैरिति भावः अतएव मन्दं मन्थरं यथा तथा उद्भूतैः उत्तोलितैः शिरोभिः फणैः उपलक्षिता इत्यर्थः, विशेषणे तृतीया । प्रौढः उत्कटः यः रोमाञ्चः लोमहर्ष एव दण्डः रोमाञ्चस्य दीर्घत्वाद्दण्डत्वेनारोप इति भावः तेन स्फायन् स्फीततां गच्छन् यः निर्मोकः कञ्चुकः तस्य सन्धेः सन्धिदेशात् प्रसरन् विस्तारं गच्छन् अविगलंश्च अस्रवंश्च सम्मदः सम्यक् हर्षः स्वेदपूरः घर्मप्रवाहश्च गानश्रमजनित इति भावः यासां तथाभूताः । सन्धेरिति पञ्चमी एकत्र हेतौ अन्यत्रापादाने इति बोध्यम् । सत्यः जिह्वायुग्मेन जिह्वाद्वयेन द्विजिह्वत्वादिति भावः अभिपूर्णं यत् आननं मुखं तेन विषमं विपर्य्यस्तम् यथा तथा उद्गीर्णैः उच्चरितैः वर्णैः अभिरामं मनोज्ञं यथा तथा तव गुणान् उद्गृणन्ति उच्चैर्गायन्ति । नागकन्यानां वैरी गरुडः तस्मात् भयस्य निवारको विष्णुः, स तव पुत्रत्वेनावतीर्ण इति धन्यो भवानित्याशयेनेति भावः । स्रग्धराछन्दस् ॥५६॥

(ठ) प्रत्यासीदति निकटे वर्त्तते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रवेशसमयः। तदेवंविधमधुरगोष्ठीभङ्गनिष्ठुराणां प्रथमे(ङ) तावद्वयमेव भवितुमिच्छामः।

(दशरथो रामलक्ष्मणावलोक्य बाष्पभरोत्तरङ्गितलोचनो मुनिं प्रति भगवन् इत्यर्धोक्ते वाचःस्तम्भं नाटयति ।)

वामदेवः । (ससंभ्रमम्) । भगवन् कौशिक ! साधय(ढ) । शिवाः सन्तु पन्थानो वत्सयो रामलक्ष्मणयोः ।

(इत्युत्थाय सर्वे यथोचितमाचरन्ति ।)

विश्वामित्रः । एवमास्यतां (ण) भवद्भिः । (इति राजपुत्राभ्यामनुगम्यमानो निष्क्रान्तः ।)

दशरथः । (दीर्घमुष्णं च निःश्वस्य ।) वामदेव ! नूनमिदानीमस्मानिव भगवन्तमपि कौशिकमकारणवत्सलं (त) वत्सो मे रामभद्रः

क्वचिदस्मद्वियोगार्त्तिदुःखी दुःखाकरिष्यति (थ)।
अपूर्वविषयालोकसुखी (द) च सुखयिष्यति ॥५७॥

(ङ) एवंविधेति एवंविधा या मधुरा मनोहारिणी गोष्ठी सभा तस्याः भङ्गेन निष्ठुराः दुर्विनीता इत्यर्थः तेषाम् । प्रथमे अग्रगण्यः ।

(ढ) साधय गच्छ, प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते इति नाट्यशास्त्रात् ।

(ण) आस्यताम् उपविश्यताम् ।

(त) अकारणवत्सलम् अहैतुकस्निग्धम् ।

(थ) अस्मदिति अस्माकं वियोगेन या आर्त्तिः व्यथा तया दुःखी व्याकुलः । दुःखाकरिष्यति दुःखितं करिष्यति ।

(द) अपूर्वेति अपूर्वः अदृष्टपूर्वः यः विषयः प्रदेशादिः तस्य आलोकेन दर्शनेन सुखी सन्तुष्टः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वामदेवः । (विहस्य) । राजर्षे ! वयं वा कौशिको वेति क्व पुनरेष कक्षाविभागो रामभद्रमाधुर्य्यस्य (ध) । पश्य ।

यदिन्दोरन्वेति व्यसनमुदयं वा निधिरपा-
मुपाधिस्तत्रायं जयति जनिकर्तुः प्रकृतिता ।
अयं कः सम्बन्धो यदनुहरतो तस्य कुमुदं
विशुद्धाः शुद्धानां ध्रुवमनभिसन्धिप्रणयिनः ॥५८॥

दशरथः । (विहस्य) । एवमेतत् ।

रत्नाकरो जनयिता सहजश्च वर्गः
किं कथ्यतामृतकौस्तुभपारिजाताः ।

(ध) कक्षेति कक्षायाः प्रकोष्ठस्य विभागः भेदबुद्धिः । रामभद्र-माधुर्य्यस्य रामचन्द्रीयमधुरतायाः । रामभद्रस्य निजः परो वेति बुद्धि-र्नास्ति सर्वस्मिन्नेव समतावुद्धिरिति भावः ।

यदिति । अपां निधिः समुद्रः यत् इन्दोश्चन्द्रस्य व्यसनं विपत्तिम् उदयम् उन्नतिं वा अन्वेति अनुगच्छति चन्द्रस्य व्यसने व्यसनम् उदये उदयमनुभवतीति भावः तत्र अनुगमे अयम् उपाधिः कारणं जनिकर्तुः जनकस्य प्रकृतिता स्वभावः जयति उत्कर्षेण वर्त्तते इत्यर्थः । कुमुदं तस्य चन्द्रस्य अनुहरते अनुगच्छति चन्द्रे उदिते कुमुदमुल्लसति अस्त-मिते निमीलतीति यदिति भावः अयम् अनुहरणं कः सम्बन्धः ? न कोऽपीत्यर्थः । पिता पुत्रस्य उदये विपदि च तदनुरूपं सुखं दुःखञ्चानु-भवतीति स्वभावो युज्यते, कुमुदेन च चन्द्रस्य कः सम्बन्धः येन तथा-चरतीति भावः । अतः सम्बन्धः न प्रणयहेतुरित्याह विशुद्धा इति । विशुद्धाः निर्मलप्रकृतयः शुद्धानां निर्मलप्रकृतीनां अनभिसन्धिप्रण-यिनः अकृत्रिममित्राणि भवन्तीति ध्रुवम् उत्प्रेक्षे । शिखरिणी-वृत्तम् ॥ ५८ ॥

रत्नाकर इति । जनयिता उत्पादकः रत्नाकरः समुद्रः, सहजः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किं तैरचिन्त्यमिह तत् पुनरन्यदेव
तत्त्वान्तरं कुमुदबन्धुरसौ यदिन्दुः ॥५९॥

(पुनरवलोक्य) । कथं लोचनपथ(न)मतिक्रान्तः सरामलक्ष्मणो भगवान् । तद्वयमपि वत्सप्रवासदुर्मनायमानां दक्षिणकोशलेश्वरसुतां (प) देवीमुपेत्य सान्त्वयामः ।

(इति निष्क्रान्ताः सर्वे ।)

इति मुनीन्द्रसंवादो नाम प्रथमोऽङ्कः ।

सोदरः वर्गश्च अक्षतकौस्तुभपारिजाताः किं कथ्यतां किं वक्तव्यः । तैः अक्षतकौस्तुभपारिजातैः रत्नाकरेण वेत्यर्थः किम् ? न किमपि प्रयोजनं चन्द्रस्येति भावः पुनः किन्तु इह जगति अन्यदेव तत् अचिन्त्यम् अतर्कणीयं तत्त्वान्तरं भावान्तरम् अस्तीति शेषः यत् असौ इन्दुः चन्द्रः कुमुदबन्धुः कैरववल्लभः । जन्यजनकभावादिसम्बन्धोऽकिञ्चित्कर इति भावः । वसन्ततिलकं वृत्तम् ॥५९॥

(न) लोचनपथं दृष्टिमार्गम् ।

(प) वत्सेति वत्सयोः रामलक्ष्मणयोः प्रवासेन भिन्नदेशत्वेन विरहेणेति यावत्, प्रवासो भिन्नदेशत्वं कार्याच्छापाच्च संभवादिति दर्पणे । दुर्मनायमानां दुःखितमनसाम् । दक्षिणकोशलेश्वरसुतां कौशल्याम् ।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्यविरचिता
अनर्घराघवप्रथमाङ्कव्याख्या समाप्ता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्वितीयोऽङ्कः ।

(ततः प्रविशति यजमानशिष्यः ।)

शिष्यः । अये ! प्रभातप्रायैव रजनी । तथाहि ।

तमोभिः पीयन्ते गतवयसि पीयूषवपुषि
ज्वलिष्यन्मार्त्तण्डोपलपटलधूमैरिव दिशः ।
सरोजानां कर्षन्नलिमयमयस्कान्तमणिवत्
क्षणादन्तःशल्यं तपति पतिरद्यापि न रुचाम् ॥१॥

अपि च ।

जाताः पक्वपलाण्डुपाण्डुमधुरच्छायाकिरस्तारकाः
प्राचीमङ्कुरयन्ति किञ्चन रुचो राजीवजीवातवः ।
लूतातन्तुवितानवर्तुलमितो विम्बं दधच्चुम्बति
प्रातः प्रोषितरोचिरम्बरतलादस्ताचलं चन्द्रमाः ॥२॥

तमोभिरिति । पीयूषवपुषि अस्तरश्मौ चन्द्रे इत्यर्थः गतं वयः जीवनकालो यस्य तथाभूते अस्तं गते सतीत्यर्थः ज्वलिष्यतः सूर्य्यकिरणयोगेन तेजः प्रकटयिष्यतः मार्त्तण्डोपलपटलस्य सूर्य्यकान्तमणिनिचयस्य धूमैरिव तमोभिः तिमिरैः दिशः पीयन्ते आच्छाद्यन्ते इति यावत् । अद्यापि इदानीमपि रुचां पतिः सूर्य्यः अयस्कान्तमणिवत् अलिमयं भ्रमरमयं सरोजानां पद्मानाम् अन्तःशल्यम् अन्तरस्थितलौहनिर्मितास्त्रविशेषं कर्षन् न तपति । उपमालङ्कारः । शिखरिणीवृत्तम् ॥१॥

जाता इति । पक्वः परिणतः यः पलाण्डुः पेयाज इति प्रसिद्धो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सर्वतोऽवलोक्य च ।)

दिङ्मण्डलीमुकुटमण्डनपद्मराग-
रत्नाङ्कुरे किरणमालिनि गर्भितेऽपि ।
सौखप्रसुप्तिकमधुव्रतचक्रवाल-
वाचालपङ्कजवनीसरसाः सरस्यः ॥२॥

अपि च ।

प्राचीविभ्रमकर्णिकाकमलिनीसंवर्त्तिकाः सम्प्रति
द्वे तिस्रो रमणीयमम्बरमणेर्यामुच्चरन्ते रुचः ।

मूलविशेषः तद्वत् पाण्डुः मधुरा च या छाया कान्तिः तां किरन्ति वर्षन्तीति तथाभूताः तारकाः नक्षत्राणि प्राचीं पूर्वां दिशम् अङ्कुरयन्ति किञ्चित् प्रकाशयन्तीत्यर्थः । किञ्च किमपि स्वल्पा अपीत्यर्थः राजीवानां पद्मानां जीवातवः जीवनौषधभूताः रुचः अरुणकिरणा इत्यर्थः न अङ्कुरयन्तीति पूर्वेणान्वयः । इतः अस्मिन् प्रातः प्रभाते प्रोषितरोचिः गतप्रभः चन्द्रमाः लूता कीटविशेषः तस्याः तन्तुवितानवत् सूत्रविस्तारवत् वर्त्तुलं बिम्बं मण्डलं दधत् सन् अम्बरतलात् आकाशमण्डलात् अस्ताचलं चुम्बति स्पृशति आश्रयतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥२॥

दिङ्मण्डलीति । दिङ्मण्डल्याः प्राच्या दिश इत्यर्थः मुकुटमेव मण्डनं भूषणं तस्मिन् यत् पद्मरागरत्नं तस्य अङ्कुरः प्ररोहः तस्मिन् किरणमालिनि सूर्ये गर्भितेऽपि गर्भस्थितेऽपि गगनाभ्यन्तरस्थितेऽपीत्यर्थः अनुदितेऽपीति भावः सरस्यः सरोवराणि सुखप्रसुप्तिः सुखशयनं मुञ्चन्तीति सौखप्रसुप्तिकाः तथाभूता ये मधुव्रताः भ्रमराः तेषां चक्रवालेन मण्डलेन वाचालया बहुभाषिण्या, वह्निवाक्पटुवाचालवाचाटा बहुभाषिणीत्यमरः । पङ्कजवन्या कमलश्रेण्या सरसाः रसवत्यः मनोहारिण्य इति भावः जाता इति शेषः । वसन्ततिलकं वृत्तम् ॥३॥

प्राचीति । सम्प्रति प्राच्याः दिशः नायिकाया इति ध्वनिः विभ्र-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सूक्ष्मोच्छ्वासमपीदमुत्सुकतया संभूय कोषाद्वहि-
र्निष्क्रामद्भ्रमरौघसंभ्रमभराद्भोजमुज्जृम्भते ॥४॥

अपि च ।

एकद्विप्रभृतिक्रमेण गणनामेषामिवास्तं यतां
कुर्वाणा समकोचयद्दशशतान्यम्भोजसंवर्त्तिकाः ।
भूयोऽपि क्रमशः प्रसारयति ताः सम्प्रत्यमूनुद्यतः
संख्यातुं सकुतूहलेव नलिनी भानोः सहस्रं करान् ।५॥

साय विलासार्थमित्यर्थः कर्णिकाः कर्णाभरणानि तद्भूता इति भावः कमलिनीसंवर्त्तिकाः पद्मिनीनवदलानीत्यर्थः तत्स्वरूपा इति भावः अम्बरमणेः सूर्यस्य द्वे तिस्रः रुचः प्रभाः द्यां आकाशं उच्चरन्ते उद्गच्छन्ति । सूक्ष्मोच्छ्वासमपि अल्पकिरणसर्गात् स्वल्पप्रकाशमपि इदं अम्भोजं पद्मम् उत्सुकतया उत्कण्ठया संभूय मिलित्वा कोषात् कुड्मलात् बहिर्निष्क्रामतः निर्गच्छतः भ्रमरौघस्य संभ्रमभरात् आवेगातिशयात् हेतोः उज्जृम्भते अत्यन्तं विकसतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

एकेति । नलिनी पद्मिनी अस्तं यतां गच्छताम् एषां किरणानां एकद्विप्रभृतिक्रमेण एकः अस्तं गतः द्वौ अस्तं गतौ त्रयः अस्तं गता इत्यादिरूपेण गणनां संख्यां कुर्वाणेव कुर्वतीव दशशतानि सहस्रमित्यर्थः अम्भोजसंवर्त्तिकाः पद्मनवदलानि, संवर्त्तिका नवदलमित्यमरः । समकोचयत् किरणानामस्तगमनवत् एकादिक्रमेण निमीलितवतीत्यर्थः । सम्प्रति इदानीम् उद्यतः उदयं गच्छतः भानोः सूर्यस्य अमून् सहस्रं करान् संख्यातुं गणयितुं सकुतूहलेव कौतुकवतीव भूयोऽपि पुनरपि ताः संवर्त्तिकाः क्रमशः प्रसारयति विस्तारयति । उत्प्रेक्षालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपि च ।

प्रत्यासन्नसुरेन्द्रसिन्धुरशिरःसिन्दूरसान्द्रारुणा
यत्तेजस्त्रसरेणवो वियदितः प्राचीनमातन्वते ।
शङ्के सम्प्रति यावदभ्युदयते तत्तर्कुटङ्कोन्मृजा-
रज्यद्बिम्बरजश्छटावलयितो देवस्त्विषामीश्वरः ॥६॥

(पुरो(क)ऽवलोक्य ।) कथमिदमुदयाचलमौलिमाणिक्य(ख)-मर्कमण्डलमद्यापि न विहायस्तल(ग)मलङ्करोति । तदस्म-

---

प्रत्यासन्नेति । प्रत्यासन्नः निकटवर्त्ती पूर्वदिगधिपत्वादिति भावः यः सुरेन्द्रः देवराजः तस्य सिन्धूरः हस्ती ऐरावत इत्यर्थः तस्य शिरः-सिन्दूरेण मस्तकस्थसिन्दूरेण सान्द्रं निविड़म् अतीवेत्यर्थः अरुणा रक्ताः, यस्य तेजसां त्रसरेणवः अणुपरिमाणविशेषाः इतः अस्मिन् प्रदेशे प्राचीनं वियत् पूर्वाकाशम् आतन्वते विस्तारयन्ति प्रकटयन्तीत्यर्थः । अतः शङ्के मन्ये, स तर्कुः कुम्भकारस्य देवशिल्पिनः विश्वकर्मणः चक्राकारयन्त्रविशेषः तत्र यष्टङ्कः पाषाणदारणास्त्रविशेषः तेन उन्मृजा विशुद्धिः संस्कार इति यावत् तया रज्यत् रक्तीभवत् उज्ज्वलीभवदित्यर्थः यत् बिम्बं मण्डलं तस्य रजसां रेणूनां कणानामिति भावः छटाभिः समूहैः वलयितः वेष्टितः त्विषां तेजसाम् ईश्वरो देवः सूर्यः यावत् अभ्युदयते अविलम्बमेव उदेष्यतीत्यर्थः । यावत्पुराभ्यां भव्ये इति सूत्रे वर्त्तमानसामीप्यसम्बन्धिनि भविष्यति लट् । शार्दूलविक्रीड़ितं वृत्तम् ॥ ६ ॥

(क) पुरः अग्रतः ।

(ख) उदयेति उदयाचलस्य मौलौ शिरसि स्थितं माणिक्यं रत्नविशेषः ।

(ग) विहायस्तलं गगनतलम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भगवतो विंतायमानयज्ञस्य कुलपतेः कौशिकस्यादेशात् समिदाहरणाय (घ) प्रस्थितोऽस्मि । तत्त्वरितं गच्छामि । (इति परिक्रामति) ।

(प्रविश्य संभ्रान्तो वटुः (ङ) ।)

वटुः । अज्ज सुणस्सेह, किं वि अच्चरिअं भीसणं च वट्टदि ।

शुनःशेफः । (सहसत्कारं परिदृश्य ।) सखे पशुमेद्र! किमाश्चर्यं भीषणं च वर्त्तते ।

पशुमेद्रः । अज्ज रामो त्ति को वि खत्तिअकुमारो आअदो त्ति सुणिअ कोदूहलेन धावन्तस्स तवोवणपेरन्तपरिट्ठिदा (च) पत्थरपुत्तलिआ सच्चमाणुसीभविअ मम ज्जेव्व संमुहं परावडिदा (छ) । तं पेक्खिअ उत्तरासङ्गवक्कलं (ज) वि उज्झिअ (झ) पलायिदो म्हि ।

(घ) अस्मद्गुरोः अस्माकम् आचार्यस्य । कुलपतेः, मुनीनां दशसहस्रं योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृत इत्युक्तलक्षणस्य । कौशिकस्य विश्वामित्रस्य । वितायमानयज्ञस्य वितन्यमानक्रतोः । समिदाहरणाय काष्ठाहरणाय, काष्ठं दार्विन्धनं त्वेध इन्धमेधः समित् स्त्रियामित्यमरः ।

(ङ) वटुः ब्रह्मचारी ।

(च) तपोवनपर्यन्तपरिस्थिता तपोवनप्रान्तवर्त्तिनी ।

(छ) परापतिता उपस्थिता ।

(ज) उत्तरासङ्गवल्कलम् उत्तरीयतरुत्वचम् ।

(झ) उज्झित्वा त्यक्त्वा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शुनःशेफः । (विहस्य ।) सखे ! साधु कृतम् । दिष्ट्या हि जीवतः पुनरावृत्तिः (ञ) ।

पशुमेद्रः । ता रक्खदु मं अज्जो इमाए दुट्ठरक्खसीए मुहादो । (इति वेपमानः (ट) पादयोः पतति) ।

शुनःशेफः । (सस्मितमुत्थाप्याङ्कमारुह्य च ।) वयस्य ! शृणोषि भगवतो गोतमस्य महर्षेरहल्यां नाम धर्मदारान् (ठ) ।

पशुमेद्रः । जा जणअवंसपुरोहिदस्स तत्थभवदो सदाणन्दस्स जणणी । तदो तदो ।

शुनःशेफः । सेयं पुरा पुरुहूतखण्डितचरित्रा (ड) तस्य दीर्घतपसो मुनेर्मन्युना निजमेव (ढ) तदिन्द्रियदौर्बल्य(ण)मेवं विवर्त्तमानमनुभवन्ती (त) सम्प्रत्यस्य रघुराजपुत्रस्य तेजसा तस्मादन्धकारान्निरमुच्यत (थ) । तदलमावेगेन (द) ।

(ञ) पुनरावृत्तिः पुनरागमनम् । दिष्ट्या भाग्येन ।

(ट) वेपमानः कम्पमानः ।

(ठ) धर्मदारान् धर्मपत्नीम् ।

(ड) पुरुहूतेति पुरुहूतेन इन्द्रेण खण्डितं भ्रंशितं चारित्रं पातिव्रत्यमिति यावत् यस्याः तथाभूता ।

(ढ) दीर्घतपसः महातपसः । मुनेः गोतमस्य । मन्युना क्रोधेन । निजमेव स्वमेव ।

(ण) इन्द्रियदौर्बल्यम् इन्द्रियस्य स्वर्गेन्द्रियस्य दौर्बल्यं विकारमिति यावत् ।

(त) विवर्त्तमानं परिणमत् । अनुभवन्ती भुञ्जाना ।

(थ) अन्धकारात् शापादिति भावः निरमुच्यत निर्मुक्ता अभूदित्यर्थः ।

(द) आवेगेन उद्वेगेन ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पशुमेद्रः । (उन्मील्य चक्षुषी सर्वतोऽवलोक्य ।) अहो अच्छरिअम् । अज्जस्स पसादेण पुणो वि जीअलोए पविट्ठो म्हि । तह वि सङ्कज्जरो अज्ज वि ण मं परिच्चअदि । ता अज्ज सुअस्सेह, मुहुत्तअं विसमीअदु ।

शुनःशेफः । सखे! भयमिति किमेतद् ब्राह्मणस्य । तत्पर्यवस्थापयात्मानम् (ध) ।

(इत्युपविशतः ।)

पशुमेद्रः । (चिरं विमृश्य निःश्वस्य (न) च सविस्मयम् ।) कधं विसयमिअणिहासलज्जालाए (प) भअवदो हरिणो वि हरिणदा विटप्पीअदि (फ) ।

शुनःशेफः । (विहस्य ।) साधु ब्रवीषि । अल्पीयान् (ब) खल्वयं लोकः कथमैहिकसुखाध्यवसायाद् (भ) वै अमूर्भू-

---

(ध) पर्यवस्थापय स्थिरीकुरु ।

(न) निःश्वस्य कथं देवेन्द्रोऽपि ईदृशमकार्यं कृतवानिति विषादादिति भावः ।

(प) विषयेति विषयाः भोग्यवस्तूनि स्रक्चन्दनवनितादयः एव मृगतृष्णा मरीचिकाः ताभिः सलज्जलया शोभया दृष्टेति यावत्, सलज्जा तु शोभायामिति रत्नकोषः ।

(फ) हरेरिन्द्रस्य हरिणता पशुत्वमिति यावत् विटप्यते उपार्ज्यते, विटपि धातुश्चुरादिर्द्रष्टव्यः ।

(ब) अल्पीयान् अल्पसंख्यकः विरल इत्यर्थः यद्वा क्षुद्राशयः ।

(भ) ऐहिकेति ऐहिकम् एतज्जन्मसम्बद्धं यत् सुखम् इन्द्रियभोगजमिति भावः तस्य अध्यवसायात् आश्रयात् एतज्जन्मसुखलालसयेत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यस्यो (म) रात्रयः पराहण्यन्ते (य)। किं तु मनोहारिभिराहार्यैराह्रियमाणलोचनद्वितयस्यापि (र) न जनो विवेकमङ्कुशयितुमधीष्टे (ल)। किं पुनर्नयनसहस्रतयस्य तादृशि विभवे मरुतां पतिः। चक्षुःप्रीतिमुद्भवन्तीमनूद्भवन्ति चापराणि कुसुमचापचापलानि (व)।

पशुमेद्रः। (विहस्य।) मण्णे एदाए एव्व मुणिवरणीए पुण्णपरिणामो एत्थ रामभद्दस्य पवासे कारणम्।

शुनःशेफः। इदं तावत् प्रथमम् (श)।

पशुमेद्रः। (साभ्यर्थनम्।) अज्ज, दुदीअं (ष) वि सुणिदुं इमिणा दे वअणेण पज्जुस्सुओ (स) म्हि।

(म) भूयस्यः बहवः।

(य) पराहण्यन्ते विनाश्यन्ते क्षयं नीयन्ते इत्यर्थः पारत्रिकसुखजनककार्यवैमुख्येनेति भावः।

(र) आहार्यैः आयासेन संपाद्यैरित्यर्थः भोग्यवस्तुभिरिति भावः आह्रियमाणलोचनद्वितयस्य आकृष्यमाणस्य नयनयुगलस्येत्यर्थः।

(ल) विवेकं विशिष्टावबोधम्। अङ्कुशयितुम् अङ्कुशीकर्तुं तादृशं लोचनयुगलं निवारयितुमिति यावत् न अधीष्टे न प्रभवति।

(व) नयनसहस्रतयस्य सहस्रस्य नयनानामित्यर्थः विभवे ऐश्वर्ये सतीत्यर्थः। मरुतां पतिः देवेन्द्रः। चक्षुःप्रीतिं नेत्रानुरागम् उद्भवन्तीम् उत्पद्यमानाम् अनु पश्चात् अपराणि अन्यानि कुसुमचापस्य कामस्य चापलानि चपलकार्याणि उद्भवन्ति उत्पद्यन्ते।

(श) प्रथमं कारणमिति शेषः।

(ष) द्वितीयं कारणमिति शेषः।

(स) पर्युत्सुकः समुत्सुकः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पुनःशेफः। सखे! त्वयि किमकथनीयं नाम। अस्ति किष्किन्धायां पुरन्दरस्य (ङ) नन्दनो वालिनाम प्लवगराजः। तच्च रजनीचरचक्रवर्त्तिना दशकन्धरेण सह प्रवृत्तमैत्रीक(च)मवलोक्य वानराच्छभल्लगोलाङ्गूलप्रभृतीनामाचार्यः सर्वामात्यानुमतो जाम्बवानवादीत्।

पशुनेद्रः। (सकौतुकम्।) तदो तदो।

पुनःशेफः। ततश्च राजन्! मायाविनी (क) खल्वियं राक्षसजातिः। विशेषेण महेन्द्रावस्कन्दकन्दलितविक्रमः (ख) पितृवैरी तवायं रावणः। अपिच त्वदीयदोर्मूलसम्पीडनगलितपौरुषो (ग) न विश्वविजयीति स्वयमाशङ्कनीयः। नापि सामन्तान्तरजिघृक्षायामन्तरावर्त्तिनि समुद्रे लघुसमुत्थः (घ)। तदनेन विराधमण्डलेन महा-

---

(ङ) पुरन्दरस्य इन्द्रस्य।

(च) प्रवृत्तमैत्रीकं सञ्जातमित्रभावम्।

(क) राजन् नृपते वालिन्। मायाविनी कपटमयी अतिधूर्त्तेति यावत्।

(ख) महेन्द्रेति महेन्द्रस्य अवस्कन्देन पराजयेन कन्दलितः प्रवृद्धः विक्रमो यस्य तथोक्तः।

(ग) त्वदीयेति तव इदं त्वदीयं यत् दोर्मूलं बाहुमूलं तेन यत् सम्पीडनं सम्यक् पेषणमित्यर्थः तेन गलितं विनष्टं पौरुषं पुरुषकारः सामर्थ्यमित्यर्थः यस्य तथाभूतः। पुरा सन्ध्यामुपासीनं वालिनमुपेत्य रावणः संग्रामाय आचक्राम। स तु तं कक्षामारोप्य समस्त समुद्रेषु भ्रामयित्वा सन्ध्यां समाप्य निर्जीवमेव सातिशयमनुनीतस्तत्याजेति पुराणवार्त्ता।

(घ) सामन्तेति सामन्तान्तरस्य राजान्तरस्य जिघृक्षायां संग्रहेच्छायां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुरविजयिना मैत्रमनर्थानुबन्धि (ङ)। किञ्च सर्वथेयम-नुपकारिणी पुलस्त्यापत्येषु (च) प्रीतिरिति भगवानिहोदाहरणं हरिणाङ्कशेखरः (छ)। तथाहि।

उच्चा रथो भूषणमस्थिमाला
भस्माङ्गरागो गजचर्म वासः।
एकालयस्थेऽपि धनाधिनाथे
सख्यौ दृश्येयं त्रिपुरान्तकस्य ॥ ७ ॥

सत्यामपीति शेषः तव निग्रहार्थम् अन्येषां राज्ञां साहाय्यकामनयेति भावः अन्तरावर्त्तिनि मध्यवर्त्तिनि समुद्रे लघु शीघ्रं समुत्तिष्ठतीति तथोक्तः। तव बाहुमर्दनेन गलितपौरुषतया असामर्थ्यादिति भावः।

(ङ) विराड्मण्डलेन विराड्ढं विरुद्धं सञ्जातवैरमिति यावत् मण्डलं राष्ट्रं यस्य तादृशेन। असुरविजयिना सुरेभ्यः विजयः पराभवः सुरविजयः स नास्ति यस्य तथाभूतेन सुरविजयिनेत्यर्थः। सुरविजयिनेति पाठः समीचीनः। अनर्थानुबन्धि अशुभजनकम्। सज्जदुष्टञ्च मित्रं यः पुनः सन्धातुमिच्छति। स मृत्युमुपगच्छति गर्भमश्मतरी यथेति॥ तथा, शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना। सुतप्तमपि पानीयं शमयत्येव पावकमिति च नीति-शास्त्रमत्र द्रष्टव्यम्।

(च) पुलस्त्यापत्येषु पुलस्त्यस्य महर्षिविशेषस्य अपत्येषु सन्तानेषु यक्षेश्वरराक्षसेश्वरादिष्विति भावः। अनुपकारिणी उपकारपराङ्मुखी।

(छ) उदाहरणं दृष्टान्तः। हरिणाङ्कशेखरः चन्द्रशेखरः शिव इत्यर्थः।

उच्चेति। सख्यौ मित्रे धनाधिनाथे धनपतौ कुबेरे पुलस्त्यापत्ये इति भावः एकालयस्थेऽपि एक एव आलयः कैलासः तत्र स्थितेऽपि विप्रकर्षस्थिते तु किं वक्तव्यमिति भावः। त्रिपुरान्तकस्य हरस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पशुभेदः । (सहासम् ।) अद्दो ठेरभल्लू अस्स मन्तोवणासो (ज) परिहासकुसलदा अ । तदो तदो ।

शुनःशेफः । ततश्च तद्वचनं जराप्रलपित(झ)मित्युपहसति हरीश्वर उपांशु तदनुमत्या महामात्यस्य केसरिणः (ञ) पुत्रो हनुमान् कुमारं सुग्रीवमादाय ऋष्यमूकं नाम पर्वतदुर्गमनुप्रविष्टः ।

पशुभेदः । (साकूतम् (ट) ।) अज्ज, जो सो मारुदी तेदाअल्लो (ठ) त्ति सुणीअदि ।

शुनःशेफः । अथ किम् (ड) ।

पशुभेदः । (सविचिकित्सम् (ढ) ।) अज्ज, जधा तधा भोदु ।

इयं दशा दुरवस्थेत्यर्थः । तथा च रथः वाहनम् उच्चा वृषः, अस्थिमाला भूषणम् अलङ्कारः, अङ्गरागः भस्म, वासः वस्त्रं गजचर्म । इन्द्रवज्रावृत्तं, स्यादिन्द्रवज्रा यदि तौ जगौ ग इति तल्लक्षणात् ॥७॥

(ज) स्थविरभल्लूकस्य वृद्धभल्लस्य । मन्त्रोपन्यासः मन्त्रणावचनम् ।

(झ) जरेति जरया वार्द्धकेन प्रलपितं प्रलापमित्यर्थः, प्रलापोऽनर्थकं वच इत्यमरः ।

(ञ) हरीश्वरे वानरराजे वालिनीत्यर्थः । उपांशु एकान्ते । तदनुमत्या तस्य जाम्बवतः अनुमत्या आदेशेन । महामात्यस्य महामन्त्रिणः । केसरिणः तदाख्यस्य वानरस्य ।

(ट) साकूतं साभिप्रायम् ।

(ठ) मारुतिः मरुतः वायोरपत्यं पुमान् । केसरिणः क्षेत्रे अञ्जनायां जात इति पुराणवार्त्तानुसन्धेया । त्रेतामल्लः त्रेता द्वितीयं युगं तत्र मल्लः वीरः ।

(ड) अथ किं तथेत्यर्थः । अथ किं स्वीक्रियार्थकमिति भरतः ।

(ढ) सविचिकित्सं ससंशयं, विचिकित्सा तु संशय इत्यमरः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सामी सामी ज्जेव तं (ण) परिच्छइअ ण सरिसो (त) तारिसस्स महाणुभावस्स पडिकूलपरिग्गहो (थ)।

शुनःशेफः । (विहस्य ।) पुरैव किलायमाञ्जनेयो (द) भगवतः सहस्रकिरणाद् (ध) व्याकरणविद्यामधीयानस्तदात्मजन्मनो वानरयोनेः (न) सुग्रीवस्य साहायकमभिप्रायज्ञो गुरुदक्षिणीचकार (प)।

पशुमेद्रः । (सानन्दम्) । हुं । ता उचितं जेव्व गुरुपुत्तो सब्रह्मचारी (फ) वा ऋणाट्टीयदि । तदो तदो ।

शुनःशेफः । ततश्चाहिभयोपजापजर्जरं सुहृद्गृहं(ब)सुप्तस्य राक्षसराजः खरदूषणत्रिशिरोभिर्महामात्यैरधिष्ठित-

---

(ण) तं स्वामिनम् ।

(त) न सदृशः न युक्तः ।

(थ) महानुभावस्य महावीरस्य हनुमत इत्यर्थः । प्रतिकूलपरिग्रहः प्रतिकूलस्य प्रतिद्वन्द्विनः सुग्रीवस्येत्यर्थः परिग्रहः आश्रयः ।

(द) आञ्जनेयः अञ्जना नाम काचित् वानरी तस्याः सुतः हनुमानित्यर्थः ।

(ध) सहस्रकिरणात् सूर्यात् ।

(न) तदात्मजन्मनः तत्पुत्रस्य वानरयोनेः वानरीगर्भजस्य ।

(प) साहायकं साहाय्यम् । अभिप्रायज्ञः आशयज्ञः गुरोरिति भावः । गुरुदक्षिणीचकार गुरुदक्षिणात्वेन स्वीकृतवानित्यर्थः ।

(फ) सब्रह्मचारी सतीर्थः सहाध्यायीत्यर्थः ।

(ब) अहिभयेति अहिः शत्रुः तस्मात् भयम् उपजापः भेदश्च ताभ्यां जर्जरं जीर्णं सुहृद्गृहं सुहृदः मित्रस्य वालिनः गृहम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आत्मवलैकदेशं सिन्धोरुदीचि(भ) कूले वालिप्रतिग्रहाय(म) प्राहिणोत् ।

पशुमेद्रः । कथं अपरिहीणमित्तधम्मो (य) वि सो कक्खसो ।

शुनःशेफः । सखे ! किमुच्यते । रावणः खल्वसौ ।

प्रियाकर्तुं त्वस्मै नवनिजशिरःकर्तनरस-
प्रहृष्यद्रोमा यः स परमिह लङ्कापरिवृढः ।
विलक्षव्यापारं किमपि दृशुर्यस्य दशमं
शिरस्सु मूर्धानः क्षणधृतपुनर्जन्मसुभगाः ॥८॥

(भ) सिन्धोः समुद्रस्य । उदीचि उत्तरे ।

(म) वालिप्रतिग्रहाय वालिनः साहाय्यायेत्यर्थः ।

(य) अपरिहीणेति न परिहीणः न परित्यक्तः मित्तधर्मः येन तथाभूतः ।

प्रियाकर्तुमिति । नवनिजशिरःकर्त्तने नवसंख्यकस्वशिरश्छेदने यो रसः रागः तेन प्रहृष्यन्ति रोमाणि यस्य तथाभूतः यः लङ्कापरिवृढः लङ्केश्वरः स तु स एव इह जगति अस्मै वालिने यद्वा त्वस्मै अन्यस्मै त्वशब्दः सर्वादिगणान्तर्गतः अन्यार्थकः । प्रियाकर्तुं प्रियं कर्तुं परं प्रधानं समर्थ इति यावत् । प्रियाकर्तुं कस्मैचन निजशिरःकर्त्तनरसेति पाठे कस्मैचन अनिर्वचनीयस्वरूपाय शङ्कराये-त्यर्थः । यस्य रावणस्य क्षणेन कर्त्तनमात्रेण धृतं गृहीतं यत् पुनर्जन्म पुनरुत्थानं तेन सुभगाः अतिप्रियाः इत्यर्थः ते मूर्धानः नवानि शिरांसी-त्यर्थः दशमं शिरः किमपि विलक्षः सलज्जः व्यापारः यस्य तथोक्तं शङ्करसन्तोषकारिणः एते नाहमिति लज्जाविधुरमिति भावः दृशुः ॥

शिखरिणीवृत्तम् ॥८॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पशुमेद्रः । (सकौतुकम् ।) तदो तदो ।

शुनःशेफः । ततः सुकेतुसुता नागसहस्रबलधारिणी ताडकानाम राचसी तस्मादनीका(र)दागत्य मनुष्यमण्डल-विहारकौतुका(ल)दिमामस्मदीयां भूमिमधिवसति ।

पशुमेद्रः । (सकौतुकम् ।) णाअसहस्सबला इत्थीअत्ति ति अस्सुदपुव्वं क्खु एदं । तदो तदो ।

शुनःशेफः । ततश्च श्रौतस्य विधेः प्रत्यूहमस्याः (व) शङ्क-मानः कुलपतिरिमौ दाशरथी रामलक्ष्मणावानीतवान् ।

पशुमेद्रः । जाणे रामभद्दो त्ति को वि रक्खसाणं उवरि अवइण्णो (श) क्खु एसो ।

शुनःशेफः । सखे ! एवमेतत् । रामभद्र इति कोऽप्ययं चतुश्चरो राचसरक्षासिद्धमन्त्रः (ष) । विशेषेण पुनरिदानीं

(र) सुकेतुसुता सुकेतुर्नाम कश्चित् यक्षः तस्य सुता । नागसह-स्रबलधारिणी हस्तिसहस्रसामर्थ्यवतीत्यर्थः । राचसी अगस्त्यशापात् राचसीभावमापन्नेति यावत् । अनीकात् सैन्यात् राचसराजप्रेरिता-दिति भावः ।

(ल) मनुष्येति मनुष्याणां मण्डलं चक्रं तस्मिन् विहारे विच-रणे यत् कौतुकम् औत्सुक्यं तस्मात् ।

(व) श्रौतस्य श्रुतिवेदः तद्विहितस्य विधेः यज्ञस्येत्यर्थः । प्रत्यूहं विघ्नम् । अस्याः ताड़कायाः सकाशादिति शेषः ।

(श) राचसानाम् उपरि अवतीर्णः राचसेभ्यः अधिकबलशालि-त्वेनावतीर्ण इत्यर्थः ।

(ष) चतुश्चरः चतुर्भिश्चरैः निष्पन्न इति यावत् । राचस-रचेति राचसेभ्यः रचायां सिद्धमन्त्रः फलवान् मन्त्र इति यावत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भगवता कौशिकेन ब्रह्मज्योतिष(स)स्तादृशं विवर्त(ह)माचार्यं दिव्यास्त्रमन्त्रपारायण(ज्ञ)मध्यापितः ।

पशुमेद्रः । मम मन्तमईहिं अत्थदेवदाहिं समं बलादिबलाओ (क) सत्तीओ वि रामे संकमिस्सन्ति ।

शुनःशेफः । अथ किम् । तदपि हृत्तमेव ।

पशुमेद्रः । अज्ज ! णं भणामि जइ णिआओ जेव्व सत्तीओ णिआओ जेव्व अत्थविज्जाओ । ता किं त्ति अत्तणो विग्घोवसमे राहवस्स गोरअसुप्पादेहि तत्थभवं कोसिओ । अहवा पाहुणहत्थेण सप्पमारणं (ख) क्खु एदम् ।

शुनःशेफः । सखे ! अनभिज्ञोऽसि । स्वयं प्रयोगादन्ते-

(ह) ब्रह्मज्योतिषः ब्रह्मतेजसः ।

(ह) विवर्त्तं परिणामभूतम् ।

(ज्ञ) दिव्यास्त्रेति दिव्यानाम् अस्त्राणां ये मन्त्राः रहस्योपनिषदः तेषां पारायणं पारगमनं साकल्यमित्यर्थः ।

(क) बलातिबले बला च अतिबला च ते । विद्याविशेषौ अनयोः पाठे क्षुधापिपासाराहित्यं स्यात् । उक्तञ्च रामायणे । क्षुत्पिपासे न ते राम भविष्येते नरोत्तम । बलामतिबलाञ्चैव पठतस्तव राघवेति ।

(ख) प्राघुणेति प्राघुणः अतिथिः, प्राघुणस्त्वतिथिर्द्वयोरिति त्रिकाण्डशेषः । तस्य हस्तेन । यदि सर्पो दशति तदा प्राघुणमेव, यदि सर्पः प्राघुणेन हन्यते तदा गृहस्थस्य कुशलमेव । स्वस्य मन्त्रादिप्रयोगसामर्थ्येऽपि यदि तत् न स्फुरति तदा स्वस्यैव नाश इति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वासिभि(ग)र्विहितः प्रयोगो महिमानमाचार्याणामुपचिनोति (घ)। पश्य।

स्थानेषु शिष्यनिवहैर्विनियुज्यमाना
विद्या गुरुं हि गुणवत्तरमातनोति ।
आदाय शुक्तिषु बलाहकविप्रकीर्णैः
रत्नाकरो भवति वारिभिरम्बुराशिः ॥ ९ ॥

किञ्च दीक्षिष्यमाणा (ङ) न क्रुध्यन्तीति रचितारं क्षत्रियमुपाददते (च)।

(ग) स्वयं प्रयोगात् अस्मादीनामिति शेषः। यवर्थे पञ्चमी। स्वयं प्रयोगमपेक्ष्येत्यर्थः। अन्तेवासिभिः शिष्यैः।

(घ) उपचिनोति वर्द्धयति।

स्थानेष्विति। स्थानेषु योग्यस्थलेषु शिष्यनिवहैः छात्रगणैः विनियुज्यमाना विशेषेण प्रयुज्यमाना विद्या गुरुम् आचार्यं गुणवत्तरम् अतिशयेन गुणवन्तम् आतनोति हि प्रख्यापयत्येव। तथाहि, अम्बुराशिः समुद्रः आदाय स्वस्मादेवेति शेषः शुक्तिषु मुक्तास्फोटेषु, मुक्तास्फोटः स्त्रियां शुक्तिरित्यमरः। बलाहकैर्मेघैः विप्रकीर्णैः विक्षिप्तैः वारिभिः जलैः मुक्तारूपेण परिणतैरिति भावः करणैः रत्नाकरः रत्नानाम् आकरः उत्पत्तिस्थानमित्यर्थः भवति। स्वातिनक्षत्रयोगे मेघवृष्टं जलं समुद्रमध्यवर्त्तिशुक्तिषु पतितं मौक्तिकं भवतीति प्रसिद्धिरत्रानुसन्धेया। प्रतिवस्तूपमालङ्कारः। उक्तञ्च दर्पणे। प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथगिति ॥९॥

(ङ) किञ्च अन्यच्च। दीक्षिष्यमाणाः यज्ञं करिष्यन्तः।

(च) उपाददते आश्रयन्ति।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पशुमेद्रः। अज्ज! सोहणं मन्तेसि। अस्सं वि किं वि पुच्छिदुकामो म्हि।

पुनःशेफः। किं तत्।

पशुमेद्रः। सव्वधा णिगूढं (छ) वि वाणराणं छग्गुणअं (ज) कधं अज्जेण पडिवण्णम् (झ)।

पुनःशेफः। सखे! सर्वमेतदयोध्यायात्रायां समाधिमयेन (ञ) चक्षुषा साक्षात्कृतत्रिभुवनवृत्तान्तस्य तातविश्वामित्रस्य मुखादश्रौषम्। (सर्वतोऽवलोक्य।) अये! प्राभातिकी (ट) भुवनस्य लक्ष्मीः (ठ)। तथाहि।

प्रत्यग्रज्वलितैः पतङ्गमणिभिर्नीराजिता भानवः
सावित्राः कुरुविन्दकन्दलरुचः प्राचीमलंकुर्वते।
प्रौढध्वान्तकरालितस्य वपुषश्छायाच्छलेन क्षणा-
दप्रक्षालितनिर्मलं जगदहो निर्मौकमुन्मुञ्चति ॥१०॥

(छ) निगूढम् अतिगुप्तम्।

(ज) षाड्गुण्यं षण्णां गुणानां सन्ध्यादीनां प्रयोग इत्यर्थः। सन्धिर्नाम विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणा इत्यमरः।

(झ) प्रतिपन्नं विदितम्।

(ञ) अयोध्यायात्रायां रामानयनार्थम् अयोध्यागमनकाले इत्यर्थः। समाधिमयेन योगमयेन।

(ट) प्रभातिकी प्रातःकालीना।

(ठ) लक्ष्मीः शोभा।

प्रत्यग्रेति। प्रत्यग्रज्वलितैः अभिनवं यथा तथा प्रदीप्तैः सूर्यकरस्पर्शादिति भावः पतङ्गमणिभिः सूर्यकान्तोत्पलैः नीराजिताः उत्तेजिताः इत्यर्थः अतएव कुरुविन्दस्य पद्मरागरत्नस्य कन्दलवत्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

पीत्वा भृशं कमलकुड्मलशुक्तिकोषा
दोषातनीं तिमिरदृष्टिमथ स्फुटन्तः ।
निर्यन्मधुव्रतकदम्बमिषादमन्ति
बिभ्रन्ति कारणगुणानिव मौक्तिकानि ॥११॥

अपिच ।

विकसितसंकुचितपुनर्विकस्वरेष्वम्बुजेषु दुर्लक्ष्याः ।
कलिकाः कथयति नूतनविकासिनीर्मधुलिहामर्घः ॥१२॥

नवाङ्कुरवत् रुक् प्रभा येषां तथाभूताः सावित्राः सौराः भानवः रश्मयः प्राचीं पूर्वां दिशम् अलंकुर्वते शोभयन्ति । अहो आश्चर्यं जगत् क्षणात् क्षणमात्रेण छायाम् अनातपं, छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपमित्यमरः । तच्छलेन तद्व्याजेन प्रौढेन उद्भटेन ध्वान्तेन तिमिरेण करालितस्य आच्छादितस्य वपुषः अवयवस्य अप्रक्षालितम् अथच निर्मलं निर्मोकं कञ्चुकम् उन्मुञ्चति त्यजति । अपह्नुतिरलङ्कारः । तदुक्तं दर्पणे । प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिरिति । शार्दूलविक्रीडितं वृत्तम् ॥१०॥

पीत्वेति । कमलानां पद्मानां कुड्मलानि कलिकाः ते एव शुक्तयः मुक्तास्फोटाः तासां कोषाः उदराणि दोषातनीं नैशीं तिमिरदृष्टिम् अन्धकाररूपां दृष्टिं भृशम् अत्यर्थं पीत्वा अथ अनन्तरं प्रातरिति भावः स्फुटन्तः विकसन्तः सन्तः निर्यन् निर्गच्छन् यः मधुव्रतकदम्बः भ्रमरवृन्दं तन्मिषात् तद्व्याजात् कारणगुणान् बिभ्रन्तीव दधानानीव मौक्तिकानि मुक्ताफलानि वमन्ति उद्गिरन्ति । कारणगुणाः कार्यगुणमारभन्त इति न्यायादिति भावः । अत्रापह्नुत्यनुप्राणितोत्प्रेक्षालङ्कारः । वसन्ततिलकं वृत्तम् ॥११॥

विकसितेति । मधुलिहां भ्रमराणाम् अर्घः पूजा समादर इति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(आदित्यमण्डलं निर्वर्ण्य ।)

कटुभिरपि कठोरचक्रवाकी-
त्करविरहज्वरशान्तिशीतवीर्यैः ।
तिमिरहतमयं महोभिरञ्जन्
जयति जगन्नयनौघमुष्णभानुः ॥१३॥

तदनुयानीहि मां समिदाहरणाय ।

पशुमेद्रः । अहं वि चत्तिअकुमारायं दंसणे उक्कण्ठिदोह्मि । ता कहेहि कहिं पेक्खामि ।

पुनःशेफः । (विहस्य ।) नन्वेतावेव यज्ञवाटमुत्तरेण

यावत्, मूल्ये पूजाविधावर्घ इत्यमरः । विकसितानि विकासं गतानि पुनः संकुचितानि रात्राविति भावः पुनः विकस्वराणि प्रफुल्लानि सूर्यकरस्पर्शादिति भावः तेषु अम्बुजेषु दुर्लक्ष्याः न वा एता इति लक्षयितुमशक्याः लोकानामिति शेषः कलिकाः कुड्मलानि नूतनविकासिनीः नवविकस्वराः कथयति सूचयति प्रकाशयतीति यावत् । पुरातनीषु मधुनो योगविरहात् भ्रमरास्तत्र न वसन्ति, नवासु च मधुयोगात् भ्रमराणां तत्रादर इति भावः । आर्याछन्दः ॥१२॥

कटुभिरिति । अयम् उष्णभानुः सूर्यः कटुभिरपि दैपत्तीक्ष्णैरपि कठोरः दारुणः दुर्विषह इत्यर्थः यः चक्रवाकोत्करानां चक्रवाकवृन्दानां विरहः तेन यः ज्वरः क्लेशः तस्य शान्त्या उपशमेन शीतं शीतलं सोम्यमित्यर्थः वीर्यं येषां तादृशैः महोभिः मयूखैः तिमिरहतम् अन्धकारविनष्टं जगतां नयनौघं नेत्रसमूहम् अञ्जन् अक्तं कुर्वन् विकाशयन्निति भावः जयति राजते । पुष्पिताग्रावृत्तम् । अयुजि न युगरेफतो यकारो युजिति नजौ जरगाश्च पुष्पिताग्रेति तल्लक्षणात् ॥१३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विहारभूमिषु (ड) क्रीडतः । तदुपेत्य निःशङ्कमवलोकय ।

(इति निष्क्रान्तौ ।

विष्कम्भकः (ढ) ।

(ततः प्रविशतो रामलक्ष्मणौ ।)

रामः । अहो विचित्रमिदमायतनं (ण) सिद्धाश्रमपदं नाम भगवतो गाधिनन्दनस्य ।

तत्तादृक्तृणपूलकोपनयनक्लेशाच्चिरद्वेषिभि-
र्मेध्या वत्सतरी विहस्य वटुभिः सोल्लुण्ठमालभ्यते ।
अप्येष प्रतनूभवत्यतिथिभिः सोच्छ्वासनासापुटै-
रापीतो मधुपर्कपाकसुरभिः प्राग्वंशजन्मानिलः ॥१४॥

(ड) यज्ञवाटं यागभूमिम् उत्तरेण यागभूमेरुत्तरस्यां दिशीत्यर्थः । विहारभूमिषु विचरणप्रदेशेषु ।

(ढ) विष्कम्भकः । तदुक्तं दर्पणे । वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः । संक्षेपोक्तिश्च विष्कम्भ आदावङ्कस्य दर्शितः । मध्येन मध्यमाभ्यां वा पताकाभ्यां सम्प्रयोजित इति ।

(त) आयतनं स्थानम् ।

तदिति । तस्य तादृशः तृणपूलकस्य तृणराशेः उपनयनम् आहरणं वत्सतरीणां प्रासार्थमिति भावः तेन यः क्लेशः तस्मात् चिरद्वेषिभिः सततविरक्तैरिति यावत् वटुभिः मुनिबालकैः विहस्य हास्यं कृत्वा मेध्या पवित्रा वत्सतरी द्विहायना गौः सोल्लुण्ठं सोपहासं यथा तथा आलभ्यते हन्यते । आङ्पूर्वकस्य लभेर्मारणार्थत्वात् । वत्सतरीहननम् अतिथिपरिचर्यार्थं विहितम् । तथा च स्मृतिः । महोक्षं वा वत्सतरीं दद्यादतिथये गृहीति । एष प्राग्वंशजन्मानिलः हविर्गृहे पूर्वजातः अनिलः वायुः अपि, प्राग्वंशः प्राग्घविर्गेहा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अच्छ्रयः । आर्य! किलाह्वेव ।

देवः कौस्तुभकिञ्जल्कनीलोत्पलमसौ हरिः ।
स्वयं किमपि तत्तेपे तपः कपटवामनः ॥१५॥
इत्थमेतन्महातीर्थमध्यासीना द्विजातयः ।
अकुतोभयसञ्चाराः षट्कर्माणि प्रयुञ्जते ॥१६॥

(अन्यतश्च दृष्ट्वा ।) आर्य!

पश्यैते पशुबन्धवेदिवलयैरौदुम्बरीदन्तुरै-
र्नित्यव्यञ्जितगृह्यतन्त्रविधयो रम्या गृहस्थाश्रमाः ।

दित्यमरः । मधुपर्कस्य पाकेन सुरभिः सुगन्धः अतिथिभिः अभ्यागतैः सोच्छ्वासानि उच्छ्वासयुक्तानि नासापुटानि तैः आपीतः सम्यक् पीतः आघ्रात इति यावत् प्रतनूभवति खल्लीभवति । शार्दूलविक्रीडितं वृत्तम् ॥१४॥

देव इति । कौस्तुभः नारायणवक्षःस्थितमणिविशेषः एव किञ्जल्कः केसरः यस्य तादृशं, किञ्जल्कः केसरोऽस्त्रियामित्यमरः । नीलोत्पलं तत्स्वरूप इत्यर्थः । रूपकमलङ्कारः । असौ देवो हरिः विष्णुः कपट-वामनः मायाकल्पितखर्वपुरुषः सन् स्वयं किमपि अनिर्वचनीयं तत् तपः चान्द्रायणादिकं व्रतं तेपे चचार । अनुष्टुब्वृत्तम् ॥१५॥

इत्थमिति । द्विजातयः ब्राह्मणाः इत्थम् अनेन प्रकारेण वामन-तपश्चरणेनेति यावत् एतत् क्षेत्रमिति शेषः महातीर्थम् अतीव पुण्य-स्थानम् अध्यासीनाः अधिवसन्तः अकुतोभयः सञ्चारः येषां तथाभूताः निःशङ्कसञ्चारिणः सन्तः षट्कर्माणि, अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव ब्राह्मणः परिकल्पयेदिति । मनूक्तानि अध्यापनादीनि प्रयुञ्जते प्रकुर्वन्ति । अनुष्टुब्वृत्तम् ॥१६॥

पश्येति । पश्य अवलोकय । एते गृहस्थाश्रमाः गार्हस्थ्यधर्माः पशुबन्धो यागविशेषः यागार्थं पशुबन्धनं वा तस्य वेदिः परिष्कृता

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यत्रामी गृहमेधिनः प्रचलितस्वाराज्यसिंहासना
वैतानेषु क्रपीटयोनिषु पुरोडाशं वषट्कुर्वते ॥१७॥

रामः । (सहर्षस्मितम् ।) वत्स ! इतोऽपि तावत् कृतार्थ-याव(त)श्चक्षुषी । प्रसन्नपावनो(थ)ऽयमृषीणां समवायः(द) । इदममीषाम्

पूरयित्वेव सर्वाङ्गमतिरिक्ताः शिराततीः ।
जटारूपेण बिभ्राणैः शिरोभिर्गहनं सदः ॥१८॥

भूमिः, वेदिः परिप्लुता भूमिरित्यमरः । तद्वलयैः तत्समूहैः औदुम्बरीभिः उदुम्बरकाष्ठनिर्मितसर्पफणाकारयज्ञपात्रविशेषैः दन्तुरैः उन्नतानतैः सङ्गिः नित्यं सततं व्यञ्जिता प्रकटिता गृह्यतन्त्रविधयः गृह्यसूत्रोक्तविधानानि येषु तथाविधाः अतएव रम्याः मनोहारिणः दृश्यन्त इति शेषः । यत्र येषु गृहाश्रमेषु अमी गृहमेधिनः गृहाणि दाराः, न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते इति शास्त्रात् । तैः मेधन्ते सङ्गच्छन्त इति तथोक्ताः सपत्नीका गृहिण इत्यर्थः प्रचलितं प्रकम्पितं स्वाराज्यस्य स्वर्गराज्यस्य सिंहासनं येभ्यः तथाभूताः सन्तः यागस्य स्वर्गफलकत्वादिति भावः, वैतानेषु यज्ञीयेषु क्रपीटयोनिषु अग्निषु, क्रपीटयोनिज्वलन इत्यमरः । पुरोडाशं हव्यं वषट्कुर्वते जुह्वति । शार्दूलविक्रीडितं वृत्तम् ॥१७॥

(त) कृतार्थयावः सफलीकुर्वः ।

(थ) प्रसन्नपावनः प्रसन्नः सौम्यः पावनः पवित्रताजननश्चेत्यर्थः ।

(द) समवायः समाजः ।

• पूरयित्वेति । अमीषाम् ऋषीणां सदः सभा गोष्ठीत्यर्थः सर्वाङ्गं पूरयित्वेव अतिरिक्ताः शिराततीः शिरासमूहान् जटारूपेण बिभ्राणैः दधानैः शिरोभिः गहनं निविड़ं सञ्जातमिति शेषः । अनुष्टुब्वृत्तम् ॥१८॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किञ्च ।

तपःक्लशतरैरङ्गैः स्रष्टुमाकारितैरिव ।
सायं प्रातरमी पुण्यमग्निहोत्रं प्रयुञ्जते ॥१९॥

(इति परिक्रामतः ।)

लक्ष्मणः । (सहासम् ।) आर्य ! रमणीयमितो वर्तते ।

बालेयतण्डुलविलोपकदर्थिताभि-
रेताभिरग्निशरणेषु सधर्मिणीभिः ।
तत्त्रासहेतुमपि दण्डमुदस्यमान-
माघ्रातुमिच्छति मृगे मुनयो हसन्ति ॥२०॥

तप इति । अमी ऋषयः तपोभिश्चान्द्रायणादिभिः क्लशतरैः अतीव क्लशैरित्यर्थः अस्थिचर्मावशिष्टैरिति भावः अतएव स्रष्टुं निर्मातुम् आकारितैरिव आहूतैरिव आनीतैरिवेति यावत् अङ्गैः उपलक्षिता इति विशेषणे तृतीया । यथा चित्रलिखनादौ प्रथमं रेखा क्रियते ततो कर्णिकाभिः पूरणं क्रियते । तद्वत् एतानि अस्थि-चर्मसमानि अङ्गानि रक्तमांसादिभिः पूरयितुमिवेति भावः सायं प्रातः पुण्यं पवित्रम् अग्निहोत्रं यज्ञविशेषं प्रयुञ्जते कुर्वते । सायं जुहुयात् प्रातर्जुहुयादिति श्रुतेः सायं प्रातरुभयकालीयहोमविधानात् । अनुष्टुब्वृत्तम् ॥१९॥

बालेयेति । बालेयस्य बलिः पूजा, बलिः पूजोपहारयोरित्यमरः । तस्मै हितं बालेयं तस्य तण्डुलस्य विलोपेन कवलेन कदर्थिताभिः विरक्ताभिः एताभिः सधर्मिणीभिः सहधर्मचारिणीभिः पत्नीभिरित्यर्थः अग्नि-शरणेषु होमगृहेषु मृगे तस्य मृगस्य त्रासहेतुमपि भयहेतुमपि उदस्य-मानम् उत्क्षिप्यमाणं दण्डम् आघ्रातुमिच्छति सति मुनयः हसन्ति । पलायनं दूरापास्तं दण्डमपि ग्रासदानार्थमुत्क्षिप्यमाणं मन्यमानो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः ।(परिक्रामन् सकौतुकानुरागम् ।) वत्स ! इतस्तावत् ।

आर्द्रप्रसूतिरियमङ्गनयज्ञवेदि-
र्नेदिष्ठमेव हरिणी तृणुते तृणं च ।
वत्सीयतापसकुमारकरोपनीत-
नीवारनिर्वृतमपत्यमवेक्षते च ॥२१॥

अपिच ।

विष्वक्तपोधनकुमारसमर्प्यमाण-
श्यामाकतण्डुलहृतां च पिपीलिकानाम् ।
श्रेणीभिराश्रमपथाः प्रथमानचित्र-
पत्रावलीवलयिनो मुदमुद्वहन्ति ॥२२॥

जिघ्रतीति हासकारणं तपोवनस्य शान्तत्वेन निःशङ्कत्वमिति च ध्वन्यते । वसन्ततिलकं वृत्तम् ॥२०॥

आर्द्रेति । आर्द्रा अभिनवा प्रसूतिः प्रसवो यस्याः तथोक्ता सद्यःप्रसूतेत्यर्थः इयं हरिणी अङ्गनयज्ञभूमिनेदिष्ठमेव अजिरयज्ञवेदिसन्निहितमेव तृणं तृणुते कवलयति च, वत्सीया वत्सेभ्यः हिताः ये तापसकुमाराः तेषां करैः उपनीतेन दत्तेन नीवारेण धान्यविशेषेण निर्वृतं तृप्तम् अपत्यं वत्सम् अवेक्षते च पश्यति च । वसन्ततिलकं वृत्तम् ॥२१॥

विष्वगिति । आश्रमपथाः तपोवनमार्गाः तपोधनकुमारैः ऋषिबालकैः समर्प्यमाणान् दीयमानान् श्यामाकतण्डुलान् श्यामाकाख्यतृणजातान् तण्डुलान् हरन्तीति तथोक्तानां पिपीलिकानां श्रेणीभिः विष्वक् समन्तात् प्रथमानाः विस्तारं गच्छन्त्यः चित्राः मनोज्ञाः या पत्रावल्यः पत्ररचनाविशेषाः तासां वलयं समूहः तद्वन्तः सन्तः मुदम् आनन्दम् उद्वहन्ति । वसन्ततिलकं वृत्तम् ॥२२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । अहो पशूनामप्यपत्यवात्सल्यम् (ध) । अहो शिशूनामपि सत्कर्मताच्छील्यम् (न) ।

रामः । (अन्यतोऽवलोक्य ।)

मुनिविनियोगविलूनप्ररूढमृदुशाद्वलानि बर्हींषि ।
गोकर्णतर्णकोऽयं तर्णीत्युपकण्ठकच्छेषु ॥ २३ ॥

(इति परिक्रामतः ।)

लक्ष्मणः । आर्य !

इयमेभिरालवालैः पदे पदे ग्रन्थिलासु कुल्यासु ।
तीव्रतमा जलवेणिः प्रवहति विश्रम्य विश्रम्य ॥२४॥

(ध) अपत्यवात्सल्यं सन्तानेषु स्निग्धता ।

(न) सत्कर्मेति सत्सु कर्मसु ताच्छील्यं तत्स्वभावत्वम् ।

मुनीति । अयं गोकर्णतर्णकः मृगशावकः, गोकर्णोऽश्वतरेऽपि स्यान्मृगसर्पविशेषयोरिति मेदिनी । तर्णको बालकः समाविल्यमरः । उपकण्ठकच्छेषु सन्निहितनदीतीरेषु, कच्छो नदीतटेऽनूपे इति विश्वः । मुनीनां विनियोगार्थं यज्ञकर्मणि व्यवहारार्थमित्यर्थः विलूनानि उत्पाटितानि ततः प्ररूढानि जातानि मृदूनि कोमलानि शाद्वलानि हरितानि येषां तादृशानि, शाद्वलं शाद्वहरिते इत्यमरः । बर्हींषि कुशान् खादति । आर्याछन्दः ॥२३॥

इयमिति । इयं तीव्रतमा अतिवेगवती जलवेणिः जलप्रवाहः वेणीरूपं जलं वा सूक्ष्मप्रवाहत्वेन कुटिलगामित्वेन चेति भावः आलवालैः पदे पदे स्थाने स्थाने ग्रन्थिलासु पर्ववतीषु स्रोतोविघ्नकरीष्विति भावः कुल्यासु क्षुद्रसरित्सु, कुल्याल्पा क्षुद्रसा सरिदित्यमरः । विश्रम्य विश्रम्य प्रवहति वहतीत्यर्थः । प्रतीयमानोत्प्रेक्षा । आर्याछन्दः ॥२४॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । वत्स ! साधु दृष्टम् ।

आलवालवलयेषु भूरुहां
मांसलं तिमितमन्तरान्तरा ।
केरलीचिकुरभङ्गिभङ्गुरं
सारणीषु पुनरम्बु दृश्यते ॥२६॥

तदेहि । भगवतीं कौशिकीमालोकयन्तौ मुहूर्तमात्रमात्मानं पुनीवहे । (परिक्रम्यावलोक्य च ।) क्वचित्सांग्रामिकोऽपि विशेषो नैसर्गिकमतिशेते । तथाहि ।

जडस्वच्छस्वादुप्रकृतिरपहृतेन्द्रियगणो
गुणो यद्यप्यासामयमयुतसिद्धो विजयते ।
तथाप्युत्कर्षाय स्फुरति सरितामाश्रमसदा-
मिदानीं वानीरद्रुमकुसुमजन्मा परिमलः ॥२६॥

आलेति । भूरुहां वृक्षाणाम् आलवालवलयेषु वृक्षमूलवर्त्ति-जलाधारसमूहेषु अन्तरा अन्तरा मध्ये मध्ये मांसलं प्रचुरं स्निग्धं निश्चलञ्च सारणीषु स्वल्पनदीविशेषु अम्बु जलं पुनः किन्तु केरली केरलदेशीया कामिनी तस्यास्चिकुराणां केशानां भङ्गिवत् भङ्गुरं कुटिलं दृश्यते । केरलीनां केशाः कुटिला इति प्रसिद्धिः । स्वल्पनद्याञ्च सारणीति विश्वः । रथोद्धतावृत्तं, रात् परैर्नरलगै रथोद्धतेति तल्लक्षणात् ॥२५॥

जड़ेति । जड़ा शीता स्वच्छा निर्मला स्वादुः सुस्वादा प्रकृतिः स्वभावो यस्य तथाभूतः अयम् अयुतसिद्धः अयोगसिद्धः गुणान्तरा-मिश्रेण सिद्ध इत्यर्थः स्वाभाविक इति यावत् आसां सरितां नदीनां गुणः यद्यपि विजयते सर्वोत्कर्षेण वर्त्तते तथापि इदानीम् आश्रम-सदाम् आश्रमवासिनाम् उत्कर्षाय परितोषायेत्यर्थः वानीरद्रुमाणां

CC-0. Bhagavad Ramanuja National Research Institute, Mēlukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । आर्य ! पुरस्तादनुकौशिकीतीर(प)मालोकय

तैर्मेधाजननव्रतप्रणयिभिर्व्यूहैर्वटूनामियं
सिक्ता नित्यवसन्तविभ्रमवती रम्या पलाशावली ।
एतस्यां हरिणारिपाणिजसृणिश्रेणिश्रियः कोरका
गोपायन्ति तपोवनं वनकरिक्रीडाकराकर्षणात् ॥२७॥

नदीतीरवर्त्तिनां वेतसतरूणां कुसुमेभ्यः जन्म उत्पत्तिर्यस्य तादृशः परिमलः सौरभं पूर्वोक्तगुणमिश्रित इति भावः स्फुरति प्रसरति । शिखरिणीवृत्तम् ॥२६॥

(प) पुरस्तात् अग्रतः । अनुकौशिकीतीरं कौशिक्या नद्याः तीरसमीपम् ।

तैरिति । मेधा धारणावती बुद्धिः, धीर्धारणावती मेधेत्यमरः । तस्या जननम् उत्पादनं यत् व्रतं नियमः तत्प्रणयिभिः तदाकाङ्क्षिभिरित्यर्थः तैः वटूनां मुनिबालकानां व्यूहैः समूहैः सिक्ता जलैरार्द्रीकृता अतएव नित्यः सन्ततः यो वसन्तविभ्रमः वासन्तिकविलासः वासन्तिकत्वेन विशिष्टभ्रमो वा तद्वती इयं पलाशावली पलाशवृक्षश्रेणी रम्या मनोज्ञा दृश्यते इति शेषः । एतस्यां पलाशावल्यां हरिणारिः मृगशत्रुः सिंहः तस्य पाणिजा नखरा एव सृणिश्रेणयः अङ्कुशावल्यः तासां श्रीरिव श्रीर्येषां तथोक्ताः कोरकाः कलिकाः, कलिका कोरकः पुमानित्यमरः । वनकरिणाम् आरण्यगजानां क्रीडया यत् करैः शुण्डादण्डैः आकर्षणं तस्मात् तपोवनं गोपायन्ति रक्षन्ति । वनकरिणस्तादृशीं पलाशकलिकां सन्ततां दृष्ट्वा सिंहनखरान् मन्यमानाः पलायन्ते इति भावः । मेधाजननव्रतं छन्दोब्रह्मचारिभिः क्रियते तत्र जलेन पलाशमूलसेचनं विहितमिति वेदविदां समाचारः प्रसिद्धः । शार्दूलविक्रीडितं वृत्तम् ॥२७॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये ।)

रामभद्र ! किंयच्चिरमवलोकनेन कृतार्थीक्रियन्ते (फ) तपोवनविहारभूमयः । संप्रति हि

परिणमयति ज्योतिर्वृत्त्या यजूंषि रुचां पतिः
किमपि शमिनः सावित्राख्यं रहस्यमुपासते ।
गुरुरयमनुष्ठास्यन्माध्यन्दिनीं सवनक्रिया-
मिह मखविधौ नेदीयांसं भवन्तमपेक्षते ॥२८॥

रामः । (अश्रुतमभिनीय सानुरागम् ।)

वारांस्त्रीणभिषुण्वते विदधते वन्यैः शरीरस्थिती-
रैणेय्यां त्वयि संविशन्ति वसते चापि त्वचस्तारवीः ।

(फ) कृतार्थीक्रियन्ते सफलीक्रियन्ते ।

परिणमयतीति । रुचां पतिः प्रभाकरः ज्योतिर्वृत्त्या तेजोरूपेण यजूंषि यजुर्वेदान् परिणमयति परिणतानि करोति यजूरूपं दधातीति भावः । तथाच पुराणम् । ऋङ्मयः प्रातरादित्यो मध्याह्ने च यजुर्मयः । सायं सामयश्चेति त्रयीमय उदाहृत इति । शमिनः मुनयः किमपि अनिर्वचनीयं सावित्राख्यं सावित्रनामधेयं रहस्यं तत्त्वम् उपासते आराधयन्ति । अयं गुरुः आचार्यः विश्वामित्रः माध्यन्दिनीं माध्याह्निकीं सवनक्रियां स्नानविधिम् अनुष्ठास्यन् इह अस्मिन् मखविधौ यागविधाने भवन्तं नेदीयांसं निकटवर्त्तिनम् अपेक्षते प्रतीक्षते । हरिणीवृत्तं, नसमरसला गः षड्वेदैर्हयैर्हरिणी मतेति तल्लक्षणात् ॥२८॥

वारानिति । धन्या इत्यध्याहार्यं धन्याः पुण्यवन्तः जनाः मुनय इत्यर्थः त्रीन् वारान् अभिषुण्वते स्नान्ति, वन्यैः वनजातैः फलादिभिः शरीरस्थितीः प्राणयात्राः विदधते कुर्वन्ति, ऐणेय्यां मृग-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्पश्यन्ति च धाम नाभिपततो यच्चार्मणे चक्षुषी
धन्यानां विरजस्तमा भगवती चर्येयमाह्लादते ॥२९॥

(नेपथ्ये पुनस्तदेव पठ्यते ।)

रामः । (श्रुत्वा ससंभ्रममूर्ध्वमवलोक्य च ।) कथं गगनमध्यमध्यारूढो निदाघदीधितिः (व) । वत्स ! तदेहि । यज्ञवाटमधिष्ठाय क्रमेण कृताह्निकस्य भगवतः कौशिकस्य प्रत्यनन्तरीभावः (भ) ।

(इति परिक्रामतः ।)

लक्ष्मणः । (सर्वतो दृष्ट्वा ।) आर्य !

उद्दामद्युमणिद्युतिव्यतिकरप्रक्रीडदर्कोपल-
ज्वालाजालजटालजाङ्गलतटीनिष्कूजकोयष्टयः ।

सम्बन्धिन्यां त्वचि चर्मणि संविशन्ति स्वपन्ति, तारवीः तरुसम्बन्धिनीः त्वचः वल्कलानीत्यर्थः वसन्ते च आच्छादयन्ति च, चार्मणे चर्ममये चक्षुषी यत् न अभिपततः न गच्छतः चर्मचक्षुषा यत् न दृश्यते इति भावः तत् धाम तेजः परमात्मतत्त्वमित्यर्थः पश्यन्ति च अतः धन्यानाम् इयं भगवती सर्वसामर्थ्यविधायिनीति भावः विरजस्तमाः रजस्तमोभ्यामसृष्टेत्यर्थः सात्त्विकीति यावत् चर्या अनुष्ठानमित्यर्थः आह्लादते सुखयतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥२९॥

(व) निदाघदीधितिः उष्णरश्मिः ।

(भ) प्रत्यनन्तरीभावः समीपे वार्त्तावहे इत्यर्थः ।

उद्दामेति । अमूः मध्याह्ने शून्याः सौरतेजःप्रतिघातात् दर्शनाक्षमा इति यावत् दिशः उद्दामा उत्कटा या द्युमणिद्युतिः सूर्यतेजः तस्याः व्यतिकरेण सङ्गेन प्रक्रीडतां विहरतां ज्वलतामिति यावत् अर्कोपलानां सूर्यकान्तमणीनां ज्वालाजालेन तेजःसमूहेन जटाला

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भौमोष्मप्लवमानसूर्यकिरणक्रूरप्रकाशा दृशो-
राविष्कर्म समापयन्ति धिगमूर्मध्याङ्गशून्या दिशः ॥२०॥
अन्तिकतमा (म) चेयं यज्ञवाटभूमिः । तदेतदेव न्यग्रोध-
च्छायामण्डप(य)मध्यासीना ऋत्विजः प्रत्यवेक्षावहे (र) ।
गलितयौवने (ल) पुनरहनि भगवन्तं द्रक्ष्यावः ।

रामः । एवमस्तु ।

(इति परिक्रम्य नाट्येनोपविशतः ।)

लक्ष्मणः । (पार्श्वतोऽवलोक्य ।) आर्य !

संवद्धा या जाङ्गलतटी निर्जलप्रदेशः, जङ्गलं निर्जलस्थानमिति धरणिः। तत्र निष्कूजाः कूजनरहिता निःशब्दा इति यावत् कोयष्टयः टिट्टिभाः यास्तु तथोक्ताः, कोयष्टिकटिट्टिभक इत्यमरः । तथा भौमे पार्थिवे उष्णत्वे प्लवमानैः सन्तरङ्गैः सूर्यकिरणैः क्रूराः दारुणाः प्रकाशाः यासां तथाभूताः सत्यः दृशोः नेत्रयोः आविष्कर्म आविष्कारं प्रासारण-मित्यर्थः समापयन्ति विघ्नन्तीत्यर्थः । धिक् निन्दायां, धिङ्निर्भर्त्सन-निन्द्योरित्यमरः । एता दिशः निन्दामीत्यर्थः । मध्येऽङ्गि शून्या दिश इति पाठान्तरम् । आविष्कर्मेत्यत्र आयुष्कर्मेति पाठे आयुष्कर्म प्राणधारणोपयोगिव्यापारसामर्थ्यमित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥२०॥

(म) अन्तिकतमा समीपवर्त्तिनी ।

(य) न्यग्रोधेति न्यग्रोधः वटः, न्यग्रोधो बहुपाद् वट इत्यमरः। तस्य छाया एव मण्डपं गृहं तत् ।

(र) प्रत्यवेक्षावहे पश्यावः ।

(ल) गलितयौवने अतीतयौवने शान्ते इति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मध्ये व्योम क्रीडयित्वा मयूखान्
भानोर्बिम्बे लम्बमाने क्रमेण ।
खैरं खैरं मूलतः पादपानां
पश्य छायाः कश्चिदाकर्षतीव ॥३१॥

रामः । (समन्तादवलोक्य ।) वत्स ! मध्यंदिनमतिक्रान्त(व)-मिति दिनमप्यतिक्रान्तमेव । पश्य ।

गगनशिखरमुदयाद्रेरधिरूढाः कष्टमर्करथहरयः ।
अस्तमहीधरमधुना झटिति सुखेनावरोहन्ति ॥३२॥

लक्ष्मणः । आर्य ! नूनमद्य रक्षांसि परापतिष्यन्ति (श) । यदयमध्वरवेदिकासन्निधानं ते (ष) शुनःशेफमुखेन भग-

---

मध्ये इति । मध्ये व्योम आकाशमध्ये मयूखान् करान् क्रीड़यित्वा सञ्चार्य भानोः सूर्यस्य बिम्बे मण्डले क्रमेण लम्बमाने पश्चिमाशामभिपततीत्यर्थः कश्चित् जनः पादपानां वृक्षाणां छायाः मूलतः मूलदेशात् खैरं खैरं मन्दं मन्दम् आकर्षतीव आकृष्य नयतीव पश्य अवलोकय । शालिनीवृत्तं, मात्तौ गौ चेच्छालिनी वेदलोकैरिति तल्लक्षणात् ॥३१॥

(व) अतिक्रान्तम् अतीतम् ।

गगनेति । उदयाद्रेः उदयाचलात् गगनशिखरम् अन्तरीक्षशिरोभागं कष्टं यथा तथा अधिरूढाः आरूढाः अर्कस्य सूर्यस्य रथहरयः स्यन्दनाश्वाः अधुना झटिति सुखेन अक्लेशेन अस्तमहीधरम् अस्ताचलम् अवरोहन्ति गच्छन्ति उन्नतिरेव क्लेशावहा अवनतिस्तु अनायाससाध्येति भावः । आर्यावृत्तम् ॥३२॥

(श) परापतिष्यन्ति आगमिष्यन्ति ।

(ष) अयं विश्वामित्रः । अध्वरवेदिकासन्निधानं यज्ञवेदेः समीपस्थितिमित्यर्थः । ते तव ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

धानुपाध्यायः प्रशास्ति (स) ।

रामः । (शरीषाहङ्कारम् ।) वत्स ! यद्येवं (ह) स्यात्

कल्पान्तकर्कशकृतान्तभयङ्करं मे
निष्प्रन्नतः क्रतुविघातकृताममीषाम् ।
नीराक्षसां वसुमतीमपि कर्तुमद्य
पुण्याहमङ्गलमिदं धनुरादधातु ॥३३॥

लक्ष्मणः । (विहस्य ।) कथं रजनीचरचक्रविनाशोत्कण्ठाविसंस्थुलमार्यहृदयमदीर्घदर्शिनं भगवन्तं कौशिकमपि सम्भावयति (च) ।

(स) उपाध्यायः आचार्यः । प्रशास्ति आज्ञापयति ।

(ह) यदि एवं राक्षसानां परापतनमित्यर्थः ।

कल्पान्तेति । कल्पान्ते प्रलयसङ्कटे कर्कशः दारुणः यः कृतान्तः यमः तद्वत् भयङ्करं भीषणं क्रतुविघातकृतां यज्ञविघ्नकारिणाम् अमीषां राक्षसानां कर्मणि षष्ठी, निष्प्रन्नतः नाशयतः मे मम इदं धनुः अद्य वसुमतीं पृथ्वीं नीराक्षसां राक्षसरहितां कर्तुं पुण्याहमङ्गलं शुभदिनकर्त्तव्यमङ्गलाचरणम् आदधातु करोतु । माङ्गल्यविधानेनाद्य धनुर्धारयामीति भावः ॥३३॥

(च) रजनीति रजनीचराणां राक्षसानां चक्रस्य समूहस्य विनाशाय या उत्कण्ठा व्यग्रता तया विसंस्थुलं विवशं व्याकुलमित्यर्थः अतएव अदीर्घदर्शिनम् अदूरदर्शिनमित्यर्थः । आर्यहृदयम् आर्यस्य रामस्य हृदयम् । अयं भावः, भगवान् कौशिकः राक्षसविघ्नमचिरात् 'रामेण विनाश्यते' इति जानन्नपि कथं तदर्थमुत्कण्ठातिशयं व्यनक्तीत्यस्यादीर्घदर्शित्वमिति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अविद्याबीजविध्वंसादयमार्षेण चक्षुषा ।
कालौ भूतभविष्यन्तौ वर्तमानमवीविशत् ॥३४॥

रामः । किमुच्यते तत्रभवान् विश्वामित्रः ।

प्रज्ञातब्रह्मतत्त्वोऽपि स्वर्गीयैरेष खेलति ।
गृहस्थसमयाचारप्रक्रान्तैः सप्ततन्तुभिः ॥३५॥

अपिच ।

आर्द्रीकृतो विनयनम्रमहेन्द्रमौलि-
मन्दारदामममकरन्दरसैरिवायम् ।
प्रक्रान्तकुण्डलितनूतनभूतसर्ग-
स्त्रैशङ्कवं चरितमद्भुतमाततान ॥ ३६ ॥

अविद्येति । अयं विश्वामित्रः अविद्या अज्ञानं तस्या बीजं मूलं रजस्तमसोरन्यतरं तस्य विध्वंसात् विनाशात् सत्त्वोद्रेकादिति भावः आर्षेण ज्ञानमयेन चक्षुषा भूतभविष्यन्तौ कालौ वर्त्तमानं कालं अवीविशत् प्रवेशयामास । त्रिकालज्ञोऽयमिति भावः । अनुष्टुब्-वृत्तम् ॥३४॥

प्रज्ञातेति । प्रकर्षेण सम्यगित्यर्थः ज्ञातं ब्रह्मतत्त्वं परमार्थतत्त्वं येन तथोक्तः अपि एषः विश्वामित्रः स्वर्गीयैः स्वर्गहितैः स्वर्गसाधनै-रिति यावत् गृहस्थानां समयः नियमः तस्य आचारेण प्रक्रान्तैः प्रारब्धैः सप्ततन्तुभिः यज्ञैः, सप्ततन्तुर्मखः क्रतुरित्यमरः । खेलति क्रीडति । आत्मतत्त्वविदां मुक्तावधिकारात् स्वर्गफलकक्रियाचरणम् अनात्मवेदिष्टहिकर्त्तव्यं क्रीडैव, तत्फलाकाङ्क्षाविरहादिति भावः । अनुष्टुब्वृत्तम् ॥३५॥

आर्द्रीकृत इति । अयं विश्वामित्रः विनयेन नम्रस्य विनतस्य महेन्द्रस्य मौलिमन्दारदाम्नः शिरःस्थितमन्दारकुसुममालायाः मकरन्दाः कौसुमा रसाः तैः आर्द्रीकृत इव शान्ततां नीत इति भावः अतएव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (पुरोऽवलोक्य सहर्षम् ।)

आभिरध्वरचर्याभिः श्रौतमर्थं कृतार्थयन् ।
अये कुलपतिः सोऽयमित एवाभिवर्त्तते ॥ २७ ॥

(ततः प्रविशति दीक्षितवेषो (क) विश्वामित्रः ।)

रामः । (निर्वर्ण्य । सबहुमानम् ।) वत्स लक्ष्मण ! पश्य ।

कर्मणः श्रूयमाणस्य व्यञ्जनैरधिकोज्ज्वलाम् ।
तपस्तेजोमयीं लक्ष्मीमद्य पुष्णाति मे गुरुः ॥ २८ ॥

विश्वामित्रः । (परिक्रामन् सहर्षम् ।) हन्त । कृतकृत्यप्राय-मात्मानं पश्यामः । यतः ।

प्रक्रान्तः प्रारब्धः कुण्डलितः सङ्कोचितः नूतनः भूतसर्गः प्राणिसृष्टि-र्येन तथाभूतः सन् देवेन्द्रप्रणिपातेन त्रिशङ्कोः स्वर्गारोहणव्यापात-जनितकोपात् प्रारब्धं नूतनसर्गं परित्यजन्निति भावः अद्भुतम् आश्चर्यं त्रैशङ्कवं त्रिशङ्कुसम्बद्धं चरितम् आख्यानम् आततान विस्तारयामास । वसन्ततिलकं वृत्तम् ॥२६॥

आभिरिति । अये सोऽयं कुलपतिः आचार्यः आभिः अध्वर-चर्याभिः यज्ञकर्मभिः श्रौतं श्रुतिविहितम् अर्थं तत्त्वं कृतार्थयन् सफलयन् आचरन्नित्यर्थः इत एव अत्रैव अभिवर्त्तते आगच्छति । अनुष्टुब्वृत्तम् ॥२७॥

(क) दीक्षितवेषः कृतयज्ञवेषः ।

कर्मण इति । अद्य मे मम गुरुः आचार्यः विश्वामित्रः श्रूय-माणस्य श्रुतिविहितस्य कर्मणः व्यञ्जनैः चिह्नैः तत्तद्यज्ञीयपरि-च्छदैरिति भावः अधिकोज्ज्वलाम् अधिकदीप्तिमतीं तपसः यत् तेजः ज्योतिः तन्मयीं लक्ष्मीं श्रियं पुष्णाति धारयति । अनुष्टुब्वृत्तम् ॥२८॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निर्वृत्तो बहु तावदध्वरभुजामातर्पणोऽयं विधि-
र्दायादेन समं सुकेतुदुहिता चाद्यैव घानिष्यते ।
पाणौकृत्य पुनर्वृषध्वजधनुर्भङ्गैकशुल्कां वधू-
मैक्ष्वाके सुरकार्यदिक्षु चलति स्वास्थ्यं विधाताग्रहे ॥३९॥

(रामलक्ष्मणावुत्थायोपसर्पतः ।)

विश्वामित्रः । (रामप्रतिचिरं निर्वर्ण्य सस्नेहकौतुकम् ।)

एष वैहारिकं वेषमादधानो धनुर्धरः ।
तत्त्वमान्तरमस्माकममृतैरिव लिम्पति ॥४०॥

उभौ । (उपसृत्य ।) भगवन् ! दाशरथी रामलक्ष्मणाव-
भिवाद्येते ।

निर्वृत्त इति । अध्वरभुजां देवानाम् आतर्पणः सम्यक् तृप्ति-
जनकः अयं विधिः यज्ञ इत्यर्थः तावत् साकल्येन सम्यगित्यर्थः, याव-
त्तावच्च साकल्ये इत्यमरः । निर्वृत्तः सम्पन्नः । अद्य सुकेतुदुहिता
ताड़का दायादेन दायं पैतृकं धनम् आदत्ते इति दायादः पुत्रादिः
तेन समं सह घानिष्यते एव अवश्यमेव विनाशयिष्यते रामेणेति शेषः ।
पुनः किन्तु वृषध्वजस्य हरस्य धनुर्भङ्ग एकः अद्वितीयः शुल्कः पणः
यस्याः तथोक्तां वधूं जानकीमित्यर्थः पाणौकृत्य हस्तेकृत्य तद्धनुर्भङ्गेन
परिणीयेत्यर्थः ऐक्ष्वाके रामे सुरकार्याय या दिशः दक्षिणा इति भावः
तासु चलति गच्छति रावणवधार्थं दक्षिणां दिशां प्रयाति सतीत्यर्थः
स्वास्थ्यं स्वस्थतां विधाताग्रहे करिष्यामः सुस्था भविष्याम इति भावः ।
शार्दूलविक्रीडितं वृत्तम् ॥३९॥

एष इति । एष धनुर्धरः वैहारिकं विहारसम्बन्धिनं क्रीडार्थमित्यर्थः
वेषम् आदधानः परिदधानः रामः अस्माकम् आन्तरं तत्त्वम् अन्तः-
करणम् अमृतैः सुधाभिः लिम्पतीव लिप्तं करोतीव । अनुष्टुब्वृत्तम्
॥४०॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः। (आशिङ्ग्य।) वत्सौ! शिमन्यदाशास्महे(ख)।
युवाभ्यामभिनिर्वृत्तयोगक्षेमस्य वज्रिणः।
ऐश्वर्यप्रक्रियामात्रकृतार्थाः सन्तु हेतयः॥ ४१॥

(उभौ तूष्णीमधोमुखौ स्तः।)

विश्वामित्रः। (विहस्य।) वत्सौ! समन्तादुपशीलितोऽयं सन्निवेशः (ग)। कच्चिदस्मदीयास्तपोवनभूमयो रमयन्ति वामुपस्नेहयति (घ) वा गार्हस्थ्य(ङ)मृषीणाम्।

उभौ। (सप्रश्रयम् (च)।) भगवन्!
रम्यमेतदरम्यं वा कः परिच्छेत्तुमर्हति।
किन्तु द्वयातिगं चित्तमद्य नौ पश्यतोरभूत्॥४२॥

(इति सर्वे यथोचितमुपविशन्ति।)

(ख) आशास्महे आशिषा पूरयामीत्यर्थः।

युवाभ्यामिति। युवाभ्याम् अभिनिर्वृत्तः सुसम्पन्नः योगः अलब्धलाभरूपः क्षेमः लब्धस्य हस्तादभ्रंशनरूपः अथवा योगः अपूर्वलाभः, योगो ध्यानेऽप्यपूर्वलाभे इति धरणिः। क्षेमः विघ्नाभावेन मङ्गलं यस्य तथाभूतस्य वज्रिणः इन्द्रस्य हेतयः अस्त्राणि वज्रादीनीति भावः ऐश्वर्यं प्रभुत्वं तस्य प्रक्रियामात्रं सुदर्शनमात्रमिति यावत् तेन कृतार्थाः सफलाः सन्तु भवन्तु युवाभ्यामेव तत्कार्यसमाधानादिति भावः। अनुष्टुब्वृत्तम्॥४१॥

(ग) उपशीलितः परिदृष्टः युवाभ्यामिति शेषः सन्निवेशः स्थानम्।

(घ) रमयन्ति सुखयन्ति वां युवाम्। उपस्नेहयति स्निग्धौ करोतीत्यर्थः।

(ङ) गार्हस्थ्यं गृहस्थसमयाचारः।

(च) सप्रश्रयं सविनयम्।

रम्यमिति। एतत् ऋषीणां गार्हस्थ्यमित्यर्थः रम्यं मनोज्ञम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः । (साकूतस्मितम् ।) वत्सौ !

इह वनेषु स कौतुकवामनो
मुनिरतप्त तपांसि पुरातनः ।
तमिव वामवलोक्य तपस्विनो
नयनमद्य मनागुदमीमिलन् ॥ ४२ ॥

(उभौ मुहूर्तमुन्मनीभवतः (छ) ।)

विश्वामित्रः । (स्वगतम् ।) अये ! किमप्युत्साहवर्धनाय प्राग्भवीय(ज)मनुस्मारितमन्तःकरणमनयोः । तदेतावदस्तु । अन्यतः प्रक्षिपामि (झ) । (प्रत्यगवलोक्य प्रकाशं ससंभ्रमम् ।) कथमुदयगिरिकाश्मीरकुङ्कुमकेदारस्य प्रभावसन्ध्यालतायाः

करणम् अमनोज्ञं वा कः जनः परिच्छेत्तुं निर्णेतुम् अर्हति शक्नोति न कोऽपीत्यर्थः । किन्तु पश्यतोः नौ आवयोः चित्तम् अद्य दयातिगं रजस्तमोऽतिक्रान्तं सत्त्वनिष्ठमिति भावः अभूत् । अनुष्टुब्वृत्तम् ॥४२॥

इहेति । स कौतुकवामनः कपटवामनमूर्त्तिः पुरातनः मुनिः नारायणः इह एषु वनेषु तपांसि अतप्त चचार । तपस्विनः मुनयः अद्य तमिव वामनदेवमिव वां युवाम् अवलोक्य नयनं नेत्रं मनाक् अल्पं यथा तथा उदमीमिलन् उन्मीलयन्ति स्म । स्वानदृष्ट्या तमिव युवां पश्यन्ति स्मेति भावः । द्रुतविलम्बितं वृत्तम् । द्रुतविलम्बितमाह नभौ भराविति तल्लक्षणात् ॥४३॥

(छ) उन्मनीभवतः पूर्वजन्मवृत्तान्तोद्भावनेनेति भावः ।

(ज) प्राग्भवीयं पूर्वजन्मसम्बद्धम् ।

(झ) प्रक्षिपामि अन्यस्मिन् विषये मनो नयामि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रथमस्तवको गभस्तिमाली हस्ताहस्तिकया कुतूहलिनी-
भिर्दिगङ्गनाभिर्वारुणीं यावदुपनीतः (ञ) । (सनिर्वेदं च ।)

यातोऽस्तमेष चरमाचलचूडचुम्बी
पङ्केरुहप्रकरजागरणप्रदीपः ।
आः सर्वतः स्फुरतु कैरवमाः पिबन्तु
ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः ॥ ४४ ॥

(सर्वतोऽवलोक्य ।)

अयमपि खरयोषिल्लर्णकाषायमीष-
द्विस्मरतिमिरोर्णाजर्जरोपान्तमर्चिः ।
मदकलकलविङ्कीकाकुनान्दीकरेभ्यः
क्षितिरुहशिखरेभ्यो भानुमानुद्भिनोति ॥४५॥

(ञ) उदयेति उदयगिरेः उदयाचलस्य काञ्चीरं तद्देशभवं यत् कुङ्कुमं तस्य कोदारस्य चेतस्य । प्रभातसन्ध्या प्रातःसन्ध्या एव लता यष्टी तस्याः । प्रथमस्तवकः आद्यगुच्छः गभस्तिमाली सूर्यः । हस्ताहस्तिकया हाताहातीति प्रसिद्धयेत्यर्थः कुतूहलिनीभिः कौतुकवतीभिः दिगङ्गनाभिः दिश एव अङ्गनाः नार्यः ताभिः वारुणीं पश्चिमां दिशं यावत् प्रतीत्यर्थः उपनीतः प्रापितः ।

यात इति । पङ्केरुहाणां पद्मानां प्रकरस्य समूहस्य जागरणाय प्रबोधाय प्रदीपः एषः सूर्यः चरमाचलचूडचुम्बी अस्ताचलशिखर-स्पर्शी सन् यातः गतः अस्तं गत इत्यर्थः । आः अनास्थाऽवकलव्ययम् । कैरवं कुमुदं सर्वतः उपलात् स्फुरतु विकसतु, आः चकोराः पक्षि-विशेषाः उदरम्भरयः उदरभरणार्थिन इत्यर्थः ज्योत्स्नाकरम्भं चन्द्रि-काकल्पं दधिसक्तुकं पिबन्तु । वसन्ततिलकं वृत्तम् ॥४४॥

अयमिति । अयं भानुमान् सूर्यः अपि मदकलानां मत्तानां कलविङ्कीनां चटकीनां काकुरेव विकृतध्वनिविशेष एव नान्दी स्तुतिवादः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

मन्त्रसंस्कारसम्पन्नास्तन्वदौदन्वतीरपः ।
एतत्त्रयीमयं ज्योतिरादित्याख्यं निमज्जति ॥४६॥

रामः । (सर्वतो निरूप्य ।) वत्स लक्ष्मण !

तापनैरेव तेजोभिः प्रुष्टनिर्वाणमेचकाः ।
दिशो जाताः प्रतीची तु समुदाचरति क्रमात् ॥४७॥

तत्करेभ्यः, भवेन्मदकलो मत्ते इति, चटकः कलविङ्कः स्यात्तस्य स्त्री कलविङ्किकेति, काङ्क्षुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरिति चामरः । चितिरङ्गिणखरेभ्यः उच्चाग्रेभ्यः खरयोषितः गर्दभ्याः कर्णवत् कापायं कषायेण रक्तमिव कापायं कषायरसरञ्जितमित्यर्थः, ईषत् अल्पं यथा तथा विस्वरं प्रसरत् यत् तिमिरं तदेव जर्णा वोन्दत्वात् ऋणवर्णमेघादिलोन, जर्णा मेघादिलोम्नि स्यादित्यमरः । तथा जर्जरं भग्नमिति यावत् उभाग्नं यस्य तत् अर्चिः तेजः उच्चिनोति आकर्षतीत्यर्थः । आलिनीदृत्तं, गणमयमयुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥४५॥

मन्त्रेति । एतत् त्रयीमयं वेदमयम् आदित्याख्यं सौरमित्यर्थः ज्योतिः तेजः उदन्वतः समुद्रस्येमा औदन्वत्यः ताः अपः जलानि मन्त्रसंस्कारसम्पन्नाः स्वस्य वेदमयत्वात् वैदिकमन्त्रेण यः संस्कारः विशुद्धिः तत्सम्पन्नाः तत्संयुक्ताः तन्वत् कुर्वत् निमज्जति समुद्रं प्रविशतीति भावः । अनुष्टुब्वृत्तम् ॥४६॥

तापनैरिति । दिशः अन्या इति शेषः तापनैः सौरैः एव तेजोभिः प्रुष्टाः दग्धाः पश्चात् निर्वाणे तेजसामपागमे इत्यर्थः मेचकाः श्यामलाः, कालश्यामलमेचका इत्यमरः । जाताः । तु किन्तु प्रतीची पश्चिमा दिक् क्रमात् समुदाचरति सम्यक् राजते सम्यक् बिभेति वा अन्यासां दिशामवस्थादर्शनादिति भावः । समुदाचारस्तु शोभायां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किञ्च ।

काञ्चिद्बिभ्रति भूतिमाश्रमभुवो वैतानवैश्वानर-
ज्वालोपप्लवमानधूमवलभीविभ्रान्तदिग्भित्तयः ।
श्रूयन्ते वटवस्तृतीयसवनस्वाध्यायदीर्घानपि
स्वर्धावन्धमनोहरं प्रतिमुहुः स्वान् द्राघयन्तः स्वरान् ॥४८॥

विश्वामित्रः । वत्स राघव !

उन्मुक्ताभिर्दिवसमधुना सर्वतस्ताभिरेषा
स्वच्छायाभिर्निचुलितमिव प्रेक्ष्यते विश्वमेतत् ।

पूर्वरूपे भयेऽपि चेति विश्वः । तापनैरेवेत्यत्र तापनैरिवेति पाठः समीचीनः । तथात्वे जाता इवेत्युत्प्रेक्षा । स्रग्धरावृत्तम् ॥४७॥

काञ्चिदिति । आश्रमभुवः तपोवनभूमयः वैतानस्य यज्ञीयस्य वैश्वानरस्य अग्नेः ज्वालया उपप्लवमानः धूतस्सन्नः उच्चरन् यः धूमः स एव वलभी सौधोपरिवर्त्तमानं क्षुद्रगृहं तत्र विभ्रान्ताः विशेषेण भ्रान्तिं नीता दिश एव भित्तयः कुड्यानि यासां तथाभूताः सत्यः काञ्चित् अनिर्वचनीयामिति भावः भूतिं सम्पदं शोभामित्यर्थः, भूतिर्भस्मनि सम्पदीत्यमरः । बिभ्रति दधति । वटवः ब्राह्मणकुमारा अपि तृतीयसवने सायंकालीनस्नाने यः स्वाध्यायः वेदाध्ययनं तेन दीर्घान् उच्चैस्तरानित्यर्थः स्वान् निजान् स्वरान् उदात्तादीन् प्रतिमुहुः पुनः पुनः स्वर्धायाः परस्परजिगीषाया बन्धेन आवेशेन मनोहरं मनोज्ञं यथा तथा द्राघयन्तः दीर्घीकुर्वन्तः श्रूयन्ते । शार्दूलविक्रीडितं वृत्तम् ॥४८॥

उन्मुक्ताभिरिति । एतत् विश्वं जगन्मण्डलं दिवसम्, अत्यन्तसंयोगे द्वितीया । दिवसं व्याप्येत्यर्थः उन्मुक्ताभिः परित्यक्ताभिः सौरेण तेजसा तिरोहिताभिरिति भावः ताभिरेव स्वच्छायाभिः निजच्छा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पर्यन्तेषु ज्वलति जलधौ रत्नसानौ च मध्ये
चित्राङ्गीयं रमयति तमःस्तोमलीला धरित्री ॥४९॥

लक्ष्मणः । (सनिर्वेदम् ।)

तेजोमयं तमोमयमन्यतरस्यां तदेव दिक्चक्रम् ।
किमपि विधित्रा धात्रा सृष्टिरियं भुवनकोषस्य ॥५०॥

(सर्वतोऽवलोक्य ।)

चूडारत्नैः स्फुरद्भिर्विषधरविवराण्युज्ज्वलान्युज्ज्वलानि
प्रेक्ष्यन्ते चक्रवाकीमनसि निविशते सूर्यकान्तात् कृशानुः ।

याभिः अधुना अस्तमनसमये इत्यर्थः सर्वतः समन्तात् निचुलितमिव कवलितमिव प्रेक्ष्यते दृश्यते । तमसां स्तोमस्य समूहस्य लीला विलासो विसरणमित्यर्थः यस्यां तथाभूता इयं धरित्री पृथ्वी पर्यन्तेषु प्रान्तेषु जलधौ समुद्रे रत्नसानौ सुमेरौ, रत्नसानुः सुरालय इत्यमरः । ज्वलति दीप्यमाने सति सौरे तेजसीति भावः चित्राङ्गी विविधवर्णरञ्जिता सती रमयति प्रीतिमुत्पादयति लोकानामिति शेषः । मन्दाक्रान्ता-वृत्तम् ॥४९॥

तेजोमयमिति । तदेव दिक्चक्रं दिङ्मण्डलं तेजोमयं पश्चिमत इति भावः अन्यतरस्यां प्राच्यादाविति भावः तमोमयम् अन्धकारा-च्छन्नमिति यावत् अतः इयं भुवनकोषस्य ब्रह्माण्डस्य धात्रा सृष्टिः विधात्रकर्तृकं निर्माणम् । एकदा तूभयप्राप्तौ कर्मण्येव न कर्त्तरीति नियमात् भुवनकोषस्येति कर्मणि षष्ठ्यां धात्रेति कर्त्तरि तृतीया । किमपि अनिर्वचनीयं यथा तथा विधित्रा आश्चर्यरूपिणीत्यर्थः । आर्यावृत्तम् ॥५०॥

चूडारत्नैरिति । विषधराणां भुजङ्गानां विवराणि अश्माणि स्फुरद्भिः राजद्भिः तिमिरोदयादिति भावः चूडारत्नैः शिरोमणिभिः उज्ज्वलानि उज्ज्वलानि प्रेक्ष्यन्ते दृश्यन्ते । सूर्यकान्तात् सूर्यकान्ता-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किञ्चामी ग्लपयन्तस्तिमिरमुभयतो निर्भराहस्तमिस्रा-
सङ्घट्टोत्पिष्टसन्ध्याकणनिकरपरिस्पर्धिनो भान्ति दीपाः ॥५१॥

रामः । (विलोक्य ।)

विश्वं चाक्षुषमस्तमस्ति हि तमःकैवल्यमौपाधिक-
प्राच्यादिव्यवहारबीजविरहाद्दिङ्मात्रमेव स्थितम् ।
गृह्णन्ते भयहेतवः पटुभिरप्यन्धान्तरैर्भाति च
ध्वान्ते नातिघनेन वस्तु वचसा ज्ञातः स्वरेणामुकः ॥५२॥

स्त्रोपलात् वशात्तः अग्निः चक्रवाकीनां मनसि निविशते प्रविशति । सूर्यास्तमयात् सूर्यकान्ता निस्तेजसश्चक्रवाकीनां मनांसि च रात्रि-विरहित्वात् सन्तप्तानि भवन्तीति भावः । किञ्च अमी दीपाः तिमिरम् अन्धकारं ग्लपयन्तः खण्डयन्तः उभयतः उभयोः पार्श्वयोः निर्भरम् अत्यन्तम् अहस्तमिस्रयोः दिवसरजन्योः यः सङ्घट्टः सम्मेलनं तेन उत्पिष्टा विमर्दिता या सन्ध्या तस्याः कणनिकरं बिन्दुसङ्घं सन्ध्याया लौहित्यादिति भावः परिस्पर्द्धन्ते अनुकुर्वन्तीति तथोक्ताः सन्तः भान्ति राजन्ते । तमिस्रा तामसी रात्रिरित्यमरः । स्रग्धराछन्दम्, म्रभ्नै-र्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमितितल्लक्षणात् ॥५१॥

विश्वमिति । चाक्षुषं चक्षुरिन्द्रियग्राह्यं विश्वं जगत् अस्तं गतं तिरोहितमिति यावत् चक्षुरिन्द्रियेण विश्वं न दृश्यते इति भावः । तमसाम् अन्धकाराणां कैवल्यं केवलं तम इति यावत् अस्ति हि वर्त्तते एव । उपाधिर्विशेषणं तत्सम्बन्धी औपाधिकः विशेषणसम्बन्ध इत्यर्थः यः प्राच्यादिव्यवहारः इयं प्राची दिक् इयं प्रतीचीत्यादिरूप इत्यर्थः तस्य बीजं हेतुः सूर्य इत्यर्थः तस्य विरहात् अस्तमयात् दिङ्मात्रमेव स्थितं केवलं दिगिति प्रसिद्धिस्तिष्ठति न तु प्राच्यादिरूपेणेति भावः । पटुभिः समर्थैरपि वस्तुग्रहणे इति भावः अन्धान्तरैरन्धैरि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किञ्च ।

घनतरतिमिरघुणोत्करजग्धानामिव पतन्ति काष्ठानाम् ।
छिद्रैरमीभिरडुभिः किरणव्याजेन चूर्णानि ॥ ५३ ॥

(नेपथ्ये कलकलः ।)

(सर्वे ससंभ्रममाकर्णयन्ति ।)

(पुनस्तत्रैव ।)

निर्मज्जच्चक्षुरन्तर्भ्रमदतिकपिशक्रूरतारा नराक्षि-
ग्रन्थिं दन्तान्तरालग्रथितमविरतं जिह्वया घट्टयन्ती ।

न्द्रियैस्त्वगादिभिः भयहेतवः भीतिकारणानि पदार्था इति शेषः रज्ज्वन्ते रज्जवः सर्पा इतिवदिति भावः । अतिघनेन अतिसान्द्रेण ध्वान्तेन तमसा वस्तु घटपटादिकं वचसा आप्तवाक्येन अयं घटः अयं पट इत्यादिवाक्येन भाति राजते ज्ञायते इति भावः स्वरेण परिचितेनेति शेषः अमुकः अयं पुमान् ज्ञातः विदितो भवति । अन्धकारधर्मवर्णनमिदम् । शार्दूलविक्रीडितं वृत्तम् ॥५२॥

घनेति । घनतरं सान्द्रतरं यत् तिमिरम् अन्धकारः स एव घुणोत्करः काष्ठकीटसमूहः तेन जग्धानां भक्षितानां कवलितानामिति यावत् काष्ठानां दिशां दारूणामिवेति ध्वनिः, काष्ठं दार्विन्धनमिति, दिशस्तु कक्षुभः काष्ठा इति चामरः । चूर्णानीव अमीभिः उडुभिः नक्षत्रैः छिद्रैः नक्षत्ररूपकीटनिष्कापितकाष्ठविवरैरिवेति ध्वनिः किरणव्याजेन मयूखमिषेण पतन्ति । नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियामित्यमरः । उत्प्रेक्षालङ्कारः । आर्याछन्दः ॥५३॥

निर्मज्जदिति । निर्मज्जती निर्मग्नीभवती कोटररूपतामापद्यमाने इति यावत् ये चक्षुषी तयोः अन्तः अभ्यन्तरयोः भ्रमन्त्यौ घूर्णमाने अतिकपिशे अत्यन्तपिङ्गले क्रूरे भीषणे तारे कनीनिके यस्याः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ध्वान्तेऽपि व्यात्तवक्त्रज्वलदनलशिखाजर्जरे व्यक्तकर्मा
निर्मान्ती गृध्ररौद्रीं दिवमुपरि परिक्रीडते ताडकेयम् ॥५४॥

अपिच ।

त्रेताग्निकुण्डपूरं च वर्षन्ती रुधिरच्छटाः ।
हिंस्राः सुबाहुमारीचमिश्रा नः परिवृण्वते ॥५५॥

विश्वामित्रः । (साकूतम् (ट) ।) कथं ताडका । वत्स राम-भद्र !

विधानमानुश्रविकं गृहेषु नः
प्रतिस्खलन्ती किमियं प्रतीक्ष्यते ।

तयोक्ता, तारकाख्यः कर्णीनिकेत्यमरः । दन्तानाम् अन्तराले मध्ये ग्रथितं लग्नं नरास्थिग्रन्थिं मनुष्यकङ्कालग्रन्थिं जिह्वया अविरतम् अजस्रं घट्टयन्ती चर्वयन्तीत्यर्थः व्यात्तं विस्तृतं यत् वक्त्रं वदनं तस्मिन् ज्वलतः अनलस्य अग्नेः शिखया जर्जरे जर्जरतां गते विध्वस्ते इति यावत् ध्वान्ते अन्धकारेऽपि व्यक्तं प्रकटं कर्म निष्ठुरमिति भावः यस्या-स्तथाविधा इयं ताडका उपरि ऊर्ध्वदेशे दिवम् आकाशं गृध्ररौद्रीं गृध्राणां सञ्चारात् भयङ्करीं निर्मान्ती कुर्वती सती परिक्रीडते विहर-तीत्यर्थः । स्रग्धराछन्दः ॥५४॥

त्रेतेति । हिंस्राः क्रूरकर्माणः सुबाहुमारीचमिश्राः सुबाहु-मारीचप्रभृतयश्च राक्षसा इति शेषः त्रेताग्निः दक्षिणाग्निर्गार्हपत्यो हवनीयश्चयोऽग्नयः । अग्नित्रयमिदं त्रेतेत्युक्तलक्षणमग्नित्रयं तस्य कुण्डः आधारः तस्य पूरः पूरणं यस्मिन् तद् यथा तथा रुधिरच्छटाः रक्तविस्तारान् शोणितबिन्दून् वा वर्षन्तः सन्तः नः अस्मान् परिवृण्वते अवरुन्धन्ति । अनुष्टुब्वृत्तम् ॥५५॥

(ट) साकूतं साभिप्रायम्, आहेति क्रियाविशेषणम् ।

विधानमिति । नः अस्माकं गृहेषु आश्रमेषु आनुश्रविकं वैदिकं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुबाहुमुख्यैः सममाततायिभि-
र्गृहाण चापं निगृहाण ताडकाम् ॥५३॥

रामः । (सदृशातिरेकम् (ठ) ।) भगवन् ! स्त्रिय(ड)मिमाम् ।
(पुनर्नेपथ्ये ।)

अब्रह्मण्यमब्रह्मण्यम् (ढ) । भोस्तात विश्वामित्र ! परिभूयामहे (ण) । प्रहीयतामधिज्यधन्वा दाशरथिः (त) ।

रामः । (विहस्य । नेपथ्यावलोकितकेन ।) बालर्षे शुनःशेफ ! मुहूर्तं धीरो भव ।

विधानं प्रतिस्खिरन्ती नाशयन्ती इयं ताड़का किं कथं प्रतीक्ष्यते त्वयेति शेषः । चापं धनुः गृहाण, सुबाहुमुख्यैः सुबाहुप्रभृतिभिः आततायिभिः वधोद्यतैः राक्षसैरिति शेषः समं सह, आततायी वधोद्यत इत्यमरः । तस्य षड्विधत्वमुक्तम् । यथा, अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिन इति । तस्य वधे दोषो नास्तीत्युक्तं मनुना । आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदिति । आततायिवधे दोषो हन्तुर्भवति कथनेति च । ताड़कां निगृहाण जहि । वंशस्थविलं वृत्तं, वदन्ति वंशस्थविलं जतौ जरावितिं तल्लक्षणात् ॥५६॥

(ठ) सदृशातिरेकं सानुकम्पातिशयमित्यर्थः, आङेति क्रियाविशेषणम् ।

(ड) स्त्रियमिति कथं निगृह्णामि स्त्रीवधस्य गर्हितत्वादिति भावः ।

(ढ) अब्रह्मण्यम् अवध्योक्तौ नाञ्प्रयोज्यमिदम्, अब्रह्मण्यमवध्योक्तावित्यमरः ।

(ण) परिभूयामहे वयं, तत् परित्रायस्वेति भावः ।

(त) प्रहीयतां प्रेष्यताम् । अधिज्यधन्वा सज्जितधनुष्कः । दाशरथिः रामः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अलं क्लिशित्वा गुरुमल्पकोऽयं
विधिस्त्वदाज्ञैव गरीयसी नः ।
न कौशिकस्य त्वयि धर्मपुत्रे
पुत्रे मधुच्छन्दसि वा विशेषः ॥ ५७ ॥

विश्वामित्रः । वत्स ! कृतमुत्तरोत्तरेण (थ) । नन्वयं नेदीयानाश्रमोपघातः (द) ।

लक्ष्मणः । (सव्यथमिव (ध) । स्वगतम् ।)

मीमांसते किमार्योऽयं कौशिकेऽप्यनुशासति ।
वाचमेषामृषीणां हि शास्त्रमेवानुवर्त्तते ॥ ५८ ॥

अलमिति । गुरुम् आचार्यं क्लिशित्वा अलं गुरवे क्लेशो न कृतव्य इत्यर्थः । अयं विधिः विधानं राक्षसविध्वंसनमित्यर्थः अल्पकः तुच्छः, तव आज्ञा एव नः अस्माकं गरीयसी अतिमहती । धर्मपुत्रे धर्मेण पालिते त्वयि पुत्रे मधुच्छन्दसि वा पुत्रे औरसे इति शेषः कौशिकस्य विश्वामित्रस्य न विशेषः प्रभेदः अस्तीति शेषः । गुरुवद् गुरुपुत्रेषु गुरुदारेषु चैव हीति मनुवचनेन गुरुपुत्रस्य गुरुवन्माननीयत्वकीर्त्तनात् गुरोश्च धर्मपुत्रौरसपुत्रयोर्निर्विशेषत्वात् त्वदाज्ञयैव कार्यं साधयामीति भावः । उपजातिवृत्तम् ॥५७॥

(थ) कृतमुत्तरोत्तरेण पुनः पुनः प्रतिवचसा कृतम् अलम् उत्तरोत्तरं विफलमिति तत्प्रयोजनं नास्तीति भावः ।

(द) ननु भोः, नेदीयान् सन्निहितः उपस्थित इत्यर्थः ।

(ध) सव्यथमिव सन्तापितमिव आश्रमोपघातश्रवणेनेति भावः ।

मीमांसत इति । कौशिके विश्वामित्रे अनुशासति आदिशति अपि अयम् आर्यः रामः किं कथं मीमांसते विचारयति राक्षसशासनं कर्त्तव्यं न वेति भावः । शास्त्रमेव एषाम् ऋषीणां वाचम् अनुवर्त्तते

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (स्वगतम् ।)

गुर्वादेशादेव निर्मीयमाणो
नाधर्माय स्त्रीवधोऽपि स्थितोऽयम् ।
अद्य स्थित्वा श्वो गमिष्यद्भिरल्पै-
र्लज्जास्माभिर्मीलिताक्षैर्जितैव ॥ ५९ ॥

किन्तु ।

दीर्घं प्रजाभिरतिकौतुकिनीभिराभि-
रस्मिन्नकीर्त्तिपटहे मम ताड्यमाने ।
ज्योतिर्मयेन वपुषा जगदन्तसाक्षी
लक्ष्यिष्यते कुलगुरुर्भगवान् वशिष्ठः ॥६०॥

अनुसरति, एषां वागेव शास्त्ररूपेण वर्त्तति तत् कथं शास्त्रानुसरणे आर्यस्य विचार इति भावः । अनुष्टुब्वृत्तम् ॥५८॥

गुर्विति । गुरोः आदेशादेव आज्ञयैव निर्मीयमाणः क्रियमाणः अयं स्त्रीवधोऽपि अधर्माय न स्थितः न प्रभवतीति भावः । अद्य अस्मिन् दिने स्थित्वा अत्रेति शेषः श्वः परदिने गमिष्यद्भिः अल्पैः बालकैः अस्माभिः मीलिताक्षैः निमीलितनयनैः सद्भिः लज्जा जितैव भविष्यतीति शेषः । दुष्कार्य्यकारिणां जनसन्दर्शने एव लज्जा, तस्य नयनोन्मीलनसाध्यं, तदभावा निमीलितनयनेनास्मादकार्य्यस्थानात् सत्वरप्रस्थाने केनापि दुष्कृतस्याज्ञेयत्वात् न लज्जाप्रसर इति भावः । शालिनीवृत्तं, मात्तौ गौ चेच्छालिनी वेदलोकैरिति तल्लक्षणात् ॥५९॥

दीर्घमिति । अतिकौतुकिनीभिः किमाश्चर्य्यमेतत् रघुवंशीयस्येति कौतूहलवतीभिः आभिः प्रजाभिः जनैः अस्मिन् मम अकीर्त्तिपटहे स्त्रीवधोऽनेन कृत इति दुर्यशोवादित्रभेदे ताड्यमाने सति ज्योतिर्मयेन तेजोमयेन वपुषा ज्ञानात्मनेत्यर्थः जगदन्तसाक्षी जगतीमु अन्तस्य प्रत्य-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये ।)

अलमिष्ट्वा मखान् मूर्खाः ! खड्गधारेयमस्ति नः ।
अदवीयानयं पन्थाः स्वर्लोकमुपतिष्ठते ॥ ६१॥

रामः । (श्रुत्वा सरोषं ससंभ्रमं चोत्थाय सविनयमञ्जलिं बध्वा ।)

भगवन् जगत्त्रयगुरो गाधिनन्दन !
दशरथगृहे सम्भूतं मामवाप्य धनुर्धरं
दिनकरकुलास्कन्दो कोऽयं कलङ्कनवाङ्कुरः ।
इति न वनितामेतां हन्तुं मनो विचिकित्सते
यदधिकरणं धर्मस्थीयं तवैव वचांसि नः ॥ ६२॥

यस्यापि साक्षी साक्षात् दृष्टा तत्सकाशे न किमपि गोप्यते केनापीति भावः कुलगुरुः वंशाचार्यः भगवान् न सर्वशक्तिमान् वशिष्ठः दीर्घम् अत्यन्तं लज्जिष्यते ममैतेन कर्मणेति शेषः । वसन्ततिलकं वृत्तम् ॥६०॥

अलमिति । रे मूर्खाः ! याज्ञिका इति शेषः, मखान् यज्ञान् इष्ट्वा कृत्वेत्यर्थः यज्ञैर्देवान् अभ्यर्च्येति यावत् अलं वृथा यज्ञार्थोऽयमायासो य इति भावः । नः अस्माकम् इयं खड्गधारा अस्ति वर्त्तते यया युष्मान् नाशयाम इति भावः । अयम् अदवीयान् अदूरवर्त्ती शीघ्रगम्य इति भावः पन्थाः मार्गः उपाय इति भावः स्वर्लोकं स्वर्गम् उपतिष्ठते उपस्थितो भवति शीघ्रं स्वर्गं प्रापयतीति भावः । बहुभिरायासैः खलु यागः क्रियते तेनापूर्वं जन्यते ततश्च स्वर्गलाभ इति स्वर्गगमने युष्माकं कुटिलः पन्थाः । अस्माकन्तु खड्गाघातेन शीघ्रं स प्राप्यते इति वृथा यज्ञप्रयासस्तद् युष्मान् निहत्य स्वर्गं प्रेषयाम इति भावः । अनुष्टुब्वृत्तम् ॥६१॥

दशरथेति । दशरथस्य गृहे सदने पत्न्यां वा, न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते इति शास्त्रात् । सम्भूतं सद्वृत्तपन्नं धनुर्धरम् अस्माकं धनुर्वेदं माम् अवाप्य प्राप्य अयं कः दिनकरस्य सूर्यस्य कुला-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(प्रणिपत्य नेपथ्याभिमुखम् ।) भोस्तपोधनाः ! मा भैष्ट(न) ।

रजनिचरचमूरमूरपास्य-
त्वयमहमागत एव रामचन्द्रः ।
कुशिकसुतकुशाग्रतोयबिन्दो-
रिदमनुकल्पमवेत कार्मुकं मे ।६३॥

(इति धनुरारोपयन्(प) निष्क्रान्तः ।)

स्कन्दः वंशावमाननकरः कलङ्कस्य नवः अङ्कुरः प्ररोहः उपस्थित इति शेषः इति हेतोः मनः एतां वनितां 'ताड़कां हन्तुं न विचिकित्सते न संशेते, विचिकित्सा तु संशय इत्यमरः । यत् यतः तवैव वचांसि नः अस्माकं धर्मस्थीयं धर्मस्थितिमूलं धर्मप्रवर्त्तकमिति यावत् अधिकरणम् अवलम्बनम् । तव वच एव धर्म इति कृत्वा एनां हन्मीत्याशयः । हरिणीवृत्तं, नसमरसला गः षड्वेदैर्हयैर्हरिणी मतेति तल्लक्षणात् ॥६२॥

(न) मा भैष्ट भीतिं न कुरुध्वम् ।

रजनीति । अयमहं रामचन्द्रः अमूः उपरि वक्ष्यमाना इति भावः रजनिचररमूः राक्षससेनाः अपास्यन् निराकुर्वन् आगत एव उपस्थित एव । मे मम इदं कार्मुकं धनुः कुशिकसुतस्य विश्वामित्रस्य कुशाग्रे यत् तोयं तस्य बिन्दोः कणस्य अनुकल्पं पश्चात् कल्पं निकृष्टोपायमिति भावः अवेत जानीत । राक्षसनिधने गुरोः कुशजलमेव मुख्यः कल्पः धनुरिदन्तु मम ततो हीनकल्पमिति तेनैव कुशजलेनैते हताः, मम तु धनुर्निमित्तमात्रमिति भावः । मुख्यः स्यात् प्रथमः कल्पोऽनुकल्पस्तु ततोऽधम इत्यमरः । पुष्पिताग्रावृत्तम्, अयुजि न युगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रेति तल्लक्षणात् ॥६३॥

(प) आरोपयन् सज्जं कुर्वन् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (साशङ्कमात्मगतम् ।) दिष्ट्या क्षात्रेण धर्मेण कौमारमप्यशून्य(फ)मार्य्यस्यासीत् । (नेपथ्याभिमुखमवलोक्य हर्षं नाटयन् प्रकाशम् ।) भगवन् कौशिक ! पश्य पुरस्तादार्यं धृतधनुषि

वायव्यास्त्रव्यतिकरनिरालम्बनस्ताड़केयः
प्राप्तो जीवन्मरणमसुभिर्विप्रमुक्तः सुबाहुः ।
क्षत्तोन्मुक्ता भुवि च करुणाश्चर्य्यबीभत्सहास-
त्रासक्रोधोत्तरलमृषिभिर्दृश्यते ताड़केयम् ॥६४॥

(फ) दिष्ट्या भाग्येन, दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिरित्यमरः । क्षात्रेण क्षत्रियोचितेन । धर्मेण आचारेण । कौमारं बाल्यम् अशून्यम् अविरहितमित्यर्थः बाल्यमपि क्षात्रधर्मपुरस्कृतमिति यावत् ।

वायव्येति । ताड़काया अपत्यं पुमान् ताड़केयः मारीच इत्यर्थः वायव्यस्य वायुदैवतस्य अस्त्रस्य व्यतिकरेण सम्बन्धेन आघातेनेति यावत् निरालम्बनः आलम्बनः आश्रयः तद्रहितः सन् जीवन् मरणं प्राप्तः जीवन्मृतः सन् निराकृत इत्यर्थः । सुबाहुः तदाख्यो राक्षससेनापतिः असुभिः प्राणैः विप्रमुक्तः वियुक्तः निहत इति यावत्, इयञ्च ताड़का क्षत्ता छिन्ना भुवि पृथिव्याम् उन्मुक्ता त्यक्ता पातितेति यावत्, करुणया स्त्रीत्वनिबन्धनया दयया आश्चर्य्येण कथं महाराक्षसी बालेनानेन निहतेत्येवंरूपेण बीभत्सेन घृणया हासेन आनन्दजनितेन त्रासेन सत्यं न निहता पुनर्जीवति चेति भयेन क्रोधेन तत्कृतात्याचारजनितेनेति भावः उत्तरलं चकितं यथा तथा ऋषिभिः मुनिभिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः । (विलोक्य ।) वत्स लक्ष्मण ! विस्मयेन प्रमोदेन च परवन्तो (ब) वयं न वाचामधीश्महे (भ)। वक्तव्यमेव वा किमस्ति । न खल्वियमद्यतनी (म) वः प्रतिष्ठा (य)।

दिक्कूलङ्कषकीर्त्तिधौतवियतो निर्व्याजवीर्योद्धता-
स्ते यूयं रघवः प्रसिद्धमहसो यैः सोऽपि देवाधिपः ।
बिभ्राणैरसुराधिराजविजयक्रीडानिदानं धनुः
पौलोमीकुचपत्रभङ्गरचनाचातुर्य्यमध्यापितः ॥६५॥

लक्ष्मणः । भगवन् ! पश्य ।

दृश्यते । मन्दाक्रान्तावृत्तं, मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मिति तल्लक्षणात् ॥६४॥

(ब) परवन्तः पराधीनाः ।

(भ) अधीश्महे प्रभवामः वाक्प्रसरोऽस्माकं नास्तीति भावः ।

(म) अद्यतनी आधुनिकी ।

(य) प्रतिष्ठा ख्यातिः ।

दिगिति । दिशां कूलङ्कषा दिगन्तव्यापिनी या कीर्त्तिः तया धौतं क्षालितं वियत् आकाशं यैः तथाभूताः ते प्रसिद्धाः रघवः रघुवंश्याः यूयं निर्व्याजवीर्योद्धताः अकपटपराक्रमोद्धताः प्रसिद्धमहसः प्रख्याततेजसः, असुराधिराजानाम् असुरमुख्यानां विजयः पराभव एव क्रीड़ा तस्या निदानं हेतुभूतं धनुः बिभ्राणैः दधद्भिः यैः युष्माभिः सः प्रसिद्धः देवाधिपोऽपि इन्द्रोऽपि पौलोम्याः पुलोमनन्दिन्याः शच्याः कुचयोः स्तनयोः पत्रभङ्गरचनायां पत्रावलिविरचनायां चातुर्य्यं वैदग्धत्रं पाटवमित्यर्थः अध्यापितः शिक्षितः । तत्कार्य्यस्यासुरविजयस्य रघुवंशीयानामुपरि भारार्पणात् केवलं शच्या सह देवराजः सततं क्रीड़तीति भावः । शार्दूलविक्रीड़ितं वृत्तम् ॥ ६५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अद्य नैशाचरीं सेनामेनामुन्मूलयन्नयम् ।
आधानं वीरधर्मस्य निर्माय त्वामुपस्थितः ॥६६॥

(प्रविश्य ।)

रामः । (सवैलक्ष्यस्मितम् (र) ।)

पूषा वशिष्ठः कुशिकात्मजोऽयं
त्रयस्त एते गुरवो रघूणाम् ।
महामुनेरस्य गिरा कृतोऽपि
स्त्रैणो वधो मां न सुखाकरोति ॥६७॥

(आश्रममवलोक्य ।)

प्रत्यासन्नतुषारदीधितिकरक्लिश्यत्तमोवल्लरी-
कल्पाभिर्मखधूमवल्लिभिरमी संमीलितव्यञ्जनाः ।
श्वः सञ्जीवरयिष्यमाणवटुकव्याधूतशुष्यत्त्वचो
निद्राणातिथयस्तपोधनगृहाः कुर्वन्ति नः कौतुकम् ॥६८॥

अद्येति । अयं रामः अद्य एनां नैशाचरीं राक्षसीं सेनाम् उन्मूलयन् वीरधर्मस्य वीरचर्यायाः आधानं संस्थितिं निर्माय कृत्वा स्वस्मिन्निति शेषः त्वाम् उपस्थितः प्राप्तः । अनुष्टुप्वृत्तम् ॥६६॥

(र) सवैलक्ष्यस्मितं सलज्जमन्दहासम् ।

पूषेति । पूषा सूर्यः वशिष्ठः अयं कुशिकात्मजश्च एते त्रयः ते प्रसिद्धाः रघूणां रघुवंशीयानां गुरवः । किन्तु अस्य महामुनेः विश्वामित्रस्य गिरा वाचा कृतोऽपि अनुष्ठितोऽपि स्त्रैणः स्त्रीसम्बन्धी वधः ताड़काहननमित्यर्थः मां न सुखाकरोति न प्रीणयति । उपजाति वृत्तम् ॥६७॥

प्रत्यासन्नेति । प्रत्यासन्नः उदयोन्मुखः यस्तुषारदीधितिचन्द्रः तस्य करेण किरणेन क्लिश्यन्त्यः नष्टीभवन्त्यः यास्तमोवल्लर्यः अन्धकार-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(पुरतोऽवलोक्य ।)

स्फुरति पुरतो माद्यन्माद्यच्चकोरविलोचन-
प्रकरकिरणश्रेणीदत्तस्वहस्तवनं महः ।
हृदय ! लघु मा भूः प्रेयोदर्शनप्रतिभूरयं
कुवलयदृशामिन्दुर्नेत्रे सुधाभिरनक्ति नः ॥६९॥

अपिच ।

श्रेण्यः तत्कलाभिः तत्सदृशीभिः मखधूमपङ्क्तिभिः यज्ञीयधूमलताभिः संवीलितं तिरोहितं व्यञ्जनं चिह्नं द्वारकुड्यादिरूपं येषां तथाभूताः श्वः परदिने सञ्जीवरयिष्यमाणाः परिधास्यमानाः वटुभिः ब्रह्मचारिभिः व्याधूता विशेषेण कम्पिताः अतएव शुष्यन्त्यः शोषं गच्छन्त्यः त्वचः वल्कलानि येषु तथाविधाः तथा निद्राणाः स्वपन्तः अतिथयः अभ्यागता येषु तादृशाः तपोवनवृक्षाः आश्रममण्डपानि नः अस्माकं कौतुकम् आनन्दं कुर्वन्ति जनयन्ति । शार्दूलविक्रीडितं वृत्तम् ॥६८॥

स्फुरतीति । माद्यतां माद्यताम् अतिशयेन हृष्यतामिति यावत् चकोराणां पक्षिविशेषाणां ये विलोचनप्रकराः नेत्रसमूहाः तेषां किरण-श्रेणीभिः मयूखनिचयैः दत्तेन स्वहस्तेन हस्तावलम्बनेन सादरदृष्टि-पातेनेति भावः घनं सान्द्रं महः तेजः तेजः चान्द्रमिति भावः पुरतः अग्रतः स्फुरति राजते । हे हृदय ! लघु उत्सुकं मा भूः न भव, कुवलयदृशां नीलोत्पलाक्षीणां प्रेयोदर्शनप्रतिभूः प्रियतमदर्शने लग्नकः अयम् इन्दुश्चन्द्रः नः अस्माकं नेत्रे सुधाभिः अमृतकिरणैः अनक्ति लिम्पति शीतलयतीति यावत् । इन्दुर्हि विरहोद्दीपकतया विरहिणीनां प्रियसमागमसाधकोऽपि यन्मम नेत्रे शीतलयति अतः शीघ्रं मे प्रियया समागमः सम्भवितेति कथं ते समुत्सुकतेति दुर्बलं हृदयं मैथिलीदर्श-नोत्सुकं प्रति रघुपतेरुक्तिरियमिति बोध्यं वस्तुतस्तु प्रक्षिप्तमेतत् पद्यमिति चिन्त्यम् । हरिणीवृत्तम् ॥६९॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उन्मीलन्ति मृणालकोमलरुचो राजीवसंवर्त्तिका-
संवर्त्तव्रतवृत्तयः कतिपये पीयूषभानोः कराः ।
अप्युच्चैर्धवलीभवन्तु गिरिषु क्षुब्धोऽयमुन्मज्जता
विश्वेनेव तमोमयो निधिरपामङ्काय फेनायते ॥७०॥

(सनिर्वेदम् ।)

इन्दुर्यद्युदयाद्रिमूर्ध्नि न भवत्यद्यापि तन्मा स्म भू-
न्नासीरेऽपि तमःसमुच्चयममूरुन्मूलयन्ति त्विषः ।
अप्यक्ष्णोर्मुदमुद्गिरन्ति कुमुदैरामोदयन्ते दिशः
सम्प्रत्यूर्ध्वमसौ तु लाञ्छनमभिव्यङ्क्तुं प्रकाशिष्यते ॥७१॥

उन्मीलन्तीति । मृणालवत् कोमलाः सुकुमाराः रुचः कान्तयः येषां तथाभूताः, राजीवानां पद्मानां याः संवर्त्तिकाः नवदलानि तासां संवर्त्ते प्रलये यत् व्रतं सङ्कल्पः तत्र वृत्तिर्व्यापारो येषां तथाविधाः कमलदलसङ्कोचका इति यावत्, पीयूषभानोः अमृतरश्मेश्चन्द्रस्य कतिपये न तु समग्रा नवोदितत्वादिति भावः, कराः किरणाः उन्मीलन्ति प्रसरन्ति । उच्चैः किरणैः गिरिषु पर्वतेषु धवलीभवन्तु श्वेतीभवन्तु उन्मज्जता उन्मज्जनं कुर्वता विश्वेन जगता क्षुब्ध इव मथित इव अयं तमोमयः अन्धकारमयः श्यामत्वादिति भावः अपां निधिः समुद्र अङ्काय झटिति फेनायते फेनमुद्गिरति । उत्प्रेक्षालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥७०॥

इन्दुरिति । अद्यापि यदि इन्दुश्चन्द्रः उदयाद्रेः उदयाचलस्य मूर्ध्नि शिरसि न भवति नोदेतीत्यर्थः । तत् तदा मा स्म भूत् न भवतु नोदेत्वित्यर्थः । ननु तर्हि तमोनाशादिकं कथं स्यादित्याह नासीर इति । अमूः त्विषः किरणाः नासीरेऽपि अस्तेऽपि उदयात् प्रागपीत्यर्थः, नासीरोऽप्यस्ताने स्यादस्तेऽपीति विश्वः । तमसाम् अन्धकाराणां समुच्चयं समूहम् उन्मूलयन्ति नाशयन्ति अक्ष्णोश्चक्षुषोर्मुदं प्रीतिं, मुत् प्रीतिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(शङ्खम् ।)

काश्मीरेण दिहानमम्बरतलं वामभ्रुवामानन-
द्वैराज्यं विदधानमिन्दुदृषदां भिन्दानमम्भःशिराः ।
प्रत्युद्यत्पुरुहूतपत्तनवधूदत्तार्घदर्भाङ्कुर-
चीवोत्सङ्गमैन्दवमिदं बिम्बं समुज्जृम्भते ॥७२॥

एतावत्

प्रमदो हर्ष इत्यमरः । उद्भिरन्ति जनयन्ति कुसुमैः तद्विकासैरिति भावः दिशः आमोदयन्ते सुरभीकुर्वन्ति अपि । तु पुनः असौ चन्द्रः सम्प्रति तत्तत्तमोनाशादिकार्यसमाधानानन्तरमित्यर्थः ऊर्ध्वं उपरि लाञ्छनं कलङ्कं अभिव्यङ्क्तुं प्रकटयितुं प्रकाशिष्यते उत्थास्यति । स्वकीयैः सत्कार्यैः साध्यते स्वयं प्रकाशे तु कलङ्क इति राहुः दुर्भाग्यमिन्दोरिति प्रस्तुतवर्णनेन कस्यापि अप्रस्तुतस्य व्यवहारयोगात् समासोक्तिरलङ्कारः । तदुक्तं दर्पणे । समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहार-समारोपः प्रस्तुतेऽन्यस्य वस्तुन इति । शार्दूलविक्रीडितं वृत्तम् ॥७१॥

काश्मीरेणेति । काश्मीरेण कुङ्कुमेन, काश्मीरं कुङ्कुमे च स्यादिति मेदिनी । अम्बरतलम् अन्तरीक्षं दिहानं दिग्धं कुर्वत् निम्यदित्यर्थः, वामभ्रुवां सुन्दरीणां आननद्वैराज्यं मुखप्रतिपक्षतां वदनप्रतिस्पर्द्धितामिति यावत् विदधानं कुर्वत्, इन्दुदृषदां चन्द्रकान्तोपलानाम् अम्भः-शिराः जलनाड़िकाः भिन्दानं खण्डयत्, प्रत्युद्यन्तीभिः प्रत्युद्गच्छ-न्तीभिः पुरुहूतपत्तनवधूभिः देवाङ्गनाभिः दत्तः यः अर्घः तस्य दर्भाङ्कुरेण कुशाङ्कुरेण चीवः मत्तः अतिभक्षणादिति भावः उत्सङ्गकुरङ्गः क्रोड-हरिणः यत्र तथाभूतम् इदम् ऐन्दवम् इन्दुसम्बन्धि बिम्बं मण्डलं समुज्जृम्भते सम्प्रकाशते । शार्दूलविक्रीडितं वृत्तम् ॥७२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पौलोमीकुचकुम्भकुङ्कुमरजःखाजन्यजन्मोद्धताः
शीतांशोर्द्युतयः पुरन्दरपुरीसीम्नामुपस्कुर्वते ।
एताभिर्लिहतीभिरन्धतमसान्युद्ग्रथ्नतीभिर्दिशः
चौर्णीमास्तृणतीभिरन्तरतमं व्योमेदमोजायते ॥७३॥

अपिच ।

नैवायं भगवानुदञ्चति शशी गव्यूतिमात्रीमपि
द्यामद्यापि तमस्तु कैरवकुलश्रीचाटुकाराः कराः ।
मथ्नन्ति स्थलसीम्नि शैलगहनोत्सङ्गेषु संरन्धते
जीवग्राहमिव क्वचित् क्वचिदपि छायासु गृह्णन्ति च ॥७४॥

पौलोमीति । पुलोम्नः अपत्यं स्त्री पौलोमी शची तस्याः कुचकुम्भयोः स्तनकलसयोः यत् कुङ्कुमरजः काश्मीरपरागः तस्य खाजन्ये खाकुल्ये यत् जन्म तेन उद्धताः गर्विताः शीतांशोश्चन्द्रस्य द्युतयः पुरन्दरस्य पुरी स्वर्गनगरी तस्याः सीम्नां प्रदेशानां उपस्कुर्वते गुणान्तराधानं कुर्वन्ति तत्प्रदेशान् शोभयन्तीत्यर्थः । अन्धतमसानि गाढान्धकारान् लिहतीभिः खादन्तीभिः नाशयन्तीभिरिति यावत्, दिशः उद्ग्रथ्नतीभिः प्रकटयन्तीभिः, चौर्णीं पृथ्वीं आस्तृणतीभिः आच्छादयन्तीभिः एताभिः द्युतिभिः करणभूताभिः अन्तरतमम् अतिमध्यम् इदं व्योम आकाशं ओजायते ओजस्विवदाचरति अतिशयेन उज्ज्वलीभवतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ७३ ॥

नैवेति । अयं भगवान् शशी अद्यापि गव्यूतिमात्रीमपि क्रोशद्वयपरिमाणामपि, गव्यूतिः स्त्री क्रोशयुगमित्यमरः । द्याम् आकाशं नैव उदञ्चति उत्तिष्ठति । तु किन्तु कैरवकुलानां कुमुदवृन्दानां श्रीः शोभा चाटुरालोकः प्रकाश इति यावत्, नृपादेर्वर्णने चाटुरालोके चाटुरिष्यते इति धरणिः । तौ कुर्वन्तीति तथोक्ताः कराः किरणाः तमः अन्धकारं स्थलसीम्नि स्थलदेशे मथ्नन्ति विलोडयन्ति विध्वंसय-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(ज्योत्स्नातिशयं विभाव्य ।)

किं नु ध्वान्तपयोधिरेष कतकचोदैरिवेन्दोः करै-
रत्यच्छोऽयमधश्च पङ्कमखिलं छायापदेशादभूत् ।
किंवा तत्करकर्त्तरीभिरभितो निस्तक्षणादुज्ज्वलं
व्योमैवेदमितस्ततश्च पतिताश्छायाच्छलेन त्वचः ॥७५॥

(परिक्रम्य पार्श्वतोऽवलोक्य च ।)

दलविततिभृतां तले तरूणा-
मिह तिलतण्डुलितं मृगाङ्करोचिः ।

न्नीत्यर्थः शैलानां गहनानाञ्च उत्सङ्गेषु अभ्यन्तरेष्विति यावत् संस्पृशते अवरुद्धं कुर्वन्ति तथा क्वचित् क्वचिदपि छायास्तु जीवन्ताहमिव गच्छन्ति छायाविलीनमपि तत्तत्प्रदेशेभ्यः स्वयं प्रवेशेन निष्क्राशय-न्नीवेत्यर्थः । उचितश्चैतद् भृत्यानामिति ध्वनिः । शार्दूलविक्रीडितं वृत्तम् ॥ ७४ ॥

किमिति । अयं ध्वान्तपयोधिः अन्धकारसमुद्रः कतकचोदैरिव औषधविशेषचूर्णैरिव इन्दोश्चन्द्रस्य करैः किरणैः अत्यच्छः अतिनिर्मलः किं नु ? कतकमिति मगधदेशप्रसिद्धवृक्षविशेषफलं, तस्य चूर्णप्रक्षेपेण पङ्कादिकमधः पतति जलञ्च निर्मलं भवतीति प्रसिद्धिमाश्रित्योक्तम् । अखिलं समस्तं पङ्कं छायापदेशात् छायाच्छलात् अधश्च अभूत् । किं वा तस्य इन्दोः करा एव कर्त्तर्यः कर्त्तरिकाः ताभिः अभितः समन्तात् निस्तक्षणात् कर्त्तनात् इदं व्योम आकाशम् उज्ज्वलं भवतीति शेषः छायाच्छलेन इतस्ततः तस्य त्वचः चर्माणि निस्तक्षा इति शेषः पतिताश्च । यथा अन्यस्यापि निस्तक्षस्य वृक्षादेस्त्वच इतस्ततः पतन्ति तद्वदिति भावः । सन्देहालङ्कारः । तदुक्तं दर्पणे । सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थित इति । शार्दूलविक्रीडितं वृत्तम् ॥७५॥

दलेति । दलविततिभृतां विस्तृतपत्राणामित्यर्थः तरूणां वृक्षा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मदचपलचकोरचञ्चुकोटी-
कवलनतुच्छमिवान्तरान्तराभूत् ॥७६॥

(विभाव्य च ।)

त्रिभुवनतमोलुण्टाकीनामहो मिहिरत्विषा-
मभिविधिरसौ कोकश्रेणीमनस्यवशिष्यते ।
क्षुधमपि तमः कोपादन्तः प्रविश्य विनिघ्नतः
शशधरकरानच्छिन्नाग्रांश्चरन्ति चकोरकाः ॥७७॥

अपिचेदानीम् ।

शनम् इह तले अधःप्रदेशे मृगाङ्करोचिः चन्द्रकिरणः तिलखण्डुलितं तिलतण्डुलाभ्यामिव आचरितम् अतएव अन्तरा अन्तरा मध्ये मध्ये मदेन प्रमोदेन चपलानां चकोराणां चञ्चुकोटीभिः चञ्चुमुखैः कवलनेन भक्षणेन तुच्छमिव शून्यमिव अभूत् । उत्प्रेक्षालङ्कारः । पुष्पिताग्रावृत्तम् ॥ ७६ ॥

त्रिभुवनेति । अहो आश्चर्यं त्रिभुवनस्य त्रिजगतः तमसाम् अन्धकाराणां लुण्टाकयः लुण्ठनकारिण्यः तासां मिहिरत्विषां सौरतेजसाम् असौ अभिविधिः अभिव्याप्तिः कोकश्रेणीनां चक्रवाककुलानां मनसि अवशिष्यते अवतिष्ठते । इदानीं तासां नान्यत्र स्थितिः परं चक्रवाकहृदयेषु स्थितिरेव अन्यथा कथं ते सन्तप्तास्तिष्ठन्ति तेषां रात्रौ परस्परविरहादिति भावः । चकोरकाः चकोरपक्षिणः क्रोधात् अन्तः प्रविश्य क्षुधं क्षुधामित्यर्थः तमोऽपि अन्धकारञ्च विनिघ्नतः विनाशयतः अच्छिन्नाग्रान् दूरप्रसारिण इति भावः शशधरकरान् चन्द्रकिरणान् चरन्ति खादन्ति पिबन्तीत्यर्थः । हरिणीवृत्तम् ॥ ७७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तथा पौरस्त्यायां दिशि कुमुदकेदारकलिका-
कपाटघ्नीमिन्दुः किरणलहरीमुल्लसयति ।
समन्तादुन्मीलद्बहलजलविन्दुस्रवकिनो
यथा पुञ्जायन्ते प्रतिगुडकमेणाङ्कमणयः ॥७८॥

(परिक्रामन्नूर्ध्वमवलोक्य ।)

तरुणतमालकोमलमलीमसमेतदयं
कलयति चन्द्रमाः किल कलङ्कमिति ब्रुवते ।
तदनृतमेव निर्दयविधुन्तुददन्तपद-
व्रणविवरोपदर्शितमिदं हि विभाति नभः ॥७९॥

तथेति । इन्दुश्चन्द्रः पौरस्त्यायां प्राच्यां दिशि कुमुदानां कैरवाणां केदारः क्षेत्रं तत्र याः कलिकाः मुकुलानि तासां कपाटघ्नीं सङ्कोचनाशिनीमिति यावत् विकासिनीमिति भावः किरणलहरीं मयूखतरङ्गं तथा उल्लसयति प्रसारयति, यथा समन्तात् सर्वतः उन्मीलद्भिः प्रसरद्भिः बहुलैः प्रभूतैः जलबिन्दुभिः स्रवकिनः सगुच्छाः जलबिन्दुवर्षिण इति यावत् एणाङ्कमणयः चन्द्रकान्ताः प्रतिगुडकं गुटिकां गुटिकां प्रति पुञ्जायन्ते विस्तृता भवन्तीति यावत् । शिखरिणीवृत्तं, रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणीति तल्लक्षणात् ॥ ७८ ॥

तरुणेति । अयं चन्द्रमाः तरुणः अभिनवः यस्तमालः तद्वत् कोमलं मृदुलं मलीमसं श्यामलञ्च एतत् किमपि वस्त्विति यावत् कलयति धत्ते, लोकास्तु तत् कलङ्कमिति ब्रुवते वदन्ति किलेति प्रसिद्धौ । तत् लोकवाद इति भावः अनृतमेव अलीकमेव । हि, यतः इदं निर्दयस्य निष्ठुरस्य विधुन्तुदस्य राहोः दन्तपदेन दन्ताघातेन यत् व्रणं तदेव विवरं रन्ध्रं तेन उपदर्शितं प्रकटितं नभः आकाशं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किञ्च ।

रुचिभिरभितष्टङ्कोत्कीर्णैरिव त्रसरेणुभि-
र्यदुडुभिरपि छेदैः स्थूलैरिव भ्रियते नभः ।
प्रकृतिमलिनो भास्वद्बिम्बोन्मृजाकृतकर्मण-
स्तदयमपि हि त्वष्टुः कुन्दे भविष्यति चन्द्रमाः ॥८०॥

लक्ष्मणः । (सर्वतोऽवलोक्य ।)

भूयस्तराणि यदमूनि तमस्विनीषु
ज्योत्स्नीषु च प्रविरलानि ततः प्रतीमः ।

विभाति राजते । कोकिलकं वृत्तं, हयऋतुसागरैर्यतियुतं यदि कोकिलकमिति तल्लक्षणात् ॥ ७९ ॥

रुचिभिरिति । यत् अभितः समन्तात् टङ्कोत्कीर्णैः पाषाण-दारणास्त्रविशेषोत्क्षिप्तैः त्रसरेणुभिरिव, ज्वालान्तरगते भानौ यत् किञ्चिद् दृश्यते रजः । प्रथमं तत्प्रमाणानां एतरेणुं प्रचक्षते इत्युक्त-प्रमाणैर्वस्तुविशेषैरिव रुचिभिः मयूखैः तथा उडुभिः नक्षत्रैरपि स्थूलैः छेदैरिव खण्डैरिव नभः आकाशं भ्रियते पूर्यते तत् अयं प्रकृतिमलिनः स्वभावकलुषः चन्द्रमाः भास्वद्बिम्बस्य सूर्यबिम्बस्य उन्मृजायाम् उन्मार्जने तक्षणे इति यावत् कृतकर्मणः कृतव्यापारस्य त्वष्टुः विश्वकर्मणः कुन्दे मन्त्रविशेषे भविष्यति हि अवश्यमेव भवि-ष्यतीत्यर्थः । नैता रुचयः किन्तु विश्वकर्मणष्टङ्कोत्कीर्णास्त्रसरेणव एते, नैतानि नक्षत्राणि किन्तु विश्वकर्मणष्टङ्कोत्कीर्णाश्छेदविशेषा एते, तस्मादवश्यमेव चन्द्रः प्रकृतिमलिनः विश्वकर्मणः कुन्दे तिष्ठतीत्यु-त्प्रेक्षा । पुरा सूर्यतेजांसि असहमानया सूर्यपत्न्या संज्ञया प्रार्थितः पिता विश्वकर्मा सूर्यं यन्त्रारूढं कृत्वा हीनतेजसमकरो-दिति पुराणवार्त्तानुसन्धेया । हरिणीवृत्तम् ॥ ८० ॥

भूयस्तराणीति । यत् यतः अमूनि उडूनीत्यर्थः तमस्विनीषु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सन्ध्यानलेन भृशमम्बरमूषिकाया-
मावर्त्तितैरुडुभिरेव भृतोऽयमिन्दुः ॥८१॥

(विहस्य च ।) हन्त ! यथाधर्म(ख)मेतत् ।

यत्पीयूषमयूखमालिनि तमःस्तोमावलीढ़ायुषां
नेत्राणामपमृत्युहारिणि पुरः सूर्योढ़ एवातिथौ ।
अम्भोजानि पराञ्चि तन्निजमघं दत्त्वेव तेभ्यस्ततो
गौराङ्गीवदनोपमासुकृतमादत्ते पतिर्यज्वनाम् ॥८२॥

तामसीषु रजनीषु भूयस्तराणि प्रभूतानि, ज्योत्स्नीषु चन्द्रिकान्वितासु रात्रिषु, ज्योत्स्नी चन्द्रिकयान्वितेत्यमरः । प्रदिरलानि खल्वानि च दृश्यन्ते इति शेषः, ततः तस्मात् प्रतीमः मन्यामहे सन्ध्या एव अनलः अग्निः तेन अम्बरमाकाशमेव मूषिका सुवर्णादिद्रवीकरणपात्रविशेषः तत्र आवर्त्तितैः द्रवीकृतैः उडुभिरेव नक्षत्रैरेव अयम् इन्दुः भृतः पूरितः ततश्च तन्द्रोदये नक्षत्राणां खल्वता तेषां द्रवीभावेन तदन्तर्गतत्वादिति भावः । उत्प्रेक्षालङ्कारः । वसन्ततिलकं वृत्तम् ॥८१॥

(ख) यथाधर्मं धर्मानुसारीत्यर्थः ।

यदिति । यतः तमःस्तोमेन तिमिरसङ्घातेन अवलीढ़ं भक्षितं नाशितमित्यर्थः आयुः जीवनं स्वव्यापार इति यावत् येषां तथाविधानां नेत्राणाम् अपमृत्युहारिणि विघातनाशिनीति यावत् नेत्रविकार-कारिणीति भावः पीयूषमयूखमालिनी अमृतरश्मौ एव सूर्योढ़े अस्तमितसूर्यकालागते अतिथौ अभ्यागते जने पुरः अग्रतः पूर्वस्यां दिशि वा उपस्थिते सतीति शेषः अम्भोजानि पद्मानि पराञ्चि पराङ्मु-खानि सङ्कुचितानि भवन्तीति शेषः, तत् तस्मात् यज्वनां पतिः द्विजराज-श्चन्द्रः अतिथिरूप इति भावः निजम् अघं पापं मार्जयतीति यावत् तेभ्यः अम्भोजेभ्यः दत्त्वेव ततः तेभ्य एव सकाशादित्यर्थः गौराङ्गी या नारी तस्या वदनेन या उपमा सादृश्यं सुकृतं पुण्यं आदत्ते गृह्णाति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः। (सर्वतोऽवलोक्य। सस्मितम्।) अहह नामधेयमाधुर्य्यादपरमार्थदृश्वानो विप्रलभ्यन्ते (व)। तथाहि।

स्मेरा दिशः कुमुदमुज्झितुरं पिबन्ति
ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः।
आः कीदृगत्रिमुनिलोचनदूषिकायां
पीयूषदीधितिरिति प्रथितोऽनुरागः॥८३॥

(रामं च दृष्ट्वा। सहर्षस्मितम्।) कथमयं कुमाराङ्कविजयप्रत्या-

सुन्दरीवदनस्य चन्द्रसाम्यप्रसिद्धेः। उक्तञ्च धर्मसंहितासु। अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते। स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति। अतिथौ विमुखे प्रोक्तं गते यत् पातकं नृणाम्। तदेवाष्टगुणं प्रोक्तं सूर्य्योढ़े विमुखे गते इति च। शार्दूलविक्रीड़ितं वृत्तम्॥८२॥

(व) नामधेयेति नामधेयमात्रस्य नाममात्रस्य माधुर्य्यात् मनोज्ञत्वात्। अपरमार्थदृश्वानः अतत्त्वदर्शिनः। विप्रलभ्यन्ते प्रतार्य्यन्ते।

स्मेरा इति। दिशः स्मेराः विकासस्वभावाः सत्य चन्द्रकरसङ्गादिति भावः, कुमुदम् उच्चैः भिदुरं प्रकाशशीलं सत एव रजन्यामिति भावः, उदरम्भरयः उदरपूर्त्तिलालसा इति यावत् चकोराः ज्योत्स्नाकरम्भं ज्योत्स्नारूपं दधिसक्तून्, करम्भो दधिसक्तव इत्यमरः। पिबन्ति दधिसक्तुभ्रान्त्या नतु ज्योत्स्नामुद्वेजयति भावः। आः निन्दायां तथापीति भावः अत्रिमुनेः लोचनस्य दूषिकायां मले, दूषिका नेत्रयोर्मलमित्यमरः। मलश्चते चन्द्रमसीति यावत्, अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौरिति कालिदासः। पीयूषदीधितिः अमृतकिरण इति अनुरागप्रियता लोकानामिति शेषः प्रथितः प्रख्यातः। अयुक्तमेतदिति भावः। वसन्ततिलकं वृत्तम्॥८३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गतोऽपि ताडकानिग्रहेण ह्रिणीयमानः (ग) सहसा नोपतिष्ठते (घ) वत्सः। (लक्ष्मणं प्रति।) वत्स सौमित्रे! अस्माकमनेन वृत्तान्तेन प्रदोषलक्ष्मी(स)रियमनूद्यते (ङ)। पश्य।

निशाचराणां तमसां निहन्ता
पुरोऽयमुद्गच्छति रामचन्द्रः।
अथोल्लसद्भिर्नयनैर्मुनीना-
मयं कुमुद्वानजनि प्रदेशः ॥८४॥

रामः। (विभाव्य।)

मदयति यदुत्पन्नो दुग्धाम्बुधेरयमम्बुधीन्
नयति नयनादत्रेर्जातो मुदं नयनानि च।

(ग) कुमारेति कुमाराङ्कः प्रथमं युद्धं तस्मिन् यो विजयः शत्रुविनाशः तस्मात् प्रत्यागतः शत्रून् विनाश्य समागत इत्यर्थः। ताड़काया निग्रहेण वधेन। ह्रिणीयमानः लज्जमानः स्त्रीहत्याया अकर्त्तव्यत्वाद् गर्हणीयत्वाच्चेति भावः।

(घ) उपतिष्ठते समुपगच्छति।

(स) प्रदोषलक्ष्मीः रजनीसुखश्रीः, प्रदोषो रजनीसुखमित्यमरः।

(ङ) अनूद्यते पुनरुक्ता भवति अधिकं वर्त्तते इत्यर्थः।

निशाचराणामिति। निशाचराणां तमसाम् अन्धकाराणाम् अन्धकारस्वरूपाणां निशाचराणामिति यावत् निहन्ता अयं राम एव चन्द्रः रामचन्द्रः पुरः अग्रतः उद्गच्छति उदेति उपतिष्ठते इत्यर्थः। अथ इदानीं उल्लसद्भिः विकसद्भिः आनन्दातिशयादिति भावः मुनीनां नयनैः अयं प्रदेशः कुमुद्वान् कैरववान् अजनि। मुनीनां नयनान्येव कुमुद्वानि विकसन्तीति भावः। उपेन्द्रवज्रावृत्तम्, उपेन्द्रवज्रा प्रथमे लघौ सेति तल्लक्षणात्। रूपकमलङ्कारः ॥८४॥

मदयतीति। अयं सोमः दुग्धाम्बुधेः क्षीरसागरात् यत् यतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदखिलसुरश्रेणीसाधारणप्रणया शची-
सहचरचरस्थाली सोमः समञ्जसमीहते ॥८५॥

(सलज्जमुपसृत्य ।) भगवन् ! अभिवादये ।

विश्वामित्रः । (सस्नेहवङ्गमानमालिङ्ग्य ।) वत्स रघुनन्दन ! इत्थमेव

प्रकृष्टकर्त्तृभिप्रायक्रियाफलवतो विधीन् ।
प्रयुञ्जानास्त्वया वीर ! परिपाल्यामहे वयम् ॥८६॥

रामः । (स्वगतम् ।) शिरसा गृहीतमाचार्य्यवचनम् ।

विश्वामित्रः । (समरधूलिधूसरं रामस्य कपोलमुन्मार्जयन् ।) यत्सत्यममुना नक्तञ्चरव्यतिकरेण (क) प्रियसुहृदा सौर-

---

उत्पन्नः, तस्मात् अम्बुधीन् समुद्रान् नंदयति हर्षयति, अत्रेः नयनात् जातः, अतएव नयनानि लोकानामिति शेषः सुदृशम् आनन्दं नयेति प्रापयति च । युक्तश्चैतत् जन्यजनकसम्बन्धादिति भावः । किन्तु अखिलसुरश्रेणीनां सर्वदेवानां साधारणः समानः प्रणयः लालसा यस्यां तादृशी शचीसहचरस्य इन्द्रस्य चरस्थाली हवनीयद्रव्यभाण्ड-मित्यर्थः सोमः लताभेदः चन्द्रश्च, सोमः सोमलतायाञ्च चन्द्रे चेति विश्वः । तत् प्रसिद्धं समञ्जसं समीचीनं युक्तमित्यर्थः ईहते चेष्टते । एतत् तु निःसम्बन्धतया अतीव युक्तमिति भावः । हरिणीवृत्तम् ॥८५॥

प्रकृष्टेति । हे वीर ! प्रकृष्टम् उत्कृष्टं कर्त्तृभिप्रायं कर्त्तारमभिप्रैतीति तथोक्तं कर्त्तृनिष्ठमित्यर्थः यत् क्रियाफलं तत् विद्यते येषु तान् विधीन् वैदिककर्माणि प्रयुञ्जानाः कुर्वन्तः वयं त्वया परिपाल्यामहे रक्षणीयाः । अनुष्टुब्वृत्तम् ॥ ८६ ॥

(क) नक्तञ्चरव्यतिकरेण निशाचरसम्पर्केण ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ध्वजेन वितन्यमाने वैताने कर्मणि कम्पितमिव मे हृदयम् (ख)।

रामः । (सगौरवम् ।) भगवन् ! क एष सीरध्वजो नाम य(ग)मद्य ते त्रिभुवनदुर्लभोऽयं प्रियसुहृच्छब्दप्रयोगः कमपि महिमानमारोपयति (घ)।

विश्वामित्रः । वत्स ! शृणोषि विदेहेषु मिथिलां नाम नगरीम् ।

रामः । यत्र पवित्रमाश्चर्यद्वयं जनाः कथयन्ति । सकलराजकदुराकर्षमैन्दुशेखरं (ङ) धनुः, लाङ्गलमुखोल्लिखितविश्वम्भराप्रसूतिरगर्भसम्भवा (च) मानुषी ।

विश्वामित्रः । (विहस्य ।) अथ किम् ।

रामः । (सकौतुकम् ।) ततः किं तस्याम् ।

विश्वामित्रः ।

(ख) सीरध्वजेन जनकेन । वितन्यमाने विस्तार्यमाणे क्रियमाणे इत्यर्थः । वैताने यज्ञिये । नक्षत्रराशदीयं यज्ञं यदि विहन्युरिति हृदयकम्पनमिति भावः ।

(ग) यं सीरध्वजम् ।

(घ) कमपि अनिर्वचनीयं महिमानं गौरवम् आरोपयति नयति ।

(ङ) सकलेति सकलैः राजकैः राजन्यैः दुराकर्षम् अनाकर्षणीयमिति यावत् ऐन्दुशेखरं शैवम् ।

(च) लाङ्गलेति लाङ्गलमुखेन हलाग्रेण उल्लिखिता क्षता विश्वम्भरा भूमिरेव प्रसूतिः जननी यस्याः तथाभूता । अगर्भसम्भवा अनुदरजाता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

असौ सीरध्वजो राजा यो देवाद् द्युमणेरपि ।
अध्यैष्ट याज्ञवल्क्यस्य मुखेन ब्रह्मसंहिताम् ॥८७॥

तस्य संन्यस्तशस्त्रस्य (छ) पुराणराजर्षेर्जनकवंशजन्मनो दीक्षाविलोपशङ्का पर्य्याकुलयति (ञ) माम् । तदेत(झ)-मायुष्मन्तौ, विधिशेष(ञ)मस्मदीयं समाप्य सहैव (ट) मिथिलामुपतिष्ठामहे (ठ) ।

रामः । (सहर्षमपवार्य्य ।) वत्स लक्ष्मण! ममापि तस्मिन्नतरुणरोहिणीरमणचूडामणिपाणिप्रणयिनि शरासने चिरस्य कौतुक(ड)मस्ति ।

असाविति । असौ राजा सीरध्वजः, यः याज्ञवल्क्यस्य मुनेर्मुखेन देवात् द्युमनेः सूर्य्यात् अपि ब्रह्मसंहितां वेदशास्त्रम् अध्यैष्ट अधीतवान् । याज्ञवल्क्येन सूर्य्यादधीतं सीरध्वजेन तु याज्ञवल्क्यादिति भावः । अनुष्टुब्वृत्तम् ॥ ८७ ॥

(छ) संन्यस्तशस्त्रस्येति संन्यस्तं परित्यक्तं शस्त्रं येन तथाभूतस्य स्वयमात्मरक्षणाक्षमस्येति भावः ।

(ञ) दीक्षाविलोपशङ्का नक्षत्रराक्रमणात् यज्ञव्याघातशङ्केत्यर्थः पर्य्याकुलयति सर्वतः व्याकुलयति ।

(झ) तत् तस्मात् तस्य दीक्षारक्षणार्थमिति भावः एतम् आगच्छतम् ।

(ञ) विधिशेषं यज्ञशेषम् ।

(ट) सहैव मिलित्वैवेति यावत् ।

(ठ) उपतिष्ठामहे गच्छामः ।

(ड) अतरुणेति अतरुणः नवः रोहिणीरमणश्चन्द्रः चूडामणिर्यस्य सः तथोक्तस्य हरस्येत्यर्थः पाणिप्रणयिनि हस्तप्रणयवति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (सपरिहासम् ।) आर्य्यायामयोनिजन्मनि (ढ) राजकन्यकायामपि ।

रामः । (सरोषस्मितम् ।) कथमन्यदेव किमपि प्रहसनं सूत्रयति (ण) भवान् । (मुनिं प्रति ।) भगवन् इक्ष्वाकुवंश-गुरो ! यदभिरुचितं भवते ।

(इति परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति कौमारविक्रमो नाम द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

(ततः प्रविशति कञ्चुकी (क) ।)

शरासने शरा अस्यन्ते क्षिप्यन्ते अनेनेति शरासनं धनुः तस्मिन् । कौतुकम् औत्सुक्यं तद्दर्शनलालसेति यावत् ।

(ढ) आर्य्यायां मान्यायाम् । अयोनिजन्मनि अगर्भसम्भूतायां जानक्यामित्यर्थः ।

(ण) प्रहसनं परिहसनीयम् । सूत्रयति करोति ।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यकृता
अनर्घराघवद्वितीयाङ्कव्याख्या समाप्ता ।

(क) कञ्चुकी, अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः । सर्व-कार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते इत्युक्तलक्षणः कश्चित् पुरुषः । उक्तञ्च भरतेन । जरावैक्लव्ययुक्तेन विप्रेण गालेन कञ्चुकीति । अन्तःपुरे त्वभिरतः स्यादन्तर्वंशिको जन इत्यमरश्च ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कञ्चुकी । (जरावैक्लव्यविसंस्थुलानि (ख) कतिचित्पदानि दत्त्वा आत्मानं प्रति सखेदोपालम्भम् (ग) ।)

गात्रैर्गिरा च विकलश्चटुमीश्वराणां
कुर्वन्नयं प्रहसनस्य नटः कृतोऽस्मि ।
तत्त्वां पुनः पलितवर्णकभाजमेनं
नाट्येन केन नटयिष्यति दीर्घमायुः ॥१॥

(पुरो विलोक्य ।) अये सीतापादमूलोपजीविनी कलहंसिका ।

(प्रविश्य ।)

कलहंसिका । अज्ज ! पणमामि ।

कञ्चुकी । वत्से ! कल्याणिनी भूयाः ।

कलहंसिका । अज्ज ! चिरेण कुदो तुज्झे ।

(ख) जरेति जरया वार्द्धकेन यत् वैक्लव्यं व्याकुलीभावः सतत-दुःस्थतेत्यर्थः तेन विसंस्थुलानि पदे पदे स्खलितप्रायाणीति यावत् ।

(ग) सखेदोपालम्भं सदुःखाक्षेपम् आहेति क्रियाविशेषणम् ।

गात्रैरिति । हे आत्मन् ! गात्रैः अङ्गैः गिरा वाचा च विकलः अवशः अयम् अहम् ईश्वराणां प्रभूणां चटुं चाटुं प्रिय-भाषितमिति यावत्, चटुश्चाटौ पिचण्डे चेति मेदिनी । कुर्वन् प्रहसनस्य नाट्यविशेषस्य परिहासस्य वा नटः अभिनेता कृतः अस्मि । तत् तस्मात् दीर्घम् आयुः जीवितकालः पलितवर्णकभाजं पलितेन यत् वर्णकं जराजनितशौक्लमित्यर्थः तद्भाजम् एनं त्वां पुनः इदानीमपी-त्यर्थः केन नाट्येन अभिनयकाव्येन नटयिष्यति नर्त्तयिष्यति ? पलितं जरसा शौक्लमित्यमरः । इदानीमपि तव नटनं न युज्यते इति भावः । वसन्ततिलकं वृत्तम् ॥ १ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कञ्चुकी। (विमृश्य।) तत्किं न कथ्यते। वत्से! विदितमेव भवत्याः, यथा तत्तादृगङ्गुतं दारकद्वय(घ)मादाय भगवान् कौशिको यजमानं (ङ) महाराजं सीरध्वजमुपस्थितः।

कलहंसिका। अध इं। अज्ज! पहवं (च) णामधेयं च ताणं सुणिदुं अत्थि मे कोदूहलं।

कञ्चुकी। वत्से! कथयामि।

त्रयस्त्रिंशत्कोटिविदशमयमूर्त्तेर्भगवतः
सहस्रांशोर्वंशे जयति जगदीशो दशरथः।
यदस्त्रैरस्निग्धैरसुरयुवतिश्वासपवन-
प्रकोपे सिद्धे न स्पृशति शतकोटिं शतमखः॥२॥

इमौ तस्य विश्वाम्यत्युराजजौ रामलक्ष्मणौ।
ययोर्भरतशत्रुघ्नावनुजौ द्वन्द्ववारिणौ॥३॥

(घ) दारकद्वयं कुमारयुगलम्।

(ङ) कौशिकः विश्वामित्रः। यजमानं यागनिरतम्।

(च) प्रभवं प्रभवत्यस्मादिति प्रभवः उत्पत्तिस्थानं तम्।

त्रयस्त्रिंशदिति। त्रयस्त्रिंशत्कोटिविदशमयी मूर्त्तिर्यस्य तथाभूतस्य सर्वदेवात्मभूतस्येत्यर्थः भगवतः सहस्रांशोः सूर्यस्य वंशे दशरथो नाम जगदीशः राजा जयति सर्वोत्कर्षेण वर्त्तते। शतमखः इन्द्रः अस्त्रिग्धैः दारुणैः यस्य दशरथस्य अस्त्रैः असुरयुवतीनाम् असुराङ्गनानां श्वासपवनस्य निःश्वासमारुतस्य प्रकोपे वृद्धौ सिद्धे सम्पन्ने सति असुराणां निहतत्वादिति भावः शतकोटिं वज्रं न स्पृशति। दशरथेनैव स्वकार्यस्यासुरपराजयस्य साधितत्वादिति भावः। शिखरिणीवृत्तम्॥ २॥

इमाविति। इमौ रामलक्ष्मणौ नाम तस्य विश्वाम्यत्युः नृपतेः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कलहंसिका । जधा अह्मघरे भट्टधारिआ (छ) सीदा उम्मिला अ मण्डवी सुदकित्ती अ । (विहिन्य । हर्षं निरूपयन्ती ।) कधं महाकुलप्पसूदा एदे वि कुमारआ । (मुहूर्तमिव स्थित्वा । दीर्घमुष्णं च निःश्वस्य ।) कुदो अह्माणं ईरिसो भाअधेओ (ज) ।

कञ्चुकी । भवति ! मा विषीद । सर्वं भविष्यति देवब्राह्मणानुग्रहात् ।

कलहंसिका । तदो तदो ।

कञ्चुकी । ततश्च वृद्धान्तःपुराणामभ्यर्थनया (झ) तौ विकर्त्तनकुलकुमारकौ (ञ) दृष्ट्वा निवर्त्तमानः पुरोधसा गौतमे(ट)नाहमाहूय राजपुत्रीणां सौभाग्यदेवताराधनाय संविहितो(ठ)ऽस्मि ।

आत्मजौ पुत्रौ द्वन्द्वचारिणौ युगनद्धवाहनवत् सहचारिणौ भरतशत्रुघ्नौ ययोः रामलक्ष्मणयोः अनुजौ कनिष्ठौ । रामस्य अनुजः भरतः ततः लक्ष्मणः ततश्च शत्रुघ्न इति निष्कर्षः । अनुष्टुब्वृत्तम् ॥२॥

(छ) भर्त्तृदारिका राजकन्या, राजा भट्टारको देवस्तत्सुता भर्त्तृदारिकेत्यमरः ।

(ज) भागधेयं भाग्यम् ईदृशैः कुमारैः सह राजदारिकाणां परिणयस्य युक्तत्वं भाग्याधीनमिति भावः ।

(झ) वृद्धान्तःपुराणां वृद्धानाम् अन्तःपुरवर्त्तिनां जनानामित्यर्थः अभ्यर्थनया प्रार्थनया अनुरोधेनेत्यर्थः ।

(ञ) विकर्त्तनकुलकुमारौ सूर्य्यकुलदारकौ ।

(ट) पुरोधसा पुरोहितेन, पुरोधास्तु पुरोहित इत्यमरः । गौतमेन गोतमसमर्षिपुत्रेण शतानन्देनेत्यर्थः ।

(ठ) सौभाग्येति सौभाग्यं शुभादृष्टं शोभनपतिलाभहेतुभूतमिति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कलहंसिका । (सहर्षम् ।) अज्ज ! सव्वजणमणोसिदाणु-ज्जलं (ङ) विअ तत्थमवदो सदाणन्दस्स वअणम् ।

कञ्चुकी । वत्से ! एवमेतत् । न खल्वतथ्यमगम्भीरमाङ्गिरसो (ढ) ब्रवीति ।

कलहंसिका । ता किं मसेध संकरसरासणारोवणव्ववसाएण (ण) राएसिणो जणअस्स पडिण्णासाहसं णिव्वाहेस्सदि राहवो (त) ।

कञ्चुकी । वत्से ! अस्मानपि तर्कोऽयं तरलीकरोति (थ) । तथाहि ।

भावः तस्य देवता तदधिष्ठात्री देवी गौरीति भावः तस्याः समाराधनाय सम्पूजनाय । संविहितः समादिष्टः ।

(ङ) सर्वजनेति सर्वेषां जनानां मनोगतं वाञ्छितं तस्य अनुकूलं हितमित्यर्थः ।

(ढ) अतथ्यम् अनृतम् । अगम्भीरम् अगूढार्थमित्यर्थः । आङ्गिरसः अङ्गिराः ब्रह्मणः पुत्रः तस्य अपत्यं पुमान् आङ्गिरसः । ब्रह्मणः पुत्रः अङ्गिराः, तत उतथ्यः, ततो दीर्घतमाः, ततो गोतमः, ततश्च शतानन्द इत्यङ्गिरःसन्तान इति यावत् ।

(ण) शङ्करेति शङ्करस्य यत् शरासनं धनुः तस्य आरोपणं मौर्व्या सङ्गमनं तत्र व्यवसायः उद्योगः यस्य तथाभूतस्य ।

(त) प्रतिज्ञासाहसं प्रतिज्ञा पणः सैव साहसं सहोबलं विक्रम इति यावत् तत्कर्म प्रतिज्ञासाहसं पणपूरणरूपं विक्रमव्यापारमित्यर्थः । निर्वाहयिष्यति साधयिष्यति । राघवः रघुसुतः राम इत्यर्थः ।

(थ) तर्कः वितर्कः संशय इति यावत् । तरलीकरोति चपलयति आकुलयतीति यावत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पूर्णेऽपि कर्मणि हतेष्वपि राक्षसेषु
विज्ञाय मैथिलसुतामपि वीर्य्यशुल्काम् ।
बालं पितुः प्रियममुं रघुराजपुत्र-
मेतावतीं भुवमृषिः कथमानिनाय ॥ ४ ॥

कलहंसिका । (स्मरणमभिनीय । सविषादम् ।) अज्ज ! पउत्तिविसेसलब्भेण दुम्मणायमाणमत्ताणं पञ्चालिआकेलिबावारेण विणोदअन्तीं (द) भट्टदारिअं पेक्खिअ उव्विग्गाए (ध) कारणं परिवज्जिदुं (न) आगदाए अज्जस्स दंसणेण मए विसुमरिदं इमिणा उण दे रक्खसणासग्गहणेण सुमराविदह्मि ।

पूर्णेऽपीति । ऋषिः विश्वामित्रः कर्मणि यज्ञविघ्नौ पूर्णे सम्पन्नेऽपि राक्षसेषु हतेषु अपि यदर्थं स आनीतस्तत्र सिद्धेऽपीति निष्कर्षः मैथिलसुतां सीतां, वीर्य्यमेव पराक्रम एव शुल्कं पणः यस्याः तथाभूतां विज्ञायापि विदित्वापि अमुं बालं कुमारं पितुः दशरथस्य प्रियं रघुराजपुत्रं कथम् एतावतीं भुवम् एतावद्दूरदेशमित्यर्थः आनिनाय आनीतवान् । वसन्ततिलकं वृत्तम् ॥ ४ ॥

(द) प्रवृत्तीति प्रवृत्तिर्वार्त्ता, वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः । तस्या विशेषः तस्य लब्धेन प्राप्त्या । दुर्मनायमानं दुःखितमन इव आचरतीति तथोक्तम् । पाञ्चालिकेति पाञ्चालिका कृत्रिमपुत्रिका, पाञ्चालिका पुत्रिका स्यात् यस्त्वदन्तादिभिः कृतेत्यमरः । तया केलिः क्रीडनमेव व्यापारः तेन । विनोदयन्तीं प्रीणयन्तीम् ।

(ध) उद्विग्नया सञ्जातोद्वेगया ।

(न) प्रतिपत्तुं ज्ञातुम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कञ्चुकी । (सविषादम् ।) वत्से ! कीदृशी सा प्रवृत्तिः, या तव भर्तृदारिकामपि दुर्मनायते (प) ।

कलहंसिका । सुणादु अज्जो । जधा किल सीदादेवीं पत्थिदुं दसग्गीवपुरोहिदो (फ) आअदोत्ति ।

कञ्चुकी । (तत्रावस्थां नाटयन् सहर्षम् ।) कथमेतावदपि कार्य्यं वत्सा जानकी जानाति । यदनेनोदन्तेन (ब) दुर्मनीभूयते । नूनमिदानीमस्याः कृतावतरणमङ्गला(भ)न्यङ्गकानि यौवनस्य पन्थानमीक्षन्ते (म) ।

कलहंसिका । अज्ज ! एवं णेदम् । अज्जओ(य)सित्ति सिढिलीकिदलज्जा संपदि ज्जेव्व अणुहूदं (र) किंपि णिवेदेमि । (संस्कृतमाश्रित्य) (ल) ।

(प) दुर्मनायते दुर्मनसमिवाचरयति ।

(फ) दशग्रीवपुरोहितः रावणपुरोधाः ।

(ब) उदन्तेन वृत्तान्तेन, वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादित्यमरः ।

(भ) कृतेति कृतम् अवतरणे प्रादुर्भावे यौवनस्येति भावः मङ्गलं यैः तथाभूतानि ।

(म) ईक्षन्ते पश्यन्ति ।

(य) आर्य्यकः पितामहः ।

(र) अनुभूतं ज्ञातम् ।

(ल) संस्कृतमिति चेटीनां क्वचित् संस्कृतभाषणमुक्तं भरतेन । यथा, संस्कृतभाषावाराः प्रायो नाट्येषु न स्त्रियः स्राष्याः । क्वचिदपि तपःप्रभावाद् विदग्धतावोधनाच्च शस्यन्ते इति । अन्यच्च, चेटी प्राकृतभाषिणी स्याच्च संस्कृतभाषिणीति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनाकूतैरेव प्रियसहचरीणां शिशुतया
वचोभिः पाञ्चालीमिथुनमधुना सङ्गमयितुम् ।
उपादत्ते नो वा विरमति न वा केवलमियं
कपोलौ कल्याणी पुलकमुकुलैर्दन्तुरयति ॥५॥

कञ्चुकी । (सहर्षम् ।) दिष्ट्या चिरस्य जीवद्भिरस्माभिर्यौवनवती वत्सा जानकी दृष्टा । (सस्मितम् ।) ततस्ततः ।

कलहंसिका । तदो अ पुणो पुणो वि ताहिं उज्जुआहिं णिव्वन्धिज्जमाणा लज्जिदुं (व) वि लज्जेदि ।

कञ्चुकी । (विहस्य ।) वत्से ! सङ्कीर्णे (ग) वयसि खल्विदं वर्त्तते । अत्र हि

मनोऽपि शङ्कमानाभिर्बालाभिरुपजीव्यते ।
अषडक्षीणषाङ्गुण्यमन्त्री मकरकेतनः ॥६॥

अनाकूतैरिति । इयं कल्याणी सीता प्रियसहचरीणां शिशुतया बालकत्वेन भावानभिज्ञतयेति भावः हेतुना नास्ति आकूतम् अभिप्रायो येषु तथाभूतैः भावशून्यैरित्यर्थः वचोभिः उपलक्षितेति शेषः, विशेषणे तृतीया । अधुना पाञ्चालीमिथुनं क्षत्रियपुत्रिकायुगलं सङ्गमयितुं नो वा उपादत्ते न वा गृह्णाति, न वा विरमति न वा निवर्त्तते । चापल्यप्रकाशमियेति भावः । केवलं कपोलौ गण्डदेशौ पुलकमुकुलैः रोमाञ्चकलिकाभिः दन्तुरयति उन्नतानतौ करोति । सत्त्वोद्रेकादिति भावः । शिखरिणीवृत्तम् ॥ ५ ॥

(व) कञ्चुकाभिः सरलाभिः सहचरीभिः । निबध्यमाना आग्रहातिशयेन गृह्यमाणा । लज्जितुं लज्जां प्रकटयितुम् ।

(ग) सङ्कीर्णे संश्रिते बाल्ययौवनाभ्यामिति शेषः ।

मन इति । मनः चित्तमपि शङ्कमानाभिः मनो जानाति चेत्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कलहंसिका । (सलज्जम् ।) अज्ज ! रमणीअं मन्तेसि सव्वस्स वि अणहवसंवादिणी (ष) दे वाआ ।

कञ्चुकी । किञ्च वत्से !

तदात्वप्रोन्मीलन्मृदिमरमणीयात् कठिनतां
निचित्य प्रत्यङ्गादिव तरुणभावेन घटितौ ।
स्तनौ सम्बिभ्राणाः क्षणविनयवैयात्यमसृण-
स्मरोन्मेषाः केषामुपरि न रसानां युवतयः ॥७॥

भावमिति ततोऽपि विभ्यतीभिरिति भावः बालाभिः कुमारीभिः न सन्ति षट् अक्षीणि यत्र तत् तथोक्तं षट् गुणाः सन्ध्यादयः षड्गुणाः ते एव षाड्गुण्यं ततस्त्र अपड्क्षीणश्च तत् षाड्गुण्यश्चेति कर्मधारयः तृतीयाद्यगोचरसन्ध्यादिगुणषट्कमन्त्रणाकारी अपड्क्षीणो यस्तृतीयाद्यगोचर इति, सम्बिनां विपक्षो यानमासनं द्वैधमाश्रयः षट्गुणा इति चामरः । मकरकेतनः कामः उपजीव्यते सेव्यते । कामः सेव्यते, परं न केनापि तत् बध्यते इति भावः । अनुष्टुब्वृत्तम् ॥६॥

(ष) अनुभवेति अनुभवसंवादिनी अनुभवानुसारिणीत्यर्थः ।

तदात्वेति । तदात्वे तत्कालेऽ, तत्कालस्तु तदात्वं स्यादित्यमरः । यौवनोद्रेकसमये इत्यर्थः प्रकर्षेण उन्मीलन् प्रादुर्भवन् यः मृदिमा मार्दवं तेन रमणीयात् मनोज्ञात् प्रत्यङ्गात् अङ्गात् अङ्गात् कठिनतां काठिन्यं निचित्य समाहृत्य तरुणभावेन यौवनेन घटितौ निर्मितौ स्तनौ सम्बिभ्राणाः धारयन्तः तथा क्षणे प्रतिक्षणमित्यर्थः विनयः शान्तता अनौद्धत्यमिति यावत् वैयात्यं धार्ष्ट्यं चापल्यमित्यर्थः ताभ्यां मसृणः मधुरः स्मरोन्मेषः मदनविकारः यासां तादृश्यः युवतयः केषां रसानाम् आस्वादानाम् उपरि न वर्त्तन्ते इति शेषः अपितु सर्वरसोपरिवर्त्तिन्यः भवन्तीत्यर्थः । शिखरिणीवृत्तम् ॥ ७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कलहंसिका । (विहस्य ।) भोदु । ता ण किं पि तुह्मेहिं मुदम् ।

कञ्चुकी । वत्से ! न तावदर्थोऽयमद्यापि राजगोचरीभवति । यदि च स्यात् किमेतावता (स) ।

कलहंसिका । तदा हदासो रावणो देवीं (ह) परिणेदि ।

कञ्चुकी । (विहस्य ।)

हस्ते करिष्यति जगत्त्रयजित्वरोऽपि
कस्तादृशो दुहितरं जनकेश्वरस्य ।
प्राणाधिकं विपुलबाहुभृतामपीदं
त्रैयम्बकं किमपि कार्मुकमन्तरायः ॥८॥

नापि दशकन्धरानुरोधेन स्वयं प्रतिज्ञातमन्यथा करिष्यति महाक्षत्रियो विदेहराजः । तन्न किञ्चिदेतत् ।

(स) अयमर्थः एष विषयः रावणपुरोहितागमनरूप इति भावः । राजगोचरीभवति राज्ञा विदितो भवतीत्यर्थः । यदि च स्यात् राजगोचरीभवेदित्यर्थः । एतावता तेनेत्यर्थः ।

(ह) देवीं सीताम् ।

हस्ते इति । जगत्त्रयस्य त्रिभुवनस्य जित्वरोऽपि विजेतापि तादृशः कः जनकेश्वरस्य दुहितरं कन्यां हस्ते करिष्यति परिणेष्यति न कोऽपीत्यर्थः । कथमित्याह प्राणाधिकमिति । विपुलबाहुभृतां महाभुजानां महाधनुर्धराणामिति यावत् अपि इदं प्राणाधिकं वल्लभाधिकम् अतिदुर्धर्षमिति यावत् त्रैयम्बकं शाम्भवं किमपि अनिर्वचनीयं कार्मुकं धनुः अन्तरायः विघ्नः । हरधनुषि अभग्ने कोऽपि तां परिणेतुं न शक्नोतीति निष्कर्षः । मन्दाक्रान्तावृत्तम् ॥ ८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कलहंसिका । (विहस्य ।) एवं भोदु । अज्ज ! संपदि कहिं ते रामलक्खणा ।

कञ्चुकी । नन्वेतावेव देवतागारवेदिकायाम् (च) ।

मुनीन् कौशिकवैदेहगौतमानभिराध्यतः ।

ढौकितौ ज्ञानकर्मभ्यां मोक्षस्वर्गाविव स्वयम् ॥९॥

तदेहि । महच्चिरमागतानामस्माकम् (क) । कन्यान्तःपुरमेव गच्छामः ।

(इति निष्क्रान्तौ ।)

विष्कम्भकः ।

(ततः प्रविशति जनको विश्वामित्रशतानन्दौ रामलक्ष्मणौ च ।)

जनकः । (सहर्षम् ।) भगवन् विश्वामित्र !

लुम्पन्नदृष्टजामातृसम्पदां शुचमद्य नः ।

त्वदागमनजन्मायमानन्दः सुदिनायते ॥१०॥

(च) एतावेव रामलक्ष्मणावित्यर्थः । देवतागारवेदिकायां देवसदनपरिष्कृतभूमौ ।

मुनीनिति । ज्ञानकर्मभ्यां ढौकितौ संसाधितौ स्वयं मूर्त्तिमन्तौ मोक्षस्वर्गाविव कौशिकवैदेहगौतमान् विश्वामित्रजनकशतानन्दान् मुनीन् अभिराध्यतः सेवेते । अनुष्टुब्वृत्तम् ॥ ९ ॥

(क) महदिति आगतानां समेतानाम् अस्माकं महत् चिरं भूयान् विलम्बो जात इति यावत् ।

लुम्पन्निति । अद्य न दृष्टा जामातृसम्पद् जामातृलाभजनितसम्पद्भिः यैः तथाभूतानाम् अप्राप्तसदृशजामातृकाणामिति यावत् नः अस्माकं शुचं शोकं तद्लाभनिमित्तं सन्तापमित्यर्थः लुम्पन् हरन्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

अद्य प्रदक्षिणशिखावलयः कृशानु-
रश्नाति मे जनपदेषु वषट्कृतानि ।
त्वत्तेजसि स्फुरति शान्तिकपौष्टिकेषु
स्रां च स्रुचं शिथिलमाङ्गिरसो बिभर्त्ति ॥११॥

विश्वामित्रः । सखे सीरध्वज! चिरस्य शान्तः पुष्टश्च (ख) तवायं जनपदः ।

यत्र त्वं ब्रह्ममीमांसातत्त्वज्ञो दण्डधारकः ।
पुरोधाश्चैव यस्यासावङ्गिरःप्रपितामहः ॥१२॥

तव आगमनात् जन्म उत्पत्तिर्यस्य तादृशः अयम् आनन्दः सुदिना-यते शोभनं दिनमिवाचरति । अनुष्टुब्वृत्तम् ॥ १० ॥

अद्येति । अद्य मे मम जनपदेषु कृशानुरग्निः प्रदक्षिणा प्रकर्षेण दक्षिणां दिशं गता शिखा एव वलयं वेष्टनं यस्य तथाभूतः सन् वषट्कृतानि हुतानि, अग्नौ तु हुतं त्रिषु वषट्कृतमित्यमरः । शान्तिकपौष्टिकेषु शान्तिकर्मसु पुष्टिसाधनकर्मसु च तव तेजसि स्फुरति सति त्वयैव शान्तिकपौष्टिककर्मसु संसाधितेष्विति भावः आङ्गिरसः शतानन्दः स्रां स्रुचं यज्ञीयपात्रविशेषं शिथिलं यथा तथा अनावश्यकत्वादिति भावः बिभर्त्ति धारयति । वसन्ततिलकं वृत्तम् ॥ ११ ॥

(ख) शान्तः शान्तियुक्तः निरापदित्यर्थः । पुष्टः पुष्टियुक्तः सम्पन्न इति यावत् ।

यत्रेति । यत्र यस्मिन् जनपदे ब्रह्मणः वेदस्य मीमांसायाः तत्त्वज्ञः सारज्ञः त्वं दण्डधारकः शास्ता, तथा अङ्गिराः प्रपितामहः यस्य तथोक्तः अङ्गिरसः प्रपौत्र इत्यर्थः असौ शतानन्दः पुरोधाः पुरोहितश्च । अनुष्टुब्वृत्तम् ॥ १२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(स्मितं कृत्वा ।) जामातुरदर्शनजन्मा शोकः पुनरस्माकमुपशमयितुमवशिष्यते (ग) । किञ्च शोकहर्षौ नाम लोकयात्रेयं भवतः (घ) । तथाहि ।

यजूंषि तैत्तिरीयाणि मूर्त्तानि वमति स्म यः ।
स योगी याज्ञवल्क्यस्त्वां वेदान्तानध्यजीगपत् ॥१३॥

(ग) अस्माकमिति जैथिलेन स्वस्यात्मीयभावप्रकटनम् । उपशमयितुं नाशयितुम् । अवशिष्यते अवशिष्टो वर्त्तते । अन्यस्मिन् विषये अस्माकं शोको नास्ति केवलं सदृशजामातृलाभाभावे शोको वर्त्तते इति भावः ।

(घ) किञ्चेति भवतस्तत्त्वज्ञस्य शोकहर्षप्रकटनं केवलं संसारयात्रामात्रं सांसारिकभावेषु वर्त्तमानस्य भवतः संसारधर्मयोः शोकहर्षयोः प्रकटनं न तु तात्त्विकमिति भावः ।

यजूंषीति । यः मूर्त्तानि मूर्तिमन्ति यजूंषि यजुर्वेदमन्त्रान् तैत्तिरीयाणि तित्तिरिपक्षिभक्षितानि वमति स्म उद्गिरति स्म स योगी याज्ञवल्क्यः त्वां वेदान्तान् उपनिषदः अध्यजीगपत् अध्यापितवान् । ब्रह्मतत्त्वप्रतिपादिकानाम् उपनिषदां तात्पर्य्यावबोधात् तव शोकहर्षयोर्नावसर इति भावः । पुरा याज्ञवल्क्यः शाकल्यमुनेः सकाशात् यजुर्वेदमधीत्य गुरुदक्षिणार्थमुद्यतः । गुरुणा च शाकल्येन दक्षिणा न गृहीता । ततश्च याज्ञवल्क्यस्य निर्बन्धेन जातकोपो मुनिर्मम विद्या दीयतामित्युवाच । याज्ञवल्क्येन च सकोपेन अधीतयजुर्वेदः उद्गीर्य दत्तः । तेन च गुरुणा तित्तिरिपक्षिरूपिणा स वान्तो वेदः भक्षितः । ततश्च तद्भागस्य कृष्णयजुःसंज्ञाभूत् । याज्ञवल्क्यस्य पुनः सूर्य्यात् यजुर्वेदमधीतवान् । तद्भागस्य शुक्लयजुःसंज्ञा प्रसिद्धेति वार्त्तानुसन्धेया । अनुष्टुवृत्तम् ॥ १७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (जनान्तिकम् (ङ) ।) आर्य्य ! अयमयं स राजा वैदेहः । पवित्रमपरिमेयार्थ्यं यस्यावदान(च)मुपाध्याया-दनुश्रूयते ।

रामः । (सप्रमोदानुरागम् ।) वत्स ! स एवायं शतपथ-कथाधिकारी (छ) पुरुषः प्रणाय्यायान्तेवासिने (ज) यस्मै वाजसनेयो (झ) याज्ञवल्क्यः सूक्तानि(ञ) यजूंषि प्रोवाच ।

विश्वामित्रः । (मुहूर्त्तं निर्वर्ण्य च ।)

निजाय तस्मै गुरवे यतीनां
जैत्राय विश्वामितगोसहस्रम् ।
तं गोसहस्राधिपतेः प्रशिष्य-
मुपास्महे मैथिलमातिथेयम् ॥१४॥

(ङ) जनान्तिकम्, अन्योन्यामन्त्रणं यत् स्यात् जनान्ते तज्जना-न्तिकमिति भरतः ।

(च) अवदानं पूर्वकृतं कर्म, अवदानं वृत्तकर्म शुद्धं कर्म च कीर्त्तितमिति विश्वः ।

(छ) शतपथेति शतं पन्थानो यस्य स शतपथः शतशाख इति यावत् यजुर्वेदस्य शतशाखत्वादिति भावः तस्य कथायां वार्त्तायाम् अधिकारी अधिकारवान् व्युत्पन्न इति यावत् ।

(ज) प्रणाय्याय वासनारहिताय सुतुच्छवे इति यावत्, प्रणा-य्योऽभिलाषशून्यः स्यादिति हारावल्याम् । अन्तेवासिने शिष्याय, छात्रान्तेवासिनौ शिष्ये इत्यमरः ।

(झ) वाजसनेयः यजुर्वेदवित् ।

(ञ) सूक्तानि सुष्ठु उक्तानि समीचीनतया विरचितानीत्यर्थः ।

निजायेति । यतीनां योगिनां जैत्राय जेता एव जैत्रः तस्मै योगिप्रवरायेति यावत् तस्मै निजाय स्वकीयाय गुरवे आचार्य्याय

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जनकः । (सप्रश्रयम् (ट) ।) भगवन् ! यदन्यत्किञ्चिदभिदधाति (ठ) तत्र प्रभविष्णु(ड)र्भवान् । तत्रभवतः सहस्रमयूखान्तेवासिनो योगीश्वरा(ढ)दध्ययनमिति महीयसी(ण)यमस्माकं यशःपताका ।

विश्वामित्रः । (विहस्य ।) भो महायोगिन् !

किं याज्ञवल्क्यो जनकः किमेवं
न वः स्वरूपं कवयोऽपि विद्युः ।
प्रवाहनित्यानधिकृत्य युष्मान्
सहस्रशाखाः श्रुतयः प्रथन्ते ॥१५॥

याज्ञवल्क्यायेत्यर्थः विप्राणितं दत्तं गवां सहस्रं येन तथोक्तं, गवां किरणानां सहस्रं गोसहस्रं तस्य अधिपतेः सूर्यस्येत्यर्थः, स्वर्गेपुपशुवाग्वज्रदिङ्नेत्रदृष्टिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः । प्रशिष्यं शिष्यशिष्यम् अतिथेयम् अतिथिषु साधुः तम् अतिथिसेवापरायणमित्यर्थः तं मैथिलं सीरध्वजम् उपाग्महे उपगच्छामः । उपजातिवृत्तम् ॥ १४ ॥

(ट) सप्रश्रयं सविनयम् ।

(ठ) अभिदधाति वदति ।

(ड) प्रभविष्णुः समर्थः । विविधप्रशंसावादे भवान् पटुः परमहं तद्भाजनं नेति भावः ।

(ढ) तत्रभवतः पूज्यात् । सहस्रमयूखान्तेवासिनः सूर्यशिष्यात् । योगीश्वरात् योगिनां प्रधानात् याज्ञवल्क्यादित्यर्थः ।

(ण) महीयसी अतिमहती ।

किमिति । याज्ञवल्क्यः किं वक्ष्यति शेषः जनकः किं वक्ष्यति शेषः कवयोऽपि विद्वांसोऽपि वः युष्माकं स्वरूपं तत्त्वम् एवम् इत्थं न विद्युः न जानीयुः किमपरे इति भावः । याज्ञवल्क्यजनकयोर्न

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शतानन्दः । भगवन् कौशिक ! एवमीदृशाः खल्वमी त्रिभुवनमहनीयमहिमानो मनीषिणः (त) ।

जनकः । (सवैलक्ष्यस्मितम् (थ) ।)

निर्माय कार्मणमृचामघमर्षणीना-
मुन्मार्जनीर्जगदघानि तवाद्य वाचः ।
श्रोतुं चिरप्रणयि कौतुकमस्ति चेतो
दुःखाकरोति पुनरेष ममार्थवादः ॥१६॥

तद्विरम । (इति शिरस्यञ्जलिं घटयति (द) ।)

विशेषोऽस्तीति भावः । प्रवाहेण गुरुशिष्यपरम्परया नित्यान् अविनाशिनः युष्मान् अधिकृत्य अवलम्बेत्यर्थः सहस्रशाखाः श्रुतयः वेदाः प्रथन्ते प्रख्याता भवन्ति । यद्यपि सामवेदस्य सहस्रशाखत्वं यजुषां शतशाखत्वम् ऋचामेकविंशतिशाखत्वमिति वेदानां सहस्रशाखाधिकत्वमुक्तं तथाप्यत्र सहस्रशाखा इति वचनं शाखावाहुल्यमात्रज्ञापनार्थमिति न दोषः । उपजातिवृत्तम् ॥ १५ ॥

(त) त्रिभुवनेति त्रिभुवने महनीयः पूजनीयः महिमा प्रभावः येषां तथोक्ताः । मनीषिणः महानुभावाः ।

(थ) सवैलक्ष्यस्मितं सलज्जमन्दहासम् ।

निर्मायेति । अघमर्षणीनां पापहारिणीनाम् ऋचाम् ऋग्वेदीयमन्त्रविशेषाणां कार्मणं कर्मानुष्ठानजनितं संस्कारविशेषं निर्माय कृत्वा जगताम् अघानि पापानि उन्मार्जनीः संशोधनीः तव वाचः वचनानि श्रोतुम् अद्य मम कौतुकं कौतूहलम् अस्ति, पुनः चित्त एषः अर्थवादः स्तुतिः प्रशंसेत्यर्थः मम चिरप्रणयि चिरं त्वयि बद्धानुरागं चेतः दुःखाकरोति दुःखितं करोति । पापानीति कर्मयोगे कर्मणि षष्ठीवाधयिन्त्यः । वसन्ततिलकं वृत्तम् ॥ १६ ॥

(द) घटयति योजयति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः । (सस्मितमञ्जलिमुद्घाटयन् ।) सखे सीरध्वज ! संह्रियता(ध)मच्छलिः । अमी तूष्णींभूताः (न) स्मः । कात्यायनीकामुकंकार्मुकारोपणपणप्रणयप्रवीणेन दुहितुः पत्या (प) सम्प्रत्यपर्य्युषितप्रतिज्ञो (फ) भूयाः ।

लक्ष्मणः । (अपवार्य्य (ब) ।) आर्य्य ! परस्परेषां पौरुषोत्कर्षप्रशंसारमणीयः पावनोऽयममीषां समवायः (भ) ।

रामः । वत्स ! यदात्थ (म) ।

स्मरन्ति लोकार्थममी किल श्रुती-
रिति प्रतिष्ठामधिगन्तुमीश्महे ।
परं यदेषां पुनरस्ति वैभवं
तदेत एव व्यतिविद्रुते यदि ॥१७॥

(ध) संह्रियताम् उद्घाट्यताम् ।

(न) तूष्णींभूताः मौनिनः ।

(प) कात्यायनीति कात्यायन्याः गौर्य्याः कामुकः कान्तः हरः तस्य कार्मुकारोपणं धनुषि मौर्वीयोजनमेव पणः तस्य प्रणये पूरणे प्रवीणः निपुणः तथाभूतेन । दुहितुः पत्या जामातेत्यर्थः ।

(फ) अपर्य्युषितप्रतिज्ञः पूर्णप्रतिज्ञः ।

(ब) अपवार्य्य अपवारितं कृत्वा । तल्लक्षणमुक्तं भरतेन । रहस्यं कथ्यतेऽन्यस्य स्फुटं तदपवारितमिति ।

(भ) परस्परेषाम् अन्योन्येषाम् । पौरुषेति पौरुषस्य पुरुषकारस्य यः उत्कर्षः तस्य प्रशंसया स्तुतिवादेन रमणीयः मनोज्ञः । पावनः पापनाशनः । समवायः सम्मेलनम् ।

(म) आत्थ ब्रवीषि ।

स्मरन्तीति । अमी ऋषयः लोकार्थं जगदुपकारार्थं श्रुतीः वेदान् स्मरन्ति किलेति प्रसिद्धौ । स्मृतिरूपेण परिणमयन्तीति प्रसिद्धिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जनकः । (सहर्षम् ।) भगवन् ! परमनुगृहीतोऽस्मि । यतः ।

समस्या वा साम्नां बहिरबहिरंहःपरिमृजा-
मृचां वा संवादः किमपि यजुषां वा परिपणः ।
त्वदाशीर्वादोऽयं बहुविषयसाक्षात्कृतफलो
वरं मे वत्सायाः प्रथयति पुरोवर्त्तिनमिव ॥१८॥

विश्वामित्रः । (साकूतस्मितम् (य) ।) सखे सीरध्वज ! एवमेतत् ।

वेदार्थस्मरणजन्यानाम् ऋषिवाक्यानामेव स्मृतित्वात् अतएव तेषां स्मृतिसंज्ञेति भावः । एषां पुनः यत् परं महत् वैभवं माहात्म्यम् अस्ति तत् एते एव यदि सम्भावनायां व्यतिविद्रते परस्परं जानन्ति एतेषां वैभवम् अतएव जानन्तीति सम्भाव्यते नान्ये इति यावत् । वंशस्थविलं वृत्तम् ॥ १७ ॥

समस्येति । बहिः बाह्यदेशेषु अबहिः अभ्यन्तरेषु अंहःपरिमृजां पापापनोदिनां साम्नां समस्या समाहारः संक्षेपो वा, समस्या तु समासार्थेत्यमरः । ऋचां ऋग्वेदानां संवादः सम्भाषणं वा किमपि अनिर्वचनीयस्वरूप इत्यर्थः यजुषां परिपणः मूलधनं वा, नीवी परिपणो मूलधनमित्यमरः । वाशब्दत्रयस्तुपमावाचकं विकल्पार्थं वा । तथाचामरः, वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चय इति । बहुषु विषयेषु साक्षात्कृतं प्रत्यक्षीकृतं फलं यस्य तथाभूतः अयं तव आशीर्वादः दुहितुः पत्या सम्यत्यपर्य्युपितप्रतिज्ञो भूया इत्युक्तः मे मम वत्सायाः सीतायाः वरं पुरोवर्त्तिनमिव अग्रतस्तिष्ठन्तमिव प्रथयति प्रकटयति । शिखरिणीवृत्तम् ॥ १८ ॥

(य) साकूतस्मितं साभिप्रायमन्दहासम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दवीयस्यो दूरादपथमिह चामुत्र च शुचां
त्रिवेदीवाक्यानामनतिचिरभग्ना इव खिलाः ।
श्रुतिग्राह्यं ज्योतिः किमपि बहिरन्तर्मलमुषो
मृजाया मज्जानः क्व नु विपरियन्ति द्विजगिरः ॥१९॥

घतानन्दः । (स्वगतम् ।) नूनं रामभद्रमेव जामातरमभिसन्धाय (र) भगवानयं पुनः पुनर्वक्रोक्तिभिः (ल) सौरध्वजं परिमोहयति(व) । भवतु । अहमस्य प्ररोचनार्थमसंविदान इव (श) पृच्छामि । (प्रकाशम् ।) भगवन् ! कस्येदं शकुन्त-

---

दवीयस इति । दूरात् अतिशयेनेत्यर्थः दवीयस्यः महत्य इत्यर्थः इह च अस्मिन् लोके च अमुत्र परस्मिन् लोके च शुचाम् अपथम् अस्थानं शोकनाशहेतुभूता इति यावत्, त्रिवेदीवाक्यानां श्रुतिवचसाम् अनतिचिरभग्नाः तत्क्षणप्रकटिता इत्यर्थः खिला इव अप्रहतभूमय इव, द्वे खिलाप्रहते समे इत्यमरः । श्रुतिग्राह्यं श्रवणेन्द्रियग्रहणीयं किमपि अनिर्वचनीयं ज्योतिः तेजोरूपा इति भावः, बहिरन्तर्मलमुषः बाह्याभ्यन्तरपापहारिण्य इत्यर्थः मृजायाः शुद्धेः मज्जानः सारभागाः, सारो मज्जा नरीत्यमरः । द्विजगिरः ब्राह्मणवाचः क्व नु कुत्र खलु विपरियन्ति विपरिवर्त्तन्ते ? नैव कुत्रापि विपरीतानि भवन्तीत्यर्थः । शिखरिणीवृत्तम् ॥ १९ ॥

(र) अभिसन्धाय जनसाधयेत्यर्थः ।

(ल) वक्रोक्तिभिः अनतिव्यक्तैर्वचनैरिति यावत् ।

(व) परिमोहयते विमुग्धं करोति ।

(श) प्ररोचनार्थम् अभिव्यक्तार्थमित्यर्थः । असंविदान इव अजानन्निव ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

राजकेतोरिव (घ) कौस्तुभश्रीवत्सौ रत्नद्वयम् (स) ।

विश्वामित्रः । (विहस्य । स्वगतम् ।) साधु वत्स शतानन्द ! साधु । यदेतत् कृतं तीर्थं विवक्षितस्य वस्तुनः सुखावताराय (ह) । (प्रकाशम् ।) वत्स गौतम ! ककुत्स्थकुलसम्भवौ कुमारावेतौ ।

शतानन्दः । (सप्रत्यभिज्ञमिव (च) ।)

पुत्रार्थे जगदेकजाह्निकययूद्दामभ्रमत्कीर्त्तिना
चातुर्होत्रवितीर्णविश्ववसुधाचक्रेण चक्रे मखः ।
राज्ञा षड्रथिरथेन यत्र सकलस्वर्वासिसर्वातिथौ
स स्वेनैव फलप्रदः फलमपि स्वेनैव नारायणः ॥२०॥

(घ) शकुन्तेति शकुन्तराजः पक्षिराजः गरुडः केतुर्यस्य स शकुन्तराजकेतुर्विष्णुः तस्येव ।

(स) रत्नद्वयं महामूल्यधनभूतं बालकद्वयम् । दारकद्वयमिति पाठान्तरम् ।

(ह) तीर्थं सोपानं, तीर्थं सोपानपङ्क्तौ स्यादिति धरणिः । विवक्षितस्य वक्तुमिष्टस्य वस्तुनः विषयस्य । सुखावताराय सुखेन प्रसङ्गायेति यावत् ।

(च) सप्रत्यभिज्ञमिव पूर्वानुभूतस्य ज्ञानं प्रत्यभिज्ञा तत्सहितमिव ।

पुत्रार्थे इति । जगति एकः अद्वितीयः जाह्निकः अतिवेगवानित्यर्थः ययुरेव अश्वमेधीयोऽश्व एव, ययुरश्वोऽश्वमेधीय इत्यमरः । उद्दामा उद्भटा भ्रमन्ती कीर्त्तिर्यस्य तथाभूतेन, चत्वारः होतारः चतुर्होतारः ते तव चातुर्होत्राः, स्वार्थे ष्णप्रत्ययः । ऋग्वेदी एकः सामवेदी द्वितीयः यजुर्वेदी तृतीयः अथर्ववेदी चतुर्थ इति चत्वारः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तल्लिमेतावेव तौ दाशरथी यौ किल रामलक्ष्मणौ ताड-कामथनमङ्गलोद्वातवितीर्णदिव्यास्त्रमन्त्रपारायणेन (क) भगवतैव विनीतौ वैतानिकस्य (ख) कर्मणश्छिद्रापिधान-दक्षिणया (ग) भगवन्तमुपासाञ्चभूवतुः (घ)।

विश्वामित्रः । (सकौतुकम् ।) अथ किम् ।

(जनकस्तौ सस्नेहवद्धमानं पश्यति ।)

शतानन्दः । तदनयोः कतरो रामभद्रः कतरश्च लक्ष्मणः ।

विश्वामित्रः । (रामं निर्दिश्य ।) वत्स आङ्गिरस !

होतार इति यावत् तेभ्यः वितीर्णं दक्षिणात्वेन दत्तं विश्वं समस्तं वसुधाचक्रं भूमण्डलं येन तादृशेन राज्ञा पङ्क्तिरथेन दशरथेन मखः यज्ञः चक्रे कृतः । सकलाः सर्वे सर्वाशिनः स्वर्गवासिनः देवाः सर्वः शिवश्च अतिथयः अभ्यागताः यत्र तथाभूते यत्र मखे, अतिथिर्नो गृहा-गते इत्यमरः । स स्वेनैव स्वयमेव फलप्रदः यज्ञफलदाता नारायणः स्वेनैव स्वयमेव फलमपि अभूदिति शेषः । नारायण एव यज्ञीय-फलरूपेणाऽपि गृहे चतुर्धा विभक्तः समभवदिति फलितार्थः । शार्दू-लविक्रीडितं वृत्तम् ॥ २० ॥

(क) ताड़केति ताड़काया मथनं निधनमेव मङ्गलं तस्य उद्घाते उपक्रमे, उद्घातस्तु पुमान् पादस्खलने सदुपक्रमे इति मेदिनी । वितीर्णं दत्तं दिव्यास्त्राणां मन्त्रपारायणं मन्त्ररूपमभीष्टं येन तथा-भूतेन, पारायणमभीष्टं स्यात् तत्परात्रययोरपीति मेदिनी ।

(ख) विनीतौ शिक्षितौ । वैतानिकस्य यज्ञीयस्य ।

(ग) छिद्रापिधानदक्षिणया छिद्रमन्तरायः तस्य अपिधानं तिरो-धानं निराकरणमित्यर्थः तदेव दक्षिणा गुरवे निष्क्रयत्वेन दत्तं वस्तु तया ।

(घ) उपासाञ्चभूवतुः आराधयामासतुः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ये चत्वारो दिनकरकुलक्षत्रसन्तानमल्ली-
मालाम्लानस्तवकमधुरा जज्ञिरे राजपुत्राः ।
रामस्तेषामचरमभवस्ताडकाकालरात्रि-
प्रत्यूषोऽयं सुचरितकथाकन्दलीमूलकन्दः ॥ २१ ॥

शतानन्दः । (लक्ष्मणं निर्दिश्य ।) अयं चापरो लक्ष्मणः दिष्ट्या भगवद्वसिष्ठप्रसूतं (ङ) क्षत्रकुलमध्यते (च) ।

जनकः । (विहस्य ।) साधु भगवन् ! अस्माद्दृशीषु प्रजासु प्रविश्य क्रीडसि (छ) ।

क्रोधाग्नौ पुरुहूतहुङ्कृतिपराभूतत्रिशङ्कुत्रपा-
सम्पातज्वलिते जगत्त्रयमयीं त्वय्याहुतिं जुह्वति ।

ये इति । दिनकरस्य सूर्यस्य कुले वंशे ये क्षत्रसन्तानाः क्षत्रियसमूहाः ते एव मल्लीमाला मल्लिकापुष्पस्रजः तासाम् अम्लान-स्तवक इव मधुरा मनोहरा ये चत्वारः राजपुत्रा जज्ञिरे जाताः, तेषां राजपुत्राणाम् अचरमभवः अग्रजः, ताड़का एव कालरात्रिः प्रलयरजनी तस्याः प्रत्यूषः प्रभातं तस्याः संहर्त्तेति भावः, सुचरितस्य कथा एव कन्दली वृक्षविशेषः तस्याः मूलं प्रधानं कन्दः मूलं यमा-श्रित्य सुचरितकथा प्रवर्त्तते इति भावः, अयं रामः । मन्दाक्रान्ता-वृत्तं, मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्ममिति तल्लक्ष-णात् ॥२१॥

(ङ) भगवदिति भगवता वशिष्ठेन प्रसूतं संस्कृतमित्यर्थः ।

(च) मध्यते वर्द्धते ।

(छ) प्रजासु सन्तानेषु, प्रजा स्यात् सन्ततौ जने इत्यमरः । प्रविश्य क्रीड़सि अस्माकं सङ्कल्पानुसारेण तत्तत्सङ्कल्पितार्थसिद्ध्यर्थं विचरसीति भावः ।

क्रोधाग्नाविति । पुरुहूतस्य इन्द्रस्य हुङ्कृत्या हुङ्कारेण परताभूः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

संभ्रान्तोपनतस्य नाटितजरावैक्लव्यशीर्णाक्षराः
प्रत्यूहाय बभूवुरम्बुजभुजो देवस्य चाटूक्तयः ॥ २२ ॥

तमपि नाम भगवन्तं यजमानमन्ये गोपायितारः (ञ) ।

शतानन्दः । राजर्षे ! एवमेतत् । किं पुनर्न दीक्षिष्यमाणाः (झ) क्रुध्यन्तीति रक्षितारं क्षत्रियमुपाददते (ञ) ।

जनकः । (सहर्षं रामलक्ष्मणौ निर्दिश्य जनान्तिकम् ।) भगवन् शतानन्द !

भवति न तथा भानोः शिष्ये गुरौ रसतो न च
स्वयमपि मुनौ विश्वामित्रे गृहानधितिष्ठति ।

स्वर्गात् भ्रंशितः यस्त्रिशङ्कुः तस्य तपायाः लज्जायाः सम्पातेन सम्भ्रमनेन ज्वलिते दीपिते क्रोधाग्नौ जगत्त्रयमयीं त्रिभुवनमयीम् आहुतिं त्वयि जुह्वति सति त्रिशङ्कोः स्वर्गाद् भ्रंशनतपया प्रवृद्धकोपे त्वयि सृष्टिसंहारं कर्तुमुपक्रममाणे सतीति भावः, संभ्रान्तः सन् उपनतः समीपोपस्थितः तस्य देवस्य अम्बुजभुवः पद्मयोनेः नाटितेन जनितेन जरावैक्लव्येन वार्द्धक्यविकलतया शीर्णानि स्खलितानि अक्षराणि वर्णाः यासु तथाभूताः चाटूक्तयः प्रियभाषणानि त्वत्सन्तोषकराणि वचनानीति यावत् प्रत्यूहाय विघ्नाय बभूवुः प्रियभाषणेन त्वां भगवान् कमलयोनिर्जगत्संहारात् निवारयामासेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २२ ॥

(ञ) यजमानं यज्ञं कुर्वन्तम् । गोपायितारः रक्षितारः ।

(झ) दीक्षिष्यमाणाः यज्ञ्यमाणाः ।

(ञ) उपाददते गृह्णन्ति आश्रयन्ति ।

भवतीति । एतौ दशरथसुतौ रामलक्ष्मणौ दृष्ट्वा उच्छ्वसितम् उल्लसितं मे मनः यथा प्रत्यग्ज्योतिषः परात्मनः प्रबोधे ज्ञाने सुखासिकां सुखावस्थानं निरतिशयानन्देन स्थितिमिति यावत् शिथिल-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशरथसुतावेतौ दृष्ट्वा यथोच्छ्वसितं मनः
शिथिलयति मे प्रत्यग्ज्योतिःप्रबोधसुखासिकाम् ॥२३॥

शतानन्दः । राजर्षे वैदेह ! एवमेतत् । ममापि राजपुत्राविमौ साक्षात्कुर्वतो वत्से सीतोर्मिले न हृदयादवरोहतः (ट) ।

जनकः । (विश्वामित्रं प्रति ।) भगवन् !

इदं वयो मूर्त्तिरियं मनोज्ञा
वीराद्भुतोऽयं चरितप्ररोहः ।
इमौ कुमारौ वत पश्यतो मे
कृतार्थमन्तर्नटतीव चेतः ॥ २४ ॥

यति मन्दीकरोति, भानोः सूर्यस्य शिष्ये गुरौ याज्ञवल्क्ये रसतः अनुरागात् न तथा स्वयं मुनौ विश्वामित्रे महान् अधितिष्ठति न च तथा भवति तद्वत् उच्छ्वसितं मनः प्रत्यग्ज्योतिः प्रबोधसुखासिकां न शिथिलयतीति यावत् । यद्वा भवति त्वयि तथा भानोः शिष्ये इति वार्थः । रसत इत्यत्र वसत इति पाठे गुरौ गुरुसमीपे वसतः तिष्ठतः समेत्यनेन सम्बन्धः । एतौ दृष्ट्वा आत्मतत्त्वं मया विस्मृतमिति भावः । हरिणीवृत्तम् ॥ २३ ॥

(ट) अवरोहतः अवतरतः ।

इदमिति । इदं वयः शैशवयौवनयोः सन्धिरूपमिति भावः । इयं मनोज्ञा मनोहारिणी मूर्त्तिः, अयं चरितप्ररोहः चरित्रस्याङ्कुरः वीराद्भुतः वीररसेन अद्भुतः चमत्कारी अनयोरिति सर्वत्र सम्बन्धः । वत हर्षे इमौ कुमारौ पश्यतः अवलोकयतः मे मम चेतः कृतार्थं सिद्धमनोरथं सत् अन्तः अभ्यन्तरे नटतीव नृत्यतीव । उपजातिवृत्तम् ॥ २४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विश्वामित्रः। (सोत्प्रासम् (ठ)।) सखे सीरध्वज! हृदय-मेवामन्त्रयस्व (ड) किमर्थं कृतार्थमसीति।

जनकः। (सखेदस्मितम्।)

यद्गोत्रस्य प्रथमपुरुषस्तेजसामीश्वरोऽयं
येषां धर्मप्रवचनगुरुर्ब्रह्मवादी वशिष्ठः।
ये वर्त्तन्ते तव च हृदये सुष्ठु सम्बन्धयोग्या-
स्ते राजानो मम पुनरसौ दारुणः शुल्कसेतुः॥२५॥

रामलक्ष्मणौ। (सविमर्शम् (ढ)।) कथमस्मदीयाः कथाः प्रस्तूयन्ते।

विश्वामित्रः। (सस्मितम्।) राजर्षे! यदि शुल्कसंस्थैव (ण) केवलमन्तराय(त)स्तन्न किञ्चिदेतत्।

(ठ) सोत्प्रासम् ईषद्धास्यसहितम्, उत्प्रासः स मनाक् स्मित-मित्यमरः।

(ड) आमन्त्रयस्व पृच्छ।

यदिति। येषां गोत्रस्य कुलस्य प्रथमपुरुषः आदिपुरुषः अयं तेज-सां ईश्वरः सूर्य्यः। येषां धर्मप्रवचने धर्मशिक्षायां गुरुः आचार्य्यः ब्रह्मवादी वेदवित् तत्त्वज्ञो वा, वेदस्तत्त्वं तपो ब्रह्मेत्यमरः। वशिष्ठः। ये च तव हृदये वर्त्तन्ते तव हृदयं येषां हिताय वर्त्तते इति भावः, ते राजानः सुष्ठु सम्यक् सम्बन्धयोग्याः वैवाहिकसम्बन्धार्हाः, पुनः किन्तु मम असौ शुल्कसेतुः पणबन्धः दारुणः कठिनः प्रतिबन्धक इति यावत्। मन्दाक्रान्तावृत्तम्॥ २५॥

(ढ) सविमर्शं सवितर्कम्।

(ण) शुल्कसंस्था पणव्यवस्था।

(त) अन्तरायः विघ्नः कन्यादानं प्रतीति शेषः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जनकः । (सखेदं विमृश(थ)न्नपवार्य्य ।) भगवन्नाङ्गिरस !

यद्विदन्नपि विदेहनन्दिनी-
पाणिपीड़नविधेर्महार्घताम् ।
एवमाह मुनिरेष कौशिक-
स्तेन मुह्यति चिराय मे मनः ॥ २६ ॥

तदेव स्थाणवीयं वा धनुः स्यादिदमीदृशम् ।
एतदारोपणं नाम पणो वा मम जर्जरः ॥२७॥

शतानन्दः । शान्तं शान्तम् (द) ।

दुर्लङ्घ्यमीश्वरशरासनमप्रमोच्य-
शुल्कग्रहस्त्वमसि सर्वमिदं तथैव ।

(थ) विमृशन् विचिन्तयन् ।

यदिति । विदेहनन्दिन्याः सीतायाः पाणिपीड़नस्यैव परिणय एव विधिः व्यापारः तस्य महार्घतां महामूल्यताम् असौकर्य्यमिति भावः विदन्नपि जानन्नपि एष मुनिः कौशिकः एवम् इत्थं न किञ्चि-देतदिति आह ब्रवीति तेन कथनेन मे मम मनः चिराय मुह्यति मोहं प्राप्नोति नास्य भावमवधारयतीति भावः । रथोद्धताद्वृत्तम् ॥२६॥

तदिति । तदेव इदं स्थाणवीयं शाम्भवं धनुः ईदृशम् अनेन बालकेन आरोपणीयमिति भावः वा स्यात् एतस्य धनुषः आरोपणं नाम मम पणः जर्जरः जीर्णः विफल इति यावत् वा स्यादिति शेषः । अस्य बालकस्य तादृशं सामर्थ्यं विदित्वा विश्वामित्रेण तथोक्तं वा चिरकृतस्य पणबन्धस्यानुरोधेन वयस्या कन्या कथं रक्ष्यते, दीयता-मस्मै कुमारायेति विश्वामित्रादेशे पणो मम वितथः स्यादिति भावः । अनुष्टुब्वृत्तम् ॥ २७ ॥

(द) शान्तं शान्तं तव मनस्तापः शाम्यतु शाम्यत्विति यावत् ।

दुर्लङ्घ्येति । ईश्वरस्य हरस्य शरासनं धनुः दुर्लङ्घ्यं दुर्धर्षं दुरा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किं त्वस्य राघवशिशोः सहजानुभाव-
गम्भीरभीषणमतिस्फुटमेव वृत्तम् ॥२८॥

जनकः । (मुनिं प्रति ।) भगवन् कौशिक! चिरमपि विकल्पयन् (ध) न भवद्भिरामभिधेय(न)मद्यापि निश्चिनोमि ।

विश्वामित्रः । (विहस्य ।) तदुपदर्शय कार्मुकमैन्दुशेखरं (प) रामभद्र एव व्याकरोतु (फ) ।

रामः । (सहर्षं स्वगतम् ।) कथमलीकविकल्पै(ब)राजानं प्रमोहयामि (भ) । नन्वयं ममैव कौतुकं (म) पूरयितुमेश्वरं

रोपणीयमित्यर्थः, त्वञ्च अप्रमोच्यः अत्याज्यः गुलुकप्रहः पणबन्धः यस्य तथाभूतः असि, इदं सर्वं धनुषः दुर्लङ्घ्यत्वं तव च अमोच्य-गुलुकप्रहत्वं तथैव तथ्यमेवेत्यर्थः । किन्तु अस्य राघवशिशोः रामस्य वृत्तं चरितं ताड़कावधादिकरूपमिति भावः सहजेन स्वाभाविकेन अनुभावेन प्रभावेन गम्भीरं दुरवगाहं भीषणं भयङ्करं अत्युद्भटमिति यावत् अतिस्फुटमेव सुव्यक्तमेव । तस्मात् सम्भाव्यते अनेन ते पणबन्धः सफलीकरिष्यते इति भावः । वसन्ततिलकं वृत्तम् ॥ २८ ॥

(ध) विकल्पयन् विचिन्तयन् ।

(न) अभिधेयं प्रतिपाद्यम् ।

(प) कार्मुकं धनुः । ऐन्दुशेखरं शाम्भवम् ।

(फ) व्याकरोतु व्यक्तीकरोतु ।

(ब) अलीकविकल्पैः वृथासंशयैः ।

(भ) प्रमोहयामि विमूढं करोमि ।

(म) कौतुकम् औत्सुक्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

धनुरभ्यर्थयते भगवान् । (जनकं च दृष्ट्वा सविमर्शम् (य) ।) अहह ।

बालेन सम्भाव्यमिदं च कर्म
ब्रवीति च प्रत्ययितो महर्षिः ।
इति ध्रुवं मन्त्रयते नृपोऽयं
दत्ते किमत्रोत्तरमाकुलोऽस्मि ॥ २९ ॥

जनकः । (मुहूर्तमिव स्थित्वा दीर्घमुष्णं च निःश्वस्य ।) भगवन् ! क्व तादृशं भागधेयमस्माकं येन भगवता विश्वामित्रेण नाथवन्तो (र) वयं मैथिलीमेतस्मै रघुकुलकुमाराय प्रतिपाद्य चिराय कृतार्थीभवामः ।

(रामो लज्जते ।)

जनकः । किं च भगवन् !

येषां चापसमर्पितत्रिभुवनच्छिद्रापिधानव्रतं
जातं रोहितमेव केवलमपज्याबन्धमैन्द्रं धनुः ।

(य) सविमर्शं सवितर्कम् ।

बालेनेति । प्रत्ययितः सञ्जातप्रत्ययः महर्षिः बालेन मया इदं कर्म ऐश्वरधनुरारोपणरूपं सम्भाव्यं साध्यं ब्रवीति च कथयति च । अयं नृपः इति ध्रुवं निश्चितं मन्त्रयते चिन्तयति, तदत्र धनुरानयनविषये किम् उत्तरं दत्ते, तत्र आकुलः व्याकुलः अस्मि भवामि यदि धनुरसम्भवारोपणं दृष्ट्वा नानयेदित्याकुलताहेतुरिति भावः । उपजातिवृत्तम् ॥ २९ ॥

(र) नाथवन्तः आश्रयवन्तः सनाथा इत्यर्थः ।

येषामिति । चापसमर्पितत्रिभुवनच्छिद्रापिधानव्रतमिति समस्तं पदम् । ऐन्द्रम् इन्द्रसम्बन्धि धनुः येषां भूभुजां चापेषु धनुःषु सम-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तेऽपि प्रेक्ष्य पुरा शरासनमिदं मौर्वीकिणश्यामिका-
कस्तूरीसुरभीकृतानबिभरुर्व्यर्थं भुजान् भूभुजः ॥३०॥

विश्वामित्रः । (विहस्य ।) सखे सीरध्वज ! कथं महापुरुष-राशिमात्मानमवमन्यसे ।

त्वद्भागधेयमपि तादृशमुत्सवाना-
मेतादृशां वयमपि प्रसमीक्षितारः ।
सन्त्येव विश्वभुवनाभयदानशौण्डाः
क्षौणीभुजः परममी तु न रामभद्रः ॥३१॥

र्पितं न्यस्तं त्रिभुवनस्य छिद्रापिधानम् अन्तरायदूरीकरणमेव व्रतं नियमः व्यापार इति यावत् यस्य तथाभूतम् अतएव अपगतः ज्यावन्धः मौर्वीरोपणं यस्य तादृशं यत् केवलं रोहितमेव सरलमेव जातं न तु कदाचित् ज्यावन्धनाय नमितमिति भावः ये इन्द्रकार्यमसुर-वधादिकं बाहुबलेन चक्रुरिति फलितार्थः । पुरा पूर्वं तेऽपि भूभुजः राजानः इदं शरासनं धनुः प्रेक्ष्य मौर्वीभिः धनुर्ज्याभिः तत्सञ्चा-लनैरिति भावः किणः कड़ा इति प्रसिद्धः तस्य श्यामिका कालिमा एव कस्तूरी मृगमदः तया सुरभीकृतान् सुगन्धीकृतान् सुख्याति-भाजनीकृतानिति भावः भुजान् व्यर्थं यथा तथा अबिभरुः बिभ्रति स्म । शार्दूलविक्रीडितं वृत्तम् ॥ ३० ॥

त्वदिति । तव भागधेयमपि भाग्यमपि तादृशं महोत्सवपूर्ण-मिति भावः वयमपि एतादृशाम् उत्सवानां त्वदीयानामिति शेषः प्रसमीक्षितारः द्रष्टारः तवोत्सवदर्शनेनैव वयं सुखीभविष्याम इति भावः । विश्वभुवनानां सर्वजगताम् अभयदाने शौण्डाः शक्ताः क्षौणीभुजः राजानः सन्ति एव विद्यन्ते एव । परं किन्तु अमी राजानः रामभद्रः न, ते रामभद्रसदृशा नेति भावः । वसन्ततिलकं वृत्तम् ॥ ३१ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (स्वगतम् ।) कथमुपाध्यायेनैवैतदभिहितं यदस्मि वक्तुकामः ।

जनकः । भगवन् ! सत्यमचिन्त्यो (ल) मणिमन्त्रौषधीनामिव रघुकुलकुटुम्बकानामनुभावः । पर(व)मेतद् ब्रवीमि ।

गिरीशेनाराद्वस्त्रिजगदवजैत्रं दिविषदा-
मुपादाय ज्योतिः सरसिरुहजन्मा यदसृजत् ।
हृषीकेशो यस्मिन्त्रिपुरजनि मौर्वी फणिपतिः
पुरस्तिस्रो लक्ष्यं धनुरिति किमप्यद्भुतमिदम् ॥३२॥

शतानन्दः । आः (श) किमनया पुनःपुनः पिनाकप्रश-

(ल) अचिन्त्यः अतर्कणीयः ।

(व) रघुकुलकुटुम्बकानां रघुवंशीयानामित्यर्थः । अनुभावः प्रभावः । परं किन्तु ।

गिरीशेनेति । गिरीशेन हरेण आराद्वः सेवितः अनुरुद्ध इति यावत् सरसिरुहजन्मा ब्रह्मा दिविषदां देवानां ज्योतिः तेजः उपादाय समाहृत्य त्रिजगताम् अवजैत्रं विध्वंसकं यत् धनुः असृजत् निर्मितवान्, हृषीकेशः नारायणः यस्मिन् धनुषि इषुः शरः, फणिपतिः अनन्तनागः मौर्वी शिञ्जिनी तया तिस्रः पुरः असुरनगर्यः लक्ष्यं वेध्यम् अजनि अभूत् इतीत्थं इदं धनुः किमपि अनिर्वचनीयरूपम् अद्भुतम् आश्चर्यं वस्त्विति शेषः । शिखरिणी-वृत्तम् ॥ ३२ ॥

(श) आ इति अनास्थायाम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्तिपञ्जिकया (घ)। तदेतत्कौशिकमेव प्रमाणयन्तो (ङ) बहुमन्यामहे। अपिच किमग्रक्यं रामभद्रस्य।

उत्पादयन् कमपि कौणपकोटिहोमं
तेजोहुताशनसमिन्धनसामिधेनीम्।
यस्ताडकामकृत बालसखैः पृषत्कै-
रीषज्जयः स्फुटमनेन दशाननोऽपि ॥३३॥

(नेपथ्येऽङ्गप्रविष्टः।)

पुरुषः। दशाननपुरोहितः शौष्कलो महाराजं दिदृक्षते।

शतानन्दः। (सोद्वेगम्।) आः, आगच्छतु।

(पुरुषो निष्क्रान्तः।)

रामः। (सव्यथं जनान्तिकम्।) वत्स लक्ष्मण! कथमन्त-

(घ) पिनाकप्रशस्तिपञ्जिकया ऐश्वरधनुषः प्रशंसाविस्तारेण।

(ङ) प्रमाणयन्तः प्रमाणं कुर्वन्तः।

उत्पादयन्निति। यः रामः कमपि अनिर्वचनीयं कौणपकोटिहोमं राक्षसकोटिहोमं, राक्षसः कौणपः क्रव्यादित्यमरः। उत्पादयन् कुर्वन्नित्यर्थः बालसखैः बालस्य सखायः तैः शैशवमित्रैरित्यर्थः पृषत्कैः शरैः, पृषत्करणे विशिखा इत्यमरः। ताड़कां, तेज एव स्वप्रताप एव हुताशनः अग्निः तस्य समिन्धने सम्यक् ज्वालने सामिधेनीम् अग्निसन्धुक्षणऋचम्, ऋक् सामिधेनी धाम्ना च या स्यादग्निसमिन्धने इत्यमरः। अग्रत कृतवान्, अनेन रामेण दशाननोऽपि स्फुटं सुव्यक्तम् ईषज्जयः प्रायेण जेतव्य इति यावत्। वसन्ततिलकं वृत्तम् ॥ ३३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रितो(ह)ऽयमनेन दुरात्मना राक्षसेन कामारिकार्मुकपरिचर्य्यामहोत्सवः (च) ।

लक्ष्मणः । आर्य ! न केवलमयम् (क) (इत्यर्धोक्ते हसति ।)

(रामः सप्रणयरोषस्मितं तमपाङ्गेन पश्यति ।)

(प्रविश्य ।)

शौक्लः । (प्रत्येकमवलोक्यात्मगतम् ।) कथमत्रैव जनकशतानन्दाभ्यां पुरस्कृतो विश्वेषा(ख)मस्माकममित्रो (ग) विश्वामित्रः । (विचिन्त्य ।) तिष्ठतु । कोऽयं (घ) हस्तदक्षिणेन (ङ) । (दृष्ट्वा ।) अये ! कावेतौ क्षत्रियब्रह्मचारिणौ ।

पुण्यलक्ष्मीकयोः कोऽयमनयोः प्रतिभासते ।

मौञ्जयादिव्यञ्जनः शान्तो वीरोपकरणो रसः ॥३४॥

(ह) अन्तरितः तिरोहितः ।

(च) कामारीति कामस्य अरिः हरः तस्य कार्मुकं धनुः तस्य परिचर्या आकर्षणरूपा सेवा सैव महान् उत्सवः ।

(क) न केवलमयं केवलम् अयं महोत्सवः न अन्तरित इति शेषः अन्योऽपि सीतापरिणयमहोत्सव इति भावः ।

(ख) विश्वेषां सर्वेषाम् ।

(ग) अमित्रः शत्रुः ।

(घ) कोऽयम् अयं विश्वामित्रः कः ? न किमपि कर्त्तुं समर्थ इति भावः ।

(ङ) हस्तदक्षिणेन हस्तस्य दक्षिणदिशा ।

पुण्येति । पुण्या पवित्री लक्ष्मीः श्रीः ययोः तथाभूतयोः अनयोः कः अयं मौञ्जी मुञ्जतृणनिर्मिता मेखला आदिपदेन वटदण्डादीनां ग्रहणं, मौञ्जयादिः व्यञ्जनं चिह्नं यस्य तादृशः वीरोपकरणः वीररस-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निसर्गोदग्र(च)मिदं च कुमारद्वयम् ।
पार्श्वे त्रयाणामितेषामृक्सामयजुषामिव ।
रूपाभ्यां विधिमन्त्राभ्यामथर्वेव प्रदीप्यते ॥३५॥

(विमृश्य ।) आः, नूनं स एव लक्ष्मणद्वितीयो रामहतकः कौशिकमृषिमनुप्लुवमानो (छ) मिथिलामुपस्थितः । (सक्रोधशोकम् ।) हा वत्से सुकेतुनन्दिनि ताडके ! कथमीदृशान्मनुष्यडिम्भात् (ज) तादृशो दैवदुर्विपाक(झ)स्ते संवृत्तः । कष्टमनरण्यवंशजन्मनः (ञ) क्षत्रियशिशोरनात्मवेदिता (ट) ।

परिपोषितः शान्तः रसः भावविशेषः प्रतिभासते स्फुरति । अनुष्टुब्वृत्तम् ॥ ३४ ॥

(च) निसर्गेति निसर्गेण स्वभावेन उदग्रं तेजस्वलम् ।

पार्श्वे इति । ऋक्सामयजुषामिव एतेषां त्रयाणां जनकशतानन्दविश्वामित्राणामित्यर्थः पार्श्वे विधिरनुष्ठानं मन्त्रश्च ताभ्याम् अथर्वेव चतुर्थवेद इव रूपाभ्याम् आकृतिभ्यां प्रदीप्यते प्रकर्षेण ज्वलति कुमारद्वयमिति पद्यस्थेनान्वयः । अनुष्टुब्वृत्तम् ॥ ३५ ॥

(छ) अनुप्लुवमानः अनुगच्छन् ।

(ज) मनुष्यडिम्भात् मानवशिशोः, डिम्भो बालिशबालयोरिति विश्वः ।

(झ) दैवदुर्विपाकः दैवात् दुष्टो विपाकः परिणामः विसदृशं फलं मृत्युरिति भावः, विपाकः पटले खेदे कर्मणो विसदृक्फले इति मेदिनी ।

(ञ) अनरण्यवंशजन्मनः अनरण्यः दशरथस्य पूर्वपुरुषः कश्चित् राजा प्राक् रावणेन निहतः तस्य वंशे जन्म यस्य तथाभूतस्य रावणनिर्जितवंशोद्भूततया अतितुच्छस्येति भावः ।

(ट) अनात्मवेदिता आत्मज्ञानानभिज्ञता स्वस्वरूपस्य सामान्यज्ञानाभाव इति यावत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुन्दासुरेन्द्रसुतशोणितसीधुपान-
दुर्मत्तमार्गणनिरर्गलवीरशब्दः ।
द्रोहं चकार दशकण्ठकुटुम्बकेऽपि
सोऽयं वटुः कुशिकनन्दनयज्ञबन्धुः ॥३३॥

भवतु । द्रष्टव्यमस्य भुजाशौण्डीर्य्यम् (ठ) । (उपसृत्य ।)

अपि सुखिनो यूयं जनकमिश्राः ।

जनकः । स्वागतं पौलस्त्यपुरोहितस्य । इत आस्यताम् (ड) ।

(शौष्कलस्तथा करोति ।)

जनकः । अपि कुशलं ते राज्ञो रावणस्य । अथवा ।

विपदां प्रतिकर्त्तारो यस्योपायैरथर्वभिः ।
त्वादृशाः सन्ति किं तस्य कल्याणमनुयुज्यते ॥३७॥

सुन्देति । सः अयं कुशिकनन्दनस्य यज्ञबन्धुः यज्ञरक्षणे सहाय-भूतः वटुः ब्रह्मचारी राम इति भावः, सुन्दो नाम असुरेन्द्रः तस्य सुतः सुवाहुः तस्य शोणितमेव सीधुर्मद्यं, मैरेयमासवः सीधुरित्य-मरः । तस्य पानेन दुर्मत्ता अतिमत्ता ये मार्गणाः शराः, कलम्बमार्गणशरा इत्यमरः । तैः निरर्गलः अप्रतिबद्धः वीरशब्दः अयं वीर इति शब्दः आख्या यस्य तथाभूतः सन् दशकण्ठकुटुम्बकेऽपि रावणपरिवारेऽपि द्रोहम् अनिष्टं चकार । वसन्ततिलकं वृत्तम् ॥ ३६ ॥

(ठ) भुजाशौण्डीर्य्यं बाहुवीर्य्यम् ।

(ड) आस्यताम् उपविश्यताम् ।

विपदामिति । त्वादृशाः सन्तीति भावः अथर्वभिः अथर्ववेदविहितैरित्यर्थः उपायैः मारणवशीकरणादिभिः यस्य विपदां प्रतिकर्त्तारः प्रतिकारणः सन्ति विद्यन्ते, तस्य रावणस्य कल्याणं मङ्गलं किम् अनुयुज्यते पृच्छ्यते अपितु कल्याणमेव सततं तस्येत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शौष्कलः । (विहस्य ।) श्रोत्रिय सीरध्वज ! प्रत्यक्करिष्यामेव (ढ) वयं यदि स्वभुजमण्डलीमत्तवारणावलीवलयितोरः-प्रासादसुस्थितचतुर्दशलोकलक्ष्मीमहान्तःपुरे लङ्कापतौ किमपि प्रतिकार्य्यमभविष्यत् (ण) । पश्य ।

यच्चेष्टाः समनीकसीमनि परिवस्तः पराङ्मुखमपि
प्रत्यक्षीकुरुते सहस्रनयनः पृष्ठोद्भवैरर्चिभिः ।
चक्रे वर्म च नागलोकजयिनीं यात्रामिव प्रस्तुवन्
यः कैलाससमुद्धरस्य कोट्यमपादानं तु तस्यापदाम् ॥३८॥

यद्वा त्वादृशा दुराज्ञान इति भावः अथर्वभिः उपायैः यस्य विपदां प्रतियोगे द्वितीया । प्रतिकर्त्तारः विपत्कर्त्तार इत्यर्थः तस्य कल्याणं किम् अनुयुज्यते पृच्छ्यते ? न कदापि कल्याणं तस्य सम्भवतीति भावः । प्रश्नोऽनुयोगः पृच्छा चेत्यमरः । अनुष्टुब्वृत्तम् ॥ ३७ ॥

(ढ) प्रत्यक्करिष्याम प्रतीकारम् अकरिष्याम ।

(ण) स्वभुजेति स्वस्य भुजानां बाहूनां विंशतिसंख्यकानामिति भावः मण्डल्यः सङ्घाता एव मत्तानां मादक्षायिणां वारणानां हस्तिनाम् आवल्यः समूहाः ताभिः वलयिते वेष्टिते उरःप्रासादे वक्षः-स्थलरूपराजसद्मनि, प्रासादो देवभूभुजामित्यमरः । तत्र सुखेन स्थिता चतुर्दशानां भूरादीनां लोकानां लक्ष्मीरेव महत् अन्तःपुरम् अन्तःपुरिका राजमहिषीति यावत् यस्य तथाभूते । लङ्कापतौ रावणे । एतादृशस्य रावणस्य किमस्माभिः प्रतिकार्य्यमस्तीति भावः ।

यच्चेष्टा इति । समनीकसीमनि संग्रामचेत्रे, अनीकोऽस्त्री रणे सैन्ये इति विश्वः । परिवस्तः परितः त्रासं गतः अतएव पराङ्मुखो भवन्नपि सहस्रनयनः इन्द्रः पृष्ठोद्भवैः पृष्ठदेशजातैः अर्चिभिः नेत्रैः अस्य सहस्रनयनत्वात् पृष्ठेऽपि अर्चिसद्भावादिति भावः । यस्य रावणस्य चेष्टाः रणव्यापारान् प्रत्यक्षीकुरुते पश्यति, यश्च

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (सामर्षं जनान्तिकम् ।) आर्य ! कथमसौ सहस्रार्जुनवालिभ्यामवलीढशौर्य्यसारो (त) दुरात्मा रावणः प्रस्तूयते (थ)।

रामः । वत्स ! न वक्तव्यमिदम् । महान्तो हि तादृशाः । किञ्च ।

स्यातां नाम कपीन्द्रहैहयपती तस्यावगाढान्तर-
स्थामानौ दशकन्धरस्य महती स्कन्धप्रतिष्ठा पुनः ।
सद्यःपाटितकण्टकौकसकणाकीर्णा यदंसस्थलीः
स्वेनेभाजिनपल्लवेन मुदितः प्रास्फोटयद् धूर्जटिः ॥३९॥

नागलोकजयिनीं पातालजयसाधनीं यात्रां युद्धार्थं प्रयाणं प्रस्तुवन्निव कुर्वन्निव कैलासम् उद्दश्य उत्क्षिप्य वर्त्म मार्गं नागलोकस्येति शेषः चक्रे कृतवान्, तस्य रावणस्य आपदाम् अपादानं प्रभवः कीदृशन्तु किञ्चकारमेव । नैव तस्यापत् सम्भवति यास्याभिः प्रतिकार्य्येति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ३८ ॥

(त) सहस्रार्जुनवालिभ्यां सहस्रार्जुनः कार्त्तवीर्य्योऽर्जुनः यः रणे सहस्रबाहुर्भवतीति तस्य सहस्रार्जुन इति संज्ञा । वाली वानरराजः ताभ्याम् । अवलीढेति अवलीढः भक्षितः नाशित इति यावत् शौर्य्यसारः वीर्य्यरूपं धनं यस्य तथाभूतः ।

(थ) प्रस्तूयते प्रकर्षेण स्तूयते प्रशस्यते इति यावत् ।

स्यातामिति । कपीन्द्रहैहयपती वालिसहस्रार्जुनौ तस्य दशकन्धरस्य रावणस्य अवगाढं ज्ञातम् अन्तरस्थाम आन्तरं बलं सामर्थ्यं वा याभ्यां तथाभूतौ स्यातां नाम । पुनः किन्तु स्कन्धप्रतिष्ठा कायस्थितिः महती भूयसी, रूपादिपञ्चके स्कन्धः कायेऽंशे भूपतावपीति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच।

मघोनस्तद्घोरं कुलिशमलसीकृत्य समरे
भुनक्ति स्वाराज्यं त्रिभुवनभटोऽयं दशमुखः।
श्रियो नानास्थानभ्रमणरमणीयां चपलता-
मवच्छिद्य स्वस्मिन्नपि भुजवने पूरयति यः ॥४०॥

जनकः। (शौष्कलं प्रति।) ब्रह्मन्! सत्यमीदृशो राक्षस-राजः।

शौष्कलः। राजर्षे जनक!

सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डली-
क्रीडाक्लृप्तपुनःप्ररूढशिरसो वीरस्य लिप्सोर्वरम्।

विश्वः। धूर्जटिः शम्भुः सुदितः प्रीतः सन् स्वेन निजेन दृभाजिन-मल्लवेन गजचर्माश्वलेन सद्यः तत्क्षणं पाटितानां निलूनानां कण्ठानां नवानामिति भावः कीकसकणैः अस्थिकणैः क्षुद्रास्थिभिरित्यर्थः आकीर्णाः व्याप्ताः, कीकसं कुल्यमस्थि चेत्यमरः। यस्य कायस्य अंस-स्थलीः स्कन्धदेशान् प्रास्फोटयत् वीजयति स्मेत्यर्थः। महासाह-सिकोऽयं शिवभक्तश्चेति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ३९ ॥

मघोन इति। त्रिभुवनभटः त्रिलोकीवीरः अयं दशमुखः समरे युद्धे मघोन इन्द्रस्य तत् प्रसिद्धं घोरं भीषणं कुलिशं वज्रम् अलसी-कृत्य निश्चेष्टीकृत्य मघवन्तं जित्वेति भावः स्वाराज्यं स्वर्गराज्यं भुनक्ति। तथा यः श्रियः लक्ष्म्याः नानास्थानेषु भ्रमणेन रमणीयां चपलतां चापल्यम् अवच्छिद्य निरस्य स्वस्मिन् भुजवने पूरयति स्थापयति अपि, अचञ्चलां श्रियं भुनक्ति चेति भावः। शिखरिणी-वृत्तम् ॥ ४० ॥

सन्तुष्टे इति। तिसृणां पुरां रिपौ शम्भौ सन्तुष्टेऽपि तपः-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

याञ्चादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं शृणु
त्वं शृणुत्यभितो मुखानि स दशग्रीवः कथं वर्ण्यताम् ॥४१॥

सोऽपि

कन्यामयोनिजन्मानं वरीतुं प्रजिघाय माम् ।
पुरोधसा गौतमेन गुप्तस्य भवतो गृहान् ॥४२॥

विश्वामित्रः । सखे सीरध्वज ! पश्य पिनाकदर्शनोल्लासिकाविसंष्ठुलचित्तवृत्तिरिव (द) वत्सो रामभद्रः ।

जनकः । (विहस्य ।)

प्रभावादिति भावः । कण्डूला कण्डूयुक्ता या दोर्मण्डली भुजावली तस्याः क्रीडया क्षतानि क्षिप्तानि पुनः प्ररूढानि उत्पन्नानि उत्थितानीति यावत् शिरांसि यस्य तथाभूतस्य वरं लिप्सोः लब्धुमिच्छोः यस्य वीरस्य याच्ञायां यत् दैन्यं कातर्यं तेन पराञ्चि पराङ्मुखानि विप्रतिपन्नानीति यावत् मुखानि मिथः परस्परम् अभितः समन्तात् त्वं शृणु त्वं शृणु इतीत्थं कलहायन्ते कलहं कुर्वन्ति, स दशग्रीवः कथं केन प्रकारेण वर्ण्यतां व्याख्यायतां न केनापि प्रकारेण वर्णितुं शक्यते इत्यर्थः । वर्ण्यतामित्यत्र कथ्यतामिति पाठान्तरम् । शार्दूलविक्रीडितं वृत्तम् ॥ ४१ ॥

कन्यामिति । अयोनिजन्मानम् अगर्भसम्भवां कन्यां सीतामित्यर्थः वरीतुं प्रार्थयितुं मां पुरोधसा पुरोहितेन गौतमेन गुप्तस्य पालितस्य भवतः तव गृहान् प्रजिघाय प्रेषितवान् स इति शेषः । अनुष्टुब्वृत्तम् ॥ ४२ ॥

(द) पिनाकेति पिनाकस्य ऐश्वरधनुषः दर्शने या उल्लासिका औत्सुक्यं तया विसंष्ठुला चञ्चला चित्तवृत्तिः यस्य तथाभूत इव ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किमेतदेव भगवन्नभिधीये पुनस्तराम् ।
इक्ष्वाकवो विदेहाश्च परवन्तस्त्वया वयम् ॥४३॥

शौष्कलः । भोः सौरध्वज ! किमिदमस्माकमाकाश-वचनम् (घ) उत दुष्परिच्छेद्य (न) एवायमर्थः । यदुत्तर-मपि न प्रतिपद्यसे (प) । पश्य ।

दातव्येयमवश्यमेव दुहिता कस्मैचिदेनामसौ
दोर्लीलामसृणीकृतत्रिभुवनो लङ्कापतिर्याचते ।
तत् किं मूढवदीक्षसे ननु कथागोष्ठीषु न शासति
त्वद्वृत्तानि परोरजांसि मुनयः प्राच्या मरीच्यादयः ॥४४॥

किमिति । हे भगवन् ! किं कथम् एतदेव पुनस्तरां पुनरित्यर्थः अभिधीये उच्ये मां पुनः पुनः कथं ब्रवीषीत्यर्थः । इक्ष्वाकवः विदेहाश्च वयं त्वया परवन्तः त्वदधीना इत्यर्थः त्वं यथाज्ञापयसि तथैव करो-मीति भावः । अनुष्टुब्वृत्तम् ॥ ४३ ॥

(घ) आकाशवचनम् आकाशे शून्यदेशे वचनं त्वया प्रयुक्तमिति भावः ।

(न) दुष्परिच्छेद्यः दुर्बोधः ।

(प) प्रतिपद्यसे ददासीत्यर्थः ।

दातव्येति । इयं दुहिता अवश्यमेव कस्मैचित् दातव्या न तु गृहे रक्षणीयेति भावः । दोर्लीलया भुजविलासेन मसृणीकृतं कोमलीकृतं मलीकृतमिति यावत् त्रिभुवनं येन तथाभूतः असौ लङ्कापतिः रावणः एनां कन्यां याचते प्रार्थयते । तत् तदा मूढवत् इतिकर्त्तव्य-विमूढ इव किं कथम् ईक्षसे पश्यसि । ननु भोः कथागोष्ठीषु विवि-धालापेषु प्राच्याः पुरातनाः मरीच्यादयः मुनयः परोरजांसि रजोगुणात् पराणि सात्विकानीति यावत् तव वृत्तानि चरितानि नः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शतानन्दः । ब्रह्मन् ! चिराय दत्तमेवोत्तरमस्माभिः ।

शौष्कलः । हन्त ! राजपुत्रीसमर्पणादन्यत्कीदृशं तत् ।

शतानन्दः । शृणु ।

शाम्भवं चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमियं तस्मै मैथिली कल्पयिष्यते ॥४५॥

शौष्कलः । (विहस्य ।) शान्तम् । अहह युष्माकमप्य-मून्यक्षराणि (फ) ।

तेनाङ्गुलीशतनिघृष्टकुवेरशैल-
कण्ठोत्तदोःकुलिशकन्दलविक्रमेण ।
माहेश्वरेण महता दशकन्धरेण
कर्मेदृशं कथमनार्यमधिक्रियेत ॥४६॥

अस्मान् शासति कथयन्ति । एतादृशस्य महनीयचरितस्य तव तादृश-सत्पात्रे कन्यादानं युक्तमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥४४॥

शाम्भवमिति । यः शाम्भवं शैवं चापं धनुः आरोप्य मौर्व्या सङ्गमयेत्यर्थः अस्मान् आनन्दयिष्यति, तस्मै इयं मैथिली पूर्णपात्रं पारितोषिकरूपं धनं कल्पयिष्यते दास्यते । अनुष्टुब्वृत्तम् ॥ ४५ ॥

(फ) अक्षराणि हरकार्मुकारोपणविषयाणि रावणं प्रतीति भावः ।

तेनेति । अङ्गुलीनां शतं तेन विंशतिभुजत्वात् प्रत्येकं भुजे पञ्चानामङ्गुलीनां सद्भावात् साकल्येन अङ्गुलीनां शतसंख्यकत्वमिति द्रष्टव्यं निघृष्टः उत्पिष्टः यः कुवेरशैलः कैलासः तस्य कण्ठेन उक्तः प्रकटितः दोष्णां भुजानां कुलिशकन्दलवत् वज्रसमूहवत् विक्रमो यस्य तथाभूतेन महता माहेश्वरेण शैवेन दशकन्धरेण रावणेन ईदृशम् अनार्यम् असत् कर्म इष्टदेवचापभङ्गरूपमिति भावः कथम् अधि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शतानन्दः । (विहस्य ।) ब्रह्मन् !

अयं महाक्षत्रियगोत्रजन्मा
दृढ़प्रतिज्ञो जनकाधिराजः ।
न चापमारोपयिता दशास्य-
स्तथापि जानासि यदुत्तरं नः ॥४७॥

गौष्कलः । (सहासम् ।)

अङ्गिरास्य पुलस्त्यस्य प्रसवौ परमेष्ठिनः ।
पौलस्त्ये ज्ञातिधर्मोऽयं तत्किमाङ्गिरसस्य ते ॥४८॥

(सामर्षम् (व) ।)

क्रियेत स्त्रीक्रियेत ? न कथमपि स्वाभीष्टस्य मनःपीड़ादायकं कर्म सैव्येन कर्त्तव्यमिति भावः । वसन्ततिलकं वृत्तम् ॥ ४६ ॥

अयमिति । अयं जनकाधिराजः सीरध्वजः महतां क्षत्रियाणां गोत्रे कुले जन्म यस्य तथाभूतः महाकुलीन इत्यर्थः, तथा दृढ़प्रतिज्ञः प्रतिज्ञां विफलीकर्त्तुमशक्त इति यावत् दशास्यः रावणः चापं धनुः न आरोपयिता न आरोपयिष्यति चेदिति शेषः, तथा सति नः अस्माकं यत् उत्तरं पूर्वसूक्तं तत् जानासि अपि जानास्येवेत्यर्थः । उपेन्द्र-वज्राछन्दम् ॥ ४७ ॥

अङ्गिरास्येति । अङ्गिरास्य पुलस्त्यस्य परमेष्ठिनः ब्रह्मणः प्रसवौ पुत्रौ, तत् तस्मात् आङ्गिरसस्य अङ्गिरःप्रपौत्रस्य ते तव पौलस्त्ये पुलस्त्यपौत्रे रावणे अयं ज्ञातिधर्मः ज्ञातित्वनिबन्धनः विद्वेष इति यावत् किम् ? अनुष्टुब्वृत्तम् ॥ ४८ ॥

(व) सामर्षं सक्रोधम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

माहेश्वरो दशग्रीवः क्षुद्राश्चान्ये महीभुजः ।
पिनाकारोपणं शुल्कं हा सीते ! किं भविष्यसि ॥ ४९ ॥

शतानन्दः । (उरोपध्यघम् ।) ब्रह्मन् ! एवमनेन धनुषा किमपि विनयाधिकारिकमध्याप्यते (भ) । यदद्य परम-माहेश्वरस्ते रावणोऽपि (म) संवृत्तः ।

शम्भोराधारमचलमुत्क्षेप्तुं भुजकौतुकी ।
माहेश्वरो धनुः क्रष्टुमहो ते दशकन्धरः ॥५०॥

(शौष्कलवर्जमन्ये जयन्ते (य) ।)

माहेश्वर इति । दशग्रीवः माहेश्वरः महेश्वरभक्त इति यावत् यद्वा महेश्वर एव माहेश्वरः त्रिजगत्पतिरित्यर्थः, अन्ये महीभुजः राजानः क्षुद्राः नीचाः । पीनाकस्य शैवधनुषः आरोपणं शुल्कं पणः, हा इति खेदे सीते । किं भविष्यसि ? तव दुर्भाग्यमिति भावः । अनुष्टुब्वृत्तम् ॥ ४९ ॥

(भ) विनयाधिकारिकं विनयस्य अधिकारी विनयाधिकारी विनयीत्यर्थः तस्य भ वः विनयाधिकारिकं, भावे ष्णप्रत्ययः । विनयि त्वमित्यर्थः अध्याप्यते शिक्ष्यते ।

(म) रावणोऽपि तथाविधदुराचारोऽपीति भावः परममाहे-श्वरः महाशैवः । अस्य धनुरारोपणस्य अशक्यत्वादेव महेश्वरे विन-यित्वं रावणस्येति भावः ।

शम्भोरिति । अहो आश्चर्यं ते तव दशकन्धरः रावणः शम्भोः आधारं निवासभूतम् अचलं पर्वतं कैलासमित्यर्थः उत्क्षेप्तुं स्थानात् च्यावयितुमित्यर्थः भुजकौतुकी बाहुवीर्यकौतुकवान् अभूदिति शेषः तव माहेश्वरः मेति भावः धनुः क्रष्टुम् आरोपयितुं माहेश्वरः महेश्वरभक्तः इदानीमभूदिति शेषः । अनुष्टुब्वृत्तम् ॥ ५० ॥

(य) जयन्ते मन्दं मन्दं हसन्ति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शतानन्दः । (सरोषावहित्थम् (र) ।) रामभद्र !

तदेतदारोपय चापमीश-
प्रकोष्ठभस्मप्रतिरूषितज्यम् ।
शौर्य्योष्मभाजां भजतां सुखानि
स्वबाहुमौर्वीकिणकालिकैव ॥५१॥

शौष्कलः । (सक्रोधम् ।) अरे रे शतानन्द ! किमुद्भ्रान्तो(ल)-ऽसि । यदेवमस्मदग्रे पौलस्त्यं महाराजमधिक्षिपसि(व) । कथमयं ते माणिक्यपरिहाणेन गैरिकपरिग्रहः (श) ।

(र) सरोषावहित्थं रोषस्य क्रोधस्य अवहित्था आकारगोपनम्, अवहित्थाकारगुप्तिरित्यमरः । सतृणाहितम् ।

तदिति । तत् तस्मात् ईशस्य शिवस्य प्रकोष्ठः कफोणेरधो-मणिरन्ध्रपर्यन्तहस्तविभागः, स्यात् कफोणिस्तु कूर्परः । तस्योपरि प्रगण्डः स्यात् प्रकोष्ठस्तस्य चाग्रथ इत्यमरः । तस्य भस्मना प्रति-रूषिता रञ्जिता ज्या मौर्वी यस्य तादृशम् एतत् चापं धनुः आरो-पय ज्यया सङ्गमय, स्वबाहौ निजभुजे यो मौर्वीकिणः हरचापा-रोपणजनित इति भावः तस्य कालिकैव श्यामिकैव शौर्य्येण यः उष्मा गर्वः तं भजन्ते इति तथाभूतानां दृप्यतीनामिति शेषः सुखानि भजतां गच्छतु । राज्ञां सुखानि सलिलानि भवन्तीति भावः । उपजातिवृत्तम् ॥ ५१ ॥

(ल) उद्भ्रान्तः मोहं गतः ।

(व) अधिक्षिपसि निन्दसि ।

(श) माणिक्यपरिहाणेन माणिक्यं महारत्नविशेषः तस्य परि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यदेवं दशग्रीवमवमन्यमानस्य मनुष्यपोते(घ)ऽनुरागः। यदिवा तत्रभवन्तं (स) गौतममपहाय डुलिचञ्चुषि सहस्राक्षे भवती मातुरहल्यायाः (ह)।

शतानन्दः। (सरोषहासम्।) किमात्थ रे किमात्थ अस्मद्दग्र इति।

विश्वामित्रः। (सप्रणयरोषमिव।) वत्स गौतम! विरम विरम शुष्ककलहात् (च)। अतिथिरयमस्माकमुपाध्यायो दशकण्ठस्य। (व्यथमानौ रामलक्ष्मणौ च दृष्ट्वा विहस्य।) वत्स रामभद्र! धनुर्गृहोपसर्पण(क)मभ्यनुजानाति ते जनकान्वयपुरोधाः (ख)।

हाणेन परित्यागेन। गौरिकपरिग्रहः गौरिकं पर्वतीवर्त्तिकाविशेषः तस्य परिग्रहः स्वीकरणम्।

(घ) अवमन्यमानस्य अवजानतः। मनुष्यपोते मानवशिशौ।

(स) यदिवा अथवा। तत्रभवन्तं पूज्यम्।

(ह) डुलिचञ्चुषि डुलिवत् कच्छपीवत् चञ्चूंषि यस्य तथाभूते, कमठी डुलिरित्यमरः। कमठीनां चञ्चुः पिङ्गलं भवति इन्द्रस्यापि तथा। तथाच श्रुतिः, अक्षीणि ते इन्द्र पिङ्गलानीति। अहल्याया अनुराग इति शेषः। यथा गौतमं परित्यज्य तव माता सहस्राक्षं प्रति अनुरक्ता तथा तत्पुत्रस्त्वं रावणमपहाय मनुष्यपोतं प्रति अनुरज्यसीति युक्तमेवेति भावः।

(च) शुष्ककलहात् विफलविवादादिति भावः।

(क) धनुर्गृहेति धनुषः गृहं तस्य उपसर्पणं समीपगमनम्।

(ख) जनकान्वयपुरोधाः शतानन्दः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । यदादिशन्ति गुरवः । (इति सविनयलज्जाकौतुकं परिक्रम्य लक्ष्मणेन सह निष्क्रान्तः ।)

शौष्कलः । राजर्षे सीरध्वज ! धन्योऽसि । पुरा किल महेश्वरपरिचर्यावदाने निवृत्तेषु (ग) नवमूर्धसु

वरं तादृक्कर्माद्भुतसदृशमप्रेक्ष्य किमपि
प्ररोहद्वैलक्ष्यं पुरविजयिनो येन ददृशे ।
तदुन्मार्ष्टुं त्रिभुवनमपि प्रार्थितमिदं
तदेव त्वय्यर्थीभवति दशमं रावणमुखम् ॥५२॥

शतानन्दः । (उत्थाय । नेपथ्यावलोकितकेन । सहर्षाद्भुतम् ।) पश्यन्तु भवन्तः ।

यस्मिन्नेकधनुष्यतो भगवतः खड्गाङ्गपाणेरसा-
वाकृष्टो गुणतां गतोऽप्यहिपतिः कर्णावतंसायते ।

(ग) महेश्वरेति महेश्वरस्य परिचर्या समाराधनं सैव अवदानं वृत्तं कर्म तस्मिन् निवृत्तेषु छिन्नेषु ।

वरमिति । येन तादृशः कर्माद्भुतस्य अद्भुतस्य कर्मणः नवशिरःकर्त्तनरूपस्येति भावः सदृशम् उपयुक्तं वरं किमपि किञ्चिदपि अप्रेक्ष्य अदृष्ट्वा स्थितस्येत्यध्याहार्यं पुरविजयिनः हरस्य प्ररोहत् जायमानं वैलक्ष्यं लज्जाजनितकुण्ठितभावः ददृशे दृष्टं, ततश्च तत् वैलक्ष्यम् उन्मार्ष्टुं दूरीकर्त्तुमिति यावत् अपि च येन इदं त्रिभुवनं त्रिलोकाधिपत्वमिति भावः प्रार्थितं याचितं तदेव दशमं रावणमुखं त्वयि अर्थीभवति याचकं भवति, किमतः परं ते भाग्यमिति भावः । शिखरिणीवृत्तम् ॥ ५२ ॥

यस्मिन्निति । एकधनुष्यतः एकधनुर्धरस्य भगवतः खड्गाङ्गपाणे-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उन्मुक्तः पुनरेव भूषणपदं याति प्रकोष्ठान्तरे

(जनक औत्सुक्यं नाटयति ।)

शतानन्दः ।

काकुत्स्थेन तदेव भार्गवगुरोः कोदण्डमाक्षप्यते ॥५३॥

(नेपथ्ये ।)

लक्ष्मणः ।

रुन्धन्नष्ट विधेः श्रुतीर्मुखरयन्नष्टौ दिशः क्रोडयन्
मूर्त्तीरष्ट महेश्वरस्य दलयन्नष्टौ कुलक्ष्माभृतः ।
तान्यक्ष्णा वधिराणि पन्नगकुलान्यष्टौ च सम्पादय-
न्मुन्मीलत्ययमार्य्यदोर्बलदलत्कोदण्डकोलाहलः ॥५४॥

हरस्य यस्मिन् धनुषि अष्टौ आक्षप्तः गुणतां शिञ्जिनीत्वं गतोऽपि अहिपतिः शेषनागः कर्णावतंसायते कर्णालङ्कार इव आचरति आकर्णकर्षणादिति भावः, उन्मुक्तः त्यक्तः सन् कर्षणादिति शेषः पुनरेव प्रकोष्ठान्तरे मणिबन्धोपरिभागमध्ये भूषणपदम् अलङ्कार-स्थानम् अलङ्कारवत् स्थितिमिति यावत् याति प्राप्नोति, काकुत्स्थेन रामेण भार्गवगुरोः जामदग्न्याचार्य्यस्य हरस्य तदेव कोदण्डं धनुः आक्षप्यते । शार्दूलविक्रीडितं वृत्तम् ॥ ५३ ॥

रुन्धन्निति । अयम् आर्य्यस्य रामस्य दोर्बलेन बाहुवीर्य्येण दलतः भज्यमानस्य कोदण्डस्य धनुषः कोलाहलः कलरवः विधेः ब्रह्मणः अष्ट श्रुतीः अवयवेन्द्रियाणि चतुर्मुखत्वादिति भावः रुन्धन् तिरोदधत्, अष्टौ दिशः प्राच्यादीरित्यर्थः मुखरयन् ध्वनयन्, महेश्वरस्य अष्ट मूर्त्तीः वार्य्यादीः क्रोडयन् व्याप्नुवन्, वारि वह्निर्धरा वायुरा-काशं चन्द्रमा अपि । यजमानो रविश्चेति मूर्त्तयोऽष्टौ मता हरेः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जनकः । (सहर्षविषादाद्भुतम् (घ) ।) कथं भग्नमपि (ङ) ।

शतानन्दः ।

वैदेहीकरबन्धमङ्गलयजुःसूक्तं द्विजानां मुखे
नारीणां च कपोलकन्दलतले श्रेयानुलूलुध्वनिः ।
पेष्टुं च द्विषतामुपश्रुतिशतं मध्येनभो जृम्भते
रामक्षुण्णमहोच्चलाञ्छनधनुर्दम्भोलिजन्मा रवः ॥५५॥

इति पुराणम् । अष्टौ कुलच्छाम्भृतः कुलपर्वतान् दलयन् विदारयन्, तानि प्रसिद्धानि अष्टौ पन्नगकुलानि तक्षकादीनि च अक्ष्णा चक्षुषा वधिराणि शब्दापाटकानि तेषां चक्षुःश्रवत्वादिति भावः सम्पादयन् कुर्वन्, उन्मीलति प्रसरति । शार्दूलविक्रीडितं वृत्तम् ॥ ५४ ॥

(घ) सहर्षेति हर्षः प्रतिज्ञायाः साफल्यात्, विषादः चिरस्थितस्य तादृशस्य धनुषस्तथाविधाकर्षणात्, अद्भुतम् आश्चर्यं लोकोत्तरकार्यसम्पादनादिति भावः, तैः सहितम् ।

(ङ) भग्नमपीति न केवलमारोपणमित्यपिशब्दार्थः ।

वैदेहीति । द्विजानां ब्राह्मणानां मुखे वैदेह्याः सीतायाः करबन्धाय विवाहाय यत् मङ्गलं तदर्थं यजुःसूक्तं यजुर्वेदीयः शोभनो मन्त्रविशेषः, नारीणां स्त्रीणां कपोलकन्दलतले गण्डसमूहप्रदेशे श्रेयान् माङ्गलिकः उलूलुध्वनिः, द्विषतां शत्रूणाम् उपश्रुतिशतं श्रोत्रेन्द्रियशतसमीपं पेष्टुं दलितुं रामेण क्षुण्णं खण्डितं महोच्चलाञ्छनस्य वृषभध्वजस्य यत् धनुः तदेव दम्भोलिर्वज्रं तस्मात् जन्म यस्य तथाभूतः रवश्च मध्येनभः अन्तरीक्षमध्ये जृम्भते प्रसरति । शार्दूलविक्रीडितं वृत्तम् ॥ ५५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गौष्यालः । (सविषादाङ्गतमात्मगतम् ।) अहो दुरात्मनः क्षत्रियस्फुलिङ्गस्य सर्वकर्मीणमुष्मायितम् (च) ।

जनकः । (सहर्षं पादयोर्निपत्य ।) भगवन् कुशिकनन्दन !

इयमात्मगुणेनैव क्रीता रामेण मैथिली ।

स्वगृहव्यवहारस्तु लक्ष्मणायोर्मिलास्तु नः ॥५६॥

विश्वामित्रः । (सस्मितम् ।) सखे सीरध्वज ! यदभिरुचितं भवते ।

शतानन्दः । (जनककर्णे एवमेवं कथयित्वा ।) भगवन् विश्वामित्र ! ममापि चन्द्रशेखरशरासनारोपणप्रथमप्रियवादिनः पारितोषिकं धारयसि (छ) ।

विश्वामित्रः । (विहस्य ।) वत्स ! दीयते । किमभिप्रैषि (ज) ।

(च) क्षत्रियस्फुलिङ्गस्य क्षत्रियरूपाग्निकणस्य । सर्वकर्मीणं सर्वेषु कर्मसु कुशलं शक्तमिति यावत् । उष्मायितं तेजस्वलत्वम् ।

इयमिति । इयं मैथिली सीता रामेण आत्मगुणेनैव निजसामर्थ्येनैव क्रीता न तु मया दत्तेति भावः । स्वगृहस्य निजगृहस्य गार्हस्थ्यस्येति भावः व्यवहारः कन्यादानरूप इति भावः तु किन्तु अयं भवत्विति शेषः यथा नः अस्माकम् ऊर्मिला लक्ष्मणाय अस्तु भवतु दीयते इति भावः । अनुष्टुब्वृत्तम् ॥ ५६ ॥

(छ) चन्द्रशेखरेति चन्द्रशेखरस्य शिवस्य शरासनं धनुः तस्य आरोपणं रामेण मौर्व्या सङ्गमनं तदेव प्रथमं प्रियं वदतीति तथोक्तस्य । पारितोषिकं पुरस्कारार्थं धनमिति यावत् । धारयसि क्षणवत् दातुमर्हसीति भावः ।

(ज) अभिप्रैषि इच्छसि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शतानन्दः। कुशध्वजदुहितृभ्यां माण्डवीश्रुतकीर्त्तिभ्यां भरतशत्रुघ्नावभ्यर्थये।

विश्वामित्रः। एवमस्तु। (शतानन्दं हस्ते गृहीत्वा सस्मितम्।) वत्स! सर्वमस्माभिर्विधातव्यम्। आगमयस्व (झ) तावद्भरतम्।

जनकः। तर्हि प्रहीयतामेष एव भगवानाङ्गिरसः प्रियसुहृदमुत्तरकोशलेश्वरमानेतुम्।

विश्वामित्रः। एवमस्तु।

शतानन्दः। (उत्थाय।) भगवन्! किमन्यदधिकमस्ति वाचिकम् (ञ)।

विश्वामित्रः। वत्स! निसृष्टार्थो(ट)ऽसि। गम्यताम्।

(इति शतानन्दो निष्क्रान्तः।)

विश्वामित्रः। (हर्षं नाटयन्नात्मगतम्।)

दोर्लीलादलितेन्दुशेखरधनुर्विख्यातविक्रान्तिना
काकुत्स्थेन कृतो विदेहनृपतिः पूर्णप्रतिज्ञाभरः।

(झ) आगमयस्व आनय।

(ञ) वाचिकं सन्देशवाक्, सन्देशवाग् वाचिकं स्यादित्यमरः।

(ट) निसृष्टार्थः दूतविशेषः यः स्वयमूहापोहसमर्थः। तथाचोक्तं दर्पणे, उभयोर्भावमुक्तीय स्वयं वदति चोत्तरम्। सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः॥ इति।

दोर्लीलेति। दोर्लीलया भुजविलासेन दलितं भग्नं यत् इन्दुशेखरस्य हरस्य धनुः तेन विख्याता विक्रान्तिः पराक्रमः यस्य तथा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पश्यामश्च सुहृदृष्टहाचवनवोन्मीलद्विवाहोत्सवा-
नैक्ष्वाकेषु च मैथिलेषु च फलन्त्यस्माकमाशिषः ॥५७॥

शौष्कलः । (वैलक्ष्यरोषाभ्यां स्मयमानः (ठ) ।) भोः सोर-ध्वज ! पुरुषप्रकर्षाधाने हि विद्यावृद्धसंयोगाद्बहिरङ्गानि वयांसि (ड) । यदनया प्रहीणलब्धकन्यया योनसम्बन्धोप-स्थितं (ढ) पुलस्त्यकुलमुपेक्षमाणो वर्षीयानपि कोमल-

---

भूतेन काकुत्स्थेन रामेण विदेहेन्द्रपतिर्जनकः पूर्णः प्रतिज्ञाभरः यस्य तादृशः सफलप्रतिज्ञाभार इत्यर्थः कृतः । अद्य इदानीं सुहृदाम् ऐक्ष्वाकाणां मैथिलानाञ्चेति भावः गृहात् नवं नवं यथा तथा उन्मीलन् प्रस्फुरन् विवाहोत्सवः येषु तथाभूतान् पश्यामश्च, ऐक्ष्वाकेषु इक्ष्वाकु-वंशीयेषु च मैथिलेषु मिथिलवंशीयेषु च अस्माकम् आशिषः आशीर्वादाः फलन्ति च । शार्दूलविक्रीडितं वृत्तम् ॥ ५७ ॥

(ठ) वैलक्ष्यरोषाभ्यां वैलक्ष्यं रावणमपहाय रामे सीताप्रदान-कीर्त्तनात् प्रभोरवमाननात् कुण्ठितभावः, रोषः तन्निबन्धनः कोपः ताभ्याम् । स्मयमानः मन्दं मन्दं हसन् ।

(ड) पुरुषेति पुरुषस्य प्रकर्षः उत्कर्षः तस्य आधाने अवबोधे । हिशब्दोऽवधारणार्थः । विद्यावृद्धेति विद्यया वृद्धः प्रवीणः तत्संयो-गात् तत्सम्बन्धात्, ववर्थे पञ्चमी । विद्यावृद्धसम्बन्धमपेक्ष्येत्यर्थः वयांसि वयोवाङ्मयानि वार्द्धकानीति यावत् बहिरङ्गाणि दुर्बला-नीत्यर्थः । तव वयसा वार्द्धकोऽपि विद्यावृद्धत्वाभावात् पुरुषप्रकर्षज्ञानं नास्तीति भावः ।

(ढ) प्रहीणलब्धकन्यया प्रहीणं हलपद्धतिः तत्र लब्धया कन्यया अयोनिजयेति यावत् यद्वा प्रहीणा भूमौ लब्धत्वेन मातापितृविहीना लब्धा कन्या तया । योनसम्बन्धेन विवाहार्थितया उपस्थितं स्वयमा-गतमित्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रज्ञो(ण)ऽसि । (मुनिं प्रति ।) कौशिक ! नाद्यापि किञ्चिद्-तिक्रामति (त) । तवापि लङ्कापतौ ताड़काबधापराधम-पमार्ष्टुमयमेवावसरः (थ) । (कौशिकस्तलावक्षां नाटयति ।)

जनकः । भगवन् ! एहि । स्वयमुपेत्य रामभद्रवदन-चन्द्रचन्द्रिकाप्रवाहेण निर्वापयामि (द) तावदलीकधनु-र्धरसहस्रप्रार्थ्यमानमैथिलीकदर्थित(ध)मात्मानम् । न हि मिहिरमरीचिनिचयपचेलिमस्य (न) तुहिनकरबिम्बसंवा-दादपरोऽपि कश्चिदगदङ्कारः कैरवाकरस्य (प) ।

(इत्युत्थाय परिक्रामतः ।)

(ण) उपेक्षमाणः अनादियमाणः । वयीयानपि अतिवृद्धोऽपि कोमलप्रज्ञः मृदुबुद्धिः अल्पज्ञ इति यावत् ।

(त) न अतिक्रामति न अतिवर्त्तते । इदानीमपि परिणयो न सम्पन्न इति भावः ।

(थ) अपमार्ष्टुं क्षालयितुम् । अवसरः समयः अस्तीति शेषः रामाय सीतामदत्त्वा रावणाय एनां दातुं यत्नः क्रियतां तया सति रावणस्तव ताड़काबधापराधं क्षमते इति भावः ।

(द) रामभद्रेति रामभद्रस्य वदनमेव चन्द्रः तस्य चन्द्रिकाप्रवा-हेण ज्योत्स्नास्रोतसा । निर्वापयामि शीतलयामि ।

(ध) अलीकेति अलीकधनुर्धराणां वृथाधनुष्मतां सहस्रेण प्रार्थ्य-मानया मैथिल्या हेतुभूतया कदर्थितं विरक्तीकृतम् ।

(न) मिहिरेति मिहिरस्य सूर्यस्य मरीचीनां मयूखानां निचयः समूहः तेन पचेलिमस्य पच्यमानस्य सन्तप्यमानस्येत्यर्थः ।

(प) तुहिनेति तुहिनकरश्चन्द्रः तस्य बिम्बं मण्डलं तस्य संवादात् सम्पर्कात् अगदङ्कारः औषधम् । कैरवाकरस्य कुमुदसङ्घातस्य ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शौम्यलः । (सखेदमाकाशे ।) हा तपस्विनि (फ) सीते ! हतास्मि । पौलस्त्यप्रार्थितापि विचार्य्यसे ।

त्रिभुवनविजयश्रियः सपत्नीं
जनयतु को भवतीमनात्मतन्त्राम् ।
स्वजनमपि न ते निरूपयामः
कमपि विपाट्य भुवं विनिर्गतासि ॥५८॥

(सरोषं जनकं प्रति ।) सीरध्वज !

पौराणीभिरनेकविक्रमकथागाथाभिरर्थापिता-
स्ते वीरस्य जयन्ति राक्षसपतेर्दोःस्तम्भदम्भोलयः ।
यानुत्प्रेक्ष्य विशोषयन्मदमयं मैरेयमैरावणो
भूषास्त्रग्भिरभूदमात्यमधुपश्रेणीषु साधारणः ॥५९॥

(फ) तपस्विनि वराकि !

त्रिभुवनेति । कः जनः अनात्मतन्त्रां पराधीनां भवतीं त्रिभुवन-विजयश्रियः त्रिलोकीविजयलक्ष्म्याः सपत्नीं जनयतु करोतु, ते तव कमपि स्वजनम् आत्मीयजनमपि न निरूपयामः पश्यामः । यतः भुवं विपाट्य विभिद्य विनिर्गता असि अतस्ते मातापित्रादीनामभावात् स्वजनसम्बन्धो नास्ति येन यात्रापात्रविवेकः क्रियते इति भावः । पुष्पिताग्रावृत्तम् ॥ ५८ ॥

पौराणीभिरिति । पौराणीभिः पुरातनीभिः अनेकाभिः विक्रम-कथागाथाभिः पराक्रमचरितगानैः अर्थापिताः आभाषयीकृताः व्याख्याता इति यावत् ते प्रसिद्धाः वीरस्य राक्षसपतेः रावणस्य दोःस्त-म्भदम्भोलयः बाहुस्तम्भवज्राणि जयन्ति सर्वोत्कर्षेण वर्त्तन्ते । ऐरावणः इन्द्रहस्ती यान् दोःस्तम्भदम्भोलीन् उत्प्रेक्ष्य दृष्ट्वा मदमयं गर्वमयं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तेषु च सत्सु
वृथा सज्जनसम्बन्धसत्कारेणासि वञ्चितः।
पौलस्त्यहस्तवर्त्तिन्या सीतया तु भविष्यते ॥६०॥

(साक्षेपं (व) च नेपथ्याभिमुखमवलोक्य।)

समन्तादुत्तालैः सुरसहचरीचामरमरु-
त्तरङ्गैरुन्मीलद्भुजपरिघसौरभ्यशुचिना।
स्वयं पौलस्त्येन त्रिभुवनभुजा चेतसि कृता-
मरे राम! त्वं मा जनकपतिपुत्रीमुपयथाः ॥६१॥

मैरेयं मदवारि विशोषयन् भूषाखड्गैः अलङ्कारपुष्पमालाभिः अमात्यमधुपश्रेणीषु सहचरभ्रमरसमूहेषु साधारणः सामान्यः अपरगजसदृश इति यावत् अभूत्। दत्तामपि सीतां रावणो बाहुबलेन हरिष्यतीति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ५९ ॥

वृथेति। वृथा निरर्थकेनेति यावत् सज्जनैः साधुजनैः सम्बन्धः संयोगः तेन सत्कारः पूजा प्रशंसेति यावत् राजा जनकः सत्यप्रतिज्ञ इत्येवंरूपेति भावः तेन वञ्चितः प्रतारितः असि, तु किन्तु सीतया अन्यस्मै दत्तयापीति शेषः पौलस्त्यस्य रावणस्य हस्तवर्त्तिन्या भविष्यते रावण एनां हरिष्यतीति भावः ॥ ६० ॥

(व) साक्षेपं सतिरस्कारम्।

समन्तादिति। अरे राम! समन्तात् चतुर्दिक्षु उत्तालैः महद्भिः सुरसहचरीणां देवाङ्गनानां रावणहृतानामिति भावः चामरमरुतां तरङ्गैः प्रवाहैरिति यावत् उन्मीलत् प्रसरत् यत् भुजपरिघानां बाहुर्गलानां सौरभ्यं सौगन्ध्यं तेन शुचिः सौरभवानित्यर्थः तेन त्रिभुवनभुजा त्रिलोकीश्वरेण पौलस्त्येन रावणेन स्वयं चेतसि मनसि कृतां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सविमर्शमात्मगतम् ।) अहो गम्भीर(भ)मिदमुपस्थितं वस्तु । तन्मन्त्रिणं माल्यवन्तमेव पुरस्कृत्य लङ्केश्वरस्य निवेदयामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति पिनाकभङ्गो नाम तृतीयोऽङ्कः ।

जनकपतिपुत्रीं मैथिलीं मा उपयमाः न परिणय । उपयमो विवाहे इत्यात्मनेपदम् । शिखरिणीवृत्तम् ॥ ६१ ॥

(भ) गम्भीरम् अतिमहदित्यर्थः ।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्येण कृता
अनर्घराघवतृतीयाङ्कव्याख्या समाप्ता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

चतुर्थोऽङ्कः ।

(ततः प्रविशति माल्यवान् ।)

माल्यवान् । (जृम्भमाणश्चक्षुषी परिमृज्य ।) अये विभातैव विभावरी । तथाहि ।

स्तोकोन्निद्रनिदाघदीधितिमहस्तन्द्रालुचन्द्रातपा-
स्तायन्ते ककुभो रथाङ्गरटहिणीगार्हस्थ्यगर्हाभिदः ।
अद्यापि स्वकुलायशाखिशिरसि स्थित्वा रुवन्तो मुहु-
स्तूष्णीं प्रत्यभिजानते बलिभुजो भीताः स्वयूथ्यस्वरान् ॥१॥

स्तोकेति । स्तोकेन अल्पशः उन्निद्रं विकसरं यत् निदाघदीधितिमहः सौरं तेजः तेन तन्द्रालवः निद्रालसाः निष्प्रभा इति यावत् चन्द्रातपाश्चन्द्रकिरणाः, आतपो रश्मिमात्रे च सूर्यरश्मौ च दृश्यते इति धरणिः । याच्च तायोक्ताः, रथाङ्गरटहिणीनां चक्रवाकीनां गार्हस्थ्ये संसारे या गर्हा निन्दा रात्रिविरहजनितेति भावः तस्या भिदः अपनोदिकाः सूर्योदये पुनःसङ्गमादिति भावः, ककुभः दिशः, दिशस्तु ककुभः काष्ठा इत्यमरः । तायन्ते विस्तृता भवन्ति क्रमशः प्रकाशन्ते इति यावत् । अद्यापि बलिभुजः काकाः, काके तु करटारिष्टबलिपुष्टसकृत्प्रजा इत्यमरः । स्वकुलायः निजवासस्थानं यत्र शाखिनि स स्वकुलायशाखी, कुलायो नीडमस्त्रियामित्यमरः । तस्य शिरसि अग्रशाखायां स्थित्वा मुहुः पुनः पुनः रुवन्तः शब्दं कुर्वन्तः, पुनश्च भीताः सन्तः तूष्णीं मूकीभूयेत्यर्थः स्वयूथ्यस्वरान् स्वयर्गीयस्वरान् प्रत्यभिजानते पूर्वानुभूतान् स्मरन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

प्राचीं वासकसज्जिकामुपगते भानौ दिशां वल्लभे
पश्यैता रुचयः पतङ्गदृषदामाग्नेयनाड्यिन्धमाः ।
लोकस्य क्षणदानिरङ्कुशरसौ सम्भोगनिद्रागमौ
कोकस्तोमकुमुद्वतीविपिनयोर्निक्षेपमातन्वते ॥२॥

(सर्वतो निरूप्य ।) हन्त समन्तादामोदमानपौरसम्भोगमयी (क) खल्वियं दशग्रीवभुजार्गलापरिपालिता (ख) राजधानी ।

प्राचीमिति । दिशां वल्लभे भानौ वासकसज्जिकां, कुरुते भरद्वनं यस्याः सज्जिते वासवेश्मनि । सा तु वासकसज्जा स्याद् विदितप्रियसङ्गमेत्युक्तलक्षणां प्राचीं पूर्वां दिशम् उपगते सति वासकसज्जिकामित्यत्र वासवदीक्षितामिति पाठे वासवेन इन्द्रेण दीक्षितां स्वीकृतां पालितामिति यावत्, दीक्षा स्वीकार आदेश इति विश्वः । पतङ्गदृषदां सूर्यकान्तानाम् आग्नेयनाड्यिन्धमाः आग्नेयनाड्यिं धमन्तीति अग्निसंयुक्तां कुर्वन्तीति तथोक्ताः एता रुचयः मयूखाः लोकस्य क्षणदायां रजन्यां निरङ्कुशः निरर्गलः रसः स्वादः ययोः तथाभूतौ सम्भोगनिद्रागमौ रमणस्वापौ कोकानां चक्रवाकानां स्तोमः समूहः कुमुद्वतीविपिनं कैरववनं तयोः निक्षेपं कोकस्तोमे सम्भोगं कुमुद्वतीविपिने निद्रागमं सङ्कोचमिति यावत् न्यासम् आतन्वते विस्तारयन्ति । पश्य वाक्यार्थः कर्मेति बोध्यम् । शार्दूलविक्रीडितं वृत्तम् ॥२॥

(क) आमोदेति आमोदमानानां हृष्यतामित्यर्थः पौराणां पुरवासिनां सम्भोगमयी सुखभोगात्मिका ।

(ख) दशग्रीवेति दशग्रीवस्य रावणस्य भुजा एव अर्गलाः परिघाः ताभिः परिपालिता सुरक्षिता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इतः पौरस्त्यायां ककुभि विवृणोति क्रमदल-
त्तमिस्रामर्माणं किरणकलिकामम्बरमणिः ।
इतो निष्क्रामन्ती नवरतिगुरोः प्रोच्छति वधूः
स्वकस्तूरीपत्राङ्कुरमकरिकामुद्रितमुरः ॥३॥

अपिच ।

अयं मृदुमृणालिनीवनविलासवैहासिक-
स्त्विषां वितपते पतिः सपदि दृश्यमाना निजाः ।

इतं इति । इतः अस्यां पौरस्त्यायां प्राच्यां ककुभि दिशि अम्बर-मणिः सूर्यः क्रमेण दलत् विदीर्यमाणं तमिस्रायास्तामस्या रजन्याः, तमिस्रा तामसी रात्रिरित्यमरः । मर्म यथा तथाभूतां किरणकलिकां मयूखाङ्कुरं विवृणोति प्रकटयति । इतः अस्मिन् प्रदेशे अस्मात् प्रदेशाद्वा निष्क्रामन्ती निर्गच्छन्ती वधूः नवरतिगुरोः नवीनस्य रतिगुरोः सुरताचार्यस्य नायकस्य स्वकस्तूरीपत्राङ्कुरमकरिकया निजमृगमदरचितपत्राङ्कुररूपमकरालत्या मुद्रितं चिह्नितम् अलङ्कृतमिति यावत् उरः वक्षःस्थलं प्रोच्छति तच्चिह्नरहितं करोतीत्यर्थः । तस्य गुर्वादिसमीपे सम्भोगचिह्नप्रकाशेन लज्जा मा भूदिति भावः । यद्वा नवरतिगुरोरिति पञ्चम्यन्तं पदं ततश्च नवरतिगुरोः जारात् तत्सकाशादिति यावत् निष्क्रामन्ती तादृशं उरः स्वकीयमिति शेषः प्रोच्छति उरसि तच्चिह्नस्य जारकृतत्वेन स्वनायकादीनां तज्ज्ञानं मा भूदित्याशयः । शिखरिणीवृत्तम् ॥३॥

अयमिति । मृदु कोमलं यत् मृणालिनीवनं पद्मिनीवनं तस्य विलासः विकासः तत्र वैहासिकः केलिकरः विदूषक इति यावत्, वैहासिकः केलिकरः प्रहासी च विदूषक इति भरतः । अयं त्विषां पतिः सूर्यः वितपते विस्फुरति । सपदि सम्प्रतीति यावत् उत्पन्न-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्तनौ पुलकयन्ति चोत्पलदृशां प्रियोरःस्थले
विपर्य्ययितवृत्तयो घुसृणपङ्कपत्राङ्कुराः ।४॥

इतश्च ।

प्रियवसतेरपयान्त्यो मिथः करस्थितकराम्बुजन्मानः ।
करजव्रणविरलस्तनपुलकमसूः किमपि विवदन्ते ॥५॥

(अन्यतश्च दृष्टा ।) इतो रम्यतरं वर्त्तते ।

दृशां कमलाक्षीणां प्रियोरःस्थले प्रियवक्षसि विपर्य्ययिता विपर्य्ययं प्राप्ता वृत्तिः स्थितिर्येषां ते, पुरुषायिते हि स्त्रीणामधोमुखतया प्रियतमवक्षसि वामदक्षिणस्तनयोर्वैपरीत्येन पत्रावलीनां वर्त्तनादिति भावः । दृश्यमानाः निजाः घुसृणपङ्कपत्राङ्कुराः कुङ्कुमद्रवविरचितपत्रावल्यः स्तनौ पुलकयन्ति रोमाञ्चितौ कुर्वन्ति सम्भोगस्मरणादिति भावः । दृश्वीवृत्तं, जसौ जसयला वसुग्रहयतिश्च दृश्वी गुरुरिति तल्लक्षणात् ॥४॥

प्रियवसतेरिति । प्रियवसतेः कान्तगृहात्, वसतीरालिङ्गनोरित्यमरः । अपयान्त्यः निर्गच्छन्त्यः असूः नार्य्यः करस्थितानि अवलम्बितानि करा हस्ता एव अम्बुजन्मानि पद्मानि याभिः तथाभूताः, करजव्रणेन नखक्षतेन, पुनर्भवः करुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः । विरलम् अल्पाल्पं स्तनयोः पुलकं रोमाञ्चः यत्र तद् यथा तथा मिथः परस्परं विवदन्ते, काचिद् वदति तव स्तनयोरेतावत् नखक्षतं यत् सम्भोगस्मरणजं पुलकमपि अल्पं दृश्यते, अन्या वदति नैवं मम तवैवैतादृक् दृश्यते इत्येवं कलहं कुर्वन्तीति यावत् । सामान्यनायिकावर्णनमिदम् । आर्य्यावृत्तं, यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि । अष्टादश द्वितीये पञ्चदश चतुर्थके सार्य्येति तल्लक्षणात् ॥५॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रभाते पृच्छन्तीरनुरहसवृत्तं सहचरी-
र्नवोढा न व्रीड़ामुकुलितमुखीयं सुखयति ।
लिखन्तीनां पत्राङ्कुरमनिशमस्यास्तु कुचयो-
श्चमत्कारो गूढं करजपदमासां कथयति ॥६॥

(मुहूर्त्तमनुध्याय ।) अहो यत प्रभृति वैदेहीवरणाय प्रहितेन पुरोधसा कथ्यमानं ककुत्स्थकुलकुमारस्य मानुष्यकातिश-य(ग)मशृणवम्, ततः प्रभृति कष्टां दशामनुभवामि । तथाहि ।

तत्तादृशं कथमुदेति मनुष्यलोके
तेजोऽद्भुतं निरभिसन्धि न तावदेतत् ।

प्रभाते इति । इयं नवोढा नवपरिणीता व्रीड़या लज्जया मुकुलितं नमितमिति यावत् मुखं यया तादृशी सती प्रभाते प्रातःकाले अनुरहसवृत्तं रहोवृत्तम् अनुलक्षीकृत्येत्यर्थः विषयीकृत्येति यावत् पृच्छन्तीः सहचरीः न सुखयति रहस्याख्यानविरहेणेति भावः । तु किन्तु अस्याः वध्वाः कुचयोः स्तनयोः चमत्कारः वैचित्र्यं अनिशं सततं पुनः पुनरिति यावत् पत्राङ्कुरं पत्ररचनां लिखन्तीनां कुर्वतीना-मित्यर्थः आसां सहचरीणां गूढं अप्रकटमित्यर्थः करजपदं नखक्षतं कथयति रहोवृत्तमिति शेषः । लज्जावशात् अकथितेऽपि रहोवृत्ते स्तनयोः पत्रावलीरचनसमये तासां गूढनखक्षतदर्शनात् तज्ज्ञानमभूदिति भावः । शिखरिणीवृत्तम् ॥६॥

(ग) मानुष्यकातिशयम् अमानुषचरितप्रकर्षमिति यावत् ।

तदिति । मनुष्यलोके तत् तादृशम् अद्भुतम् आश्चर्यं तेजः राम-रूपमिति भावः कथम् उदेति उदयं प्राप्नोति एतत् तावत् न निरभि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तान्येव चास्य चरितानि दशाननस्य
धिक् चिन्तया रजनिरक्षिषु नः प्रभाति ॥७॥

अपिच ।

श्रुत्वा दुःश्रवमद्भुतञ्च मिथिलावृत्तान्तमन्तःपत-
चिन्तापङ्कवसावहित्यवदनत्वग्विप्रकीर्णस्मितः ।
हेलाक्रष्टसुरावरोधरमणीसीमन्तसन्तानक-
स्रग्वासोज्ज्वलपाणिरप्यवति मां वत्सो न लङ्केश्वरः ॥८॥

सन्धि न निरभिप्रायम् अस्य कोऽपि अभिसन्धिरस्तीति भावः । अस्य दशाननस्य तानि चरितानि त्रिभुवनविजयादीनि धिक् एव निन्दास्येव, धिङ् निर्भर्त्सननिन्दयोरित्यमरः । येन ईदृशमवमानं वैदेह्या हस्तान्तरजनितं सहते इति भावः । चिन्तया दुर्भावनया रजनिः नः अस्माकम् अक्षिषु नेत्रेषु प्रभाति प्रकर्षेण दीप्यते । सततमन्धकारं मन्यामहीति भावः । वसन्ततिलकं वृत्तम् ॥७॥

श्रुत्वेति । दुःश्रवं श्रोतुमशक्यम् अद्भुतं मिथिलावृत्तान्तं श्रुत्वा अन्तःपतन्ती अन्तर्भवन्ती या चिन्ता तस्याः अपङ्कवेन गोपनेन सावहित्यानि आकारगुप्तिसहितानि यानि वदनानि मुखानि दृशेति भावः तेषां त्वचि चर्मणि उपरिभागे इति भावः विप्रकीर्णं विस्तृतं स्मितं मन्दहासः यस्य तथाभूतः वत्सः लङ्केश्वरः रावणः हेलया अनायासेन आक्रष्टानां हृतानां सुरावरोधरमणीनां देवान्तःपुरिकाणां सीमन्तेषु संयतकेशेषु याः सन्तानकस्रजः देवतरुविशेषपुष्पमालाः तासां वासेन सौरभेण उज्ज्वलः सुरभीकृत इति यावत् पाणिर्यस्य तथाभूतोऽपि पाणिना तासां केशाकर्षणादिति भावः तथाभूतोऽपि मां न अवति प्रीणाति । शार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विमृश्य । आकाशे ।) अहह ! दारुणेय(घ)मस्माकं चिर-
जीविता ।

प्रीते विधातरि पुरा परिभूय मर्त्यान्
वव्रेऽन्यतो यदभयं स भवानहंयुः ।
तन्मर्मणि स्पृशति मामतिमात्रमद्य
हा वत्स ! शान्तमथवा दशकन्धरोऽसि ।९।

(सविमर्शम् (ङ) ।) अहो मैथिलस्य नृपतेरकार्य्यज्ञता (च) ।
विश्वामित्रवशीकृते हृदि वयं मा भूम सम्बन्धिन-
स्ते दृष्टा न कथं पुराणमुनयो मान्याः पुलस्त्यादयः ।

(घ) दारुणा अतिक्लेशकरीति यावत् स्वल्पजीवने एतादृशं दुःखं न स्यादिति भावः ।

प्रीते इति । स भवान् अहंयुः अहङ्कारवान् सन् पुरा विधातरि ब्रह्मणि प्रीते सति तपसेति शेषः मर्त्यान् मानवान् परिभूयः तुच्छीकृत्येति यावत् अन्यतः मनुष्यव्यतिरिक्तेभ्य इत्यर्थः यत् अभयं भयाभावं वव्रे वृतवान्, अद्य तत् वरणं माम् अति-मात्रम् अतिशयेन मर्मणि स्पृशति मम मर्म पीडयतीति यावत् । हा वत्स ! शान्तम् अमङ्गलं दूरीभवत्विति भावः, अथवा त्वं दशकन्धरः दशाननः असि, रामस्तु एककन्धरः त्वया दशकन्धरेणावश्यं हनिष्यते इति शङ्कैव नास्तीति भावः । वसन्त-तिलकं वृत्तम् ॥ ९ ॥

(ङ) सविमर्शं सवितर्कम् ।

(च) अकार्य्यज्ञता कार्य्यानभिज्ञता ।

विश्वामित्रेति । विश्वामित्रेण वशीकृते आयत्तीकृते हृदि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जामातापि महेन्द्रमौलिवलभीपर्यङ्करत्नाङ्कुर-
ज्योत्स्नापुष्टनखेन्दुदीधितिरयं नापेक्षितो रावणः ॥१०॥

(पुरोऽवलोक्य ।) कथं मिथिलाचरितानि चरितुं(छ) मनु-
प्रहिता विरयति वत्सा शूर्पणखा ।

(प्रविश्य शूर्पणखा ।)

शूर्पणखा । (सहर्षम् ।) अम्महे! सोम्मसुन्दरविवाहणेव-
च्छलच्छोविच्छुरिदकान्तिपब्भाराइं (ज) रहुउलकुमाराणं
मुहपुण्डरीआइं पेक्खन्ती जुउच्छिदेणावि माआमाणसी-

तवेति शेषः वयं सम्बन्धिनः यौनसम्बन्धवन्तः मा भूम न भवामः, किन्तु ते प्रसिद्धाः मान्याः पुलस्त्यादयः पुलस्त्यप्रभृतयः पुराणमुनयः. रावणपूर्वपुरुषा इति भावः कथं न दृष्टाः न गणिता इति भावः विश्वामित्रादपि श्रेष्ठानां पुलस्त्यादीनां कुलजो रावणस्त्वयावश्यमेव वरणीय इति भावः । अयं रावणः महेन्द्रस्य मौलिरेव शिर एव वलभी प्रासादोपरिगृहं तदेव पर्यङ्कः तत्र ये रत्नाङ्कुराः मणिप्ररोहाः तेषां ज्योत्स्नाभिः किरणैरित्यर्थः पुष्टाः वृद्धिं नीताः नखेन्दूनां नखचन्द्राणां दीधितयः किरणाः यस्य तादृशः देवेन्द्रमस्तकनिहितचरण इति यावत् अपि जामाता न अपेक्षितः जामातृत्वेन न गणित इति यावत् । शार्दूलविक्रीडितं वृत्तम् ॥ १० ॥

(छ) चरितुं पर्यवेक्षितुमिति यावत् ।

(ज) अम्महे आश्चर्यम्, अम्मो अम्महे इति पदं कुर्यात् स्त्रीणान्तु विस्मये इति भरतः । सौम्या प्रियदर्शना सुन्दरी शोभना या विवाहनेपथ्यलक्ष्मीः वैवाहिकपरिच्छदशोभा तया विच्छुरितः विस्फुरितः कान्तिप्राग्भारः शोभातिशयः येषां तथाभूतानि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भावेण (झ) किदत्थीकिदम्हि । अम्मो सा तारिसी गुणाणं पकिदी (ञ) जा विपक्खहत्थपडिदावि (ट) सुहावेदि ।

माल्यवान् । (इदा सन्नेहम् ।) कथं वत्सा शूर्पणखा । वत्से ! अयमहम् । इत इतो भवती ।

शूर्पणखा । कधं इह ज्जेव्व अट्टालअसिहरपग्गीवे (ठ) मादामहो । अहो दुस्सिलिट्ठता (ड) दहकज्जाणम् । जं दाणिं पजागरकिलिअन्तलोअणो पडिक्खणजिम्भिआपसारिदमुहकुहरदिट्ठहिअअट्ठिदकठिणकज्जभारो (ढ) अम्मो विअ को वि दीसदि । अहवा सामस्सो वि गुरुओ (ण)

(झ) जुगुप्सितेनापि निन्दितेनापि मायामानुषीभावेन मायया रचितः मानुषीभावः तेन ।

(ञ) प्रकृतिः स्वभावः ।

(ट) विपक्षेति विपक्षस्य शत्रोः हस्ते पतितापि विपक्षगामिनी अपीत्यर्थः ।

(ठ) अट्टालकशिखरप्रग्रीवे अट्टालकस्य प्रासादस्य शिखरम् उपरिभागः तस्य प्रग्रीवे प्राङ्गणे ।

(ड) दुःश्लिष्टता दुरवगाहता ।

(ढ) प्रजागरेति प्रकृष्टेन जागरेण दुर्भावनाजनितया अनिद्रयेति यावत् क्लान्ते कलुषिते लोचने यस्य तथोक्तः । प्रतिक्षणेति प्रतिक्षणं क्षणे क्षणे या जृम्भा हाइ इति प्रसिद्धा तया प्रसारितं यत् मुखकुहरं वदनविवरं तेन दृष्टः हृदयस्थितः कठिनः महान् कार्य्यभारः यस्य तादृशः ।

(ण) गुरुकः गुरुरेव गुरुकः, स्वार्थे कन्प्रत्ययः । महानित्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मन्तिभावो विसेसेण साहसेक्करसव्ववसाअस्स चण्डचरिदस्स (त) अम्हसामिणो रावणस्स । जाणामि (थ) मं जेव्व पडिपालअन्तो (द) चिट्ठदि । जाव णं उवसप्पामि । (सविषादमुपसृत्य ।) अज्ज ! वन्दे ।

माल्यवान् । वत्से ! कल्याणिनी भूयाः । इहास्यताम् । अपि भरतशत्रुघ्नाभ्यां मिथिलामुपस्थितो दशरथः ।

शूर्पणखा । (उपविश्य ।) अज्ज ! दसरहे आअदे कुमाराणं गोदाणमङ्गले (ध) अ संवुत्ते दाव मए पत्तं मिहिलाणअरम् ।

माल्यवान् । (निःश्वस्य ।) अतिप्रकाशोऽयमर्थो (न) यथा निहतस्वीकरणा (प) जानकीति ।

(त) साहसैकरसेति साहसे सहसा बलेन क्रियमाणे कर्मणि एकरसः व्यवसायः उद्योगः यस्य तथाभूतस्य । चण्डचरितस्य तीक्ष्णपराक्रमस्य ।

(थ) जानामि मन्ये ।

(द) प्रतिपालयन् प्रतीक्षमाणः ।

(ध) गोदानमङ्गले गोदानरूपं मङ्गलं माङ्गलिककार्यं चलियाणां समाचारसिद्धमिति भावः तस्मिन् । केचित्तु गवां केशानां दानं छेदनरूपं संस्कारकर्म तदेव मङ्गलं तस्मिन् । दोवच्छेदे इत्यस्मात् भावे अनट्प्रत्ययः ।

(न) अर्थः विषयः ।

(प) निहतस्वीकरणा जातपरिणयेत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शूर्पणखा । अध इं ।

माल्यवान् । (विहस्य ।) अहो दुरात्मनः क्षत्रियब्राह्मणस्य कुशिकजन्मनो दुर्नाटकम् (फ) ।

यज्ञोपप्लवशान्तये परिणतो राजा सुतं याचित-
स्तं चानीय विनीय चायुधविधौ ते जघ्निरे राक्षसाः ।
त्रैयक्षं विदलय्य कार्मुकमथ स्वीकार्य्य सीतामितो
नो विद्मः कुहनाविटेन वटुना किं तेन कारिष्यते ॥११॥

शूर्पणखा । अज्ज ! एव्वं णेदम् । सो मए तत्थ वह्मणो वसिट्ठमहेसिणो वि फुरन्तो (ब) दिट्ठो ।

माल्यवान् । (विहस्य ।) वत्से ! तपोभिरस्य ब्राह्मणा-

(फ) दुर्नाटकं दुरभिनयः दुश्चेष्टेति यावत् ।

यज्ञेति । यज्ञस्य उपप्लवः विघ्नः तस्य शान्तये नाशाय परिणतः दृढः राजा दशरथः सुतं याचितः प्रार्थितः, तञ्च सुतं रामम् आनीय स्वाश्रममिति शेषः आयुधविधौ अस्त्रविधाने विनीय शिक्षयित्वा च ते राक्षसाः सुबाहुप्रभृतय इति यावत् जघ्निरे हताः । अथानन्तरं त्रैयक्षं शाम्भवं कार्मुकं धनुः विदलय्य भञ्जयित्वा सीतां स्वीकार्य्य परिणाय्य कुहनाविटेन कुहनायां दम्भकर्मणि विटः धूर्त्तः तथाविधेन वञ्चनाचतुरेणेत्यर्थः तेन वटुना ब्राह्मणेन कौशिकेन इतः अस्यां लङ्कायां किं करिष्यते रामेणेति शेषः तत् नो विद्मः न जानीमः । शार्दूलविक्रीडितं वृत्तम् ॥ ११ ॥

(ब) स ब्राह्मणः कौशिक इति यावत् । वशिष्ठमहर्षेरपि, यवर्षे यज्ञमी । वशिष्ठं महर्षिमपेक्ष्यापीत्यर्थः स्फुरन् दीप्यमानः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

देशोऽपि स्थानिवद्भावेन क्षत्रकार्य्यं न जहाति (भ)। किञ्च स्वभावमधुरोऽपि काकुत्स्थवटुरौत्पत्तिकेन क्षात्रेण ब्राह्मण्येन च जन्मना त्रिजातकादस्मान्मुनेरधीयानोऽधरीणं परिणंस्यते (म)। तथाहि ।

(भ) ब्राह्मणादेशः क्षत्रियस्यापि ब्राह्मणत्वेनातिदेशः ब्रह्मण्ये स्थितिरिति भावः। स्थानिवद्भावेन स्थानं स्थितिः प्राकृतधर्मः अस्यास्तीति स्थानी अत्र क्षत्रजातिः तेन तुल्यं स्थानिवत् तस्य भावस्तेन क्षत्रकार्य्यं क्षत्रियोचितमारणादिरूपं न जहाति न त्यजति। उक्तञ्च मुग्धबोधे वोपदेवगोस्वामिना स्थानिवदादेश इति।

(म) स्वभावमधुरः निसर्गसुन्दरः। काकुत्स्थवटुः काकुत्स्थब्रह्मचारी राम इत्यर्थः। औत्पत्तिकेन उत्पत्तिर्जन्म तत्सम्बन्धिना क्षात्रेण क्षत्रतेजसेत्यर्थः ब्राह्मण्येन ब्रह्मतेजसा च ततश्च ब्राह्मणेन तपोजनितेन जन्मना ब्राह्मण्यलाभेनेति भावः त्रिजातकात् जन्मत्रययोगिनः अथच त्रिभिर्जातादिति वाक्पारुष्यमिति बोध्यं मुनेर्विश्वामित्रात्। अधीयानः अध्ययनं कुर्वन् अधरीणं निन्दितं यथा तथा, अधरीणो धिक्कृत इत्यमरः। अधरीणं इति पाठान्तरं परिणंस्यते परिणतो भविष्यति असत्सङ्गादसदेव जायते इति भावः। पुरा श्वशुरस्य गाधिन्दपतेः स्वस्य च पुत्रार्थं जमदग्निर्महर्षिर्यज्ञं कृतवान्। तत्र यज्ञीयचरोरेकभागं ब्रह्मतेजसा अपरभागं क्षत्रतेजसा अभिमन्त्रितमासीत्। तद् ब्रह्मतेजोऽभिमन्त्रितं चरुभागं गाधिमहिषी अनवधानात् भक्षितवती। अपरं क्षात्रतेजोऽभिमन्त्रितं तत्कन्या रेणुका भक्षितवती। ततश्च गाधिसुतो विश्वामित्रः ब्राह्मतेजोऽभिमन्त्रितचरोत्पन्नत्वात् क्षात्रं ब्राह्मण्यञ्च जन्मत एव लब्धवान्, पुनश्च तपसा ब्रह्मण्यमित्यस्य त्रिजातकत्वमिति पूराणवार्त्तानुसन्धेया।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अविनयभुवामज्ञानानां शमाय भवन्नपि
प्रकृतिकुटिलाद्विद्याभ्यासः खलत्वविवृद्धये ।
फणिभयभृतामस्तूच्छेदक्षमस्तमसामसौ
विषधरफणारत्नालोको भयं तु भृशायते ॥१२॥

भवतु । किमतिक्रान्तोपवर्णनेन (य) । कथं त्विदानीं स्वयं ग्रहीतुमुत्तिष्ठमानो (र) राक्षसपतिः प्रतिकर्त्तव्यः (ल) स्यात् ।

शूर्पणखा । अज्ज ! ण खु मोट्टिमं परिहरन्तो (व) अम्हो उवाओ लक्खीअदि ।

अविनयभुवामिति । अविनयभुवां दुर्विनयजनकानाम् अज्ञानानां शमाय शान्तये भवन्नपि प्रकृतिकुटिलात् स्वभावक्रूरात् विद्याभ्यासः खलत्वस्य दौर्जन्यस्य विवृद्धये विशेषेण वर्द्धनाय भवतीति शेषः । तथाहि, असौ विषधरस्य भुजङ्गस्य फणारत्नालोकः फणिभयभृतां सर्पभयावहानां तमसाम् अन्धकाराणाम् उच्छेदक्षमः विनाशक्षमः अस्तु भवतु, तु किन्तु भयं भृशायते भृशम् अत्यर्थं भवतीत्यर्थः । प्रकृतिसुन्दरस्यापि दुर्जनसङ्गात् दौर्जन्यं जायते इति भावः । हरिणीवृत्तम् ॥ १२ ॥

(य) अतिक्रान्तोपवर्णनेन अतिक्रान्तस्य अतीतस्य उपवर्णनेन अनुशोचनेनेत्यर्थः ।

(र) ग्रहीतुं हर्त्तुं सीतामिति शेषः उत्तिष्ठमानः यतमानः ।

(ल) प्रतिकर्त्तव्यः प्रतिविधेयः शमनीय इति यावत् ।

(व) मोट्टिमं बलात्कारम् । परिहरतः त्यजतः बलात्कारं विनेत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आत्मवान् । वत्से ! मा मैवम् । महादोषो हि तादृशेन धर्मविजयिना वीरप्रवालेन परिगृहीताया वैदेह्याः प्रसह्यापहारः (ग) । पश्य ।

दोःस्तम्भदर्पडम्बरमिति स्पष्टं न विस्रन्ते
वैदेहीकरबन्धसूचनमिति प्रस्तौति न व्रीडया ।
इत्यालोच्य कृतस्मितैर्मुनिभिरादिष्टेन येन क्षणा-
दात्तं वन्दितमाश्रितं च सहसा भग्नं च तादृग्धनुः ॥१३॥

(ग) वीरप्रवालेन वीराङ्कुरेण बालकवीरेणेति यावत् प्रसह्यापहारः बलात् अहरणं महान् दोषो यत्र तादृशः ।

दोःस्तम्भेति । दोःस्तम्भयोः बाहुरूपस्तम्भयोर्द्वयस्य दर्पस्य डम्बरं विस्तारः स्यादिति बुद्ध्या स्पष्टं स्फुटं यथा तथा न विस्रन्ते न विस्फुरति न स्पर्द्धते इति यावत्, तथा वैदेह्याः सीतायाः करबन्धः परिणयः तस्य सूचनम् इति व्रीडया लज्जया न प्रस्तौति न प्रस्तुतं करोतीत्यर्थः उभयत्र राम इति कर्तृपदमूह्यम् । इति इत्थम् आलोच्य विविच्य रामस्य महानुभावतामिति भावः कृतस्मितैः कृतहासैः मुनिभिः शतानन्दादिभिः आदिष्टेन येन रामेण क्षणात् तादृक् धनुः आत्तं स्वीकृतं वन्दितं नमस्कृतम् आश्रितं नामितञ्च सहसा भग्नञ्च । नात्र मुनिभिरा इत्यत्र द्वादशेऽक्षरे यतिभङ्गदोषः, स्वरविहितसन्धेरसदृशाय एव तस्य दोषत्वेनाभिधानात् । यदुक्तं छन्दोमञ्जर्याम् । क्वचिच्छन्दसाञ्चे यतिरभिहिता पूर्वकृतिभिः पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च । पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां यथा क्षीणः पुण्यात्पतनमहिमा नां कलयेति ॥ शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्कथञ्च तस्मिन्निशाचरनाथमाततायिन(घ)मनुजानीमः ।

शूर्पणखा । (निःश्वस्य ।) जधा णिक्कविदं मादामहेण । अहो कालस्स माहप्पं, जं दाणिं तिहुअणजअलच्छीलीलावन्दिआरे (स) महाराअरावणे वि एव्वं मन्तीअदि ।

माल्यवान् । वत्से !

मुनिरपि गुरुर्दिव्यास्त्राणां बभूव दिवौकसा-
मजगवधनुर्भङ्गे तावानहो स महोत्सवः ।
रघुपतिगुणक्रीतामेतामवेहि जगत्त्रयीं
विपरिणमते दौर्जन्यं तु प्रभुत्वमदेन नः ॥१४॥

(घ) आततायिनं दारापहारिणम् । तथाच स्मृतिः, अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिन इति ।

(स) त्रिभुवनेति त्रिभुवनस्य जयलक्ष्म्याः लीलया वन्दीकारः बलात् हरणम् तस्मिन् ।

मुनिरिति । मुनिरपि विश्वामित्र इति शेषः दिव्यानां अस्त्राणां गुरुः आचार्यः बभूव, रामं दिव्यास्त्रसम्प्रदाये सुशिक्षितमकरोदिति भावः, अहो आश्चर्यम् अजगवं पिनाकः, पिनाकोऽजगवं धनुरित्यमरः । तत् धनुः तस्य भङ्गे दिवौकसां देवानां तावान् अत्यधिक इति यावत् स महोत्सवः महान् आनन्दः आसीदिति शेषः देवधनुर्भङ्गे देवानां क्षोभस्य औचित्येऽपि प्रत्युत महोत्सव इति देवा अपि रामपक्षपातिन इति भावः । अतः एतां जगत्त्रयीं त्रिलोकीं रघुपतेः रामस्य गुणेन क्रीताम् अवेहि जानीहि । तु किन्तु केवलमिति भावः नः अस्माकं दौर्जन्यं प्रभुत्वमदेन वयमेव जगत्प्रभव इति गर्वेण

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शूर्पणखा । को सन्देहो तस्सिं विवाहमहूसवे सव्वं मए पच्चक्खीकिदम् ।

माल्यवान् । तदेवमेकलोष्टवधः स्यात् (ङ) । तथाहि, मिथिलां प्रविश्य बलादाकृष्यमाणे कलत्रे कथं तितिक्षेत(च) रघुराजपुत्रः । तं चोत्तिष्ठमानं पौरजानपदप्रकृतयोऽप्यनुतिष्ठेरन् । किमङ्ग ! सम्बन्धिबान्धवाः (क) । यथोक्तम्, आरण्यो(ख)ऽग्निरिव दुःसहदुःखामर्षजं तेजो विक्रमयति, मण्डलस्य चानुग्राह्यो (ग) भवति इति ।

विपरिणमते विपर्यस्यति वयमेव रामविद्वेषिण इति भावः । हरिणीवृत्तम् ॥ १४ ॥

(ङ) तदेवं तस्मात् एवं रावणे बलात् तत्कलत्रं हर्तुं गते इति यावत्, एकलोष्टेति एकस्य एकाकिनो रावणस्येति भावः लोष्टैः मृत्खण्डैः बहुभिर्जनैः प्रक्षिप्तैरिति भावः वधः विनाशः स्यात् ।

(च) कथं तितिक्षेत क्षमेत नैव क्षमेतेत्यर्थः ।

(क) तच्च रामम् उत्तिष्ठमानं रावणेन युध्यमानमिति यावत् । पौरेति पौराः पुरवासिनः, जानपदाः देशवासिनः, प्रकृतयः प्रधानपुरुषाः राजामात्यादयः । अनुतिष्ठेरन् राममनुसरेयुरित्यर्थः । किं वक्तव्यमिति शेषः । अङ्ग सम्बोधने । सम्बन्धिबान्धवाः सम्बन्धिनः स्वजनाः बान्धवाः सुहृदः । एते यत् राममनुतिष्ठेरन् तत् किं व्यक्तव्यमिति भावः ।

(ख) आरण्यः वन्यः ।

(ग) दुःसहेति दुःसहेन सोढुमशक्येन दुःखेन यः अमर्षः क्रोधः तज्जं तदुत्पन्नं तेजः प्रतापः सामर्थ्यविशेष इति यावत् विक्रमयति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शूर्पणखा। (दीर्घमुष्णं च निःश्वस्य।) अज्ज! किं दाणिं जुत्तम्।

माल्यवान्। शृणु वत्से! कार्य्यज्ञासि। अस्ति वनौकसां (घ) मन्त्री जाम्बवान्। स मतङ्गाश्रमवास्तव्यामुपसृत्य (ङ) श्रमणां नाम सिद्धशबरीमभ्यर्थितवान्। यथास्य वालिनो द्वैराज्येन क्षीणा लुब्धापवारिताः प्रकृतयः (च) किष्किन्धायां कुमारसुग्रीवमभिषेक्ष्यमाणाः सामवायिकं रामभद्रमपेक्षन्ते (छ)।

शूर्पणखा। (सातङ्कम्।) कधं खत्तिअपोदओ (ज) वालिणिग्गहे वि सहाओ समीहीअदि। तदो तदो।

माल्यवान्। ततश्चायोध्यातः (झ) कैकेय्या भरतवार्त्ताहर-

योधयति। मण्डलस्य राजचक्रस्य। अनुपाह्यः अनुकम्पनीयः अनुसरणीय इति भावः।

(घ) वनौकसां वानराणाम्।

(ङ) मतङ्गेति मतङ्गस्य मुनेः आश्रमे वास्तव्यं वासो यस्याः ताम्। उपसृत्य उपेत्य।

(च) द्वैराज्येन राजकद्वयेन स्वस्य राज्यं सुग्रीवस्य च राज्यं तयोर्द्वयोः आत्मसात्करणेनेति भावः। क्षीणाः दुर्बलाः लुब्धा लोभपरायणाः अपवारिताः अपसृताः प्रकृतयः प्रधानपुरुषाः।

(छ) अभिषेक्ष्यमाणाः राजपदस्थं करिष्यन्त इति यावत् सामवायिकं समवायान् सङ्घान् सङ्गच्छतीति तथोक्तम्। अपेक्षन्ते प्रतीक्षन्ते रामं सहायं कृत्वा वालिनिग्रहाय यतन्ते इति भावः।

(ज) क्षत्रियपोतकः क्षत्रियबालकः।

(झ) अयोध्यातः अयोध्यानगरात्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

णाय (ञ) प्रेषिता मन्थरा नाम स्थविरदासी (ट) कठोरतर-तरणितापवज्रानलज्वालावलीढजीविता मिथिलाप्रान्तरे (ठ) तिष्ठतीति निदाघकिरणान्तेवासी सतीर्थमृषिं (ड) याज्ञवल्क्यमुपस्थाय (ढ) सम्प्रत्येव निमेषमात्रान्निवृत्तो हनूमान् कथयति । अतस्त्वमप्यस्मदनुरोधेन हनूमत्प्रत्यवेक्षितस्वशरीरा परपुरप्रवेशविद्यया (ण) मन्थराशरीरमधितिष्ठन्ती (त) मिथिलामुपेत्य प्रत्यवेता संविधानकमिदं

(ञ) भरतेति भरतस्य मिथिलां गतस्येति भावः वार्त्ताहरणाय संवादानयनार्थम् ।

(ट) स्थविरदासी वृद्धा किङ्करी ।

(ठ) कठोरेति कठोरतरस्य अतिदुःसहस्य तरणितापस्य सूर्यातपस्य वज्रानलस्येव ज्वालाभिः सन्तापैः अवलीढम् आक्रान्तं जीवितं यस्याः तथाविधा । मिथिलाप्रान्तरे मिथिलाया दूरभूम्ये अध्वनि, प्रान्तरं दूरभूम्योऽध्वेत्यमरः ।

(ड) निदाघेति निदाघकिरणस्य उष्णरश्मेः सूर्यस्येत्यर्थः अन्तेवासी शिष्यः सतीर्थं सहाध्यायिनम् एकगुरुमिति यावत्, सतीर्थास्त्वेकगुरव इत्यमरः ।

(ढ) उपस्थाय वन्दित्वेत्यर्थः ।

(ण) हनूमदिति हनूमता प्रत्यवेक्षितम् अवधानेन रक्षितं स्वशरीरं निजदेहः यस्याः तथाभूता । परपुरेति परस्य पुरं शरीरं तस्मिन् प्रवेशविद्यया प्रवेशसाधन्या विद्यया ।

(त) अधितिष्ठन्ती आश्रयन्ती ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशरथगोचरीकरिष्यसि (थ)। इत्यभाविना (द) गुरुनिदेशचर्य्याप्रसङ्गेन (ध) पङ्कपाषाणविषमकण्टकव्यालकुलबहुलामरण्यानी(न)मनुप्रविष्टः सर्वथा वैदेशिको राजपुत्रः (प) कार्य्यगौरवान्नियत(फ)मेव वालिवधपूर्वकेन प्रतीकारसन्धिना सख्येन सुग्रीवमुपगृह्णीयादिति (ब)।

शूर्पणखा। (सकौतुकम्।) अज्ज! किं तं संविहाणअम्।

माल्यवान्। (कर्णे।) एवमेवम्। (इति कथयति।)

(थ) प्रत्ययिता जनितविश्वासा। संविधानकं रामवनवासभरतराज्यदानरूपं कैकेय्या अभिप्रेतमिति भावः। दशरथगोचरीकरिष्यसि दशरथाय निवेदयिष्यसीत्यर्थः।

(द) इत्यम् अनेन प्रकारेण एवंविधकौशलेनेति यावत् भाविना भविष्यता।

(ध) गुरुनिदेशेति गुरोः पितुः निदेशः आज्ञा तस्य चर्या प्रतिपालनं तत्प्रसङ्गेन तदनुरोधेनेत्यर्थः।

(न) पङ्केति पङ्कैः कर्दमैः पाषाणैः प्रस्तरैः विषमा अवनतोन्नता तथा कण्टकैः व्यालकुलैः हिंस्रजन्तुवृन्दैः बहुला ताम्। अरण्यानीं महारण्यम्।

(प) वैदेशिकः भिन्नदेशभवः तत्तदरण्यभूम्यनभिज्ञ इति भावः। राजपुत्रः रामः।

(फ) नियतमेव निश्चितमेव।

(ब) प्रतीकारसन्धिना प्रतीकारे साहाय्यकरणे सुग्रीवकर्तृके इति भावः सन्धिः आशयः यत्र तथाभूतेन। यद्वा प्रतीकारसन्धिः परस्परोपकारकरणार्थं सम्मेलनम्। उक्तञ्च चाणक्येन, मयास्योपकृतं पूर्वमयं मामुपकारिष्यति। इति यः क्रियते सन्धिः प्रतीकारः स

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शूर्पणखा । (हसन्ती ।) अहो वुड्ढरिच्छस्स (भ) कुड्डिलदा । तदो तदो ।

माल्यवान् । ततश्च सापि शबरयोगिनी (म) सुग्रीवगुणानुरोधेन सर्वमोमित्युरसिकृत्य (य) तदेव विदेहाभिमुखी (र) प्रस्थितेति मे जनस्थानविहारिभि(ल)र्निशाचरैरागत्य निवेदितम् । तदमुना च जाम्बवत्प्रयोगेण फलता (व) विराधप्रभृतिभिरधिष्ठितेषु विन्ध्यगिरिगह्वरेषु विहरतो रामस्य सुकरं कलत्रापहरणम् । अस्मदीयास्तु मायाः (श) सुरासुरप्रथमरेखयोधस्य (ष) युद्धमुदितविबुधपतिना

उच्यते ॥ उपकारं करोम्यस्य ममाप्येष करिष्यति । अयं वापि प्रतीकारो रामसुग्रीवयोरिवेति । तथाभूतेन सख्यबन्धेन संश्लेषेण । उपगृह्णीयात् आश्रयेत् ।

(भ) वृद्धकञ्चुकस्य स्थविरभल्लूकस्य ।

(म) शबरयोगिनी सिद्धशबरी ।

(य) उरसिकृत्य हृदये कृत्वेत्यर्थः । उररीकृत्येति पाठे स्वीकृत्येत्यर्थः ।

(र) विदेहाभिमुखी मिथिलाभिमुखी ।

(ल) जनस्थानविहारिभिः दण्डकारण्यस्थानविशेषसञ्चारिभिः ।

(व) जाम्बवत्प्रयोगेण जाम्बुवतः कौशलेन । फलता सिद्धिं गच्छता ।

(श) मायाः कपटाचरणानि ।

(ष) सुरासुरेति सुरासुरयोर्मध्ये प्रथमा रेखा सङ्ग्रामः यस्य तथाभूतो यो योधः तस्य अग्रवीरस्येति यावत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वितीर्णमायाहरणमन्त्रधारिणो (स) दशरथस्य सन्निधौ न प्रभवन्ति (ह) ।

शूर्पणखा । (सविचिकित्सम् (च) ।) अज्ज ! उवणदस्स एव्वं (क) करीअदि ।

माल्यवान् । (विहस्य ।) वत्से ! साधु । दृष्टसंवादिनी (ख) ते दृष्टिः (ग) । यदाहुः । यो ह्युपनतस्य पुत्रदारानतिमन्यते तस्योद्विग्नं मण्डलमभावायोपतिष्ठते इति । किं पुनरत्रास्य नैष निसर्गतेजस्वी संशयप्रवृत्तिमातिष्ठते (घ) ।

(स) युद्धेति युद्धेन मुदितः प्रीतः वियुधानां देवानां पतिरिन्द्रः तेन । वितीर्णः दत्तः यः मायाहरणमन्त्रः तं धारयतीति तथोक्तस्य ।

(ह) न प्रभवन्ति न सिद्धिं व्रजन्तीति भावः ।

(च) सविचिकित्सं ससंशयम् ।

(क) उपनतस्य समीपागतस्य रामस्येति शेषः एवं कलत्रापहरणमिति यावत् ।

(ख) दृष्टसंवादिनी दृष्टानां विज्ञानामिति यावत् संवादिनी अनुमोदिनी अनुसारिणी वा ।

(ग) दृष्टिः ज्ञानम् ।

(घ) अतिमन्यते हरति । मण्डलं राष्ट्रम् उद्विग्नं शङ्कितं कदाचाकस्मादेवं करिष्यतीति बुद्धेति भावः । अभावाय विनाशाय । उपतिष्ठते परिणमति । निसर्गतेजस्वी स्वभावेन तेजस्वलः एष राम इति यावत् । संशयप्रवृत्तिं समाश्रयेण वर्त्तनम् । किं पुनः आतिष्ठते अङ्गीकरोति ? नैवाङ्गीकरोतीत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शूर्पणखा । हुं (ङ) । अस्सं भणामि । अवि एव्वं (च) करिस्सदि रामभद्दो ।

माल्यवान् । कः संशयः (छ) । लोकोत्तरं हि किमप्युन्मीलयन्तो (ज) जगति राज्योपभोगेभ्योऽपि बीभत्सन्ते महानुभावाः (झ) ।

शूर्पणखा । अस्सं वि किं वि अणत्थन्तरं (ञ) अत्थ यडिदुमिति तक्केमि ।

माल्यवान् । (सहर्षम् ।) किं तत् ।

शूर्पणखा । मए जणअणअरादो (ट) णिक्कन्तीए खुडिद-सिरिकण्ठसरासणस्स (ठ) दासरहिणो मच्छरेण (ड) सअलखत्तिअकिदन्तो परसुरामो परागदो (ढ) त्ति ।

(ङ) हुं प्रश्ने, हुं प्रश्नेऽङ्गीकृतौ रोषे इति विश्वः ।

(च) अपिः प्रश्ने । एवं पिष्टनियोगेन दण्डकारण्यप्रवेशमिति भावः ।

(छ) कः संशयः । संशयो नास्तीत्यर्थः ।

(ज) लोकोत्तरम् अलौकिकं किमपि अनिर्वचनीयमित्यर्थः भावमिति भावः । उन्मीलयन्तः प्रकटयन्तः ।

(झ) बीभत्सन्ते जुगुप्सन्ते राज्यभोगादीन् तुच्छीकृत्य निन्दन्तीत्यर्थः । महानुभावाः महाप्रभावाः ।

(ञ) अनर्थान्तरम् अनिष्टविशेषः ।

(ट) जनकनगरात् निर्गतात् ।

(ठ) क्षुण्णेति क्षुण्णं दलितं श्रीकण्ठस्य हरस्य शरासनं धनुः येन तथाभूतस्य ।

(ड) मात्सर्येण विद्वेषेण, मत्सरोऽन्यशुभद्वेष इत्यमरः ।

(ढ) परागतः उपस्थितः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

माल्यवान् । (सहर्षम् ।) सर्वमुपपद्यते (ण) ।

भुजार्गलितनर्मदामकरचक्रदंष्ट्राङ्कुर-
व्रणप्रकरकर्कशं किमपि बिभ्रदुग्रं वपुः ।
स येन परशौ हुतो नृपतिरर्जुनः कौतुका-
दसौ कथमुपेक्षते गुरुधनुर्व्यलीकं मुनिः ॥१५॥

परन्त्व(त)नेनापि सकलमूर्धाभिषिक्तकण्ठकाण्डरुधिराव-
सेकपङ्किलकुठारेण दुरभिभवो (थ) दाशरथिः ।

(ण) उपपद्यते युज्यते ।

भुजेति । येन भुजाभिर्बाहुभिः सहस्रेणेति भावः अर्गलितायाः प्रतिरुद्धायाः नर्मदायाः नदीभेदस्य यानि मकरचक्राणि जलजन्तु-विशेषाः तेषां दंष्ट्राङ्कुरैः दशनाग्रैः यः व्रणप्रकरः क्षतसमूहः तेन कर्कशं सञ्जातकिणत्वात् कठिनमिति यावत् किमपि अनिर्वचनीयम् उग्रं भीषणं वपुः शरीरं बिभ्रत् दधानः सः प्रसिद्धः नृपतिरर्जुनः कार्त्तवीर्य्य इत्यर्थः कौतुकात् अवलीलयेत्यर्थः परशौ कुठारे हुतः दग्धः, असौ मुनिः परशुरामः गुरोः शिवस्य धनुर्व्यलीकं धनुर्भङ्ग-मित्यर्थः कथम् उपेक्षते सहते नैव सहते इत्यर्थः । पुरा बाहुभिर्न-र्मदां बद्ध्वा जलक्रीडां कुर्वतः कार्त्तवीर्य्यस्याङ्गानि जलजन्तुभिः क्षता-नीति प्रसिद्धिः । पृथ्वीवृत्तं, जसौ जसयला यस्मुपहयतिश्च पृथ्वी गुरु-रिति तल्लक्षणात् ॥१५॥

(त) परन्तु किन्तु ।

(थ) सकलेति सकलानां मूर्धाभिषिक्तानां क्षत्रियाणां, मूर्धाभि-षिक्तो राजन्यो बाहुजः क्षत्रियो विराड्डित्यमरः । कण्ठा एव काण्डाः तेषां रुधिरावसेकेन रक्तस्रावेण पङ्किलः कर्दमितः कुठारो यस्य तथा-भूतेन । दुरभिभवः दुर्जयः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शूर्पणखा । (साभ्यसूयम् (द) ।) अहो दुद्दमुहे (ध) तस्सिं खत्तिअवटुए (न) एव्वं संभावेदि मादामहो ।

माल्यवान् । वत्से ! नैतज्जानासि ।

सर्वराजकदुर्धर्षं सुर्वदेवमयं धनुः ।
भञ्जता राममद्रेण विजिग्ये भुवनत्रयम् ॥१६॥

इदानीं तु

राजन्यरुधिराम्भोधिकृतत्रिषवणो मुनिः ।
प्राप्तः परशुरामोऽयं न विद्मः किं करिष्यति ।१७॥

तदेहि राजकुलमेव गच्छावः ।

(इति निष्क्रान्तौ ।)

विष्कम्भकः ।

(द) साभ्यसूयं गुणेषु दोषारोपणमभ्यसूया तत्सहितं रामगुण-प्रकटनासहनपुरःसरमित्यर्थः ।

(ध) दुग्धमुखे दुग्धपोष्ये शिशाविति भावः ।

(न) क्षत्रियवटुके क्षत्रियबालके ।

सर्वेति । राममद्रेण सर्वैः राजकैः राजन्यैः दुर्धर्षं धर्त्तुमशक्य-मित्यर्थः सर्वदेवमयं सर्वदेवतास्वरूपं धनुः भञ्जता सता भुवनत्रयं विजिग्ये जितमित्यर्थः । सर्वजनदुष्करकर्मकारी सर्वविजयी स्वत एव भवतीति भावः । अनुष्टुब्वृत्तम् ॥ १६ ॥

राजन्येति । राजन्यानां क्षत्रियाणां रुधिराम्भोधौ शोणित-सागरे कृतं त्रिषवणं त्रिसन्ध्यस्नानं येन तादृशः अयं मुनिः परशुरामः प्राप्तः उपस्थितः किं करिष्यति, न विद्म न जानीमः । अत्र वाक्यार्थः कर्म । अनुष्टुब्वृत्तम् ॥ १७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये ।)

भो भो जनकाग्निहोत्रपरिचारकाः ! पाद्यं पाद्यम् । अर्घोऽर्घः (प) ।

आजन्मब्रह्मचारी पृथुलभुजशिलास्तम्भविभ्राजमान-
ज्याघातश्रेणिसंज्ञान्तरितवसुमतीचक्रजैत्रप्रशस्तिः ।
वक्षःपीठे घनास्त्रव्रणकिणकठिने संक्ष्णुवानः पृषत्कान्
प्राप्तो राजन्यगोष्ठीवनगजमृगयाकौतुकी जामदग्न्यः ॥१८॥

(प) जनकेति जनकस्य यत् अग्निहोत्रं अग्नौ होमविधिः तस्य परिचारकाः भृत्याः । पाद्यं पादप्रक्षालनार्थं जलं, पाद्यं पादाय वारिणीत्यमरः । आनीयतां दीयतां वा । अर्घः पूजा, अर्घः पूजन-मूल्ययोरिति विश्वः । क्रियतामिति शेषः । त्वरया आदरेण वा द्विरुक्तिः ।

आजन्मेति । आजन्म जन्मन आरभ्य ब्रह्मचारी अनुष्ठितब्रह्म-चर्यः सांसारिकसुखभोगरहित इति भावः, पृथुलौ महान्तौ भुजावेव शिलास्तम्भौ तयोः विभ्राजमाना विशेषेण राजमाना या ज्याघात-श्रेणिः मौर्व्याकर्षणजनितक्षतराजिः तस्याः संज्ञया नाम्ना अन्तरिता आच्छादिता वसुमतीचक्रस्य भूमण्डलस्य जैत्रप्रशस्तिः जयप्रशंसा यस्य तथोक्तः, ज्याघातपङ्क्तिव्याजेन संख्याता जयप्रशस्तीः बिभ्रदिति भावः । घनानां कठिनानाम् अस्त्राणां व्रणेन क्षतेन ये किणाः तैः कठिने कर्कशे वक्षःपीठे पृषत्कान् बाणान् संक्ष्णुवानः तेजयन्, राज-न्यगोष्ठी क्षत्रियसमूह एव वनगजाः तेषां मृगयायां कौतुकी मृग-यालुरित्यर्थः, जामदग्न्यः परशुरामः प्राप्तः उपस्थितः । स्रग्धराछन्दः, स्रग्भ्रैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति तल्ल-क्षणात् ॥ १८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

एष स्त्रैणकपोलकुङ्कुमशिखिस्तेयातिभीरौ भुजे
बिभ्राणश्चतुरन्तराजविजयि ज्यानादरौद्रं धनुः ।
तूणावेव पुनस्तरां दृढयति स्वादन्तरस्मात्पटा-
दाकृष्टैः कुशचीरतन्तुभिरभिक्रुद्धो मुनिर्भार्गवः ॥१९॥

(ततः प्रविशति शरचापहस्तः क्रोधोद्धतो जामदग्न्यः ।)

जामदग्न्यः । (सखेदम् ।) अहह यथा वृष्टभोजिना स्वता-न्तेन (फ) प्रत्यवसितास्ते सांयुगीनाः (ब) । वर्त्तमाने तु (भ)

एष इति । एष भार्गवो मुनिः अभिक्रुद्धः ऐश्वरधनुर्भङ्गादिति भावः अतएव स्त्रैणाः स्त्रीसम्बन्धिनः क्षत्रियाणामिति शेषः कपोलाः गण्डभागाः तेषु या कुङ्कुमशिखिः काश्मीररागराजिः तस्याः स्तेनेन चौर्येण अतिभीरौ अतिशङ्किते भुजे, चौरः सततं शङ्कितो भवतीति भावः । चतुरन्तराजविजयि चतुर्दिङ्मण्डलक्षत्रियजेतृ, ज्यानादेन मौर्वीध्वानेन रौद्रं भीषणं धनुः बिभ्राणः दधानः सन् स्वात् निजात् अन्तरस्मात् उत्तरीयात् पटात् वस्त्रात् आकृष्टैः कुशचीरतन्तुभिः कुशवल्कलतन्तुभिः तूणावेव पुनस्तराम् अतिशयेन दृढयति दृढीकरोति । चतुरन्तरीपविजयीति पाठे चतुरन्तरीपस्य चतुर्द्वीपस्य विजयीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ १९ ॥

(फ) वृष्टभोजिना वृष्टं स्वादु भुङ्क्ते इति तथोक्तेन स्वतान्तेन यमेन ।

(ब) प्रत्यवसिताः भक्षिताः, प्रत्यवसितगिलितखादितशातमित्यमरः । सांयुगीनाः रणसम्बन्धिताः, सांयुगीनो रणे साधरित्यमरः । सह अर्जुनादय इति शेषः ।

(भ) वर्त्तमाने तु सद्यति तु ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शस्त्राशस्त्रिकथैव का नवभवद्गीर्वाणपाणिन्धमाः
पन्थानो दिवि सङ्कुचन्ति वसुधा वन्ध्या न सूते भटान्।
लक्ष्मीरप्यरविन्दसौधवलभीनिर्व्यूहपर्यङ्किका-
विश्रान्तैरलिभिर्न कुञ्जरघटागण्डोद्गतैर्मोदते ॥२०॥

(सविमर्शार्थम् (म)।)

शम्भुर्यद्गुणवल्लरीमुपनयत्याकृष्य कर्णान्तिकं
भ्रश्यन्ति त्रिपुरावरोधसुदृशां कर्णोत्पलग्रन्थयः।

शस्त्राशस्त्रिकथेति। शस्त्रैव शस्त्रैव प्रकृत्य यत् युद्धं वृत्तं तत् शस्त्राशस्त्रि तस्य कथैव वार्त्तैव का? नास्तीत्यर्थः। नवा नूतना भवन्तः ये गीर्वाणाः देवाः संग्रामहतानां क्षत्रियाणां नवं देवत्वमिति भावः, पाणीन् धमन्ति पीडयन्तीति तथोक्ताः संग्रामहतानामसङ्ख्या-ततया सङ्कटगमनादिति भावः पन्थानः दिवि अन्तरीक्षे सङ्कुचन्ति न स्फुरन्तीति भावः। वसुधा पृथ्वी वन्ध्या जननशक्तिरहिता, यतः भटान् वीरान् न सूते न जनयति। लक्ष्मीरपि जयश्रीरपि कुञ्जर-घटानां शङ्खपार्श्विकगजानां गण्डेभ्यः कपोलेभ्यः उद्गतैः निर्गतैः तेषा-मभावादिति भावः। अरविन्दसौधवलभी हर्म्यशिरोगृहं सैव निर्व्यूहपर्यङ्किका हस्तिदन्तनिर्मितपर्यङ्कं तत्र विश्रान्तैः अलिभिः भ्रमरैः न मोदते न प्रीतिमनुभवतीत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

(म) सविमर्शं सवितर्कम्।

शम्भुरिति। शम्भुः शिवः यस्य गुणवल्लरीं मौर्वीलताम् आकृष्य कर्णान्तिकं कर्णसन्निध्यम् उपनयति प्रापयति, किन्तु त्रिपुरावरोध-सुदृशां त्रिपुरान्तःपुरस्त्रीणां कर्णोत्पलग्रन्थयः कर्णोत्पलानां सन्धि-बन्धनानि भ्रश्यन्ति प्रच्यवन्ति, इमां यद्गुणवल्लरीम् उन्मुच्य विमुच्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वं चास्फालयति प्रकोष्ठकमिमामुच्चुच्च तासामहो
भिद्यन्ते वलयानि दाशरथिना तद्भग्नमैशं धनुः ॥२१॥

(सरोषविकटं परिक्रामन् ।) भो भो विदेहाः (य) क्व रामो दाशरथिः ।

यस्मिन्नर्जुनदोःसहस्रनलकप्रोद्गच्छदस्रच्छटा-
जिह्वाले जुहवाञ्चकार विमुखा राजन्यसत्तामपि ।
सोऽयं प्राक्तवलग्रहस्य विघसीभूतेष्वपि क्षत्रिय-
क्षुद्रेषु क्षुधितश्चिरेण परशुस्तेनायमन्विष्यते ॥२२॥

स्वं निजं प्रकोष्ठकं कफोणेरधोभागम् आस्फालयति सन्ताडयति च शम्भुरिति पूर्वेणान्वयः । किन्तु तासां त्रिपुरावरोधसुदृशां वलयानि कङ्कणाः भिद्यन्ते भज्यन्ते । अत्रैकस्य कर्णान्तिकनयने अपरासां कर्णोत्पलभ्रंश इति, तथा एकस्य प्रकोष्ठकास्फालने अपरासां वलभ्रंश इति च कार्य्यकारणयोर्भिन्नदेशतायामसङ्गतिरलङ्कारः । तदुक्तं दर्पणे, कार्य्यकारणयोर्भिन्नदेशतायामसङ्गतिरिति । येन धनुषा त्रिपुरयोषितां पतिवधात् कर्णोत्पलादीनां विलासभूषणानां भ्रंश इति भावः, दाशरथिना तत् ऐशं शाम्भवं धनुः भग्नम् अहो आश्चर्य्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ २१ ॥

(य) विदेहाः मैथिलाः ।

यस्मिन्निति । अर्जुनस्य कार्तवीर्य्यस्य दोष्णां भुजानां सहस्रमेव नलकं नल इति प्रसिद्धं तस्मात् प्रोद्गच्छन्ती निःसरन्ती या अस्रच्छटा रुधिरधारा तया जिह्वाले रसनाशालिनीत्यर्थः, यस्मिन् परशौ कुठारे रुषा क्रोधेन राजन्यानां क्षत्रियाणां सत्तामपि विद्यमानतामपि जुहवाञ्चकार विमुखतवन्तः वशमिति शेषः येन परशुना क्षत्रियान् विध्वं-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(ततः प्रविशति सधैर्यप्रमोदो दाशरथी रामः ।)

रामः ।

साकं शक्तिधरेण तत्रभवतो देवाद्भवानीपते-
र्यः सम्यक्त्वमवाप चापनिगमं सम्यक्च सामानि च ।
शूराणाञ्च तपस्विनाञ्च परमां काष्ठामधिष्ठात्रुभि-
स्तेजोभिर्भगवानसौ भृगुपतिर्दिष्ट्याद्य दर्शिष्यते ॥२३॥

जामदग्न्यः । (सखेदोपालम्भमात्मानं प्रति ।)

भस्माङ्कुरेति खुरलीकलहे कुमार-
मप्याक्षिपन् परुषरोषरसान्धचेताः ।

सयामासिमेत्यर्थः, सोऽयं परशुः प्राक्कवलयहस्य प्राथमिकपाशयह-
णस्य विघसीभूतेषु भोजनशेषभूतेषु अपि क्षत्रियक्षुद्रेषु, विघसो यज्ञ-
शेषभोजनशेषयोरिति मेदिनी । राजन्यान्धमेषु सत्स्वपीत्यर्थः चिरेण
क्षुधितः क्षुधापीडितः, तेन परशुना हेतुना अयं रामः अन्विष्यते अनु-
सन्धीयते मयेति शेषः । यद्वा तेन परशुना इति कर्तृपदम् । शार्दू-
लविक्रीडितं वृत्तम् ॥ २२ ॥

साकमिति । यः शक्तिधरेण स्कन्देन साकं सह तत्रभवतः
पूज्यात् देवात् भवानीपतेः हरात् सम्यक्त्वं सम्यक्पूर्वं चापनिगमं धनुर्वेदं
सम्यक्च सम्यक्पूर्वाणि सामानि सामवेदांश्च अवाप प्राप्तवान्, शूराणाञ्च
वीराणाञ्च तपस्विनाञ्च परमां काष्ठां उत्कर्षम् अधिष्ठात्रुभिः आश्र-
यद्भिः तेजोभिः उपलक्षित इति शेषः, विशेषणे तृतीया । महावीरत्व
महातपस्वित्वे इति भावः असौ भगवान् भृगुपतिः परशुरामः दिष्ट्या
भाग्येन अद्य दर्शिष्यते द्रष्टव्यः मयेति शेषः । शार्दूलविक्रीडितं
वृत्तम् ॥ २३ ॥

भस्मेति । योऽहं परुषं निष्ठुरम् अतएव रोषरसेन कोपा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दृष्टोऽस्मि यः कृतमिथोहसितं शिवाभ्यां
तच्चापभङ्गमपि हा सहणः शृणोमि ॥२४॥

(विष्टभ्य च ।) अहो मामरण्यनिवासिननुपश्रुत्य दुरात्मना रघुकुटुम्बकेन दूरमुच्छ्वसितम् (र) । (किञ्चिदुच्चैः ।)

रे काकुत्स्थाः ! कथं वः श्रुतिविषयमयं नागमङ्गार्गवीयो
दुःसामन्तापचारप्रचितपितृवधामर्षनिस्तारबन्धुः ।
वारानासन्नविंशान्निशसितविषमक्षत्रजातिप्ररोहः
क्रोधादुत्कृत्तगर्भामिषरुधिरवसाविस्रगन्धिः कुठारः ॥२५॥

वेशेन अन्धं चेतः चित्तं यस्य तथाभूतः सन् खुरलीकलहे शस्त्राभ्यासविवादे शस्त्रयोग्यताविवादे वा, अभ्यासः खुरली योग्येति हारावली । भस्माङ्कुर नष्टतापसस्त इति कुमारं स्कन्दमपि का कथान्येषामित्यपिशब्दार्थः आक्षिपन् निर्भर्त्सयन् शिवाभ्यां पार्वतीपरमेश्वराभ्यां कृतं मिथः अन्योन्यं हसितं यस्मिन् तद् यथा तथा दृष्टोऽस्मि, हा खेदे सहणः दृष्टा आत्मावमाननाविशेषः तत्सहितः धिङ्मां यो गुरोर्धनुर्भङ्गापमानं सहे इत्यात्मानं विनिन्दन्निति भावः तस्य गुरोः चापभङ्गमपि धनुर्भङ्गमपि शृणोमि । वसन्ततिलकं वृत्तम् ॥ २४ ॥

(र) रघुकुटुम्बकेन रघुपरिजनेन रामेणेति यावत् । दूरम् अत्यर्थम् उच्छ्वसितम् प्रहृष्टमिति यावत् ।

रे काकुत्स्था इति । रे इति नीचसामन्त्रणम् । रे काकुत्स्थाः ककुत्स्थकुलजाः क्षत्रियाः । दुःसामन्तस्य दुष्टनृपतेः कार्त्तवीर्यस्येति भावः अपचारेण अत्याचारेण प्रचितः कृतः यः पितृवधः तेन यः अमर्षः शत्रुनिर्यातनेच्छा तस्य निस्तारे बन्धुः मित्रम् आसन्नविंशान्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (दृष्ट्वा सहर्षबहुमानम् ।)

जेतारं दशकन्धरस्य रभसाद्दोःश्रेणिनिःश्रेणिका-
तुल्यारूढसमस्तलोकविजयश्रीपूर्यमाणोरसम् ।
यः संख्ये निजघान हैहयपतिं शत्रोर्मुखं दृष्टवान्
यः पृष्ठं ददतोऽपि षण्मुखजये सोऽयं कृती भार्गवः ॥२६॥

एकविंशतिसंख्यकान् वारान् विश्वसितः निहतः विप्रमक्षत्रजातेः दुष्टक्षत्रियजातेः प्ररोहः अङ्कुरः येन तथोक्तः तथा क्रोधात् उत्कृत्ताः खण्डिताः ये गर्भाः क्षत्रस्त्रीणामिति भावः तेषाम् आमिषं मांसं रुधिरं रक्तं वसा मेदः ताभिः विस्रगन्धिः आमगन्धिः, मांसं क्रव्यमामिषमिति हारावली । विस्रं स्यादामगन्धि यदित्यमरः । भार्गवीयः भार्गवसम्बन्धी अयं कुठारः कथं वः युष्माकं श्रुतिपथं न अगमत् श्रवणविषयतां न गत इत्यर्थः । स्रग्धराछन्दः ॥ २५ ॥

जेतारमिति । यः रभसात् वेगात् अवलीलयेति यावत्, रभसो वेगहर्षयोरित्यमरः । दोष्णां भुजानां विंशतिसंख्यकानामिति भावः श्रेणिः पङ्क्तिरेव निःश्रेणिका अधिरोहणी सोपानपङ्क्तिरिति यावत् तया तुल्यं समकालमित्यर्थः आरूढया समस्तलोकानां सर्वजगतां विजयश्रिया पूर्यमाणम् अधिष्ठीयमानम् उरः वक्षःस्थलं यस्य तथाभूतस्य त्रिभुवनविजयिन इति यावत् दशकन्धरस्य रावणस्य जेतारं हैहयपतिं कार्त्तवीर्यार्जुनं संख्ये युद्धे निजघान निहतवान् । दोःश्रेणिनिःश्रेणिकातुल्यारूढसमस्तलोकविजयश्रीपूर्यमाणोरसमिति पाठे दोःश्रेणिः भुजसहस्रमेव निःश्रेणिका अधिरोहणी तया तुल्यं युगपदित्यर्थः आरूढया समस्तलोकविजयश्रिया पूर्यमाणम् उरः यस्य तथोक्तमिति हैहयपतिमित्यस्य विशेषणम् । निःश्रेणिस्त्वधिरोहणीत्यमरः । यश्च षण्मुखस्य कार्त्तिकेयस्य जये पराजये

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(क्षणं क्षणिर्वर्ण्य सञ्चितम् ।) अहो सङ्कीर्य्यमाणानेकरसानुभावगम्भीरमधुरोऽयमस्याभोगः (ल) । तथाहि ।

जटां धत्ते मूर्ध्ना परशुधनुषी बाहुशिखरं
प्रकोष्ठो रौद्राक्षं वलयमिषुदण्डानपि करः ।
प्ररूढप्रौढास्त्रव्रणविकटरौद्राङ्गतमिदं
प्रशान्तामैणेयीं त्वचमपि च वक्षः कलयति ॥२७॥

(इत्युपसर्पति ।)

इत्यर्थः दृष्टं ददतोऽपि पराङ्मुखस्यापि शत्रोः पराङ्मुखस्येति शेषः सुखं दृष्टवान् तस्य पराङ्मुखत्वेन पश्चादपि सुखस्थितेरिति भावः । योऽयं क्षत्री शतकार्य्यः कार्य्यकुशल इत्यर्थः भार्गवः परशुरामः दृश्यते इति शेषः । शार्दूलविक्रीडितं वृत्तम् ॥ २६ ॥

(ल) सङ्कीर्य्यमाणेति सङ्कीर्य्यमाणेन, कर्मकर्त्तरि प्रयोगः । स्वयं सङ्कीर्णीभवता विमिश्रेणेति यावत् अनेकरसानां विविधभावविशेषाणाम् अनुभावेन आस्वादनेन गम्भीरः दुरवाहः मधुरश्च । अस्य भार्गवस्य । आभोगः पूर्णता अवयवसंस्थानमिति यावत्, आभोगः परिपूर्णतेत्यमरः ।

जटामिति । मूर्ध्ना शिरः जटां, बाहुशिखरं स्कन्धदेशः परशुधनुषी कुठारं धनुश्चेत्यर्थः, प्रकोष्ठः कफोणेरधोभागः रौद्राक्षं वलयं रुद्राक्षमालामित्यर्थः, करः हस्तः इषुदण्डान् शरानित्यर्थः धत्ते धारयति । प्ररूढेन जातेन प्रौढेन विशालेन अस्त्रव्रणेन अस्त्रक्षतेन विकटं प्रस्फुटं यथा तथा रौद्रः अद्भुतश्च रसो यत्र तथाभूतम् इदं वक्षः प्रशान्तां सोम्यां ऐणेयीं मृगसम्बन्धिनीं त्वचं चर्मापि कलयति धारयति च । शिखरिणीवृत्तम् ॥ २७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जामदग्न्यः । (विलोक्य ।) कथमयमसौ श्रूयमाणगुणानुकल्पिताकारसंवादी दाशरथिः (व) । साधु रे राजन्यपोत ! (श) साधु ।

सविधमुपसरन् समूलकाषं
कपितनृपान्वयमद्य मां धिनोषि ।
हरिमिव करिकुम्भकूटकोटि-
प्रकटकठोरनखाङ्कुरं कुरङ्गः ॥२८॥

रामः । (सस्मितम् ।) भगवन् भार्गव ! गुरुगर्भरूपयोरेतावदेवान्तरम् (ष) । किञ्च ।

(व) श्रूयमाणेति श्रूयमाणैः श्रुतिविषयतां गतैः गुणैः शौर्यादिभिः अनुकल्पितः अनुमितः य आकारः तत्संवादी तदनुकारी, अपरिचितोऽपि सोऽयमिति प्रतीयमान इति यावत् । दाशरथिः रामः ।

(श) राजन्यपोत ! राजशिशो !

सविधमिति । सविधं समीपं उपसरन् समागच्छन् त्वं कुरङ्गः मृगः करिणां ये कुम्भाः तेषां कूटानि शिखराणि, कूटोऽस्त्री शिखरं शृङ्गमित्यमरः । तेषां कोटिः तदाख्यसंख्या तत्र प्रकटः समुज्ज्वलः कठोरः तीक्ष्णः नखाङ्कुरः नखाग्रं यस्य तथाविधं हरिमिव सिंहमिव समूलकाषं समूलं यथा तथा कपितः निहतः नृपान्वयः क्षत्रियकुलं येन तथाभूतं मां अद्य धिनोषि प्रीणयसि । सिंहस्य गजेन्द्रघातिनः कुरङ्गदर्शने यथा अनायासेनैवास्य वधो मया विधेय इति बुद्ध्या प्रीतिः तथा महावीर्यकार्त्तवीर्यादिनाशिनो मम त्वद्दर्शने अनायासेनैव तव निधनं मया कर्त्तव्यमिति प्रीतिरिति निष्कर्षः । उपमालङ्कारः । पुष्पिताग्राछन्दः ॥ २८ ॥

(ष) गुरुरिति गुरुः पिता गर्भरूपः बालकपुत्रः तयोः यद्वा गुरु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आदेष्टा भगवान् भृगुर्जननयोरौत्पत्तिकब्राह्मयो-
र्देवो धूर्जटिरस्त्रकर्मणि गुरुर्वीर्य्यं च दूरे गिराम् ।
सप्तद्वीपवतीं ददद्भुवमभिप्रेषि द्विजान् कश्यप-
प्रायानप्रतिमानुभाव ! भवते कस्मैचिदस्मै नमः ॥२९॥

जामदग्न्यः । अरे क्षत्रियडिम्भ ! (स) तवानेन सत्त्वसौ-
जन्यपौरुषोत्कर्षेण किमप्यन्तराप्यायितो(ह)ऽस्मि । किन्तु ।

र्महान् गर्भरूपः क्षुद्रः तयोः । अन्तरं प्रभेदः । भवान् महान् अहं बालकः, तस्माम् अनायासेनैव भवान् हन्तुं समर्थ इति भावः ।

आदेष्टेति । हे अप्रतिमानुभाव ! अनुपमप्रभाव ! भगवान् भृगुः औत्पत्तिकब्राह्मयोः जननयोः उत्पत्तिरेकं जननं ततश्च सावित्रादि-वेददानं द्वितीयं जननं तयोरिति यावत् आदेष्टा सम्पादकः । देवः धूर्जटिः शम्भुः अस्त्रकर्मणि धनुर्वेददीक्षायां गुरुः आचार्य्यः । वीर्य्यं सामर्थ्यं गिरां वाचां दूरे तिष्ठतीति शेषः वचनातीतमिति यावत् तवेति सर्वत्र सम्बन्धः । सप्तद्वीपवतीं भुवं पृथ्वीं ददत् कश्यपप्रायान् कश्यपादीन् द्विजान् अभिप्रैषि सम्प्रदानत्वेन सङ्कल्पयसि । ईदृशाय कस्मैचित् अनिर्वचनीयस्वरूपाय अस्मै भवते तुभ्यं नमः अस्त्विति शेषः । सप्तद्वीपाश्च पुराणे कथिताः । यथा, जम्बुप्लक्षकुशक्रौञ्चशाक-शाल्मलिपुष्कराः । द्वीपाः सप्तेति । शार्दूलविक्रीडितं वृत्तम् ॥२९॥

(स) क्षत्रियडिम्भ ! राजन्यपोत !

(ह) सत्त्वेति सत्त्वं साहसं महानुभावतेत्यर्थः सौजन्यं साधुत्वं पौरुषं पराक्रमः तेषाम् उत्कर्षेण आतिशय्येन । अन्तरा मनसि । आप्यायितः परितुष्टः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri,

नाराचैः क्षतवीर्य्यनन्दनवधूबाष्पप्रियम्भावुकै-
रुत्पाद्य क्षतजोदमर्णवमथ न्युप्तं पितृभ्यां पयः ।
सम्प्रत्यस्य समस्तबाहुजभुजः क्रोधस्य निर्वास्यतः
क्षुन्दानो धनुरैन्दुशेखरमहो जातो भवानिन्धनम् ॥३०॥

रामः । (स्मित्वा ।) भगवन् !

बालस्वभावसुलभेन कुतूहलेन
कृष्टं धनुर्भगवतो वृषभध्वजस्य ।
तत्रानुषङ्गिकममङ्गलमीदृशं तु
संवृत्तमत्र न मया गणितस्त्वमासीः ॥३१॥

नाराचैरिति । क्षतवीर्य्यनन्दनस्य सहस्रार्जुनस्य वधूनां नारीणां बाष्पस्य अश्रुणः प्रियम्भावुकैः प्रियकारिभिरित्यर्थः तासां वैधव्यादिति भावः नाराचैः अस्त्रविशेषैः क्षतजोदं रक्तोदकम् अर्णवं समुद्रम् उत्पाद्य अथानन्तरं पितृभ्यां मातापितृभ्यां पयः शोणितजलमित्यर्थः न्युप्तं दत्तमित्यर्थः । निवापः पितृदानं स्यादिति, रक्तक्षतजशोणितमिति चामरः । सम्प्रति निर्वास्यतः निर्वाणं गमिष्यतः अस्य समस्तान् बाहुजान् क्षत्रियान्, बाहुजः क्षत्रियो विराड्डित्यमरः । भुङ्क्ते इति तथोक्तस्य क्रोधस्य अग्निभूतस्येति भावः ऐन्दुशेखरम् ऐशं धनुः क्षुन्दानः खण्डयन् भवान् इन्धनं काष्ठं जातः । अहो इति खेदसूचकमव्ययम् । शार्दूलविक्रीडितं वृत्तम् ॥३०॥

बालेति । बालस्य शिशोः स्वभावः प्रकृतिः तेन सुलभं स्वतः सञ्जातमित्यर्थः तेन कुतूहलेन कौतुकेन भगवतः वृषभध्वजस्य हरस्य धनुः कृष्टं आनमितं, तत्र कर्मणि तु आनुषङ्गिकम् अनभिप्रायिकम् अनुद्दिष्टमिति यावत् ईदृशम् अमङ्गलं तदुभङ्गरूपमिति भावः संवृत्तं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जामदग्न्यः । (सरोषम् ।) आः क्षुद्रक्षत्रियडिम्भ ! कथं प्रमथनाथप्रथमान्तेवासिनं (ख) परशुराममपि भवान्नाजीगणत् ।

महासेनो यस्य प्रमद ! यमदंष्ट्रासहचरैः
शरैर्मुक्तो जीवन् हिरिव शरजन्मा समभवत् ।
इमाञ्च क्षत्राणां भुजवनमहादुर्गविषमा-
मयं वीरो वारानजयदुपविंशान् वसुमतीम् ॥३२॥

रामः । शान्तं शान्तम् (क) । प्रसीद भगवन् । अवि-

सञ्जातम्, अत्र विषये मया त्वं गणितः अन्तरायत्वेन लक्षित इति यावत् न आसीः । तवाप्रियमिदं मया न ज्ञातमिति भावः । वसन्ततिलकं वृत्तम् ॥३१॥

(ख) प्रथमेति प्रमथनाथस्य हरस्य, पिनाकी प्रमथाधिप इत्यमरः । प्रथमः श्रेष्ठः अन्तेवासी शिष्यः तम् ।

महासेन इति । रे प्रमद ! प्रकटगर्व ! ममागणनादिति भावः महासेनः कार्त्तिकेयः, कार्त्तिकेयो महासेनः शरजन्मा षडानन इत्यमरः । यस्य मम यमदंष्ट्रासहचरैः अन्तकदशनसदृशैः शरैः मुक्तः परित्यक्तः पराङ्मुखत्वादिति भावः जीवन् सन् हिरिव दिवारमिव शरजन्मा एकत्र शरे शरवने जन्म यस्य तथोक्तः अन्यत्र शरात् विमुक्ततया जन्म रक्षा यस्य तथाभूतः समभवत् । अयं वीरः सोऽहमिति भावः उपविंशान् उपगता निटकस्था विंशतिर्येषां तान् एकविंशतिसंख्यकान् वारान् क्षत्राणां भुजवनानि एव महान्ति दुर्गाणि तैः विषमा दारुणा ताम् इमां वसुमतीञ्च अजयत् जितवान् । शिखरिणीवृत्तम् ॥३२॥

(क) शान्तं शान्तं भगवान् मया न गणित इति कथा निवर्त्ततां निवर्त्ततां ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सृष्यकारितया (ख) न गणितोऽसि । न पुनरवलेपात् (ग) ।

स्त्रीषु प्रवीरजननी जननी तवैव
देवी स्वयं भगवती गिरिजापि यस्यै ।
त्वद्दोर्वशीकृतविशाखमुखावलोक-
व्रीड़ाविदीर्णहृदया स्पृहयाम्बभूव ॥३३॥

जामदग्न्यः । (विहस्य ।) रे राजन्यपोत !
अनुभवपुनरुक्तां मुञ्च नः स्तोत्रचर्या-
मुपनमय तदेतत्कौशिकोपज्ञमस्त्रम् ।
क्षिपति न खलु कालं वीरगोष्ठीविनोद-
प्रियपरशुरयं मे बाहुरद्यच्छमानः ॥३४॥

(ख) अविमृष्यकारितया अविवेकितया ।

(ग) अवलेपात् गर्वात् ।

स्त्रीष्विति । तवैव जननी माता स्त्रीषु मध्ये प्रवीरजननी प्रकृष्टवीरप्रसविनी, स्वयं भगवती देवी गिरिजापि गौरी अपि तव दोष्णा भुजेन वशीकृतस्य निर्जितस्य विशाखस्य कार्त्तिकेयस्य, विशाखः शिखिवाहन इत्यमरः । मुखावलोकेन वदनदर्शनेन या व्रीड़ा लज्जा तया विदीर्णं दुःखितमिति यावत् हृदयं यस्याः तथाभूता सती यस्यै तव मात्रे स्पृहयाम्बभूव स्पृहां चकार धन्या भार्गवमाता यस्याः पुत्रः मम नन्दनमपि निर्जितवानिति स्वतोऽपि गौरवं यस्याः व्यक्ती-चकारेति भावः । वसन्ततिलकं वृत्तम् ॥ ३३ ॥

अनुभवेति । अनुभवेन पुनरुक्तां पुनःकथितां नः अस्माकं स्तोत्रचर्यां स्तुतिप्रक्रियां मुञ्च त्यज अहं वीरो न वेति स्वयमनु-भवेनैव मम स्तुतिः स्यात् किं पुनर्वचसेति भावः । तत् एतत् कौशिकात्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः। (स्वगतम्।) अये भगवन्तं विश्वामित्रमपि स्पृशति (घ)। भवत्वेवं (ङ) तावत्। (प्रकाशम्। सवैर्य्य-स्मितम्॥)

भूमात्रं कियदेतदर्णवमयं तत्साधितं हार्य्यते
यद्वीरेण भवादृशेन वदति त्रिःसप्तकृत्वो जयः।
डिम्भोऽयं नवबाहुरीदृशमिदं घोरञ्च वीरव्रतं
तत्कोपाद्विरम प्रसीद भगवन्नात्मैव पूज्योऽसि नः॥३५॥

विश्वामित्रात् उपज्ञा आद्यं ज्ञानं यस्य तथोक्तम्, उपज्ञा ज्ञानमाद्यं स्यादित्यमरः। अस्त्रं उपनमय आरोपय। वीरगोष्ठी वीराणां सभा संप्राप इत्यर्थः तस्यां विनोदे प्रियः परशुः कुठारः यत्र तथाभूतः उद्यच्छमानः उद्यतो भवन् मे मम बाहुः काकं समयं न खलु नैव क्षिपति अतिक्रामति। मालिनीवृत्तं, ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात्॥ २४॥

(घ) स्पृशति आक्षिपति कौशिकोपज्ञमन्त्रमित्यनेनेति भावः।

(ङ) भवत्वेवमिति अतः परं वीरोचितं व्यवहर्त्तव्यमिति भावः॥

भूमात्रमिति। एतत् भूमात्रं भूमण्डलमेव कियत् अत्यल्पमित्यर्थः तदपि अर्णवमयं समुद्रव्याप्तं तत् भूमात्रं साधितं जितं सत् भवादृशेन वीरेण यत् हार्य्यते भवादृशवीरात् आच्छिद्य अन्येना-परिह्रियते इति भावः त्रिःसप्तकृत्वो जयः एकविंशतिवारजयः तत् वदति कथयति यदि मध्ये तत् न हारितं तदा कथं पुनर्जयप्रयासः एतोद्यमेनैव जयस्य सिद्धत्वादिति भावः। अयं डिम्भः बालकः अहमिति शेषः नवबाहुः कोमलभुजः, इदं वीरव्रतं वीरचर्य्यानियमञ्च ईदृशम् एवंविधं घोरं भयानकं तत् तस्मात् कोपात् विरम विरतो भव,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जामदग्न्यः । (सक्रोधकम्पं सगतम् ।) अहो दुरात्मनोऽस्य राजन्यपोतस्य वीरप्रहतायाः पद्धतेरस्खलितमुक्तिप्रत्युक्तिवैदग्ध्यम् (च) । (प्रकाशम् ।) आः पाप ! जात्यैव केवलया (छ) पूज्यस्ते परशुरामः । कथमद्यापि निरायुधो(ज)ऽसि ।

विनयनिचुलितैर्भवद्वचोभिः
किमपि नवं विहसद्भिरङ्गमन्तः ।
अयमजनि करः कृतान्त-
दंष्ट्राक्रकचकठोरकुठारदुर्निरीक्ष्यः ॥३६॥

हे भगवन् ! प्रसीद प्रसन्नो भव, जात्यैव ब्रह्मण्यत्वेनैव न तु वीर्येणेत्येवकारार्थ इति भावः नः अस्माकं पूज्यः आराधनीयः असि भवसि । कोमलबाहुना बालकेन मया यदि भवतः पराजयः स्यात् तदा भवतोऽतीवावमाननम् अस्माकञ्च पूज्यपूजाव्यतिक्रमः स्यादिति कोपाद् विरत्या अस्माकं प्रसाद एव भवतः श्रेयानिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ३५ ॥

(च) वीरप्रहतायाः वीरजनचुण्णायाः । पद्धतेः आचारात् । अस्खलितम् अभ्रष्टम् । उक्तिप्रत्युक्तिवैदग्ध्यं वचनप्रतिवचनचातुर्यम् ।

(छ) केवलया न तु वीर्येणेति भावः ।

(ज) निरायुधः अशस्त्रः ।

विनयेति । विनयेन शिष्टाचारेण निचुलितैः पिहितैः न त्वन्तरे विनयोऽस्तीति भावः किमपि अनिर्वचनीयम् अन्तः मनसि स्थितमिति भावः नवम् अङ्गं बालकत्वं अपवादरूपं तत्साधितं कार्यं ते इति पूर्वोक्तं विहसद्भिः प्रकटयद्भिः भवद्वचोभिः तव वचनैः अयं करः हस्तः कृतान्तस्य यमस्य दंष्ट्रा एव क्रकचः करात इति प्रसिद्धः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(उच्चैः ।) अहो नु खलु भोः !

त्रैलोक्यत्राणशौण्डः सरसिजवसतेर्यः प्रसूतो भुजाभ्यां
स क्षत्रं नाम वर्णः कुलिशकठिनयोर्यस्य दोष्णोर्विलीनः ।
ज्वालाजिह्वालकालानलकवलभयभ्रान्तदेवासुराणि
व्यातन्वानो जगन्ति ज्वलति मुनिरयं पार्वतीधर्मपुत्रः ॥३७॥

(नेपथ्ये ।)

भगवन् भार्गव !

अप्रवृत्तिविषयं वितन्वतः
क्षत्रशब्दमियमेव मेदिनी ।

व इव यः कठोरः दारुणः कुठारः तेन दुर्निरीक्ष्यः दुर्दर्शः अजनि जात इत्यर्थः । पुष्पिताग्रावृत्तम् ॥ ३६ ॥

त्रैलोक्येति । त्रैलोक्यस्य त्रिभुवनस्य त्राणेन परिरक्षणेन शौण्डः मत्तः ख्यातो वा, शौण्डो मत्ते च विख्याते दर्पशालिन्यपि स्मृत इति विश्वः । सरसिजवसतेः पद्मयोनेः ब्रह्मण इत्यर्थः भुजाभ्यां बाहुभ्यां प्रसूतः उत्पन्नः, ब्राह्मणोऽस्य मुखमासीद् बाहूराजन्य इति श्रुतेः । अतएव बाहुजः क्षत्रियो विराडित्यमरः । सः प्रसिद्धः क्षत्रं नाम वर्णः यस्य कुलिशकठिनयोः वज्रदारुणयोः दोष्णोः बाह्वोः विलीनः स्वयं गतः, अयं पार्वतीधर्मपुत्रः भार्गवः जगन्ति ज्वालया शिखया जिह्वालः जिह्वावान् सः कालानलः प्रलयाग्निः तस्य कवलात् ग्रासात् दहनमिति यावत् तस्मात् भयं तेन भ्रान्ता भ्रान्तिं गताः देवासुरा येषु तानि व्यातन्वानः विस्तारयन् कुर्वन्नित्यर्थः ज्वलति दीप्यते । स्रग्धरावृत्तम् ॥ ३७ ॥

अप्रवृत्तिविषयमिति । क्षत्रशब्दं क्षत्रियेति संज्ञाम् अप्रवृत्तिविषयं अव्याप्तावच्छेदकताशून्यमिति यावत् वितन्वतः विस्तारयतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दक्षिणा तव बभूव यज्वनो
मुञ्च सम्प्रति तु शुष्कमायुधम् ॥३८॥

जामदग्न्यः । अये प्रशान्तगम्भीरः क एषः । तर्हि जनकेन भवितव्यम् । (तदभिमुखमवलोक्य ।) राजर्षे सीरध्वज । भगवतः सूर्यशिष्यात् पुराणवाजसनेयिनो(झ) याज्ञवल्क्यादधीतब्रह्मसिद्धान्तो गृहीतवाक्य (ञ) एवासि । किं तु नायमवसरः शिष्टानुरोधस्य (ट) ।

अवनिमधिकविंशानभ्यवस्कन्द्य वारा-
नवभृथभृतकेभ्यः सम्प्रदाय द्विजेभ्यः ।

क्षत्रियशब्दार्थं विलोपयत इति भावः यज्वनः याज्ञिकस्य तव इयमेव मेदिनी पृथिवी दक्षिणा बभूव सर्वान् क्षत्रियान् निहत्य यज्ञं कृत्वा त्वं पृथ्वीं दक्षिणात्वेन दत्तवानसीति निष्कर्षः । सम्प्रति तु इदानीन्तु शुष्कं प्रतिद्वन्द्विविरहात् अकिञ्चित्करत्वेन रसशून्यं विफलमिति भावः आयुधम् अस्त्रं मुञ्च त्यज । रथोद्धताछन्दः, रात् परैर्नरलगैरथोद्धतेति तल्लक्षणात् ॥ ३८ ॥

(झ) पुराणवाजसनेयिनः पुरातनयजुर्वेदविदः ।

(ञ) अधीतेति अधीतः पठितः ब्रह्मसिद्धान्तः वेदसारो येन तथाभूतः गृहीतवाक्यः गृहीतं वाक्यं वचनं यस्य मयेति भावः तथाभूतः । पूर्वं तव वाक्यं गृहीतमिति भावः ।

(ट) अवसरः समयः । शिष्टानुरोधस्य शिष्टस्य तवेति भावः अनुरोधः उपरोधः तस्य ।

अवनिमिति । अधिकविंशान् विंशतेरधिकान् वारान् एकविंशतिवारानित्यर्थः अवनिं पृथ्वीम् अवस्कन्द्य निर्जित्य अवभृथः दीक्षान्तः तत्र ये भृतकाः वैतनिकाः ऋत्विज इत्यर्थः तेभ्यः द्विजेभ्यः कश्यपा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विरमति रमणीयाद् द्वन्द्वयुक्तात् कथं मे
निखिलनृपतिहत्याद्दृष्टसारः कुठारः ॥३९॥

(पुनर्नेपथ्ये ।)

भृगुतिलक ! नमस्ते मुञ्च वैमत्यमेतत्
कुरु करुणमिदानीं मानसं मानशौण्ड ! ।
वहति वत किमस्त्रं पुत्रभाण्डेऽपि रामे
त्रिजगदभयदानस्थूललक्षो भुजस्ते ॥४०॥

जामदग्न्यः । (रामं प्रति ।) अये ! धीरकर्कशस्वरः (ठ) क एषः ।

दिभ्य इति भावः सम्प्रदाय दक्षिणात्वेनेति भावः स्थितस्येत्यध्याहारः मे मम निखिलानां नृपतीनां हत्यया वधेन दृष्टः लोकैरिति भावः सारः बलं सामर्थ्यमिति यावत् यस्य तथाभूतः कुठारः रमणीयात् द्वयोरेव वीरयोरन्योन्यं यत् युद्धं तत् द्वन्द्वयुद्धं तस्मात् कथं विरमति निवर्त्तते ? नैव विरन्तुमिच्छतीत्यर्थः । मालिनीवृत्तम् ॥ ३९ ॥

भृगुतिलकेति । हे भृगुतिलक ! भार्गवकुललाटभूषण ! ते तुभ्यं नमः, एतत् वैमत्यं विरुद्धां मतिं मुञ्च त्यज । हे मानशौण्ड ! मानगर्वित ! यद्वा मानोन्नत ! इदानीं मानसं करुणं सदयं कुरु । त्रिजगताम् अभयदाने स्थूललक्षः वदान्यः, स्थूलदान्यस्थूललक्षदानशौण्डा वङ्गप्रदे इत्यमरः । ते तव भुजः पुत्रभाण्डे पुत्र एव भाण्डं मूलधनं तस्मिन् रामे अपि किं कथम् अस्त्रं वहति धारयति वत खेदे । मालिनीवृत्तम् ॥ ४० ॥

(ठ) धीरेति धीरः गम्भीरः कर्कशः पुत्रतुल्यं रामं प्रति अस्त्रधारणमयुक्तं, तत्कारी त्वमतिनिष्ठुर इत्याशयेति भावः स्वरः यस्य तथाभूतः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (सप्रश्रयम् (ड) ।) भगवन् ! अयं नस्तातो रघुपतिः ।

जामदग्न्यः । (सव्यथम् (ढ) ।) धिक् सर्वतः क्षत्रकलम्बोद्भेदः (ण) । (नेपथ्याभिमुखमवलोक्य ।) भो राजन् दशरथ ! अस्मन्नामधेयमात्रमित्रेण (त) पुत्रेणामुना मानार्हो (थ) भवान् । किं पुन(द)रनभिज्ञोऽसि वीरव्यवहारस्य (ध) ।

पुरमथनधनुर्विमर्दनोत्थं
प्रदहदहर्दिवमास्त तीव्रमर्चिः ।

(ड) सप्रश्रयं सविनयम् ।

(ढ) सव्यथं सान्तस्तापम् ।

(ण) धिक् निन्दामि आत्मानमिति भावः, धिङ्निर्भर्त्सननिन्दयोरित्यमरः । सर्वतः समन्तात् क्षत्रकलम्बानां क्षत्रियाङ्कुराणाम् उद्भेदः प्रकाशः । मयि विद्यमाने इदानीमपि बहवः क्षत्राः समवेता इत्यात्मनोऽधिक्कार इति भावः ।

(त) अस्मन्नामधेयेति अस्माकं नामधेयमात्रं रामेति नाममात्रं तेन मित्रं सखा तेन, मात्रपदेन वीर्याद्यभाव इति सूचितम् ।

(थ) मानार्हः सम्माननीयः सख्युः पितुः स्वपितृतुल्यत्वादिति भावः ।

(द) किं पुनः किन्तु ।

(ध) वीरव्यवहारस्य वीरचर्यायाः ।

पुरमथनेति । पुरमथनस्य त्रिपुरारेः धनुषः विमर्दनोत्थं खण्डनजं तीव्रम् उग्रम् अर्चिः तेजः क्रोधरूपमिति भावः अहर्दिवं सततं प्रदहत् सन्तापयदिति यावत् आस्त वर्त्तते समेति शेषः । इदं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रघुजनककुटुम्बवाष्पपूरैः
परमिह शान्तिमुशन्ति शस्त्रभाजः ॥४१॥

(नेपथ्ये ।)

आः (न) जामदग्न्य ! किमेवमतिप्रसक्तः सन्त्यस्तशस्त्रा-
(प)नस्मानपि बलाद्वनुर्ग्राहयसि ।

जामदग्न्यः । (सरोषम् ।) अरे विदेहप्रसवपांशुल ! (फ)

अयमधिपतिर्भासामेकान्तरो भवतो गुरु-
स्त्वमसि तपसा यद्वर्षीयानिति स्म तितिक्षसे ।
कथमसि धनुर्नामग्राही तदेष समाप्यते
मम हि सकलक्षत्रालम्भक्रतोरमृतं भवान् ॥४२॥

अस्मिन् अर्चिपि शस्त्रभाजः शस्त्रव्यवहारिणः मादृशा इति शेषः रघुजनकयोः कुटुम्बानां वंशीयानां वाष्पपूरैः अश्रुप्रवाहैः शान्तिम् उपशमम् उशन्ति कामयन्ते । रामनिधने रघुवंश्या जनकवंश्याश्च पुत्रशोकेन जामातृशोकेन च यदि रुदन्ति तदैव मे कोपशान्तिः स्यादिति भावः । पुष्पिताग्राछन्दः ॥ ४१ ॥

(न) आ इति कोपे, आस्तु स्यात् कोपपीड़योरित्यमरः ।

(प) अतिप्रसक्तः अतिदर्पितः । सन्त्यस्तशस्त्रान् त्यक्तशस्त्रान् ।

(फ) विदेहप्रसवपांशुल ! जनकवंशाधम !

अयमिति । अयं भासाम् अधिपतिः सूर्यः भवतः एकान्तरो एकेन व्यवहितः गुरुः आचार्यः, याज्ञवल्क्येन सूर्यादधीतं त्वया तु याज्ञवल्क्यादिति सूर्यस्य तव गुरुत्वमेकान्तरमिति भावः । यत् यतः त्वं तपसा वर्षीयान् अतिवृद्धः असि, तपसे इति पाठे त्वं वर्षीयान् असि तत्रापि तपसे तपस्वरसि इति हेतोः तितिक्षसे स्म

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये ।)

भार्गव भार्गव ! च्यवनादिवृद्धवाक्यगौरवनिगृहीतसंप्रहारक्रियासमभिहारस्य तत्रभवतः (ब) परमे ब्रह्मणि वर्त्तमानस्य (भ) पुनरुपप्लवन्ते (म) बुद्धयः । तद् विरम, कियच्चिर(य)मितः परमपि नाटयिष्यति (र) भवन्तमायुधपिशाची (ल) ।

जामदग्न्यः । (विहस्य ।) अहो याज्यस्नेहः (व) शतानन्दमाकुलयति (श) । भवतु, सान्त्वयामि तावदेनम् । (तदभिमुखम् ।) आङ्गिरस !

चान्तोऽसि त्वां प्रति मया क्षमा प्रदर्शितेति भावः । इदानीं धनुर्नामग्राही धनुषः नाम स्वीकृतवान् कथम् असि ? तत् तस्मात् एषः त्वमिति शेषः समाप्यते समाप्तिं मृत्युं नीयसे इत्यर्थः त्वां हन्मीति भावः । भवान् मम सकलानां क्षत्राणाम् आलम्ब एव वध एव क्रतुर्यज्ञः तस्य अस्तं हि शेषोभूतः, अस्तं यज्ञशेषे स्यादिति विश्वः । हरिणीवृत्तम् ॥ ४२ ॥

(व) च्यवनादीति च्यवनादीनां वृद्धानां त्वत्पूर्वपुरुषाणामिति यावत् वाक्यस्य परशुराम ! युद्धात् विरमेति वचनस्येति भावः गौरवेण सम्माननेन निगृहीतः परित्यक्तः संप्रहारस्य संग्रामस्य क्रियासमभिहारः पौनःपुन्येन समाचरणं येन तथाभूतस्य । तत्रभवतः पूज्यस्य ।

(भ) वर्त्तमानस्य निरतस्य ।

(म) उपप्लवन्ते विपर्यन्ते ।

(य) कियच्चिरं कियन्तं कालमित्यर्थः ।

(र) नाटयिष्यति नर्त्तयिष्यति ।

(ल) आयुधपिशाची अस्त्रधारणलालसारूपा पिशाचयोषित् ।

(व) याज्यस्नेहः याज्यस्य यजमानस्य जनकस्येति भावः स्नेहः ।

(श) आकुलयति व्यथयति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नृपस्ते पाल्योऽयं मम पशुपुरोडाशरसिकः
पृथिव्यामव्याजोद्भटभुजभृतः सन्ति रघवः।
अमीषामुत्सिक्तं किमपि कुलमुत्क्षत्य लवशो
विधाता तत्सर्वं यदभिरुचितं ते भृगुपतिः ॥४३॥

(नेपथ्ये।)

आः पाप! क्षत्रियायाः पुत्र! क्षत्रियभ्रूणहत्यापातकिन्! निसर्गनिष्प्राणं हि प्रहरण(ष)मिच्छाकूणां ब्राह्मणेषु। तैर्यादृशस्तादृशो (स) वा सोढव्योऽसि। कथमेवमतिक्रामन्नस्माकमपि ब्रह्मवर्चसान्न (ह) बिभेषि।

नृप इति। ते तव पशुपुरोडाशे पशुश्छागो मृगो वा स एव पुरोडाशः हव्यभेदः तत्र रसिकः यत्नशील इति भावः, अयं नृपः जनकः मम पाल्यः रक्षणीयः तव याज्यमेनं न हन्मीति भावः। किन्तु रघवः रघुवंश्याः पृथिव्याम् अव्याजम् अकपटम् उद्भटं महान्तमिति यावत् भुजं बाहुं बिभ्रतीति तथोक्ताः सन्ति विद्यन्ते। अमीषां रघूणां किमपि अनिर्वचनीयम् उत्सिक्तं गर्वितं कुलं लवशः खण्डशः उत्क्षत्य विनाश्येति यावत् भृगुपतिः परशुरामः ते तव यत् अभिरुचितम् इष्टम् अस्त्यागरूपमिति भावः तत् सर्वं विधाता विधास्यति। शिखरिणीवृत्तम् ॥ ४३ ॥

(ष) क्षत्रियायाः क्षत्रियस्य गाधेः कन्या रेणुका तस्याः पुत्रः तत्सम्बुद्धौ। क्षत्रियेति क्षत्रियाणां भ्रूणाः गर्भस्थाः शिशवः तेषां हत्या वधः तेन पातकी पापी तत्सम्बुद्धौ। निसर्गनिष्प्राणं स्वभावदुर्बलम्। प्रहरणम् अस्त्रम्।

(स) यादृशस्तादृशः अतिदुराचार इति भावः।

(ह) ब्रह्मवर्चसात् ब्राह्मतेजसः। ब्रह्मतेजसा त्वां दग्धुं समर्थोऽस्मीति भावः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जामदग्न्यः । (सरोषहासम् ।) अरे ब्रह्मबन्धो ! बान्धकिनेय ! गौतमगोत्रपांसन ! (च) ।

कुर्युः शस्त्रकथाममी यदि मनोर्वंशे मनुष्याङ्कुराः
स्याच्चेद् ब्रह्मगणोऽयमाकृतिगणस्तत्रेष्यते चेद्भवान् ।
सम्राजां समिधां च साधकतमं धत्ते छिदाकारणं
धिङ्मौर्वीकुशकर्षणोल्वणकिणग्रन्थिर्ममायं करः ॥४४॥

(च) ब्रह्मबन्धो ब्राह्मणाधम ! ब्रह्मबन्धुरधिक्षेपे इत्यमरः । बान्धकिनेय ! बन्धकी कुलटा तत्पुत्रः तत्सम्बुद्धौ । अथ बान्धकिनेयः स्याद् बन्धुलस्यासतीसुत इत्यमरः । शतानन्दस्य मातृरहस्यया देवेन्द्रसङ्गमाद् बन्धकीत्वमिति भावः । गौतमगोत्रपांसन ! गौतमवंशाधम !

कुर्युरिति । यदि मनोः वंशे अमी मनुष्याङ्कुराः मानवपोताः शस्त्रकथां शस्त्रव्यवहारकथां कुर्युः, आकृत्या अवयवेन न तु ब्रह्मण्यादिनेति भावः गण्यते इति आकृतिगणः अयं ब्रह्मगणः ब्राह्मणत्वेन गणनीयः स्यात्, तथा तत्र भवान् इष्यते गण्यते चेत् तर्हि मौर्वी शिञ्जिनी कुशाः तेषां कर्षणेन उल्वणः उत्कटः किणग्रन्थिः यस्मिन् तथाभूतः मम अयं करः सम्राजां राजाधिराजानां समिधां होमीयकाष्ठानाञ्च छिदाकारणं छेदनार्थं साधकतमं करणं कुठारमिति यावत्, करणं साधकतममित्यमरः । धिक् निष्फलं यथा तथा धत्ते धारयति । अत्र धिक्शब्दस्य निष्फलार्थत्वात् तद्योगे न द्वितीया निन्दानिर्भर्त्सनार्थयोरेव तद्विधानात् । धिग् भर्त्सने च निन्दायां निष्फले कुत्सितेऽपि चेति विश्वः । मम कुठारेण एते मनुवंश्यास्त्वं शीघ्रं मारणीया इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ४४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये ।)

भगवन् भार्गव भार्गव !

त्वं वेदवानसि वशिष्ठगुरोः सनाभिः
स्वायम्भुवः स भगवान् प्रभवो गुरुस्ते ।
तेनातिमात्रमसृणं हृदयं मदीय-
मद्यापि न त्रुटति शाम्यतु ते कुदृष्टिः ॥४५॥

जामदग्न्यः । (सोच्चैर्हसन् ।) किमात्थ रे दशरथ ! किमात्थ । नाद्यापि हृदयं त्रुटतीति । कथं वा त्रुटतु स्वावदेष न व्याप्रियते (क) परशुः ।

(नेपथ्ये ।

आः जामदग्न्य ! गुरूनप्यधिक्षिपसि (ख) ।
पुरोजन्मा नाद्यप्रभृति मम रामः स्वयमहं
न पुत्रः पौत्रो वा रघुकुलभुवां च क्षितिभुजाम् ।

त्वमिति । त्वं वेदवान् वेदवित्, वशिष्ठ एव गुरुः तस्य सनाभिः सपिण्डः एकगोत्रभवः, यतः स्वायम्भुवः ब्रह्मपुत्रः स भगवान् भृगुरिति भावः ते तव गुरुः आदिगुरुरिति यावत्, वशिष्ठस्तव पूर्वजो भृगुश्च ब्रह्मपुत्रत्वात् त्वं वशिष्ठस्य सनाभिरिति भावः । तेन हेतुना वशिष्ठगुरोः सनाभित्वेन अतिमात्रं मसृणं कोमलं त्वयि दयार्द्रमिति भावः मदीयं हृदयम् अद्यापि न त्रुटति न विकृतिं गच्छतीति भावः । अतः ते तव कुदृष्टिः कुत्सितदर्शनं विरुद्धभाव इति भावः शाम्यतु शान्तिं गच्छतु निवर्त्ततामिति यावत् । गुरोः सपिण्ड इति त्वां क्षमे इति भावः ॥ ४५ ॥

(क) व्याप्रियते प्रसार्यते ।

(ख) आ इति आः कोपे, आस्तु स्यात् कोपक्रीड़योरित्यमरः ॥ अधिक्षिपसि भर्त्सयसि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अधीरं धीरं वा कलयतु जनो मामयमयं
मया बद्धो दुष्टद्विजदमनदीक्षापरिकरः ॥४६॥

जामदग्न्यः । (सावज्ञं रामं प्रति ।) अये ! किमयं लक्ष्मणो भवन्तं पुरोजन्मानमपदिशति (ख) ।

रामः । (सविलक्षस्मितम् ।) प्रसीद भगवन् ! स एवायं यौवनादर्वाचि निरपराधमधुरे वयसि (ग) वर्तमानो यानि-कानिचिदक्षराणि प्रलपति (घ) ।

जामदग्न्यः । (सस्मितम् ।) कथमेतावत्यपि मामसृष्यमाण-

पुरोजन्मेति । अद्यप्रभृति अद्यारभ्य रामः मम पुरोजन्मा अग्रजः न, अहं रघुकुलभुवां रघुवंश्यानां क्षितिभुजां राज्ञां पुत्रः पौत्रो वा न, स्वयं स्वेच्छाचारीत्यर्थः संवृत्त इति शेषः तदादेशानुवर्त्तित्वादिति भावः, अयं जनः सभास्थ इति भावः माम् अधीरम् धीरं वा कलयतु विवेचयतु तत्र न मम क्षतिरिति भावः, मया अयं दुष्टस्य द्विजस्य ब्राह्मणस्य दमनदीक्षायां शासनव्यापारे परिकरः सन्नाहः बद्धः रचितः । दुष्टमेनं शास्मीति भावः । मामय-मयमित्यत्र मामघमयमिति पाठे अघमयं पापमयं पापिष्ठमित्यर्थः । शिखरिणीवृत्तम् ॥४६॥

(ख) अपदिशति व्यक्करोति ।

(ग) अर्वाचि पूर्वस्मिन् निरपराधमधुरे नास्ति अपराधो यत्र तादृशम् अतएव मधुरं तस्मिन् वयसि कौमारे इति यावत् कुमार-स्यापराधो न गण्यते इति भावः ।

(घ) अक्षराणि वचांसि । प्रलपति अनर्थकं वदति, प्रलापोऽन-र्थकं वच इत्यमरः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

माशङ्कसे (ङ) । यतस्त्वदनुवर्ती खल्वयं (च) त्वामेवास्तमय-मानमन्वस्तमयिष्यते (छ) । निर्वाणं हि सवितारं तरणि-मणिरप्यनुनिर्वाति (ज) (नेपथ्यं प्रति ।) साधु रे लक्ष्मण । साधु । कनिष्ठतरोऽपि वरं (झ) भवान्, न पुनरयं वृथा-ज्येष्ठो (ञ, रामस्ते ।

प्रागुच्चैःशिरसं क्षुरप्रनखरैः क्रौञ्चाद्रिदन्तावलं
भित्त्वा हंसमयानि मौक्तिकफलान्याकीर्य्य पर्य्यापिताम् ।

(ङ) एतावति एतावदधिकोऽपि निर्भर्त्सने दुष्टद्विजदमनदीक्षा-परिकर इत्युक्ते इति भावः अदृष्यमाणम् अचाम्यन्तम् आशङ्कसे बुध्यसे नाहं कदापि क्षमिष्ये इति भावः ।

(च) अयं लक्ष्मणः ।

(छ) अस्तमयमानम् अस्तं गच्छन्तं मत्प्रहारप्रहारादिति भावः अन्वस्तमयिष्यते पश्चात् अस्तं गमिष्यति । त्वां निहत्य पश्चादेनमपि हनिष्यामीति भावः ।

(ज) निर्वाणम् अस्तं गतं सवितारं सूर्य्यम् । तरणिमणिरपि सूर्य्यकान्तोऽपि अनुनिर्वाति अन्वस्तं गच्छति ।

(झ) वरं मनाक् प्रियः, अव्ययमेतत् । मनागिष्टे वरं यत्तु कश्चि-दाह तदव्ययमिति शाश्वतः ।

(ञ) वृथाज्येष्ठः निरर्थकोऽग्रजः ।

प्रागिति । प्राक् पूर्वं, क्षुरप्राणि अस्त्रविशेषा एव नखराः तैः उच्चैः उन्नतं शिरः शिखरं मस्तकं वा यस्य तथोक्तं, क्रौञ्चाद्रिरेव क्रौञ्चपर्वत एव दन्तावलः हस्ती तं भित्त्वा विदार्य्य हंसमयानि मौक्तिकफलानि आकीर्य्य आक्षिप्य विक्षिप्येति यावत् पर्य्यापिताम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सैंहीं वृत्तिमधिष्ठितेऽपि हि मयि क्षात्रेण कल्पेन ते
दिष्ट्या कौतुकमाभिरामिकमसि त्वं कोऽपि वीराङ्कुरः ॥४७॥

(नेपथ्ये ।)

भार्गव भार्गव ! दुर्विज्ञानमिदमर्वाक् फलनिष्पत्तेराभिरामिकं साङ्ग्रामिकं वा (ञ) ।

रामः । (सरोषं नेपथ्याभिमुखम् ।) आः वत्स ! कोऽयमद्यतन(ट)स्ते दुर्विनयप्ररोहो (ठ) यद् गुरूनपि चेलीकरोषि (ड) ।

आत्मानं प्रापितां सिंहस्य इयं सैंही तां सिंहसम्बन्धिनीं वृत्तिं व्यापारं अधिष्ठिते आश्रितेऽपि मयि दिष्ट्या भाग्येन क्षात्रेण कल्पेन नियमेन शौर्यप्रकटनरूपेणेति भावः ते तव अभिरामः प्रीतिः तस्मै हितम् आभिरामिकं प्रीतिप्रदमित्यर्थः कौतुकं कुतूहलम् औत्सुक्यमिति यावत् दृश्यते इति शेषः, तस्मात् त्वं कोऽपि वीराङ्कुरः वीरप्ररोहः असि । पुरा परशुरामेण क्रौञ्चाद्रिं शरेण छिद्रयित्वा मानससरोविहारिणां हंसानां द्वारं कृतमिति पुराणम् । शार्दूलविक्रीडितं वृत्तम् ॥४७॥

(ञ) दुर्विज्ञानं दुर्ज्ञेयम् । अर्वाक् पूर्वम् । फलनिष्पत्तेः कार्यसिद्धेः । सांग्रामिकं संग्रामाय हितम् । यावत् न त्वया अहं निहतः तावत् मम कौतुकम् आभिरामिकं संग्रामहितं वा न ज्ञायते इति भावः ।

(ट) अद्यतनः आधुनिकः ।

(ठ) दुर्विनयप्ररोहः अशिष्टाचारप्रारम्भ इति यावत् ।

(ड) गुरूनपि पूज्यानपि । चेलीकरोषि आश्रयीकरोषि प्रतिवचसा विरञ्जयसीति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये ।)

आर्य ! तूष्णी(ढ)मयमस्मि । क्षमस्व जामदग्न्य ! नियन्त्रितो(ण)ऽहमार्येण ।

जामदग्न्यः । (विहस्य ।) अरे राम ! कथमद्यापि वाचमेव सूनृतामस्मदभियोगप्रशमनीं प्रथयसे (त) । कवचहरो(थ)ऽसि । शस्त्रैरेव प्रतिक्रियन्तां शस्त्राणि । किञ्च रे !

राजन्येभ्यो जन्म वैवस्वतेभ्य-
श्चक्रे चापाचार्य्यकं कौशिकश्च ।
क्षात्रीं चर्य्यामेवमुन्मुञ्चतस्ते
गोत्राक्षेपी वज्रलेपः कलङ्कः ॥ ४८ ॥

(ढ) तूष्णीम् मौनी ।

(ण) नियन्त्रितः रुद्धः ।

(त) सूनृतां सत्यमधुरां, सत्यं प्रियञ्च वचनं सूनृतं समुदाहृतमिति कोषः । अस्मदभियोगप्रशमनीम् अस्मत्कोपशान्तिकरीम् । प्रथयसे विस्तारसि पुनः पुनर्वदसीत्यर्थः ।

(थ) कवचहरः वर्मधरः ।

राजन्येभ्य इति । वैवस्वतेभ्यः सौरेभ्यः राजन्येभ्यः सूर्य्यवंशीयनृपतिभ्यः जन्म उत्पत्तिः तवेति शेषः । कौशिकः विश्वामित्रः चापाचार्य्यकं धनुर्वेदशिक्षायां गुरुत्वमित्यर्थः ते इति शेषः चक्रे कृतवांश्च । एवम् इत्थं गते क्षात्रीं क्षत्रियसम्बन्धिनीं चर्य्यां विक्रमव्यापारमिति यावत् उन्मुञ्चतस्त्यजतस्ते तव गोत्रं कुलम् आक्षिपति निन्दतीति तथोक्तः कलङ्कः अपवादः वज्रलेपः चिरस्थायीति भावः भवतीति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (सगर्वस्मितम् ।) भगवन् ! सत्यमेतत् ।
जातः सोऽहं दिनकरकुले क्षत्रियश्रोत्रियेभ्यो
विश्वामित्रादपि भगवतो दृष्टदिव्यास्त्रपारः ।
अस्मिन् वंशे कथयतु जनो दुर्यशो वा यशो वा
विप्रे शस्त्रग्रहणगुरुणः साहसिक्याद् बिभेमि ॥४९॥

जमदग्नेः । (सक्रोधम् ।) आः पाप दुर्मुख ! वशिष्ठ इव विश्वामित्र इव स्वस्तिवाचनिको (द) ब्राह्मणस्ते परशुरामः । (सव्यथम् ।) धिक्कष्टम् । एवमुच्चावचवाचः (ध) क्षत्रियाः श्रूयन्ते । (क्रोधातिशयं नाटयन् ।) अयमहं भोः !

शेषः । शालिनीवृत्तं, नाक्षौ गौ चेच्छालिनी वेदलोकैरिति तल्लक्षणात् ॥ ४८ ॥

जात इति । सः अहं दिनकरकुले सूर्य्यवंशे क्षत्रियश्रोत्रियेभ्यः क्षत्रिया एव श्रोत्रियाः वेदविदो ब्राह्मणविशेषाः तेभ्यः ब्रह्मनिष्ठेभ्यः क्षत्रियेभ्यः इति यावत् यातः । भगवतः विश्वामित्रात् दृष्टः ज्ञात इति यावत् दिव्यानाम् अस्त्राणां पारः अन्तः येन तथाभूतोऽपि । जनः अस्मिन् वंशे सूर्य्यकुले दुर्यशो वा यशो वा कथयतु घोषयतु । विप्रे ब्राह्मणे ब्राह्मणं प्रतीत्यर्थः शस्त्रग्रहणेन गुरु तस्मात् साहसिक्यात् अविमृश्यकरणात् बिभेमि शङ्के । मन्दाक्रान्तावृत्तं, मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मिति तल्लक्षणात् ॥४९॥

(द) स्वस्तिवाचनिकः स्वस्तीति वचनं प्रयोजनमस्येति स्वस्तिवाचनिकः यत्किञ्चित् प्रतिग्रहधनं लब्ध्वा स्वस्तीति वचनप्रयोक्तेति भावः ।

(ध) उच्चावचवाचः विविधालापाः, उच्चावचं नैकभेदमित्यमरः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सह दशरथमद्योत्कृत्य पुत्रैश्चतुर्भि-
र्जनककुलकबन्धस्कन्धनिर्गत्वरीभिः ।
नवरुधिरलताभिः क्लृप्तलीलापताकां
रणभुवमतिरौद्रीं रुद्रशिष्यः करोमि ॥५०॥

रामः । (सरोषम् ।) आः जामदग्न्य ! केयं वाग्विभीषिका (न) । दूरमतिक्रामति प्रसङ्गे (प) कदाचिदिक्ष्वाकवोऽपि दुर्मनायन्ते (फ) ।

जामदग्न्यः । (सभ्रुकुटीभङ्गम् ।) ततः किम् ।

रामः । (सावष्टम्भम् (ब) ।) ततश्च

सहेति । रुद्रशिष्यः शङ्करान्तेवासी अद्य चतुर्भिः पुत्रैः रामादिभिः सह दशरथं उत्कृत्य निहत्य जनककुलस्य विदेहवंशस्य कबन्धानां मच्छिरैः छिन्नशिरसां स्कन्धेभ्यः निर्गत्वरीभिः निर्गच्छन्तीभिः नवरुधिरलताभिः अभिनवरक्तानां लतारूपैः प्रवाहैरिति भावः क्लृप्ता रचिता लीलापताका यस्यां तथाभूताम् अतएव अतिरौद्रीम् अतिभयानकां रणभुवं संग्रामभूमिं करोमि । मालिनीवृत्तं, ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥ ५० ॥

(न) वाग्विभीषिका वाचा विभीषिका भयप्रदर्शनम् ।

(प) दूरं अत्यर्थम् । अतिक्रामति वृद्धिं गच्छति । प्रसङ्गे कस्यचित् व्यापारस्य प्रसक्तौ ।

(फ) दुर्मनायन्ते दुर्मनस इवाचरन्ति । नैव दुर्मनायन्ते नैव व्यथन्ते इति भावः ।

(ब) सावष्टम्भं सधैर्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तैस्त्रिःसप्तभिरेव राजविजयैर्यत्ते भुजस्तम्भयोः
कृत्वा तोरणमालिकां पुनरमुं द्वाविंशमारिप्सते ।
द्रक्ष्यामि त्वयि वर्त्तमानमधुना तच्चापविद्याद्भुतं
शम्भोस्तस्य हि केवलेन धनुषा कृष्टेन तुष्टिर्न मे ॥५१॥

जामदग्न्यः । (सरोषम् ।) किमात्थ रे ! किमात्थ । (द्रक्ष्यामि त्वयि वर्तमानमधुना इत्यादि श्लोकोत्तरार्धं पठित्वा सव्यथम् ।) अहो सर्वतः समिध्यमानदारुणस्य रोषजातवेदसो (भ) विदेह-दिलीपयोः कुलं नाम कति भविष्यन्त्याहुतयः (म) । (उच्चैः ।) भो भोः सप्तद्वीपकुलपर्वतवर्तिनो राजानः ! चेतयध्वं चेतयध्वम् (य) ।

तैरिति । यत् चापविद्याद्भुतं धनुर्वेदशिक्षारूपमद्भुतं वैचित्र्यमित्यर्थः तैः प्रसिद्धैः त्रिःसप्तभिरेव एकविंशतिसंख्याकैरेव राजविजयैः क्षत्रियपराजयैः ते तव भुजावेव स्तम्भौ तयोः तोरणमालिकां कृत्वा तोरणं यथा मालया अलङ्करोति तथा भुजस्तम्भौ अलङ्कृत्येति भावः पुनः अमुं द्वाविंशं द्वाविंशतेः पूरणं सञ्जयरूपमिति भावः आरिप्सते आरब्धुमिच्छति, अधुना त्वयि वर्त्तमानं तत् चापविद्याद्भुतं द्रक्ष्यामि । हि यतः तस्य शम्भोः केवलेन धनुषा कृष्टेन मे मम तुष्टिः परितोषः न अस्तीति शेषः यावत् तव धनुर्न मया कृष्टं तावत् न मे परितुष्टिरिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥५१॥

(भ) सर्वतः समन्तात् । समिध्यमानदारुणस्य समिध्यमानः स्वयं दीप्यमानः अतएव दारुणः भयङ्करः तस्य । रोषजातवेदसः कोपाग्नेः ।

(म) आहुतयः हवनीयद्रव्याणि ।

(य) चेतयध्वं, स्वार्थे णिजन्तोऽयं प्रयोगः । जानीतेत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

येन स्वां विनिहत्य मातरमपि क्षत्रास्रमध्यासव-
स्वादाभिन्नपरश्वधेन विदधे निःक्षत्रिया मेदिनी ।
यद्बाणव्रणवर्त्मना गिरिरिणः क्रौञ्चस्य हंसच्छला-
दद्याप्यस्थिकणाः पतन्ति स पुनः क्रुद्धो मुनिर्भार्गवः ॥१२॥

रामः । (सहर्षसंभ्रमम् ।)

नृपानप्रत्यक्षान् किमपवदसे मन्वयमहं
शिशुक्रीडाभग्नत्रिपुरहरधन्वा तव पुरः ।
अहङ्कारक्रूरार्जुनभुजवनव्रश्चनकला-
निसृष्टार्थो बाहुः कथय कतरस्ते प्रहरतु ॥५३॥

येनेति । येन क्षत्राणाम् अस्राण्येव रक्तान्येव मध्वासवाः मद्यानीत्यर्थः, मध्वासवो माधवको मधु माध्वीकमद्ययोरित्यमरः । तेषां स्वादाभिन्नः यः परश्वधः परशुः तेन स्वां निजां मातरमपि विनिहत्य मेदिनी पृथ्वी निःक्षत्रिया विदधे कृता । अद्यापि इदानीमपि यस्य बाणेन व्रणः क्षतं छिद्रमिति यावत् तदेव वर्त्म पन्थाः तेन क्रौञ्चस्य गिरिरिणः पर्वतस्य अस्थिकणाः हंसच्छलात् पतन्ति स भार्गवो मुनिः परशुरामः पुनः क्रुद्धः । पुरा जमदग्निः स्वां भार्यां रेणुकां जलाहरणाय नर्मदानदीं गतां तत्र कार्त्तवीर्यार्जुनस्य स्त्रीभिः सह जलक्रीडादर्शनकुतूहलेन कृतविलम्बामागतां ध्यानेन विज्ञाय क्रोधात् जहि एनामिति पुत्रान् प्रत्येकमादिदेश । तेषां कनिष्ठः परशुरामः पितुराज्ञां शिरसि निधाय परशुधारया मातरं चिच्छेदेति पुराणम् । शार्दूलविक्रीडितं वृत्तम् ॥ ५२ ॥

नृपानिति । अप्रत्यक्षान् अदृष्टिगोचरान् नृपान् किं कथम् अपवदसे निन्दसि ? नन्नु भोः शिशुक्रीडया बाललीलया भग्नं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आमदग्न्यः। (सकोपाटोपम् (र)।) आः पाप विकर्त्तनकुल-कलङ्क! पुनस्तरां (ल) तदेव पार्वतीदयितकोदण्डदलन-साहसमुद्भावयसि (व)। अहह क्षत्रियोऽपि भार्गवस्य कार्तवीर्यजयिनं भुजदण्डमन्विष्यति। अहो गरीयान् (श) कालः। यदश्रुतचर(ष)मपि श्रावयति। अदृष्टचर(स)मपि दर्शयति। अपिच रे राजन्यकीट!

जानास्येव यथा पितुः परिभवन् होमार्जुनीमर्जुनो
मत्कोदण्डमनेकराजकबधस्वाध्यायमध्यापिपत्।

त्रिपुरहरस्य शम्भोः धनुः येन तथाभूतः अहं तव पुरः अग्रतः तिष्ठामीति शेषः। अहङ्कारेण क्रूरस्य समुद्भूतस्येति भावः अर्जुनस्य कार्त्तवीर्यस्य भुजवनानां सहस्रबाहूनामिति यावत् व्रश्चनस्य छेदनस्य कला सामर्थ्यं तेन निष्टः जातः अर्थः वस्तु सार इति यावत् यस्य तथाभूतः, अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः। ते तव कतरो बाहुः प्रहरतु कथय। शिखरिणीवृत्तम् ॥ ५३ ॥

(र) सकोपाटोपं सक्रोधावेगम्।

(ल) विकर्त्तनकुलकलङ्क! छ्यर्थ्यवंशाधम! पुनस्तरां पुनरपि।

(व) पार्वतीति पार्वतीदयितस्य हरस्य कोदण्डं धनुः तस्य दलनं भञ्जनमेव साहसम् अविमृश्यकारित्वम्। उद्भावयसि प्रकटयसि।

(श) गरीयान् अतिमहान्। कालस्य प्रभावातिशय इत्यर्थः।

(ष) अश्रुतचरं पूर्वं कदापि न श्रुतम्।

(स) अदृष्टचरं पूर्वं कदापि न दृष्टमित्यर्थः।

जानासीति। पितुः होमार्जुनीं होमसाधनीम् अर्जुनीं धवलां गामित्यर्थः, वलक्षो धवलोऽर्जुन इत्यमरः। यद्वा अर्जुनीं सौरभेयीम्, अर्जुनो सौरभेयी गौरित्यमरः। परिभवन् हरन्नित्यर्थः अर्जुनः कार्त्त-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तेनैवास्ति भवत्सु यद्यपि मम क्रोधोऽयमौत्सर्गिक-
स्तत्संप्रत्युपसर्जनं गुरुधनुर्भङ्गादयं हेतुमान् ॥५४॥

रामः । ऋषे जामदग्न्य ! पटच्चरीभूता (ह) खल्वियं पुरातनी कीर्तिपताका । नन्विदानीमेव द्रष्टव्यम् । (नेपथ्याभिमुखम् ।) वत्स लक्ष्मण ! धनुर्धनुः ।

जामदग्न्यः । (साक्षेपम् ।) अरे अनात्मज्ञ क्षत्रियवटो ! (च)

तच्चापमीशभुजपीडनपीतसारं
प्रागप्यभज्यत भवांस्तु निमित्तमात्रम् ।

वीर्यः यथा मम कोदण्डं धनुः अनेकेषां राजन्यानां वध एव स्वाध्यायः वेदः तम् अध्यापिपत् अध्यापितवान् शिक्षयामासेत्यर्थः कार्त्तवीर्यं प्रति क्रोधेनैव मया धनुष्मता सर्वे क्षत्रिया निहता इति भावः तत् जानास्येव । तेनैव हेतुना कार्त्तवीर्यं प्रति कोपेनेति भावः यद्यपि भवत्सु अयं क्रोधः औत्सर्गिकः सामान्यः अस्ति, सम्प्रति तत् उपसर्जनम् अप्रधानम् औत्सर्गिक इति यावत् अयं क्रोधः गुरोः हरस्य धनुर्भङ्गात् हेतुमान् सकारणः संवृत्त इति शेषः । सामान्यतो युष्मासु स्थितस्य क्रोधस्य अयमपरो हेतुर्गुरुधनुर्भङ्गरूपो जातस्तस्मादहं न क्षमे इति तात्पर्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ ५४ ॥

(ह) पटच्चरीभूता जीर्णवसनस्वरूपा । पटच्चरं जीर्णवस्त्रमित्यमरः ।

(च) अनात्मज्ञ ! कोऽहमिति स्वरूपानभिज्ञ ! क्षत्रियवटो क्षत्रियब्रह्मचारिन् ।

तदिति । ईशस्य हरस्य भुजेन यत् पीडनं तेन पीतः भक्षितः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

राजन्यकप्रधनसाधनमस्मदीय-
माकर्ष कार्मुकमिदं गरुडध्वजस्य ।५५॥

आकृष्टेन पुनरमुनैव धनुषा किलास्मानभियोत्स्यसे (क)। क्षत्रसत्रे (ख) दीक्षितानां तु चिरस्य होता(ग)यं परशुरस्माकमस्त्येव। (इति रामस्य हस्ते धनुरर्पयति।)

रामः। (गृहीत्वा।) भार्गव! समन्तादुद्घातिनी (घ) भूमिरियम्। तदेहि, विमर्दक्षमं (ङ) प्रदेशान्तरमवतरावः।

जामदग्न्यः। (सरोषं परिक्रामन्।) भो भोः क्षात्रेण ब्राह्मेण च तेजसा विकत्थमानाः, (च) तदत्र

क्षयित इति यावत् सारो बलं सामर्थ्यमिति यावत्, सारो बले स्थिरांशे चेत्यमरः। यस्य तथाभूतं तत् चापं धनुः प्रागपि पूर्वमेव, अपिरत्रावधारणार्थः। अभज्यत स्वयमेव भग्नमित्यर्थः, कर्मकर्त्तरि प्रयोगः। भवांस्तु निमित्तमात्रं निमित्तमेव न तु प्रकृतस्य भङ्गने तव सामर्थ्यमिति भावः। इदं राजन्यकानां प्रधनं निधनमित्यर्थः तस्य साधनम् अस्मदीयं मयि स्थितमिति यावत् गरुडध्वजस्य नारायणस्य इदं कार्मुकं धनुः आकर्ष आरोपय। वसन्ततिलकं वृत्तम् ॥ ५५ ॥

(क) अभियोत्स्यसे योधयिष्यसि अस्माभिः सह युद्धं करिष्यसीत्यर्थः।

(ख) क्षत्रसत्रे क्षत्रियहोमयज्ञे।

(ग) होता होमकर्त्ता।

(घ) उद्घातिनी उन्नतानता।

(ङ) विमर्दक्षमं युद्धयोग्यं समतलमिति यावत्।

(च) विकत्थमानाः आत्मश्लाघिनः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भवतु शरणदो वा सर्वशस्त्राभिसारः
प्रतिविदधतु वास्मिन्नाशिषो वैजयिक्यः ।
अदशरथमरामं निर्विदेहेन्द्रमुर्वी-
वलयमिह विधत्ते रोषणो रैणुकेयः ॥५६॥

(इति निष्क्रान्तौ ।)

(नेपथ्ये ।)

भो भोः पौरजानपदाः ! प्रवर्त्यतां माङ्गलिकमातोद्यम् (क)। प्रसज्यता(ज)मयमपि वैदेहीविवाहमहोत्सवो जामदग्न्यविजयोत्सवेन ।

कन्या काचिदिहापि कर्मणि पणः स्यादित्यसूयावल-
त्सीतापाङ्गमयूखमांसलमुखज्योत्स्नाविलिप्तां दिवम् ।

भवत्विति । सर्वैः वीरैः शस्त्रैश्च सर्वैरिति शेषः अभिसारः अभियोगः शरणदः रक्षिता रामस्येति शेषः भवतु वा भवद्भिः सर्वैर्वीरैः सर्वशस्त्रैश्च समवेतः सन् रामो युध्यतां वेति भावः । अस्मिन् रामे वैजयिक्यः विजयसाधन्यः आशिषः शुभाशंसाः युष्माकमिति शेषः प्रतिविदधतु वा प्रतीकारं कुर्वन्तु वा । रोषणः कोपनः रैणुकेयः रेणुकानन्दनः भार्गव इत्यर्थः इह अस्मिन् संसारे उर्वीवलयं भूमण्डलम् अदशरथं दशरथशून्यम् अरामं रामशून्यं निर्विदेहेन्द्रं विदेहराजरहितञ्च विधत्ते करोति । मालिनीवृत्तम् ॥ ५६ ॥

(क) प्रवर्त्यताम् आरभ्यताम् । आतोद्यं वीणामुरजवंशकांस्यवाद्यं, चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकमित्यमरः । माङ्गलिकं माङ्गलाय हितम् ।

(ज) प्रसज्यताम् प्रवर्त्यताम् ।

कन्येति । इहापि अस्मिन्नपि कर्मणि नारायणीयमनुर्भङ्गरूपे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कुर्वाणेन रघूद्वहेन चक्रषे नारायणीयं धनुः
सन्धायाथ शरस्य भार्गवगतिच्छेदादमोघीकृतः ॥५६॥

(ततः प्रविशतो रामजामदग्न्यौ ।)

रामः । भगवन् भार्गव !

परैराहृतानां विहितमपि शस्त्रं भवतु नः
प्रकृत्या विप्रेभ्यः पुनरकृतशिल्पा रघुभुवः ।
चिरादखीरेण त्वयि तदपि रामे न गणितं
तपोविद्यावीरव्रतमथ मयि चाम्यतु भवान् ॥५८॥

इति भावः काचित् कन्या यथाहं हरधनुर्भङ्गकर्मणीति भावः पणः शुल्कं स्यात् भवेत् इति बुद्ध्या अस्त्रयया ईर्ष्या चलतः सञ्चलतः सीताया अपाङ्गस्य नेत्रान्तावलोकनस्य मयूखेन किरणेन भासला प्रभूता परिपुष्टेति यावत् या सुखस्य ज्योत्स्ना कान्तिः तया विलिप्तां विशेषेण लिप्तामित्यर्थः दिवम् आक्रमं कुर्वाणेन रघूद्वहेन रघुवंश-धरेण रामेण नारायणीयं धनुः चक्रषे आकृष्टम् । अथानन्तरं धनुःकर्षणात् परमित्यर्थः शरः सन्धाय संयोज्य भार्गवस्य गतिः स्वर्गपथगमनं तस्य छेदात् खण्डनात् अमोघीकृतश्च । नारायणीयं धनुराकृष्य तत्र शरं सन्धाय च तेन शरेण किन्ते छिनद्मीति वदन् रामः भार्गवेण अहं भोगनिरुद्धः, मम पुण्यतीर्थगतिं रुन्धि इत्युक्तः स्वर्गमार्ग-गमनं रुरोधेति निष्कर्षः । शार्दूलविक्रीडितं वृत्तम् ॥ ५७ ॥

परैरिति । परैः शत्रुभिः आहृतानां युद्धार्थमिति भावः नः अस्माकं शस्त्रं शस्त्रधारणमित्यर्थः विहितं विधिसिद्धं भवतु अपि, पुनः किन्तु रघुभुवः रघुवंश्याः प्रकृत्या स्वभावेन विप्रेभ्यः ब्राह्मणेभ्यः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जामदग्न्यः । (विहस्य ।) कथमपराद्धमस्मासु वत्सेन ।

यदर्थमस्माभिरिह प्रकोपित-
स्तदद्य दृष्ट्वा तव धाम वैष्णवम् ।
विशीर्णसर्वामयमस्मदान्तरं
चिरस्य कश्चिल्लघिमानमश्नुते ॥ ५९ ॥

रामः । इत इतो भगवन् !

जामदग्न्यः । (रामस्य चिबुकमुन्नमय्य स्मितम् ।) वत्स ! अप्रग्रस्तः खल्वारण्यकानां (झ) जनपदेषु चिरप्रचारः (ञ)। तत् क्व पुनरस्मान् नेष्यसि ।

अक्षतशिल्पाः अक्षतशस्त्रव्यवहाराः ब्राह्मणान् प्रति शस्त्रव्यवहारं न कुर्वन्तीति भावः । तदपि तथापि चिरात् आजन्मन इति भावः अखीरेण पुरुषाभिमानिना दृप्तेनेति यावत् मयेति शेषः रामे त्वयि तपोविद्यावीरव्रतं न गणितं न विचारितम् । अखीरः पुरुषे शक्ते इति मेदिनी । अथ इदानीं भवान् मयि चास्यत्र ममापराधं न गणयतीति भावः । शिखरिणीवृत्तम् ॥ ५८ ॥

यदर्थमिति । अस्माभिः यदर्थम् इह अस्मिन् विषये प्रकोपितः, अद्य तत् तव वैष्णवं धाम तेजः दृष्ट्वा अस्मदान्तरम् अस्माकम् अन्तःकरणं विशीर्णः क्षीणः सर्वः आमयः रोगः रजोगुणजनितराग इति यावत् यस्य तथाभूतं सत् चिरस्य चिरकालेन कश्चित् अनिर्वचनीयं लघिमानं लाघवम् अश्नुते भजते दिव्यज्ञानलाभादिति भावः । वंशस्थविलं वृत्तं, वदन्ति वंशस्थविलं जतौ जरावितिं तल्लक्षणात् ॥५९॥

(झ) आरण्यकानां वनवासिनाम् ।

(ञ) चिरप्रचारः दीर्घकालस्थितिरिति यावत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । भगवन् ! भगवतो याज्ञवल्क्यस्यावसथे (ट) कृतातिथेयसंविधानौ (ठ) तातजनकौ भवन्तमनुपालयतः (ड) ।

एहि विष्टरपादार्घमधुपर्कैरुपस्थितान् ।
इक्ष्वाकूंश्च विदेहांश्च पुनीहि भगवन्नमून् ॥६०॥

जामदग्न्यः । वत्स ! अपरिहार्य्यमेव (ढ) ज्ञातित्यं राजन्यश्रोत्रियाणाम् । किं पुनरेवंविधवैखानसोचिताचारस्खलितविलक्षो (ण) न शक्नोमि धर्माचार्य्यं (त) याज्ञवल्क्यमुपेत्यावलोकितुम् । आचारस्तु दूरादपि कुतः कुतः (थ) स्यात् ।

(ट) आवसथे आश्रमे ।

(ठ) कृतेति कृतम् आतिथेयसंविधानम् अतिथिसमुचिताचारः ययोः तथाभूतौ ।

(ड) अनुपालयतः प्रतीक्षेताम् ।

एहीति । हे भगवन् । विष्टरः कुशासनं पादार्घमधुपर्काः पाद्यार्घ्यमधुपर्काः तैः त्वदर्चनार्थमाहृतैरिति भावः सह उपस्थितान् अमून् इक्ष्वाकून् इक्ष्वाकुवंश्यांश्च विदेहांश्च पुनीहि पवित्रीकुरु । अनुष्टुब्वृत्तम् ॥ ६० ॥

(ढ) अपरिहार्यम् अपरित्याज्यम् ।

(ण) किं पुनः किन्तु । एवंविधेति एवंविधम् इत्थं वैखानसानां मुनीनाम् उचितस्य आचारस्य व्यवहारस्य शान्तस्येति भावः स्खलितेन भ्रंशेन विलक्षः विलज्जितः ।

(त) धर्माचार्य्यं धर्मगुरुम् ।

(थ) कुतः अनुचितः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(किञ्चिदुच्चैर्नेपथ्याभिमुखम् ।)

यस्य स्मृतीः प्रतीक्षन्ते चतुर्वर्गे मनीषिणः ।
नमो भगवते तस्मै याज्ञवल्क्याय योगिने ॥६१॥

(नेपथ्ये ।)

गायत्री द्रुपदा देवी पाप्मानमपहन्तु ते ।
पुनन्तु पावमान्यस्त्वामृध्नोतु ब्रह्म ते परम् ॥६२॥

जामदग्न्यः । भगवन् ! अपत्रपमाणो (द) न भवन्तं द्रष्टुमुत्सहे । तदनुमन्यस्व मामरण्याय (ध) ।

(नेपथ्ये ।)

शिवास्ते पन्थानो व्रज निजगृहेभ्यो निजगृहान्
किमन्यत्सर्वेषां गुणमय ! शिरोमाल्यमसि नः ।

यस्येति । मनीषिणः विद्वांसः चतुर्वर्गे धर्मार्थकाममोक्षे, त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैरित्यमरः । यस्य स्मृतीः संहितावचनानि प्रतीक्षन्ते प्रमाणयन्तीत्यर्थः, तस्मै योगिने भगवते याज्ञवल्क्याय नमः । अनुष्टुब्वृत्तम् ॥ ६१ ॥

गायत्रीति । गायत्री सावित्री देवी तथा द्रुपदा देवी द्रुपदादिव मुमुचान इत्यादिमन्त्रमयीति यावत् ते तव पाप्मानं पापम् अपहन्तु नाशयतु । पावमान्यः मन्त्रविशेषाः त्वां पुनन्तु शोधयन्तु । परं ब्रह्म तत्त्वज्ञानं ते तव ऋध्नोतु वर्द्धताम् । अनुष्टुब्वृत्तम् ॥६२॥

(द) अपत्रपमाणः लज्जमानः दुष्टव्यवहारादिति भावः । लज्जा सापत्रपान्यत इत्यमरः ।

(ध) अरण्याय अरण्यगमनाय ।

शिवा इति । ते तव पन्थानः शिवाः निरापद इत्यर्थः भव-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्रिलोकीनिर्माणस्थितिनिधनबन्धोर्मधुभिदो
भवान् षष्ठी मूर्त्तिर्भृगुकुलमधिष्ठाय रमते ॥६३॥

जामदग्न्यः । वत्स रामभद्र !

रामः । आज्ञापय ।

जामदग्न्यः । निवर्तस्व । नूनमिदानीं कृतकौतुकागार-मङ्गलोपचारः (न) श्वशुरकुललोकस्त्वां प्रतीक्षते । (इति परिष्वज्य निष्क्रान्तः ।)

रामः । (सोद्वेगम् ।) कथं गतो भगवान् । तदहमपि तातसमीपमेव गच्छामि । (इति परिक्रामन् पुरोऽवलोक्य ।) कथं तातस्य जनकस्येत एवाभिवर्त्तते । (इत्युपसर्पति ।)

(ततः प्रविशतो जनकदशरथौ । राजानावन्योन्यं परिष्वज्य ।)

जनकः ।

सुचरितमिदमैतिहासिकानां
हृदि न विरंस्यति यत् तवैष पुत्रः ।

न्विति शेषः । निजगृहेभ्यः ममावसथेभ्य इति भावः निजगृहान् व्रज गच्छ । अन्यत् किं, वक्तव्यमिति शेषः । हे गुणमय ! सर्वेषां नः अस्माकं शिरोमाल्यम् असि । त्रिलोक्याः त्रिभुवनस्य निर्माणं सृष्टिः स्थितिः पालनं निधनं नाशः तेषां बन्धोः कर्त्तुरिति भावः मधुभिदः नारायणस्य षष्ठी षण्णां पूरणी मूर्त्तिः भवान् भृगुकुलम् अधिष्ठाय रमते क्रीडति । शिखरिणीवृत्तम् ॥ ६२ ॥

(न) कृतेति कृतः अनुष्ठितः कौतुकागारे वैवाहिकगृहे मङ्गलोपचारः माङ्गलिकसमाधानं येन तथाविधः ।

सुचरितमिति । तव एषः पुत्रः भृगुसुतस्य जामदग्न्यस्य परशु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भृगुसुतपरशूदराद्विराजां
सहजविजित्वरमाचकर्ष तेजः ॥६५॥

दशरथः । (पुरोऽवलोक्य सहर्षम् ।) कथमागत एव वत्सो रामभद्रः ।

जनकः । सखे महाराज दशरथ ! पश्य पश्य ।

चिरात् चात्तं तेजस्त्रिजगदवजैत्रं जनयिता
विधाता सर्वेषामुपरि सवितारं कुलभृताम् ।
विनेता वर्णानां भृगुपतिभुजादर्पनिकषो
महावीरः श्रीमानयमसृतमक्ष्णोर्विकिरति ॥६५॥

दरात् कुठारान्नरालात् विराजां क्षत्रियाणां, वाङ्जः क्षत्रियो विराड्डित्यमरः । सजहविजित्वरं स्वभावेन जयशीलं तेजः यत् आचकर्ष आकृष्टवान् इदं सुचरितम् ऐतिहासिकानाम् इतिहासविदां हृदि न विरंस्यति न विरतं भविष्यति । पुष्पिताग्रावृत्तम् ॥ ६४ ॥

चिरादिति । चिरात् त्रिजगताम् अवजैत्रं विजेष्टृ क्षात्रं तेजः जनयिता उत्पादकः उत्पादनशील इत्यर्थः, शीलार्थेऽण्योगे कर्मणि न षष्ठी । सवितारं सूर्यं सर्वेषां कुलभृतां वंशधराणां वीजिनां चन्द्रादीनामिति भावः उपरि विधाता कर्त्ता, वर्णानां ब्राह्मणादीनां विनेता सत्पथप्रवर्त्तक इति यावत्, भृगुपतेः परशुरामस्य भुजादर्पस्य वाङ्दर्पस्य निकषः परीक्षास्थानभूतः प्रस्तरविशेषः, निकषः कषपट्टिकेत्यमरः । महावीरः श्रीमान् अयं रामः अक्ष्णो, नयनयोः अमृतं विकिरति विक्षिपति । शिखरिणीवृत्तम् ॥ ६५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशरथः ।(निर्वर्ण्य । सस्नेहम् ।) सखे सीरध्वज ! रघुराजधर्माधिकारसर्वधुरीणः (प) शिशुरपि वत्सोऽयम् । तद्-त्रिञ्जरसा दुर्वहं वर्णाश्रमभार(फ)मारोप्य वयमपि क्वापि तपोवने दिलीपकुलोचितेन विधिना शेषमायुरुपवुभुक्षामहे (ब) ।

जनकः । सखे दशरथ ! साधु ते हृदयमीदृशम् । क्रमादेतदनुष्ठातव्यम् ।

रामः । (उपसृत्य ।) तातौ ! अभिवादये ।

जनकः । एह्येहि वत्स रामभद्र । (इति सहर्षमालिङ्गति ।)

दशरथः । (रामामालिङ्ग्य ।) सखे जनक ! रामभद्रमभिषेक्तुं जामदग्न्यविजयप्रीतिरेव श्रेयानवसरः । कालक्षेपे पुनः को हेतुः ।

(प्रविश्य ।)

लक्ष्मणः । इयमार्य्यया मन्थरयोपनीता मध्यमाम्बायाः पत्री ।

(राजानौ सवितर्कमन्योन्यं पश्यतः ।)

रामः । सहर्षम् ।) वत्स लक्ष्मण ! अपि सपरिवारायाः कुशलमम्बायाः कथयत्यार्या मन्थरा ।

(प) रघुराजेति रघुराजस्य यः धर्माधिकारः तत्र सर्वधुरीणः सर्वधुरन्धरः ।

(फ) वर्णाश्रमभारं वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचारिप्रभृतीनां भारः तम् ।

(ब) उपवुभुक्षामहे उपभोक्तुमिच्छामः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । आर्य ! अथ किम् ।

रामः । नूनमस्मत्प्रवासदीर्मनस्यमम्बां पीड़यिष्यति ।

जनकः । (लक्ष्मणहस्तात्पत्रिकां गृहीत्वा याचयति ।) स्वस्ति । महाराजं दशरथं कैकेयी विज्ञापयति । यथा

तन्मे वरद्वयमुरीकृतपूर्वमेव
याचे बिभर्त्तु भरतस्तव राज्यलक्ष्मीम् ।
वर्षाणि तिष्ठतु चतुर्दश दण्डकायां
सौमित्रिमैथिलसुतासहितश्च रामः ॥६६॥

(इति राजानौ मूर्च्छतः ।)

रामः । यदादिशत्यम्बा । (इति शिरसि पत्रिकां दत्त्वा ।) वत्स लक्ष्मण ! निजामस्मदाराधनसहाध्यायिनीं प्रजावती-(भ)मादाय पुरो (म) भव ।

लक्ष्मणः । तथा । (इति निष्क्रान्तः ।)

तदिति । तत् मे मह्यम् उरीकृतपूर्वमेव पूर्वमङ्गीकृतमेव, एव-शब्दोऽवधारणार्थः । वरद्वयं याचे प्रार्थये, (तयोरेकेन) भरतः तव राज्यलक्ष्मीं बिभर्त्तु पालयतु (द्वितीयेन) रामः सौमित्रिमैथिल-सुताभ्यां लक्ष्मणसीताभ्यां सहितः चतुर्दश वर्षाणि दण्डकायां दण्ड-कारण्ये तिष्ठतु च । वसन्ततिलकं वृत्तम् ॥ ६६ ॥

(भ) अस्मदाराधनेति अस्माकम् आराधने सहाध्यायिनीं सती-र्थाम् । प्रजावतीं भ्रातृजायां सीतामित्यर्थः । प्रजावती भ्रातृ-जायेत्यमरः ।

(म) पुरः अग्रतः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । तातो ! समाश्वसितं समाश्वसितम् (य) ।

जनकः । (आश्वस्य ।) अहह ।

पाणिर्गृहीतो रघुपुङ्गवेन
देवः पुराणः श्वशुरो विवस्वान् ।
पिता स्वयं कैकयचक्रवर्त्ती
कर्मेदमेतादृगमाः किमेतत् ॥६७॥

(इति मूर्च्छति । रामः पटाञ्चलेन (र) वीजयति ।)

दशरथः । (आश्वस्य ।)

कोऽप्येष वाङ्मनसयोरतिवृत्तवृत्ति-
र्भावो हुताशनमयश्च तमोमयश्च ।
भोक्तृत्वमात्रमिह मे पुनरीदृशं मां
हा वत्स राम ! कथमुत्सहसे विहातुम् ॥६८॥

(य) समाश्वसितं समाश्वस्तौ भवतम् ।

पाणिरिति । रघुपुङ्गवेन रघुश्रेष्ठेन दशरथेन पाणिः गृहीतः । विवस्वान् सूर्य्यः देवः पुराणः श्वशुरः । पिता स्वयं साक्षात् कैकयानां चक्रवर्त्ती सम्राट् । इदम् एतादृशं कर्म दुराचरणमिति भावः कैकया इति शेषः । आः पीड़ायाम्, आस्तु स्यात् कोपपीड़-योरित्यमरः । एतत् किम् ? उपजातिवृत्तम् ॥ ६७ ॥

(र) पटाञ्चलेन वसनप्रान्तेन ।

क इति । वाङ्मनसयोः अतिवृत्तवृत्तिः अविषयः कदापि वचसा वा मनसा न चिन्तित इति भावः, हुताशनमयः अग्निमयः तमोमयः अन्धकारमयश्च कोऽपि अनिर्वचनीयस्वरूपः एषः भावः अवस्थेति यावत् मम वर्त्तते इति शेषः । इह भावे पुनः किन्तु मे मम

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विमृश्य ।) हा वत्से जानकि ! निशाचराणामातिथेयीभवितुं (ल) दशरथगृहे प्रविष्टासि । (इति मूर्च्छति ।)

रामः । तातो ! समाश्वसितं समाश्वसितम् ।

जनकः । (आश्वस्य । आकाशे लक्ष्यं बद्ध्वा ।) साधु सखि कैकेयि ! साधु । यदस्या विश्वम्भरादुहितु(व)र्मे वत्सायाः पत्युरनुवृत्तिरेव (श) प्रसादीकृता । (विमृश्य । सव्यथम् ।)

धनुष्मन्तौ वत्सौ दशरथभुजैरूष्मलतमाः
प्रदेशास्ते वत्सा शिशुरशिवहृत्ता वनभुवः ।

भोक्तृत्वमात्रम् अनुभवितृत्वमेवेत्यर्थः, मात्रपदेन प्रतीकाराक्षमत्वं व्यज्यते । हा इति खेदे, हे वत्स राम ! ईदृशम् इत्थं गतं मां विहातुं त्यक्तुं कथम् उत्सहसे इच्छसीत्यर्थः । वसन्ततिलकं वृत्तम् ॥ ६८ ॥

(ल) आतिथेयीभवितुम् आतिथ्यपरायणा भवितुम् ।

(व) विश्वम्भरादुहितुः पृथिवीकन्यायाः ।

(श) अनुवृत्तिरेव अनुगमनमेव, नान्यत् किमपि यौतकादिकमित्येवशब्दार्थः ।

धनुष्मन्तावेति । वत्सौ रामलक्ष्मणौ धनुष्मन्तौ धनुर्वेदे सुशिक्षितावेति यावत्, दशरथस्य भुजैर्बाहुभिः ते प्रदेशाः अयोध्याराज्यानि ऊष्मलतमाः अतितेजोयुक्ताः सुखकरा आसन्निति शेषः । इदानीं वत्सा सीता शिशुः क्लेशासहेति भावः, किन्तु वनभुवः अरण्यप्रदेशाः अशिवहृत्ताः विघ्नवहुला इति यावत् । राजा प्रियैः अस्मभिः प्राणैः युक्तैः परित्यक्तैः सद्भिः स्वम् अयशः कलङ्कं रामवनप्रेषणजनितमिति भावः अपमार्ष्टि खण्डयति । हे सखि ! कैकेयकुले कैकेयस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रिये राजा मुक्तैरसुभिरपमार्ष्टि स्वमयश-
श्चरित्रव्यत्यासः सखि ! कथमयं कैकयकुले ॥६९॥

कष्टं च । वयमपि कथमनेन जनपदेषु बहुलीभवता भरत-यौवराज्यलक्ष्मीकर्णपूरतमालपल्लवेन कैकेयीदुर्यशसा(प) मूर्धानमुन्नमय्य लोकस्य मुखं द्रक्ष्यामः ।

रामः । (उत्थाय ।) तात जनक ! यथा मुखे तातं शृणोमि तथा भवता विधातव्यम् । (इति निष्क्रान्तः ।)

दशरथः । (आश्वस्योत्थाय च ।) वत्स रामभद्र ! परिपालय माम् । (इति जनकेन धार्य्यमाणो निष्क्रान्तः ।)

(इति निष्क्रान्ताः सर्वे ।)

इति दशरथविप्रलम्भो नाम चतुर्थोऽङ्कः ।

तव पितुः कुले चरित्रव्यत्यासः दुराचारजनितः कलङ्क इति भावः कथं क्रियते त्वयेति शेषः । शिखरिणीवृत्तम् ॥ ६९ ॥

(प) बहुलीभवता प्रकाशमानेन । भरतेति भरतस्य यौवराज्यं तस्य लक्ष्मीः तस्याः कर्णपूरः कर्णभूषणं यः तमालपल्लवः तेन तद्रूपेणेत्यर्थः । कैकेयीदुर्यशसा कैकेयीकलङ्केन ।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण कृता
अनर्घराघवचतुर्थाङ्कव्याख्या समाप्ता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पञ्चमोऽङ्कः ।

(ततः प्रविशतः श्रवणाजाम्बवन्तौ ।)

जाम्बवान् । ततस्ततः ।

श्रवणा । ततो मिथिलाया निष्क्रम्य मन्थराकलेवरमवकीर्य्य मारुतिप्रत्यवेक्षितं (स) स्वशरीरमधिष्ठाय गङ्गायां (ह) शृङ्गवेरपुरं नाम निषादपक्क(ञ)णमागत्य शबरीभूता(क)स्मि ।

जाम्बवान् । ततस्ततः ।

श्रवणा । ततश्च ममानुपदमेव तस्मि(ख)न्निमौ रामलक्ष्मणावियं सीतेति सर्वतः शब्दो महानभूत् ।

जाम्बवान् । (सहर्षम् ।) ततस्ततः ।

(स) अवकीर्य्य परित्यज्य । मारुतिप्रत्यवेक्षितं हनूमता सुरक्षितमिति यावत् ।

(ह) गङ्गायां गङ्गातीरे ।

(ञ) निषादपक्कणं निषादाः चण्डालाः धीवरा वा, निषादः स्वरभेदे स्याच्चण्डाले धीवरेऽपि चेति मेदिनी । तेषां पक्कणः ग्रामः, पक्कणः शबरालय इत्यमरः ।

(क) शबरीभूता चाण्डालरूपिणी ।

(ख) अनुपदं पश्चात् । तस्मिन् निषादपक्कणे ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रवणा । ततश्च कावेतौ रामलक्ष्मणाविति कर्णधाराधिपतिना (ग) गुहेनाहमनुयुक्ता (घ) निवेदितवत्यस्मि ।

पुत्रीयता दशरथेन मुनिप्रसादात्
प्राप्ताः पुराणपुरुषस्य कलायतस्रः ।
तासामयं गुणमयः प्रथमः कुमारो
वीरोद्धतः पुनरसावपरस्तृतीयः ॥१॥

जाम्बवान् । श्रवणे ! साधूक्तम् । ततस्ततः ।

श्रवणा । ततश्चोदकान्तनिवर्त्तितानुयात्रिकबन्धुवर्गः ससंभ्रमोपगतेन (ङ) गुहेनोपनीतां नाव(च)मधिरुह्य । तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीयस्तस्मै सौमित्रिमैत्रीमयमुपहृतवानातरं नाविकाय ।

(ग) कर्णधाराधिपतिना नाविकराजेन ।

(घ) अनुयुक्ता पृष्टा ।

पुत्रीयतेति । पुत्रीयता आत्मनः पुत्रमिच्छता दशरथेन मुनेः ऋष्यशृङ्गस्य प्रसादात् अनुग्रहात् पुराणपुरुषस्य नारायणस्य चतस्रः कलाः अंशाः प्राप्ताः । तासां कलानां मध्ये अयं गुणमयः सर्वगुणाधार इत्यर्थः वीरोद्धतः वीररसेन उद्धतः उद्दृप्तः नायकविशेषो वा प्रथमः ज्येष्ठः कुमारः राम इति शेषः । पुनश्च असौ अपरः तृतीयः कुमारः लक्ष्मण इति शेषः । वसन्ततिलकं वृत्तम् ॥ १ ॥

(ङ) उदकान्तेति उदकान्तात् जलसमीपात् निवर्त्तितः निवारितः अनुयात्रिकः अनुगामी बन्धुवर्गः येन तथाभूतः, आ उदगन्तं स्निग्धोऽनुगम्यते इति श्रुतिः । ससंभ्रमं सत्वरम् उपगतः उपस्थितः तेन ।

(च) नावं तरणिम् । स्त्रियां नौस्तरणिस्तरिरित्यमरः ।

तीर्त्वेति । आत्मना स्वेन तृतीयः त्रयाणां पूरणः सीता-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्यामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोदञ्चदक्षं
कृच्छ्रादन्वीयमानः क्षणमचलमथो चित्रकूटं प्रतस्थे ॥२॥

जाम्बवान् । हन्त महत्करुणम् (छ) ।

श्रवणा । आर्य ! करुणभयादेव तस्मिन्निङ्गुदीतरुमूले कुमारयोर्जटाग्रहणवृत्तान्तमन्तरितवत्यस्मि (ज) ।

जाम्बवान् । श्रवणे ! सर्वमेतत्कल्याणोदर्कं (झ) भविष्यति ।

श्रवणा । अहं तु निषादपतिप्रीतये तत्रैवातिष्ठम् ।

सौमित्रिसहित इति यावत् असौ रामः भूतेशस्य हरस्य मौलिस्थजं शिरोभूषणमालाम् अमरधुनीं गङ्गां तीर्त्वा उत्तीर्य तस्मै नाविकाय गुहाय सौमित्रिणा लक्ष्मणेन सह या मैत्री सख्यं तन्मयं तदात्मकम् आतरं तरणयम्, आतरस्तरणयं खादित्यमरः । उपहृतवान् दत्तवान् सन् अथानन्तरं व्यामः बाह्वोस्तिर्य्यगन्तरभागः, व्यामो बाह्वोः सकरयोस्ततयोस्तिर्य्यगन्तरमित्यमरः । तेन ग्राह्यौ ग्रहणीयौ स्तनौ यासां ताभिः पीवरस्तनीभिरिति भावः शबराणां युवतिभिः कौतुकेन औत्सुक्येन उदञ्चती उद्गच्छती अक्षिणी नेत्रे यस्मिन् तत् यथा तथा कृच्छ्रात् दुःखात् क्षणम् अन्वीयमानः अनुगम्यमानः चित्रकूटं चित्राणि रम्याणि कूटानि शिखराणि यस्य तत्तथोक्तं नाम अचलं पर्वतं प्रतस्थे जगाम । स्रग्धरावृत्तम् । म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति तल्लक्षणात् ॥ २ ॥

(छ) करुणं शोकजननव्यापारः ।

(ज) अन्तरितवती अतिक्रान्तवती तद्वृत्तान्तो नोक्त इति भावः ।

(झ) कल्याणोदर्कं शुभोत्तरफलम्, उदर्कः फलमुत्तरमित्यमरः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अतीते च गणरात्रे सप्रकृतिजनपदः (ञ) पितुः स्वर्गारोहणवार्ताभिधायी द्वितीयो दाशरथी (ट) रामभद्रमयोध्यासुखनेतुं तेनैव यथा चित्रकूटमुपगतः ।

आत्मवान् । (सगद्गम् ।) ततस्ततः ।

श्रवणा । ततश्च तस्मिन् आर्य ! लोके कैकेयानामाकल्पमनल्पमकीर्त्तिस्तम्भं निखनता (ठ) केनापि छलित(ड)स्तातः । तत् संप्रति गृहाण रघूणामधिराज्यम् इति पुनः पुनश्चिरमनुबन्धी (ढ) रामेण सृष्टिकया प्रत्यादिष्टः (ण) कृतजटापरिग्रहो भरतः शरभङ्गमुनिप्रेषिता(त)न स्व

(ञ) गणरात्रे अतीते कतिपयनिशासु गतास्विति यावत्, गणरात्रं निशापङ्क्तिः इत्यमरः । सप्रकृतिजनपदः प्रकृतिभिः अमात्यादिभिः जनपदैः देशवासिभिश्च सहितः ।

(ट) द्वितीयो दाशरथिर्भरत इत्यर्थः ।

(ठ) कैकेयानां केकयवंश्यानाम् । आकल्पम् आप्रलयम् । अनल्पं महान्तम् । अकीर्त्तिस्तम्भं कलङ्करूपं स्तम्भम् । निखनता प्रोथयता ।

(ड) छलितः प्रतारितः । वस्तुतः कैकेय्या प्रेषिता निजदासी मन्थरा सा न, यया पितुः समीपे कैकेय्याः पतिक्रोधमियुक्त्या छलितेन तातेन आर्यः वनं प्रेषित इति भावः ।

(ढ) अनुबन्धी आग्रहवान् ।

(ण) सृष्टिकया शपथेन, सृष्टिका शपथेऽपि चेति रत्नकोषः । प्रत्यादिष्टः निराकृतः, प्रत्यादेशो निराकृतिरित्यमरः ।

(त) शरभङ्गेति शरभङ्गो नाम मुनिः तेन प्रेषितां याचित्वा दापितामिति भावः । साध्वसात् स्वयं प्रार्थनायामसामर्थ्यादिति भावः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पादुकां भद्रासन(थ)मधिरोप्य प्रजानामाभ्युदयिक मवेक्ष-(माण)स्तदैव नन्दिग्रामं गतवान् ।

जाम्बवान् । (सहर्षम् ।) हन्त फलितमस्मदुद्यवसायश्रवणा-परिश्रमाभ्याम् (ध) । ततस्ततः ।

श्रवणा । ततश्च शावाशौच(न)मास्थितस्य चक्रिणस्य प्रतिषिद्धमस्त्रग्रहणमिति छिद्रान्वेषिभिर्जनस्थानवास्तव्यैः (प) खरदूषणप्रभृतिभिस्तत्र विराधो नाम राक्षसस्तीक्ष्णः (फ) प्रहितः ।

जाम्बवान् । (विहस्य ।) धिङ्मूर्खाः ! आतिपातिके (ब) हि कार्ये राज्ञां सद्यः शुद्धिः । ततस्ततः ।

(थ) भद्रासनं सिंहासनम् ।

(द) आभ्युदयिकं माङ्गलिकं कार्यमित्यर्थः । अवेक्षमाणः अवलोकयन् ।

(ध) फलितं सिद्धम् । अस्मदिति अस्माकं व्यवसायः उद्योगः श्रवणायाः परिश्रमः ताभ्याम् ।

(न) शावाशौचं मरणाशौचम् अत्र पितुरिति शेषः ।

(प) छिद्रान्वेषिभिः स्खलनान्वेषिभिः । जनस्थानवास्तव्यैः दण्ड-कारण्यैकभावः जनस्थानं तत्र वास्तव्यैः कृतनिवासैः ।

(फ) तीक्ष्णः उग्रः भीषण इति यावत् ।

(ब) धिक् निष्फलाः अकृतार्था इत्यर्थः, निन्दाभर्त्सनार्थयोरेव धिक्शब्दयोगे द्वितीयाविधानात् अत्र निष्फलार्थत्वेन न द्वितीया । आतिपातिके सद्यःकरणीये कालक्षेपसहे इति भावः । न राज्ञां राजकर्मणीति स्मृतिः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रवणा । ततश्च विराधवधाच्चिप्तहृदये दुःसहशोकदीर्घा-ह्नीमौर्ध्वदेहिकीं (भ) पितुः क्रियामतिवाह्य (म) भगवता चतुःसमुद्रमुष्टिन्धयेन (य) विन्ध्याचलचापलारम्भविस्रब्ध-घातिना (र) वातापिदानवदीर्घयात्रामङ्गलकलशेन (ल)

(भ) विराधेति विराधस्य वधेन आक्षिप्तम् आकृष्टं हृदयं यस्य तथोक्ते । दुःसहेति दुःसहेन शोकेन दीर्घाणि अहानि यस्यां तादृशीम् । और्ध्वदेहिकीं देहात् ऊर्ध्वं भवा और्ध्वदेहिकी तां क्रियां श्राद्धादिव्यापारम् ।

(म) अतिवाह्य समाप्य ।

(य) चतुःसमुद्रेति चतुर्णां समुद्राणां समाहारः चतुःसमुद्रं तत् मुष्टीकृत्य धयति पिबतीति तथोक्तेन गण्डूषेण चतुःसमुद्रं पायिनेत्यर्थः । पुरा असुरैः सुरपराजितैः पलाय्य समुद्रमध्ये आश्रयः कृतः । पुनश्च देवैः सह युधि भङ्गमवाप्य समुद्रे आश्रयः क्रियते स्म । इत्थं पुनः पुनः क्रियमाणे देवेन्द्रेण प्रार्थितोऽगस्त्यमुनिः समुद्रं गण्डूषेणैकेन पीतवान् । ततश्चासुराः निभृतस्थानमप्राप्य सुरैर्निहता इति पुराणवृत्तकथात्रानुसन्धेया ।

(र) विन्ध्याचलेति विन्ध्याचलस्य विन्ध्यगिरेश्चापलं सुमेरुस्पर्द्धया सूर्यावरोधार्थमभ्युत्थानरूपमिति भावः तस्य आरम्भे उपक्रमे विस्रब्धं विश्वासं हन्तीति तथोक्तेन । पुरा सुमेरुस्पर्द्धया वर्द्धमाने विन्ध्ये सूर्यावरोधात् जगति विनाशमुपगच्छति देवैरभ्यर्थितोऽगस्त्यमुनिः वाराणस्याः समागत्य शिष्यं विन्ध्यं यावदहं दक्षिणस्या दिशः न परापतेयं तावत् त्वं न वर्द्धस्व प्रत्युत विनतस्तिष्ठेत्युक्त्वा दक्षिणां दिशं गतवान् । पुनश्च न परापतत् । विन्ध्यस्य तद्विश्वासेन तथैव गुरुनियोगात् विनम्रस्तिष्ठतीति पुराणवार्त्ता ।

(ल) वातापीति वातापेः तदाख्यस्य दानवस्य दीर्घयात्रा मरणं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कलशयोनिना सनाथामरण्यवीथीं (व) प्रतिष्ठमाने दाशरथौ पथि धाराधरो नाम वायसः सहसैव वैदेहीमुपाद्रवत् ।

जाम्बवान् ।) (स्वगतम् ।) इदं तावदपशकुनं (श) नाम । (प्रकाशम् ।) ततस्ततः ।

श्रवणा । ततश्च

रक्षोभिचारचरुभाण्डमिव स्तनं यो
दैव्या विदेहदुहितुर्विददार काकः ।
ऐषीकमस्त्रमधिकृत्य तदा तमक्ष्णा
काणीचकार चरमो रघुराजपुत्रः ॥ ३ ॥

तस्या मङ्गलकलशः तेन यातायां माङ्गलिककलशस्थापनस्य आचारसिद्धत्वादिति भावः । पुरा आतापिवातापिस्य द्वावसुरौ मायया विचेरतः । तयोर्वातापिः यं कञ्चन भोजनाय निमन्त्र्य मध्याह्ने आतापिं मेषरूपं निहत्य तन्मांसेन निमन्त्रितं भोजयामास । ततश्च आतापे । निष्क्रमस्वेत्युक्तस्तेन वातापिना स आतापिस्तस्य उदरं विदार्य्य निःसृतः । ततश्च द्वावेतौ तन्मांसं सुखेन बुभुजाते । इत्थं बहवो भक्षिताः । एकदा अगस्त्यमुनिर्निमन्त्रितः । स तु आतापिं मेषरूपिणं तथा भक्षितवान् यथा स पुनर्न उदरात् निरगच्छत् । इति पौराणिकी वार्त्ता ।

(व) कलशयोनिना अगस्त्येन । सनाथां समाश्रितामिति यावत् अरण्यवीथीम् अरण्यश्रेणीम् ।

(श) अपशकुनम् अमङ्गलम् ।

रक्षोभिचारेति । यः काकः रक्षसाम् अभिचारे मारणार्थयज्ञे चरुभाण्डमिव हव्यपाकपूर्णपात्रमिव, हव्यपाके चरुः पुमानित्यमरः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जाम्बवान् । ततस्ततः ।

श्रवणा । ततश्च

क्रमेणैव सुतीक्ष्णादीनुपस्थाय महामुनीन् ।
अगस्त्यशासनादास्ते पञ्चवट्यां रघूद्वहः ॥४॥

जाम्बवान् । (सहर्षम् ।) तर्हि हस्तगत एवाकाकम् । कियदन्तर(ष)मृष्यमूकजनस्थानयोः ।

श्रवणा । आर्य ! न खल्वद्यापि श्रोतव्यं शृणोषि

जाम्बवान् । अवहितोऽसि ।

श्रवणा । तत्र च कामुकी रामभद्रमनुप्रविश्य रसं (स) दास्यामीति सङ्कल्पितपतिद्रोहपातकिनी (ह) शूर्पणखा

देव्याः विदेहदुहितुः जानक्याः स्तनं विददार, चरमः आद्यः, चरमो ज्येष्ठकनिष्ठयोरिति विश्वः । तदा इषीका वीरणशलाका तस्या विकारः ऐषीकं तत् अस्त्रम् अधिक्षत्य अधित्य निचिध्येत्यर्थः तं काकं अक्ष्णा नेत्रेण काणीचकार अकाणं काणं कृतवानित्यर्थः । वसन्ततिलकं वृत्तम् ॥ ३ ॥

क्रमेणेति । रघूद्वहः रामः क्रमेण सुतीक्ष्णादीन् महामुनीन् उपस्थाय अभिवाद्येत्यर्थः अगस्त्यस्य शासनात् आदेशात् पञ्चवट्याम् आस्ते अध्युवास । अनुष्टुब्वृत्तम् ॥ ४ ॥

(ष) कियत् किञ्चिदित्यर्थः । अन्तरं व्यवधानम्, अन्तरमवकाशावधिपरिधानान्तर्द्विभेदतादर्थ्ये इत्यमरः ।

(स) रसं विषम् ।

(ह) सङ्कल्पितेति सङ्कल्पितः मनसा कृतः पतिः राम इति भावः तस्य द्रोहे अनिष्टाचरणे पातकिनी पापीयसी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणरोषहुतभुजि (च) कर्णनासौष्ठमयीभिस्त्रिसृभिराहुतिभिः प्रायश्चित्तयाञ्चक्रे (क)'।

जाम्बवान् । (सातङ्कम् ।) अहहं महाननर्थकन्दः संवृत्तः । अथ भगिन्यास्तादृशं विडम्बनमवलोक्य खरादिभिः किं प्रतिपन्नम् (ख) ।

श्रवणा । (विहस्य ।) आर्य ! किं प्रतिपन्नम् । यद्रामभद्रे धृतधनुषि प्रतिपद्यते ।

जाम्बवान् । (सहर्षोच्छ्वासम् ।) तत् किं तेऽपि वालिसाहायकोपस्थायिनो (ग) विराधयात्राप्रहतमध्वान(घ)मनुप्रपन्नाः ।

श्रवणा । अथ किम् ।

जाम्बवान् । श्रवणे ! प्ररूढ(ङ)मिदानीं रामरावणयोर्वैरम् ।

(च) लक्ष्मणेति लक्ष्मणस्य रोषहुतभुजि कोपानले ।

(क) प्रायश्चित्तयाञ्चक्रे प्रायश्चित्तमिव आचरितवतीत्यर्थः । लक्ष्मणेन तस्याः कर्णनासौष्ठानि निकृत्तानीति भावः ।

(ख) प्रतिपन्नं कृतम् ।

(ग) वालीति वालिनः साहायकाय साहाय्यार्थम् उपस्थायिनः उपस्थिताः ।

(घ) विराधेति विराधस्य यात्रया प्रयाणेन प्रहतं क्षुण्णम् । अध्वानं पन्थानं नाशमिति भावः ।

(ङ) प्ररूढं प्रकर्षेण जातम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रवणा । (हसन्ती ।) आर्य ! मन्ये खरदूषणप्रभृतीनामभिभवाभिधाने (च) केवलं क्लेशयिष्यति वाचमाक्षनः । पुनरनक्षर(छ)मपि शूर्पणखामुखमावेदयिष्यति दशकन्धरस्य ।

जाम्बवान् । (सस्मितम् ।) श्रवणे ! लघूत्थमनर्थमुत्प्रेक्ष्य प्रमुग्धो(ज)ऽस्मि ।

ऐक्ष्वाकेण पुरापि कौशिकमखादारभ्य लङ्केश्वरो
धत्ते शाश्वतिकं विरोधमधुना त्वेते हता बान्धवाः ।
उत्साहप्रभुमन्त्रशक्तिभिरलभूष्णुच्छलन्नो बली
दृप्तः शूर्पणखानिकारमपरं दृष्ट्वा कथं मृष्यते ॥५॥

(च) अभिभवाभिधाने पराजयकथने ।

(छ) अनक्षरं वाक्यशून्यम् ।

(ज) लघूत्थं शीघ्रमुपस्थितम् । उत्प्रेक्ष्य वितर्क्य । प्रमुग्धः विमूढः किंकर्त्तव्यविचाराक्षम इति यावत् ।

ऐक्ष्वाकेणेति । पुरा पूर्वम् अपि लङ्केश्वरः रावणः कौशिकमखात् विश्वामित्रयज्ञात् आरभ्य ऐक्ष्वाकेण रामेण शश्वत् निरन्तरं भवं शाश्वतिकं नित्यं विरोधं वैरं धत्ते बिभर्त्ति, अधुना तु इदानीञ्च एते बान्धवाः खरादयः हताः रामेणेति शेषः । अतः उत्साहप्रभुमन्त्रशक्तिभिः उत्साहशक्तिभिः प्रभुशक्तिभिः मन्त्रशक्तिभिश्च अलभूष्णुः अतिसमर्थः तथा छलन्नः छिद्रवित् बली बलवान् दृप्तः अहङ्कृत रावणः इति शेषः अपरम् अन्यं शूर्पणखाया निकारं नासाकर्णादिवैकृतमिति भावः दृष्ट्वा कथं मृष्यते क्षमते न कथमपीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शनैः शनै(झ)रनयोर्विरोधे संधुक्षमाणे तुल्यव्यसनस्थो (ञ) दाशरथिरसहायः सूर्यसूनुना संधातुमीषत्करः (ट) स्यात् ।

श्रवणा । आर्य ! किमिदानीमनुष्ठेयमस्ति । मम हि शिष्यपुत्रो निषादचक्रवर्ती गुहो लक्ष्मणमित्रम् । अनेन सोपानेन सुखाधिरोहो (ठ) रघुपतिरस्माकम् ।

जाम्बवान् । (सहर्षस्मितम् ।) श्रवणे ! यद्यसि सुग्रीवपक्षपातिनी । तद्गच्छ सत्वरमुपस्थापय निषादराजम् ।

(इति श्रवणा निष्क्रान्ता ।)

(नेपथ्ये । एकतः ।)

भो भो लक्ष्मण ! वैशेषिककटन्दीपण्डितो (ड) जगद्विजयमानः पर्यटामि (ढ) । क्वासौ रामः । तेन सह विवदिष्ये (ण) ।

(झ) शनैः शनैः उत्तरोत्तरमित्यर्थः ।

(ञ) संधुक्षमाणे सम्यक् दीप्यमाने प्रसरतीत्यर्थः । तुल्येति तुल्यं समानं यत् व्यसनं विपद् वैरं वा तत्र स्थित इत्यर्थः ।

(ट) सूर्यसूनुना सुग्रीवेण । संधातुं सम्मेलयितुम् । ईषत्करः अल्पेनसाध्य इत्यर्थः ।

(ठ) सोपानेन उपायेनेत्यर्थः । सुखाधिरोहः सुखेनाधिगम्य इत्यर्थः ।

(ड) वैशेषिकेति वैशेषिकस्य दर्शनविशेषस्य कटन्द्यां व्याख्यायां पण्डितः विचक्षणः । कन्दलीति पाठे वैशेषिककन्दल्यां वैशेषिकदर्शनभाष्ये निजज्ञते इति भावः पण्डितः, यद्वा वैशेषिकी विशिष्टा या कन्दली कलहः तत्र पण्डितः विचक्षणः ।

(ढ) पर्यटामि भ्रमामि ।

(ण) विवदिष्ये विविधज्ञानविषयकं तर्कं करिष्ये, विरोधं करिष्ये वा । रावणोक्तिरियम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(अन्यतः ।)

भो भो परिव्राजक ! कालसर्पखलीकारखर्जूलता (त) न खलु सुखाकरी दृश्चिकमन्त्रतान्त्रिकस्य (थ) ।

जाम्बवान् । कथं लक्ष्मणपरिव्राजकौ संलपतः (द) । शृणोमि तावत् । (इत्यवधत्ते ।)

(नेपथ्ये । पुनरेकतः ।)

आः लक्ष्मण ! सर्वविद्रावणः (ध) खल्वहम् । को मया धनेतमानभङ्गो न पराजीयते ।

(नेपथ्ये । पुनरन्यतः ।)

किं भवान् रावणः ।

(जाम्बवान् सविशेषमवदधाति ।)

(नेपथ्ये । पुनरेकतः ।)

भो वाचोयुक्तिज्ञ ! (न) सर्वेषां विद्रावणः खल्वहमिति

(त) परिव्राजक ! भिक्षो ! कालसर्पेति कालसर्पस्य खलीकारः द्रोहाचरणं स एव खर्जूः कण्डूः स विद्यते यस्य सः कालसर्प-खलीकारखर्जूलः तस्य भावः ।

(थ) सुखाकरी सुखसाधनी । दृश्चिकेति दृश्चिकः प्रसिद्धः तस्य मन्त्रे तान्त्रिकः ज्ञातसिद्धान्तः तस्य, तान्त्रिको ज्ञातसिद्धान्त इत्यमरः । कालसर्पदंशने दृश्चिकमन्त्राभिज्ञस्य सामर्थ्यं न स्फुरतीति भावः ।

(द) संलपतः अन्योन्यम् आलापं कुरुतः । संलापो भाषणं मिथ इत्यमरः ।

(ध) सर्वविद्रावणः सर्वविजयीत्यर्थः । अथच सर्ववित् सर्वज्ञः रावणः ।

(न) वाचोयुक्तिज्ञ ! वाक्पटो !

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

समस्य व्याहृतमन्यथाभिसंधाय वाक्छलेन प्रत्यवतिष्ठमानो निगृहीतो(प)ऽसि ।। तन्मुञ्च मां भिक्षायै (फ) ।

(अन्यतः ।)

किं त्वया, किन्तरां च रावणेन (ब) । अहमप्युत्को-(भ)ऽस्मि । त्वरितं गच्छामि ।

जाम्बवान् । कथमेतदस्फुटार्थ(म)मेव निर्वहणम् () । मन्ये पुनरेष परिव्राजकच्छलेन (र) रावण एव कोपदृक्षमप्यपलप्य स्वं नाम द्रागपक्रान्तः (ल) । (सर्वतो निरूप्य)

(प) समस्य समासेन उक्तेत्यर्थः । व्याहृतं उक्तम् । अन्यथ अन्येन प्रकारेण अभिसंधाय बुद्ध्वा । वाक्छलेन वक्रोक्त्या इति यावत् प्रत्यवतिष्ठमानः विरुद्धम् उपस्थापयन् । निगृहीतः प्रतारितः ।

(फ) भिक्षायै भिक्षार्थं गमनायेत्यर्थः ।

(ब) किं त्वया, किन्तराञ्च रावणेन । त्वया रावणभिन्नेन किं रावणेन च किन्तरां त्वम् अरावणः रावणो वा तेन किम् ? न किमपि प्रयोजनमित्यर्थः । अरावणो वा रावणो वा न मया गण्यते इति भावः ।

(भ) उत्सुकः व्याकुलः आश्रमगमनार्थमिति भावः ।

(म) अस्फुटार्थम् अव्यक्तार्थम् ।

(य) निर्वहणम् उपक्रान्तस्य उपसंहारः, उपक्रान्तस्य संहारो बुद्धिर्निर्वहणं त्विदमिति भरतः ।

(र) परिव्राजकच्छलेन भिक्षुव्याजेन ।

(ल) अपलप्य निह्नूय । द्राक् झटिति । अपक्रान्तः पलायितः स्वरूपप्रकाशमिति भावः । स्वं नाम रावण इति नामधेयम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अये ! पुराणप्रियसुहृ(व)दस्माकं दक्षिणस्या दिशः परापत(श)ज्जटायुरिव लक्ष्यते । तदेनमनुपालयामि (ष) तावत् । दूरदृश्यो (स) हि गृध्राः । कदाचिदेष (ह) लङ्काद्वीपवृत्तान्तमप्युपलभेत (क्ष) ।

(प्रविश्य ।)

जटायुः । प्राप्तैवेयमस्माभिः पञ्चवटी । यदसूर्गोदावरीतरङ्गसीकरसेकसुकुमारमांसलपरिसरारण्यमालिन्यो जनस्थानसीमानः (क) । अपिच ।

दृश्यन्ते मधुमत्तकोकिलवधूनिर्धूतचूताङ्कुर-
प्राग्भारप्रसरत्परागसिकतादुर्गास्तटीभूमयः ।

(व) पुराणप्रियसुहृत् प्राचीनप्रियबन्धुः ।

(श) परापतत् समागच्छन् ।

(ष) अनुपालयामि प्रतीक्षे ।

(स) दूरदृश्यः दूरदेशदर्शिनः ।

(ह) एषः जटायुः ।

(क्ष) उपलभेत जानीयात् ।

(क) गोदावरीति गोदावर्याः तरङ्गाणां सीकरसेकेन जलकणस्पर्शेनेत्यर्थः मांसला परिपुष्टा परिसरारण्यमाला तद्वत्यः । जनस्थानसीमानः कण्टकारण्यभागाः ।

दृश्यन्ते इति । मधुमत्ताभिः मकरन्दपानविह्वलाभिः मकरन्दपानेन प्रफुल्लाभिरिति वा कोकिलवधूभिः कोकिलाभिः निर्धूता विदलिताः ये चूताङ्कुराः तेषां प्राग्भारात् विस्तारात् प्रसरन्तीभिः निःस-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

याः क्षुच्छादितलङ्घ्य लुब्धकभयात्तैरेव रेणूत्करै-
र्धारावाहिभिरस्ति लुप्तपदवीनिःशङ्कमेणीकुलम् ॥ ६ ॥

जाम्बवान् । (किञ्चिदुपसृत्य ।) कुतः पुनरियता वेगेन (ख) वयस्यो जटायुः ।

जटायुः । (दृष्ट्वा ।) कथं जाम्बवान् । सखे! चमस्व । न सभाजयिष्यामि (ग) तावद्भवन्तम् । मया हि मलयाचल-कुलायादार्य्यसम्पाति(घ)पादानभिवाद्य निवर्तमानेन मारीचसहचरः सञ्चरन्निमामरण्यानीमभिलक्षितो (ङ) राक्षस-

---

रन्तीभिः परागसिक्ताभिः कौसुमरजोरूपप्रवाहाभिः दुर्गाः दुर्गमाः व्याप्ता इति यावत् तटीभूमयः तीरप्रदेशाः । एतेन वसन्तकालो व्यज्यते । दृश्यन्ते । याः तटीभूमीरित्यर्थः अतिलङ्घ्य अतीत्य धारावाहिभिः सन्ततवर्त्तिभिः तैरेव रेणूत्करैः परागसङ्घैः एणीकुलं मृगीकदम्बकं लुब्धकेभ्यः व्याधेभ्यः भयं तस्मात् लुप्ताभिः परागचिह्नताभिरिति भावः पदवीभिः पादचिह्नैरित्यर्थः निःशङ्कं निर्भयम् अस्ति वर्त्तते इत्यर्थः । लुब्धा हि मृगपदचिह्नदर्शनेन मृगाननुधावन्ति, अत्र तु पुष्परजोभिस्तदपङ्गात् बुध्यास्तदभिमुखा न भवन्तीति तेषां भयराहित्यमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥

(ख) इयता एतदधिकेन वेगेन जवेन गच्छतीति शेषः ।

(ग) सभाजयिष्यामि सत्करिष्यामि ।

(घ) मलयाचलकुलायात् मलयाचल एव कुलायः पक्षिवासस्थानं; कुलायो नीडमस्त्रियामित्यमरः । आर्य्येति आर्य्यस्य ज्येष्ठस्य सम्पातेः तदाख्यपक्षिणः ।

(ङ) अभिलक्षितः दृष्टः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

राजः । तदतिविषम(च)माशङ्कमानं मां वत्सरामभद्र-स्नेहस्त्वरयति ।

जाम्बवान् । (स्वगतम् ।) वयमप्येतदेव प्रतिपित्सामहे(छ) । (प्रकाशम् ।) सखे ! त्वरस्व । (इति निष्क्रान्तः ।)

जटायुः । (परिक्रम्यावलोक्य च ।) इयमग्रे पञ्चवटी । (सवितर्कम् ।)

नीतो दूरं कनकहरिणश्रद्धया रामभद्रः
पश्चादेनं द्रुतमुपसरत्येष वत्सः कनिष्ठः ।
बिभ्यद् बिभ्यत् प्रविशति ततः पर्णशालां च भिक्षु-
र्धिक्कष्टं भोः प्रथयति निजामाकृतिं रावणोऽयम् ॥७॥

अहह ।

आर्यपुत्रार्यपुत्रेति रुदन्तीं कुररीमिव ।
रथमारोप्य वैदेहीमेष पापः क्व यास्यति ॥८॥

(च) अतिविषमम् अतिव्यसनम् ।

(छ) प्रतिपित्सामहे प्रतिपत्तुं ज्ञातुम् इच्छामः ।

नीत इति । कनकहरिणे काञ्चनमृगे या श्रद्धा विश्वासः तया रामभद्रः दूरं नीतः । पश्चात् एष कनिष्ठो वत्सः लक्ष्मण इत्यर्थः एनं रामं द्रुतं सत्वरम् उपसरति अनुधावति । ततस्तस्मात् भिक्षुः परिव्राजकरूपधर इत्यर्थः रावण इति शेषः बिभ्यत् बिभ्यत् रामादिति शेषः पर्णशालां पत्रकुटीरं प्रविशति च । भोः धिक् कष्टम् अयं भिक्षुरूप इति भावः रावणः निजाम् आकृतिं स्वं रूपं प्रथयति प्रकटयति च । मन्दाक्रान्तावृत्तम् ॥७॥

आर्यपुत्रेति । एष पापः रावणः कुररीमिव उत्क्रोशपक्षिणीमिव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(साटोपं (ज) परिक्रामन् ।) अरेरे रावण !

वधूटीमिच्छाकोर्निजकरतलस्पर्शमलिना-
मिमां कुर्वाणस्य स्फुरति हृदि शोभैव भवतः ।
कुले येषां किन्तु त्वमसि गणितास्तेऽपि गुरवो
न सप्त ब्रह्माणः कथमिव पुलस्त्यप्रभृतयः ॥९॥

(पुनराकाशे ।) अलीकाट्टहासधूमधूसरितदशवक्त्रवल्मीक ! किमात्थ रे राक्षसापसद ! किमात्थ (झ) ।

जगद्विलोभि सीताख्यमामिषं हरतो मम ।
अयं किल जरद्गृध्रः करादाच्छिद्य नेष्यति ॥१०॥ इति ।

आर्यपुत्र आर्यपुत्र ! इति रुदन्तीं वैदेहीं रथम् आरोप्य क्व यास्यति ? अनुष्टुब्वृत्तम् ॥८॥

(ज: साटोपं ससम्भ्रमं सत्वरं वा ।

वधूटीमिति । इच्छाकोः इमां वधूटीं नवीनां वधूमित्यर्थः, अल्पा वधूर्वधूटी स्यादित्यमरः । निजस्य करतलस्पर्शेन मलिनां कलङ्कितां कुर्वाणस्य भवतः हृदि शोभैव आनन्दजनितविकास एव न तु लज्जेति भावः स्फुरति प्रसरति, किन्तु त्वं येषां कुले असि जात इति शेषः गुरवः, पुलस्त्यप्रभृतयः तेऽपि सप्त ब्रह्माणः सप्तर्षय इत्यर्थः न गणिताः त्वयेति शेषः, महात्मानस्तव पूर्वपुरुषाः कलङ्किता इति भावः । शिखरिणीवृत्तम् ॥ ९ ॥

(झ) अलीकेति अलीकः वृथा अट्टहासः महाहासः धूमः तेन धूसरितः पांशुल इत्यर्थः दशवक्त्र एव वल्मीकः कीटविशेषः तत्सम्बुद्धौ । राक्षसापसद ! राक्षसाधम ! आत्थ ब्रवीषि ।

जगदिति । अयं गृध्रः जगतां विलोभि लोभविषयं स्पृहणीयमित्यर्थः सीताख्यम् आमिषं भोग्यवस्तु मांसं वा, उत्कृष्टे पक्षे भोगे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आः पाप ! कथमेवमभिदधासि (ञ)। तिष्ठ तिष्ठ।
भुजविटपमदेन व्यर्थमन्धंभविष्णु-
र्धिगपसरसि चौरङ्कारमाक्रुश्यमानः।
त्वदुरसि विदधातु स्वामपस्कारकेलिं
कुटिलकरजकोटिक्रूरकर्मा जटायुः ॥११॥

(इति निष्क्रान्तौ ।)

निष्कम्भकः ।

(ततः प्रविशति लक्ष्मणः ।)

लक्ष्मणः । अहो दुर्निवारदारुणक्रोधशोकलज्जागहनो विषमोऽयं दशाविवर्त्तः (क)। यस्मिन्नितिकर्त्तव्यताभिधान-

---

भोग्यवस्तुनि चाभिषमिति विश्वः। हरतः मम करात् हस्तात् आच्छिद्य नेष्यति किलेत्यलीके। अनुष्टुब्वृत्तम् ॥ १० ॥

(ञ) अभिदधासि ब्रवीषि।

भुजेति। भुजा एव विटपाः शाखाः तेषां मदेन गर्वेण व्यर्थम् अन्धंभविष्णुः अन्धीभवन् चौरङ्कारं चौर्यं कृत्वेत्यर्थः आक्रुश्यमानः श्लाघमानः सन् अपसरसि पलायसे धिक् एतदिति शेषः। कुटिलानां दारुणानां करजानां नखराणां कोटिभिः अग्रैः क्रूरं भीषणं कर्म यस्य तथोक्तः जटायुः तव उरसि रक्षसि स्वाम् अपस्कारकेलिं नख-विदारणरूपं कर्म विदधातु करोतु। मालिनीवृत्तम् ॥ ११ ॥

(क) दुर्निवारेति दुर्निवारैः निवारयितुमशक्यैः अतएव दारुणैः महद्भिः क्रोधैः शत्रुं प्रति विद्वेषैः शोकैः प्रियजनविच्छेदजनितैः दुःखैः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(ख)मप्यस्माकमनौपयिकम् (ग)। तथाहि।

तत्ताट्टग्दृग्यकण्ठवञ्चनरुषा धूमायमानो गिरं
नार्द्धोक्तप्रविलीनवर्णविधुरामार्य्यः समाप्नोति मे।
चापे तातजटायुजीवितकथापर्य्यन्तधूमायित-
क्रोधोत्पीडनिपीतशोकजडिमा दृष्टिस्तु विश्राम्यति ॥१२॥

लज्जया कुलवधूरेकाकिनीं रक्षितुं शक्ता, अतः कापुरुषा वयं लोके कथं मुखं दर्शयिष्याम इति व्रीड़या गहनः गभीरः विषमः उत्कटः। दशाविवर्त्तः अवस्थापरिणामः।

(ख) यस्मिन् दशाविवर्त्ते। इतिकर्त्तव्यताभिधानं किमत्र कर्त्तव्यमिति कथनम्।

(ग) अनौपयिकम् अयुक्तं, युक्तमौपयिकं लभ्यमित्यमरः। कथने लोकाः अस्मान् किं मंस्यन्ते इति भावः।

तदिति। आर्य्यः रामः तत् तादृशं यत् दृग्यकण्ठस्य वञ्चनं सीताहरणरूपं प्रतारणं तेन या रुट् रोषः तया धूमायमानः धूमसुद्वमन् अग्निरिवेति भावः मे मम समीपे अर्द्धोक्तः अर्द्धोच्चरित एव प्रविलीनः प्रकर्षेण लयं गतः यो वर्णः अक्षरं तेन विधुरां विपर्य्यस्तां गिरं वाचं न समाप्नोति न शेषतामापादयति किञ्चिद् विवक्षुरपि सततविमनस्कतया अर्थं वदन् विस्मयति वा मोहमापद्यते इति भावः। तु किन्तु दृष्टिः आर्य्यस्येति शेषः तातस्य अनुकम्पस्य पितृसखत्वात् पितृतुल्यस्य वा जटायोः जीवितकथायाः पर्य्यन्तः अवसानम्, एतेन रावणेन हतो जटायुवधः सूचितः। तेन धूमायितः धूमोद्गारी यः क्रोधः तस्य उत्पीडेन अतिशयेन पीतः नाशितः शोकेन जड़िमा जाड्यं सपाप्यत्वमिति यावत् यस्याः तादृशी दृष्टिः चापे धनुषि विश्राम्यति पततीत्यर्थः। शत्रुजयार्थं धनुर्धारणाय यत्नं करोतीति भावः। शार्दूलविक्रीड़ितं वृत्तम् ॥ १२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्याभिमुखः।) इत इत आर्य मारीचमथन! (घ) दृश्यन्तामसूरवाचीं ककुभ(ङ)मभि वर्धमाना विन्ध्यवनवीथिभूमयः (च)।

(प्रविश्य।)

रामः। (आकाशे लक्ष्यं बद्ध्वा।)

कुले वा शौर्ये वा भुजसमुदये वा तपसि वा
बभूवुर्न प्राञ्चस्त्वमिव भवितारो न चरमे।
अहो दिङ्मोहस्ते समजनि चिरादेष न खलु
प्रवीराणां पन्था दशवदन! येनासि चलितः॥१३॥

(घ) मारीचमथन! मारीचविनाशन! एतेन मारीचवध उक्तः।

(ङ) अवाचीं दक्षिणां ककुभं दिशम्।

(च) विन्ध्येति विन्ध्यस्य गिरेः वनवीथिभूमयः काननश्रेणीप्रदेशाः।

कुले इति। रे दशवदन! रावण! कुले वंशे वा शौर्ये वीर्ये वा भुजसमुदये बाहुसमूहे वा तपसि वा प्राञ्चः पूर्वतमाः पुरुषा इति शेषः त्वमिव न बभूवुः त्वत्सदृशा नासन्, चरमे परजातास्त्वमिव न भवितारः तव तुल्या न भविष्यन्ति। अहो आश्चर्यं ते तव दिङ्मोहः दिग्भ्रमः समजनि सञ्जातः, येन चलितः गतः असि, एषः चिरात् कदापीति भावः प्रवीराणां प्रकृष्टानां वीराणां पन्था मार्गः चौर्यवृत्तिरूप इति भावः न खलु नैव। प्रवीराः कदापि चौर्यमार्गेण चलन्तीति भावः। शिखरिणीवृत्तम्॥१३॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विस्मृत्य । सखेदस्मितम् ।) हंहो पौलस्त्य !

सिद्धश्रोत्रपरम्परापरिगतैरेभिः प्रपौत्रस्य ते
वृत्तैरद्य पुलस्त्यवर्जमभितः स्त्रीरेषु देवर्षिषु ।
विष्वग्वृत्तिरसङ्गता नमयितुं दुर्वारलज्जाभर-
म्लानश्रीस्तु चतुर्मुखो भगवतो धातुः कथं वर्त्तते ॥ २४ ॥

(क्षणमनुध्याय ।) हा प्रिये विदेहराजपुत्रि ! (इति संवरणं (ङ) नाटयति ।)

लक्ष्मणः । (उपसृत्य । आर्य ! कोऽयमभिषङ्गो (ज) नाम भवादृशानप्यासदीकरोति (झ) ।

सिद्धेति । सिद्धानां देवयोनिविशेषाणां श्रोत्रपरम्परापरिगतैः कर्णपरम्पराप्राप्तैः प्रपौत्रस्य पुत्रः पुलस्त्यः पौत्रः विश्रवाः तत्पुत्रस्य ते तव वृत्तैः चरितैः चौर्य्येण परदारहरणरूपेणेति भावः पुलस्त्यवर्जं पुलस्त्यं विहाय अभितः समन्तात् देवर्षिषु स्त्रीरेषु विकाश्यमानेषु सत्सु विष्वक् चतुर्दिक्षु वृत्तिः स्थितिर्यस्याः तथोक्ता अतएव नमयितुं लज्जातिशयात् अवनतीकर्त्तुम् असङ्गता अपाविता दुर्वारेण लज्जाभरेण लज्जातिशयेन म्लाना श्रीः कान्तिर्यस्याः तथाभूता भगवतः धातुः ब्रह्मणः चतुर्णां मुखानां समाहारश्चतुर्मुखो तु कथं केन प्रकारेण वर्त्तते तिष्ठति ? लज्जया मुखं नम्रीकृत्य स्थीयते, विधातुस्तु तदपि न घटते इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १४ ॥

(ङ) संवरणं गोपनं महापुरुषत्वव्याघातशङ्कयेति भावः ।

(ज) अभिषङ्गः शोकपरिभव इति यावत्, अभिषङ्गः पराभवे इत्यमरः ।

(झ) आसदीकरोति आश्रयति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पतिते व्यसने दैवाद्दारुणे दारुणात्मनि ।
संवर्मयति वज्रेण धैर्यं हि महतां मनः ॥१५॥

रामः । (दीर्घं निःश्वस्य ।) वत्स !

सहजधैर्यवशंवदवृत्तयो
हृदि रुषश्च शुचश्च नियन्त्रिताः ।
इह तु किं करवै यदपत्रपा
किमपि मामवमत्य विजृम्भते ॥१६॥

लक्ष्मणः । (पुरोऽवलोक्य ।) आर्य ! अवमग्ने तातजटायुषो वीरलोकसाधनसिद्धक्षेत्रमरण्यानीसन्निवेशः (अ) । पश्य ।

पतिते इति । दैवात् भाग्यवशात् दारुणे महति आत्मनि दारुणे भीषणे, दारुणो भीषणे गुरावितिशाश्वतः । व्यसने विपदि पतिते सति धैर्यं हि धैर्यमेव महतां मनः वज्रेण संवर्मयति सन्नाच्छादयति आवृणोतीत्यर्थः, येन मनसो न विचलनं स्यादिति भावः । अनुष्टुब्वृत्तम् ॥ १५ ॥

सहजेति । सहजस्य स्वाभाविकस्य धैर्यस्य वशंवदा वशवर्तिनी वृत्तिर्यासां तथाभूताः रुषश्च क्रोधाश्च शुचश्च शोकाश्च नियन्त्रिताः निरुद्धाः, तु किन्तु अपत्रपा अपरावलोकनजा लज्जा, लज्जा सापत्रपान्यत इत्यमरः । माम् अवमत्य निर्जित्य किमपि अनिर्वचनीयभावेनेति भावः यत् विजृम्भते विस्फुरति, इह अस्मिन् विषये किं करवै ? न किमपि कर्तुं शक्नुयामित्यर्थः । द्रुतविलम्बितं वृत्तं, द्रुतविलम्बितमाह नभौ भराविति तल्लक्षणात् ॥ १६ ॥

(अ) वीरलोकेति वीरस्य संग्रामहतस्येति भावः लोकः स्वर्गः तस्य साधनं हेतुः अतएव सिद्धक्षेत्रं कृतार्थतायाः स्थानमित्यर्थः । अरण्यानीसन्निवेशः महारण्यभागः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भग्नोऽयं कथमस्ति रावणरथस्तातेन वज्राङ्कुर-
क्रूरापस्किरमाणभङ्गुरनखत्रोटित्रुटद्बन्धनः ।

रामः । (सकरुणम् ।)

हा सीरध्वजराजपुत्रि ! स तदा दृष्टस्त्वया धन्यया
पक्षीन्द्रो दशकण्ठकुञ्जरशिरःसञ्चारिपञ्चाननः ॥१७॥

(इति लक्ष्मणमवष्टभ्य ध्यानं नाटयति (ट) ।)

लक्ष्मणः । (स्वगतम् ।) महादोषः खल्वयमतिप्रसज्य-
मानो (ठ) मानसः शोकाख्यो विकारः । तदन्यतः प्रे-
रयामि । (प्रकाशम् ।) आर्य ! पश्य पश्य ।

विन्ध्यगिरिराजकन्यान्तःपुरमेतास्तरङ्गमालिन्यः ।
वेतस्वतीभिरद्भिस्तौर्यत्रिकगुणनिकां दधते ॥१८॥

भग्न इति । तातेन पितृसखत्वात् पितृतुल्येनेत्यर्थः जटायुषा वज्राङ्कुरवत् क्रूराभ्यां दारुणाभ्याम् अपस्किरमाणाभ्यां विदारयन्तीभ्यां भङ्गुराभ्यां कुटिलाभ्यां नखत्रोटिभ्यां नखरचञ्चूभ्यां, चञ्चुस्त्रोटिरभे स्त्रियामित्यमरः । त्रुटत् स्रवत् बन्धनं सन्धिस्थानं यस्य तथाभूतः अतएव भग्नः अयं रावणरथः कथं केन प्रकारेण अस्ति पतितः तिष्ठतीति भावः । हा इति खेदे, सीरध्वजपुत्रि ! जानकि ! तदा हरणकाले इत्यर्थः धन्यया पुण्यवत्या त्वया दशकण्ठ एव कुञ्जरः हस्ती तस्य शिरसि सञ्चरतीति तथोक्तः पञ्चाननः सिंहः, सिंहो मृगेन्द्रः पञ्चास्य इत्यमरः । तत्स्वरूप इत्यर्थः स पक्षीन्द्रः जटायुः दृष्टः । शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥

(ट) अवष्टभ्य आश्रित्य । ध्यानं नाटयति मूर्च्छतीति भावः ।

(ठ) अतिप्रसज्यमानः अतिशयेन वर्द्धमानः ।

विन्ध्येति । एताः तरङ्गमालिन्यः नद्यः वेतस्वतीभिः वाणीरवृक्षयुक्ताभिः अद्भिः जलैः तौर्यत्रिकगुणनिकां नृत्यगीतवाद्या-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (उन्मील्य चक्षुषी दीर्घमुष्णं च निःश्वस्य ।) वत्स ! दर्शनीयमेतत् ।

कुमुद्वनविशायजाग्रदम्भो-
रुहकृतयामिकविभ्रमा रमन्ते ।
मदकलकरिकर्णतालनृत्य-
न्मुखरमयूरमनोरमास्तटिन्यः ॥१९॥

(इति परिक्रामतः ।)

लक्ष्मणः । आर्य ! अयमितो गिरिर्माल्यवान् ।

इह महिषविषाणव्यस्तपाषाणपीठ-
स्खलनसुलभरोहिद्गर्भिणीभ्रूणहत्याः ।

स्यासं, तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयमिति, अभ्यासे गुणनी योग्येति चामरः । दधते कुर्वन्ति । अतएव विन्ध्यगिरिराजस्य कन्यानाम् अन्तःपुरम् एतदिति प्रतिभातीति भावः । आर्याछन्दम् ॥ १८ ॥

कुमुदेति । कुमुद्वनेन सह विशायेन पर्यायेण जाग्रद्भिः विकसद्भिरिति यावत् रात्रौ कुमुद्वनानि दिवा अम्भोरुहाणि जाग्रन्तीत्येवंरूपेणेति भावः कृतः यामिकानां प्रहरिणां विभ्रमः विलासः व्यापार इति यावत् यासु ताः तथा मदकलैः मदोद्गतैः अतएव करिणां हस्तिनां कर्णतालेन नृत्यद्भिः सुखरैः शब्दायमानैः केकारवं कुर्वद्भिरिति भावः मयूरैः मनोरमाः मनोहारिण्यः तटिन्यः नद्यः रमन्ते क्रीडन्ति रतिं जनयन्तीति भावः । पुष्पिताग्राछन्दम् ॥१९॥

इहेति । इह अस्मिन् प्रदेशे वनान्ताः वनसीमानः महिषाणां विषाणैः शृङ्गैः व्यस्तेषु विपर्यस्तेषु पाषाणपीठेषु स्खलनेन पादप्रच्यवनेनेत्यर्थः सुलभाः सहसा भवा इति यावत् रोहिद्गर्भिणीनां गर्भ-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कुहरविहरमाणप्रौढभल्लूकहिक्का-
चयचकितकिरातस्खलन्तश्चला वनान्ताः ॥२०॥

रामः । (चिरं दृष्ट्वा सकरुणाक्षम् ।)

प्रतिपरिसरं भूयानर्घः शिखण्डभृतां यथा-
मिलितनलिभिः संभुज्यन्ते कदम्बविभूतयः ।
अभिनवघनव्यूढोरस्कः प्रवर्षति माल्यवान्
विषधरवधूगर्भाधानप्रियङ्करणीरपः ॥२१॥

वत्स लक्ष्मण ! धारय माम् । न शक्नोमि स्तम्भयितु(ङ)मात्मानम् ।

वतीनां हरीणामित्यर्थः भ्रूणहत्या गर्भप्रच्युतिरिति यावत् गर्भस्थशिशुविनाशो वा येषु तथोक्ताः तथा कुहरेषु गह्वरेषु विहरमाणानां तिष्ठतामित्यर्थः प्रौढानां महतां भल्लूकानां हिक्काचयेन शब्दविशेषसमूहेन चकितानां भीतानां किरातानां व्याधानां स्खलितानि हस्तात् स्खलितानि शस्त्राणि येषु तथाविधाः दृश्यन्ते इति शेषः । मालिनीवृत्तम् ॥२०॥

प्रतिपरिसरमिति । प्रतिपरिसरं परिसरः पर्यन्तभूः तस्मिन्, विभक्त्यर्थे अव्ययीभावः । शिखण्डभृतां मयूराणां भूयान् अत्यन्तः अर्घः महोत्सवः विद्यते इति शेषः तथा अलिभिः भ्रमरैः यथामिलितं यथोपस्थितं कदम्बविभूतयः नीपसम्पदः तत्कुसुमानीति भावः संभुज्यन्ते सम्भोगविषयीक्रियन्ते । किञ्च अभिनवेन नूतनेन घनेन मेघेन व्यूढम् आश्रितम् उरः वक्षःस्थलं मध्यभागो वा यस्य तथाभूतः माल्यवान् विषधरवधूनां भुजङ्गानां गर्भाधानरूपं प्रियं क्रियते आभिरिति तथोक्ताः अपः नवोदकानीत्यर्थः प्रवर्षति । वर्षासु नवोदकसम्पर्कात् भुजङ्गीनां गर्भाधानमहोत्सवः सम्पद्यते इति प्रसिद्धिः । एतेन वर्षागम उक्तः । हरिणीवृत्तम् ॥२१॥

(ङ) स्तम्भयितुं स्थिरीकर्तुमित्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इयमविरलश्वासा शुष्यन्मुखी भिदुरस्वरा
तनुरवयवैः श्रान्तस्रस्तैरुपैति विवर्णताम् ।
स्फुरति जड़ता वाष्पायेते दृशौ गलति स्मृति-
र्मयि रसतया शोको भावस्थिरेण विपच्यते ॥२२॥

इयमिति । अविरला घनाः श्वासाः यस्याः सा, शुष्यत् शोषं गच्छत् मुखं यस्याः तथोक्ता भिदुरः भिन्नः स्वरः यस्याः तथाविधा इयं तनुः शरीरं श्रान्तानि क्लान्तानि स्रस्तानि विवशतां गतानि तैः अवयवैः अङ्गैः विवर्णतां मलिनतां उपैति प्राप्नोति । जड़ता जाड्यम् अचेतनभाव इति यावत् स्फुरति प्रसरति । दृशौ नेत्रे वाष्पायेते वाष्पमुत्सृजतः । स्मृतिः स्मरणशक्तिः गलति नश्यति । शोको भावः चिरेण मयि रसतया करुणाख्यरसरूपेण विपच्यते विशेषेण परिणतो भवतीत्यर्थः करुणरसस्य सर्वे धर्मा मयि सम्यति वर्त्तन्ते इति भावः । उक्तञ्च दर्पणे । इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् । शोकोऽत्र स्थायिभावः स्यात्योच्यमानालम्बनं मतम् । तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः । अनुभावा दैवनिन्दा भूपातक्रन्दितादयः । धैर्यस्मृत्युच्छ्वासनिःश्वासस्तम्भलपनानि च । निर्वेदशङ्कापस्मारव्याधिग्लानिस्मृतिश्रमाः । विषादजड़तोन्मादचिन्ताद्या व्यभिचारिणः । इति । वस्तुतस्तु करुणविप्रलम्भ एवायं रसः । उक्तञ्च तत्रैव । यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये । विप्रलभ्यते यदेष-स्तदा भवेत् करुणविप्रलम्भाख्यः ॥ इति । लोकान्तरं भिन्नलोकम् अदर्शनविषयमिति यावत् । एकः यथासम्भवमन्योऽपीति भावः । अत्रापि करुणरसवत् सर्वे अनुभावा व्यभिचारिणश्च यथायथं सम्भवन्तीति बोध्यम् । कविनीतम् ॥ २२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(इति लक्ष्मणेन धार्यमाणो निमीलिताक्ष एव ।) हा प्रिये दण्डकारण्यविहारसब्रह्मचारिणि (ढ)। (इति पुनः संदृष्टुते (ण) ।)

लक्ष्मणः । (सखेदमात्मगतम् ।) केन पुनरेष रसो रसान्तरेण तिरस्क्रियते (त)।

(नेपथ्ये ।)

आः पाप कबन्धहतक ! अयं न भवसि (थ)।

रामः । (आकर्ण्य । ससंभ्रमम् ।) वत्स लक्ष्मण ! दुरात्मना दनुकबन्धेन कलहायमानो (द) वयस्यस्ते गृह इव श्रूयते (ध)। बहुच्छलानि (न) रक्षांसि। तत्त्वरितमभ्युपपद्यस्व (प)।

लक्ष्मणः । तथा । (इति निष्क्रान्तः ।)

(ढ) दण्डकारण्येति दण्डकारण्येषु यो विहारः तत्र सब्रह्मचारिणि सहाध्यायिनि ।

(ण) संदृष्टुते संवरणं नाटयति ज्ञानोदयादिति भावः ।

(त) एष रसः करुण इत्यर्थः । रसान्तरेण अन्येन रसेन वीररौद्रादिनेत्यर्थः । तिरस्क्रियते आच्छाद्यते दूरीक्रियते इति यावत् ।

(थ) भवसि जीवसि ।

(द) दनुकबन्धेन दनुर्नाम कबन्ध इव कबन्धः कुक्षिस्थोदरतया शिरःशून्य इव प्रतीयमान इति यावत् तेन । कलहायमानः कलहं कुर्वन् ।

(ध) गृह इव श्रूयते स्वरानुभवादिति भावः ।

(न) बहुच्छलानि छिद्रबहुलानि ।

(प) अभ्युपपद्यस्व अनुगृहाण साहाय्यदानेन मिलमिति शेषः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (पार्श्वतोऽवलोक्य । सकरुणम् ।) देवि वामशीले(क) सीरध्वजराजनन्दिनि ! इयं ते विश्वविस्रम्भमर्मवेदिनो निचुलनिकुञ्जलेखा (ब) । इह हि

स्ववपुषि नखलक्ष्म स्वेन कृत्वा भवत्या
कृतमिति चतुराणां दर्शयिष्ये सखीनाम् ।
इति रहसि मया ते भीषितायाः स्मरामि
स्मरपरिमलमुद्राभङ्गसर्वंसहायाः ॥२३॥

(इति धनुरवष्टभ्य लक्ष्मणदत्तान्तदत्तचेतास्तथैवास्ते ।)

(ततः प्रविशति लक्ष्मणो गुहश्च ।)

गुहः । जयतु जयतु देवः ।

विनेता वर्णानामयमभयदुर्गं दिविषदां
कनिष्ठः काकुत्स्थो जयति जगदाश्चर्यचरितः ।

(क) वामशीले ! चारुचरित्रे !

(ब) विश्वविस्रम्भमर्मवेदिनी समस्तविश्वासतत्त्वज्ञा । निचुलनिकुञ्जरेखा निचुलनिकुञ्जस्य स्वयवेतसरचितविहारकाननस्य रेखा पङ्क्तिः ।

स्ववपुषीति । स्ववपुषि निजशरीरे स्वेन आत्मना नखलक्ष्म नखक्षतचिह्नं कृत्वा अहं भवत्या कृतमिति चतुराणां सखीनां दर्शयिष्ये इतीत्थं रहसि मया भीषितायाः भयं गमितायाः स्मरः कामः तस्य परिमलः विमर्दोत्थः गन्धः तस्य मुद्राचिह्नं तस्या भङ्गे सर्वसहायाः सर्वसहनशीलायाः ते तव स्मरामि, कर्मणि षष्ठी । मालिनीवृत्तम् ॥ २३ ॥

विनेतेति । वर्णानां ब्राह्मणादीनां विनेता रक्षकः दिविषदां देवानाम् अभयदुर्गं भयनिवारणार्थं शत्रुदुर्गमस्थानमित्यर्थः जगति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यदस्त्रैः पाप्मानं रजनिचरजन्मग्रहसृजं
विजित्य स्वर्लोकानविकलमुपातिष्ठत दनुः ॥२४॥

रामः । साधु वृत्तम् । शिवाः (भ) सन्तु तस्य देवयानाः (म) पन्थानः । वत्स गुह ! वियति विवर्त्तमानः (य) कश्चिद्बल इव लक्षितः किमसौ तेनैव योजनबाहुना प्रहरणीकृतः (र) ।

गुहः । देव !

दुन्दुभिं नाम दैत्येन्द्रं निष्पिपेष कपीश्वरः ।
तस्य कङ्कालकूटोऽयं कुमारेण विलोड़ितः ॥२५॥

आश्चर्यं चरितं यस्य तथाभूतः कनिष्ठः काकुत्स्थः लक्ष्मण इत्यर्थः जयति, दनुः दैत्यभेदः यस्य अस्त्रैः रजनिचरजन्म राक्षसजननं तस्य ग्रहः ग्रहणं सृजतीति तथोक्तं राक्षसयोनिप्राप्तिकारणमित्यर्थः पाप्मानं पातकं विजित्य नाशयित्वेति भावः अविकलं सम्यक् स्वर्लोकान् उपातिष्ठत प्राप । एष पूर्वं कश्चिद् गन्धर्वः शापात् राक्षसयोनिं प्राप । तत्र लक्ष्मणास्त्रात् तस्य शापान्त इति स्थितिरिति पुराणवार्त्ता । शिखरिणीवृत्तम् ॥ २४ ॥

(भ) शिवाः शोभनाः मङ्गल्या इति यावत् ।

(म) देवयानाः देवानां यानं गमनं यैः ते ।

(य) वियति आकाशे । विवर्त्तमानः विपर्य्यासेन तिष्ठन् ।

(र) योजनबाहुना दनुकबन्धेनेत्यर्थः । प्रहरणीकृतः लक्ष्मणविनाशार्थम् अङ्गीकृतः ।

दुन्दुभिमिति । कपीश्वरो वाली दुन्दुभिं नाम दैत्येन्द्रं निष्पिपेष निहतवानित्यर्थः । अयं तस्य दुन्दुभेः कङ्कालकूटः अस्थिराशिः कुमारेण लक्ष्मणेन विलोड़ितः धनुष्कोट्या विपर्य्यासित इत्यर्थः । अनुष्टुब्वृत्तम् ॥ २५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तन्निमित्तजन्मा (ख) सम्प्रति वालिनो महानभियोगः (ग) सम्भाव्यते ।

लक्ष्मणः । ततः किम् ।

रामः । वत्स ! मा मैवम् । माननीयः खल्वसौ पुराणवीरो महेन्द्रसूनुः (घ) । (गुहं प्रति ।) कुतः पुनरागच्छतो वत्सस्य योजनबाहुरन्तरायः (ष) संवृत्तः ।

गुहः । देव ! व्योमयानेन सत्वरमपक्रामति (स) रावणे सीतादेव्याः ।

रामः । (साशङ्कमात्मगतम् ।) किं पुनरस्याः ।

गुहः । यदुत्तरीयमुत्सृज्य हनूमानग्रहीत्, तदेतद्देव ! गुणानुरागिणा (ह) कुमारसुग्रीवेण सभाजयितु(च्च)मुपस्थितवतो मम हस्ते देवस्य प्राभृतीकृतम् (क) ।

(इति रामस्य हस्ते सीताया उत्तरीयमर्पयति ।)

(ख) तन्निमित्तजन्मा तन्निबन्धनः ।

(ग) अभियोगः युद्धान् प्रति आक्रमणमिति यावत् ।

(घ) महेन्द्रसूनुः इन्द्रसुतः वालीत्यर्थः ।

(ष) योजनबाहुः दनुकबन्धः । अन्तरायः विघ्नः ।

(स) अपक्रामति अपगच्छति पलायमाने इति यावत् ।

(ह) गुणानुरागिणा गुणपक्षपातिना ।

(च) सभाजयितुं सत्कर्त्तुम् ।

(क) प्राभृतीकृतम् उपहारत्वेन दत्तमित्यर्थः । सुग्रीवसभाजनार्थम् आगच्छन्नहं पथि योजनबाहुना आक्रान्तोऽस्मीत्यनेन सूचितम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (गृहीत्वा हृदये निधाय । सास्रम् ।) हा देवि विदेहराजनन्दिनि । कथमुत्तरीयशेषा (ख) दृश्यसे । (इति निमीलिताक्षो लक्ष्मणमवष्टभ्नाति (ग) ।)

लक्ष्मणः । (निःश्वस्य ।) सखे निषादराज ! कुशलं सुग्रीवस्य ।

गुहः । अद्य त्वयि वार्त्तामनुयुञ्जाने (घ) ।

रामः । (स्वगतम् ।)

जानन्नेव दशाननोऽपहरते नः प्रेयसीमस्ति वा
चन्द्रापीड़मुपासितुं स हि शिरोदाम स्वयं कृत्तवान् ।
तत्रासो रजनीचरस्य न पुनः कण्ठाटवीकर्त्तनाद्
धिग् बाणैर्मम चन्द्रहासहतकक्षुण्णोऽयमध्वा वृतः ॥२६॥

(ख) उत्तरीयशेषा उत्तरीयं शेषो यस्याः तथाभूता ।

(ग) अवष्टभ्नाति अवलम्बते ।

(घ) अनुयुञ्जाने पृच्छति ।

जानन्निति । दशाननः नः अस्माकं प्रेयसीं सीतां जानन्नेव अथवा नः अस्मान् राक्षसकुलध्वंसिन इति भावः जानन्नपि प्रेयसीं सीताम् अपहरते चोरयति । अस्ति वा अथवा एतत् युज्यते इत्यर्थः, हि यतः सः रावणः चन्द्रापीड़ं शिवम् उपासितुं स्वयं शिरोदाम निजमुण्डमालामित्यर्थः कृत्तवान् चिच्छेद । तत् तस्मात् मम शनैः शनैः कण्ठाटवीकर्त्तनात् कण्ठकाननच्छेदनात् रजनीचरस्य राक्षसस्य रावणस्य त्रासः भयं न पुनर्नैवेत्यर्थः । यतः चन्द्रहासहतकेन चन्द्रहासो रावणखड्गः स एव हतकः तेन क्षुण्णः अभ्यस्तः अयम् अध्वा मार्गः शिरश्छेदनरूपः वृतः प्रार्थितः । धिक् एतादृशं कण्ठच्छेदनसम्भवेऽपि दुराचारात् अपराङ्मुखं रावणमिति शेषः । धिग् निर्भर्त्सननिन्द्योरित्यमरः ॥ २६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । अर्य्य ! कथमस्मासु वनौकसो(ङ)ऽपि सौजन्य(च)मनुरुध्यन्ते ।

रामः । किमुच्यते । सुग्रीवः सनाभि(छ)रयमस्माकम् । अस्य हि प्रभवो (ज) भगवानैक्ष्वाकस्य प्रसविता सहस्रदीधितिः । (हृदयस्थमुत्तरीयं दृष्ट्वा ।) वत्स गुह ! स्पृहयामि सुग्रीवहनूमतोर्दर्शनाय । तदृष्यमूकगामिनं मार्गमावेदय ।

गुहः । सहर्षमात्मगतम् ।) कथमचिरादेव फलवती (झ) जाम्बवतो मन्त्रशक्तिः । (प्रकाशम् ।) इत इतो मतङ्गाश्रमवर्त्मना (ञ) देवः ।

(इति सर्वे परिक्रामन्ति ।)

गुहः । देव ! पश्य पश्य ।

विदधति मुदमक्ष्णोर्नूतनानूपनीप-
प्रहसनसहचर्य्यानित्यनृत्यन्मयूराः ।
फलपुलकितजम्बूकृष्णकूजत्कपोत-
प्रियशबरपुरन्ध्रीबन्धवो विन्ध्यलेखाः ॥२१॥

(ङ) वनौकसः वनवासिनः ।

(च) सौजन्यं सद्भावम् ।

(छ) सनाभिः सपिण्डः, सपिण्डास्तु सनाभय इत्यमरः ।

(ज) प्रभवः जन्मकारणम् ।

(झ) फलवती चरितार्थेत्यर्थः ।

(ञ) मतङ्गाश्रमवर्त्मना मतङ्गस्य मुनेराश्रमस्य वर्त्म मार्गः तेन ।

विदधतीति । नूतनानां नवानाम् अनूपनीपानां जलप्रायप्रदेशस्थकदम्बानां, जलप्रायमनूपं स्यादित्यमरः । प्रहसनं विकासः तस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (सर्वतो निरूप्य । सखेदम् ।)

समन्तादुन्मीलद्बहललहरीलङ्घनकला-
लघुप्रेङ्खत्पम्पानिलविदलदेलासुरभयः ।
अविद्यावैदेहीशतलिपिकरीणां मम धिया-
ममी हस्तालम्बं विपिनविनिवेशा विदधते ॥२८॥

लक्ष्मणः । आर्य्य ! इतस्तावत् ।

भयभ्रष्टप्रेयोविरहनिरहङ्कारहरिणी-
मुखालोकोन्मीलद्रुककरुणरुग्णां सहचरीम् ।

सहचर्य्या सङ्गेन नित्यं सततं नृत्यन्तः मयूरा यासु तथोक्ताः तथा फलैः पुलकिता इव पुलकिता ये जम्बूकुञ्जा जम्बूकाननानि तेषु कूजन्तः ये कपोताः पारावताः तेषु प्रियाणां लालसानां शबरपुरन्ध्रीणां व्याधपत्नीनां बन्धवः मित्राणि आश्रयभूता इति भावः विन्ध्यलेखाः विन्ध्यपर्वतश्रेण्यः अक्ष्णोः नयनयोः सुदं प्रीतिं विदधति जनयन्ति । मालिनीवृत्तम् ॥ २७ ॥

समन्तादिति । समन्तात् सर्वतः उन्मीलन्तीनां प्रसरन्तीनां बहलानां बहूनां लहरीणां तरङ्गाणां लङ्घनकलया अतिक्रमणक्रियया लघु यथा तथा प्रेङ्खत् सञ्चरत् यः पम्पानिलः तेन तत्सङ्गेनेति भावः विदलन्तीभिः विकसन्तीभिः एलाभिः सुरभयः सुगन्धाः अमी विपिनविनिवेशाः काननसंस्थानानि अविद्यावैदेहीशतस्य मिथ्याकल्पितसीताशतस्य लिपिकरीणां सीतायां निविष्टचित्तत्वात् सर्वत्रैव सीता सीतेति भावयित्रीणामिति भावः मम धियां बुद्धीनां हस्तालम्बं हस्तावलम्बनं विदधते कुर्वन्ति । बुद्धिर्मम सीतानिविष्टापि एतत्काननसन्निवेशदर्शनेन प्रीतिमनुभवतीति भावः । शिखरिणीवृत्तम् ॥ २८ ॥

भयेति । भयेन भ्रष्टस्य पलायितस्य प्रेयसः कान्तस्य विरहेण

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विलोक्य म्लेच्छन्तीमलमलमिति प्राक्प्रणिहितं
शरव्याल्लुब्धानां हृदयमपराद्धं न तु शराः ॥२९॥

रामः । (सास्रम् । हा देवि जानकि !

मारीचमृगयाव्यग्रे मयि प्राप्ते च रावणे ।
आसामिव कुरङ्गीणां तवोत्पश्यामि लोचने ॥३०॥

लक्ष्मणः । (स्वगतम् ।) कः पुनरुपायो येन विनोद्यते(ट)
हृदयमार्य्यस्य ।

(नेपथ्ये ।)

भो भो वनौकसः ! (ठ) कथयन्तु भवन्तः । केनास्मद्-

निरहङ्कारा गर्वरहिता विपश्येति भावः या हरिणी तस्याः मुखा-लोकेन उन्मोलन् उद्भवन् गुरुर्महान् यः करुणः शोकः दयेति यावत् तेन रुग्णां व्यथिताम् अलम् अलम् मैवं मैवम् इति म्लेच्छन्तीं स्फुटमभिदधतीं चारुभाषया भाषमाणां वा, म्लेच्छनं चारुभाषायामिति विश्वः । सहचरीं कान्तां विलोक्य दृष्ट्वा लुब्धानां व्याधानां प्राक् सहचरीनिषेधात् पूर्वमित्यर्थः प्रणिहितं प्रहितं शरव्ये इति शेषः हृदयं शरव्यात् लक्ष्यात् अपराद्धं च्युतं तद्विनाशात् निवृत्तमभूदिति भावः, तु किन्तु शरा न अपराद्धा इति शेषः प्राक् प्रहितत्वेन तेषामनिवार्य्यत्वादिति भावः । शिखरिणीवृत्तम् ॥ २९ ॥

मारीचेति । मयि मारीचमृगयायां काञ्चनमृगरूपिमारीचवधे इत्यर्थः व्यग्रः उद्यतः तस्मिन् रावणे च प्राप्ते उपस्थिते सति आसां व्याधहस्तगतानामिति भावः कुरङ्गीणां मृगीणामिव तव लोचने कातरे इति भावः उत्पश्यामि मन्ये इत्यर्थः । अनुष्टुब्वृत्तम् ॥३०॥

(ट) विनोद्यते सान्त्वयते सुस्थीक्रियते इत्यर्थः ।

(ठ) वनौकसः वनचारिणः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कीर्त्तिकामिनीकेलिचङ्क्रमणक्रीड़ापर्वतो विवर्त्तितो(ड)ऽयं दनुराजकङ्कालकूटः (ढ) ।

गुहः । (दृष्ट्वा । सभयसंभ्रमम् ।) देव ! पश्य पश्य । कनकमयसहस्रपत्रपुण्डरीकवैकक्षकप्रभापटलेन दुन्दुभिकरङ्कव्यतिकरजन्मना च रोषरागेण त्रिगुणपिशङ्गीं (ण) तनुमादधानः प्लवगराजो(त)ऽयमित एवाभिवर्त्तते ।

पौलस्त्यावयवौघसङ्कटभुजामूलक्षणोन्मूलित-
द्वैराज्यामरावतीं कृतवते वीराय यस्मै हरिः ।
नित्यालोकनकौतुकव्यसनिनीः शङ्के सहस्रं दृशः
पिण्डीकृत्य दलच्छलेन कनकाम्भोजस्रजं दत्तवान् ॥३१॥

(ड) अस्मदिति अस्माकं कीर्त्तिर्यस्य एव कामिनी तस्याः केलिचङ्क्रमणं क्रीड़ाविहारः तस्य क्रीड़ापर्वतः विलासशैलः । विवर्त्तितः विपर्य्यासितः ।

(ढ) दनुराजेति दनुराजस्य दानवेन्द्रस्य कङ्कालकूटः अस्थिचयः ।

(ण) कनकेति कनकमयानां काञ्चनमयानां सहस्रपत्रपुण्डरीकाणां सहस्रदलपद्मानां वैकक्षिकं तिर्य्यगुरसि न्यस्ता माला तस्याः प्रभापटलेन कान्तिनिचयेन । दुन्दुभीति दुन्दुभेर्दानवेन्द्रस्य करङ्कः कङ्कालः तस्य व्यतिकरः विपर्य्यासः तस्मात् जन्म यस्य तथाभूतेन रोषरागेण क्रोधजनितलौहित्येन त्रिगुणपिशङ्गीं स्वतः पिङ्गला ततः काञ्चनवैकक्षिकप्रभया पिङ्गला ततश्च क्रोधेन पिङ्गलेति त्रिराहत्तपिङ्गलामिति यावत् ।

(त) प्लवगराजः वाली ।

पौलस्त्येति । हरिरिन्द्रः पौलस्त्यस्य रावणस्य अवयवौघेन अङ्गसमूहेन सङ्कटं व्याप्तं यत् भुजामूलं कक्षा तेन क्षणम् उन्मूलितं खण्डितं द्वैराज्यं राजद्वयाधिष्ठितत्वमिति यावत् यस्याः तथाभूताम् एकराज-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

क्षणं च देवस्य महावीरसंवादगोष्ठी(घ)यमृष्यमूकयात्रा-मन्तरयिष्यति (ङ) । तदहमग्रतो गत्वा दिष्ट्या (च) वर्ध-यामि सूर्य्यतनयम् (न) ।

रामः । एवमस्तु ।

गुहः । वाचिकं (प) पुनरेतावत्कुमारसुग्रीवस्य यत् 'मित्रपर्य्यायान्तरितं (फ) देवस्य दास्यमिच्छामि' इति ।

वतीमित्यर्थः अमरावतीं कृतवते यज्ञे धीराय वालिने नित्यं सत-तम् आलोकनं दर्शनं पुत्रस्य वालिन इति भावः तस्मिन् यत् कौतुकम् औत्सुक्यं तस्मिन् व्यसनिनीः समासक्ता इत्यर्थः सहस्रं दृशः नेत्राणि दलच्छलेन दलव्याजेन पिण्डीकृत्य एकत्रीकृत्येत्यर्थः कनका-म्भोजस्रजं काञ्चनकमलमालिकां दत्तवान् इति शङ्के मन्ये । पुरा दिशां विजयाय संचरन्तं रावणं स्वस्य जयार्थमागतं वाली कक्षायां निक्षिप्य सप्तसु समुद्रेषु यथाक्रमं सन्ध्यावन्दनं कृतवान् । इति पुराणवार्त्ता । यदा च रावणः वालिनः कक्षायां निक्षिप्तः तदा अमरावती केवलेन इन्द्रेण एकराजवती आसीत् । अन्यदा तस्याः रावणेन इन्द्रेण च द्वैराज्यमिति भावः । मम पुत्रेण अमरावत्या ममैकाधिपत्यं क्षणं स्थापितमिति प्रीत्या देवेन्द्रः तस्मै कनकाम्भोज मालां ददाविति निष्कर्षः । शार्दूलविक्रीडितं वृत्तम् ॥ ३१ ॥

(घ) महावीरेति महावीरेण वालिना संवादः सम्मेलनं स एव गोष्ठी सभा ।

(ङ) अन्तरयिष्यति व्याहनिष्यतीत्यर्थः ।

(च) दिष्ट्या भाग्येन ।

(न) सूर्य्यतनयं सुग्रीवम् ।

(प) वाचिकं सन्देशवाक्, सन्देशवाक् वाचिकं स्यादित्यमरः ।

(फ) मित्रपर्य्यायेण मित्रनाम्ना अन्तरितं व्यवहितम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (अपवार्य ।) वत्स लक्ष्मण ! एवमाह वयस्यस्ते गुहः । किञ्च मन्त्रोत्साहसम्पन्नाना(व)मपि प्रभुशक्ति(भ)-मपेक्षन्ते सिद्धयः । तदहं वालिस्थाने सुग्रीवमभिषिच्य तत्कोषदण्डाभ्यां (म) समग्रशक्तिर्वैरपारं गन्तुमिच्छामि ।

लक्ष्मणः । (सस्मितम् ।) यद्येवमुपयुज्यमानमिन्द्रसूनुमु-पेक्ष्य (य) सुग्रीवेणोपयोक्ष्यमाणेन सन्धिरिति वक्रः खल्वयं पन्थाः (र) ।

रामः । (सस्मितम् ।) वत्स ! साध्वेव ब्रवीषि । किन्तु दृप्यत्पौलस्त्यकण्डूभिदुरभुजभरोषायमाणः कपीन्द्रो नायं नः सन्दधीत क्वचिदपि हि विधौ नैव साहाय्यकामः ।

(व) मन्त्रोत्साहेति मन्त्रेण मन्त्रशक्त्या षाड्गुण्यप्रयोगेणेत्यर्थः उत्साहेन उत्साहशक्त्या च सम्पन्नानां युक्तानाम् ।

(भ) प्रभुशक्तिं कोषदण्डजं तेजः, स प्रभावः प्रतापश्च यत् तेजः कोषदण्डजमित्यमरः । प्रभावमन्त्रोत्साहा मिलिता एव सिद्धये प्रभवन्तीति भावः ।

(म) तत्कोषदण्डाभ्यां तस्य सुग्रीवस्य कोषदण्डाभ्यां कोषः धनं दण्डः सेना ताभ्याम् ।

(य) उपयुज्यमानम् उपयुक्तं सम्यक् शक्तमिति भावः इन्द्रसूनुं वालिनम् । उपेक्ष्य त्यक्त्वा ।

(र) उपयोक्ष्यमाणेन उपयुक्तीकरिष्यमाणेनेत्यर्थः । सन्धिः सम्मेलनम् । वक्रः ऋजुः । पन्था मार्गः उपाय इत्यर्थः । उप-युक्तं परित्यज्य अपरम् उपयुक्तं सम्पाद्य कार्यसाधनात् प्रथमोप-युक्तेनैव कार्यसाधनं श्रेय इति भावः ।

दृप्यदिति । दृप्यतः अहङ्कुर्वतः पौलस्त्यस्य रावणस्य कण्डूभि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सोऽहं सुग्रीवमेतद्दमनदृढ़तरं मित्रमिच्छामि पश्चात्
पारस्त्रैणेयपुत्रव्ययशिथिलशुचं शक्रमाराधयामि ॥३२॥

लक्ष्मणः। साधुदर्शिनी बुद्धिरार्यस्य। किञ्च विधूतशापेन दनुनापि देवभूयमभिलम्भितेन (ल) सन्दिष्टमार्य्यस्य यथा 'अस्य निपादपतेः(व)र्वचसि देवेनावधातव्यम् (श)' इति।

रामः। तद् गुहोऽपि प्रतिदूत्यमर्हति (ष)।

लक्ष्मणः। (गुहं प्रति।) वयस्य! एवमस्मद्गिरा सुग्रीवो वक्तव्यः।

दुरः कण्डूतिमञ्जनः यः भुजभरः बाहुबलमित्यर्थः तेन ऊर्ग्वायमाणः ऊर्ग्व उद्वमन् तेजस्वन् इत्यर्थः अयं कपीन्द्रः वाली नः अस्मान् न सन्दधीत आश्रयेतेत्यर्थः। हि यतः क्वचिदपि विधौ कार्य्ये साहाय्यकामः अस्माकं साहाय्यार्थी नैव। वीर्य्यातिशयाभिमानित्वेन प्रयोजनविरहादिति भावः। सोऽहं साहाय्यार्थी अहं सुग्रीवम् एतस्य वालिनः दमनेन शासनेन दृढ़तरं बलवत्तरं मित्रम् इच्छामि। पश्चात् एतद्दमनानन्तरं शक्रम् इन्द्रं पारस्त्रैणेयस्य परस्त्रीजातस्य पुत्रस्य व्ययेन क्षयेण शिथिला शुक् शोकः यस्य तादृशम् आराधयामि कथमपि प्रीणयामीत्यर्थः। स्रग्धराछन्दस् ॥ ३२ ॥

(ल) देवभूयं देवत्वम्। अभिलम्भितेन प्रापितेन।

(व) निपादपतेः गुहस्य।

(श) अवधातव्यम् अवधानं कर्त्तव्यम्।

(ष) प्रतिदूत्यं प्रतिदूतकर्मेत्यर्थः। यथा सुग्रीवस्यायं दौत्यकर्मणि नियुक्तः तथाहमपि एनं सुग्रीवाय दूतं प्रेषयामीति भावः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

'पितायं रेतोधास्तव तरणिरस्मत्कुलगुरु-
र्मनुर्वैमात्रेयस्तदपि सहजं मित्रमसि नः ।
अथापि भ्रातेयं शिथिलयसि कापेयचपलः
शरास्तन्मे वालिक्षतजरसलोलाः प्रतिभुवः' ॥३३॥

रामः । (विहस्य ।) वत्स गुह ! एष खलु पौलस्त्यगतेना-मर्षेण धूमायमानो (स) यया कयाचिद्वाचा सौमित्रिरभि-दधातु (ह) नाम । सततसमिध्यमानजानकीविरहवैश्वा-नरेण (च) रामचेतसा पुनरग्निसाक्षिकमेव सुग्रीवो मित्र-मभ्युपगतः ।

पितेति । अस्माकं कुलगुरुः अयं तरणिः सूर्यः तव रेतोधाः त्वदुत्पादनार्थं वीर्याधानकर्त्ता पिता जनकः, मनुः अस्मत्पूर्वपुरुषः तव वैमात्रेयः, तत् तस्मात् अपि त्वं नः अस्माकं सहजं स्वाभा-विकं मित्रम् असि । अथापि कपेर्भावः कापेयं तेन चपलः अधीरः अव्यवस्थितचित्त इति यावत् सन् भ्रातेयं भ्रातिभावं सहज-मित्रत्वमिति यावत्, सगोत्रबान्धवभ्रातिबन्धुस्वस्वजनाः समाः । भ्रातेयं बन्धुता तेषां क्रमात् भावसमूहयोरित्यमरः । शिथिलयसि शिथिलं करोषि विपर्यासयसीति भावः । तत् तदा मे मम वालिनः क्षतज-रसेन शोणितास्वादेन लोलाः लुब्धाः शराः प्रतिभुवः लग्नकाः । तव भ्रातित्ववैपरीत्ये वालिमार्गगतिः स्थिरेति भावः । शिखरिणी-वृत्तम् ॥३३॥

(स) पौलस्त्यगतेन रावणगतेन । अमर्षेण क्रोधेन । धूमायमानः धूमवद्वमन् सदसद्विवेकशून्य इति भावः ।

(ह) अभिदधातु वदतु ।

(च) सततेति सततं समिध्यमानः प्रज्वलनः जानकीविरहवैश्वा-नरः सीताविरहाग्निः यस्मिन् तथाभूतेन ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गुहः । (सहर्षम् ।) परमनुगृहीतोऽसौ देवेन विकर्त्तन-तनयः (क) । (सपरिहासस्मितं च ।)

सुग्रीवे यदि पक्षपातमधुरं देव ! त्वदीयं मनः
किं नस्तेन विदाङ्करोतु भगवानम्भोजिनीवल्लभः
नव्येनात्मजराज्यलाभरभसोद्भूतेन यस्तेजसा
पूर्वस्मादधिकेन दुःसहतरो लोकेषु वर्त्तिष्यते ॥२४॥

लक्ष्मणः । (विहस्य ।) कथं तपनतनयस्य (ख) राज्य-मङ्गीकारिता वयं वयस्येन ।

रामः । (स्मितम् ।) वत्स गुह ! तावत् प्रकाशमेवं प्रतिशुश्रूषति (ग) मे हृदयम् ।

(क) विकर्त्तनतनयः सूर्यसूनुः ।

सुग्रीवे इति । हे देव ! त्वदीयं मनः सुग्रीवे यदि पक्षपातेन स्नेहेन मधुरं भवतीति शेषः नः अस्माकं तेन किं सुखमिति शेषः । तत् भगवान् अम्भोजिनीवल्लभः सूर्यः विदाङ्करोतु जानातु तस्य सर्वान्त-र्यामित्वादिति भावः वयं सर्व एव सुखिनो भविष्याम इति भावः । यः अम्भोजिनीवल्लभः नव्येन अभिनवेन आत्मजस्य पुत्रस्य राज्यलाभः तेन यो रभसः हर्षः, रभसो कोपहर्षयोरित्यमरः । तेन उद्भूतः उत्-पन्नः तेन तेजसा पूर्वस्मात् तेजस इति शेषः अधिकेन लोकेषु दुःसह-तरः अतिदुःसह इत्यर्थः शत्रूणामिति शेषः वर्त्तिष्यते भविष्यति सम-धिकतेजसा शत्रुपीड़नेन जगत् आह्लादयिष्यतीति भावः । शार्दूल-विक्रीड़ितं वृत्तम् ॥२४॥

(ख) तपनतनयस्य सुग्रीवस्य ।

(ग) प्रतिशुश्रूषति अङ्गीकरोति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गुहः । (सप्रश्रयस्मितम् (घ) ।) स्वामिन् ! इयमेव महतां शैली (ङ) ।

सन्तो मनसि कृत्यैव प्रवृत्ताः कृत्यवस्तुनि ।
कस्य प्रतिशृणोति स्म कमलेभ्यः श्रियं रविः ॥२५॥

(नेपथ्ये ।)

भो भो वनौकसः ! कथयन्तु भवन्तः । दुन्दुभिकरङ्कविक्षेपसम्भाव्यमानगम्भीरावष्टम्भनिर्भरेण (च) केनास्माकमियं चिरस्य भुजकाण्डकण्डूतिरपनेष्यते (छ) ।

गुहः । (स्वगतम् ।)

मन्ये दर्पामयाविभ्यां नित्यं दोर्भ्यामसर्पणः ।
जाम्बवत्प्रेरणादीप्तः प्राप्तोऽयं प्लवगेश्वरः ॥२६॥

(घ) सप्रश्रयस्मितं सविनयस्मितम् ।

(ङ) शैली रीतिः ।

सन्त इति । सन्तः साधवः मनसि कृत्यैव हृदये कृत्येत्यर्थः कृत्यवस्तुनि कार्यविषये प्रवृत्ताः प्रवर्त्तन्ते इत्यर्थः । तथाहि रविः सूर्यः कमलेभ्यः श्रियं लक्ष्मीं कस्य जनस्य अग्रे इति शेषः प्रतिशृणोति स्म अङ्गीकृतवान् ? न कस्यापीत्यर्थः । अनुष्टुब्वृत्तम् ॥२५॥

(च) दुन्दुभीति दुन्दुभेः दानवेन्द्रस्य करङ्कविक्षेपेण सम्भाव्यमानः अनुमीयमानः गम्भीरः महान् अवष्टम्भनिर्भरः आश्रयातिशयः यस्य तादृशेन ।

(छ) भुजेति भुजौ काण्डाविव तयोः कण्डूतिः कण्डूः अपनेष्यते निराकरिष्यते ।

मन्ये इति । दर्पामयाविभ्यां दर्पज्वरवद्भ्यां दोर्भ्यां भुजाभ्यां नित्यं सततम् असर्पणः क्रोधनः अयं प्लवगेश्वरः वानराजः जाम्बवतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदहमपि वीरयात्रादर्शनसुखं (ज) मुहूर्त्तमनुभवामि ।

(प्रविश्य ।)

वाली । (पुरोऽवलोक्य ।) अये ! प्रसन्नोज्ज्वलाकृती (झ) कावेतौ । नियत(ञ)माभ्यामेकेन दानवनाथकङ्कालोत्क्षेपनिमित्तेन (ट) भवितव्यम् । (स्मृतिमभिनीय । सवितर्कम् ।) आः सन्दिष्टमस्माभिः प्रियसुहृदा लङ्केश्वरेण । यथा

प्रक्लृप्तकान्तारकुमारभक्ति-
दौर्भागिनेयो जनकेन मुक्तः ।
मनुष्यसामन्तसुतो निषङ्गी
सहानुजस्तिष्ठति दण्डकायाम् ॥३७॥

मन्त्रिण इति भावः प्रेरणया दीप्तः ज्वलितः सन् प्राप्तः उपस्थित इति सन्धे । अनुष्टुब्वृत्तम् ॥३६॥

(ज) वीरयात्रेति वीराणां यात्रा युद्धार्थमभियोगः तस्य दर्शनेन सुखम् ।

(झ) प्रसन्नेति प्रसन्ना सौम्या उज्ज्वला दीप्तिमती च आकृतिर्ययोः तथाविधौ ।

(ञ) नियतं निश्चितम् ।

(ट) दानवेति दानवनाथस्य दुन्दुभेरित्यर्थः कङ्कालस्य अस्थ्नः उत्क्षेपः विपर्यासनं तस्य निमित्तं हेतुभूतः तेन ।

प्रक्लृप्तेति । प्रक्लृप्तः प्रकर्षेण कृतः कान्तारे वने कुमारे सुग्रीवे भक्तिः अनुरागः येन तथोक्तः सुग्रीवानुरागीत्यर्थः दुर्भगायाः पत्युरप्रियायाः भार्यायाः कौशल्याया इति भावः अपत्यं पुमान् दौर्भागिनेयः दुर्भगापुत्र इत्यर्थः अतएव जनकेन पित्रा मुक्तः परित्यक्तः निर्वासित इति यावत् मनुष्यसामन्तस्य मानवराजस्य दशरथस्येति भावः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तौ चास्माकं तत्र (ठ) विहारिषु निशाचरेषु पाठक्षरीं वृत्तिमातिष्ठमानौ (ड) भवद्भिः प्रतिकर्त्तव्यौ (ढ) इति । तत्किमयमयञ्च तौ स्याताम् ।

रामः । वत्स लक्ष्मण ! शृणु । किमयं ब्रवीति महावीरः ।

लक्ष्मणः । (किञ्चिदुपसृत्य ।) इत आवाम् । इत इतो भवान् ।

वाली । भोः ! कावेतौ युवाम् ।

लक्ष्मणः । महाभाग ! राघवौ (ण) क्षत्रियावावाम् ।

वाली । आयुष्मन् ! आकारविशेषा एव गमयन्ति (त) जातिविशेषान् । तद्विशेषं ब्रूहि ।

लक्ष्मणः । ननूक्तमेव राघवावावाम् ।

वाली । (सांभ्यसूयमिव ।) आः !

वपुरपि । वहणोति क्षत्रतां को विशेषो

रघुषु यदभिधत्से राघवावित्यभीक्ष्णम् ।

सुतः निषङ्गी तूणीरवान् महाभुजः अनुजेन लक्ष्मणेन सहितः दण्डकायां दण्डारण्ये तिष्ठति वसति । उपजातिवृत्तम् ॥२७॥

(ठ) तत्र दण्डकायाम् ।

(ड) पाटक्षरीं दाक्षवीं वृत्तिं व्यवहारम् । आतिष्ठमानौ कुर्वाणौ निशाचराणामभिभवं कुर्वन्ताविति यावत् ।

(ढ) प्रतिकर्त्तव्यौ प्रतिविधेयौ विनाशनीयाविति यावत् ।

(ण) राघवौ रघुवंशभवौ ।

(त) गमयन्ति बोधयन्ति ।

वपुरिति । वपुरपि शरीरमेव, एवार्थोऽयमपिशब्दः । क्षत्रतां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

परिकलयितुमिष्टं नाम सांस्कारिकं वा-
महह कथमपत्यप्रत्ययान्विचिनोमि ॥२८॥

लक्ष्मणः । (सधैर्यसंरम्भम् (थ) ।) भोः ! आवां तौ राम-लक्ष्मणौ ।

वाली । (सविमर्शं (द)आत्मगतम् ।) कथं 'तौ' इति सर्व-नामपदेन प्रसिद्धावित्याह । तत्किमनयोरेवान्यतरः पिना-कधन्वनो दमयिता (ध) । सोऽपि रामभद्रो रामः स्यात् । भवत्वेवं तावत् । (प्रकाशं विहस्य ।)

एको वेषपरिग्रहः परिकरः साधारणः कर्मणा-
मात्मत्योर्मधुरत्वमेव सदृशं तुल्यैव गम्भीरता ।

त्वत्वंशजातत्वं विद्योतयति प्रकटयति, रघुषु रघुवंशीयेषु युष्माविति शेषः विशेषः प्रभेदः कः ? यत् राघवौ इति अभीक्ष्णं सततम् अभिधत्से ब्रवीषि । अहह खेदे, वां युवयोः इष्टम् अभिमतं सांस्का-रिकं नामकरणाख्यसंस्कारसम्बद्धं नाम अपत्यप्रत्ययात् रघोरपत्ये पुमांसावित्यर्थघटितण्प्रत्ययात् परिकलयितुं ज्ञातुं कथं निश्चि-नोमि निर्णयामि । मालिनीवृत्तम् ॥२८॥

(थ) सधैर्यसंरम्भं सधैर्यक्रोधम् ।

(द) सविमर्शं सवितर्कम् ।

(ध) पिनाकधन्वनः ऐश्वरधनुषः यद्वा पिनाकं धनुर्यस्य तस्य हरस्य दमयिता भङ्क्ता यद्वा अवमन्ता पिनाकभञ्जनादिति भावः ।

एक इति । वेषस्य जटावल्कलादेः परिग्रहः ग्रहणं धारण-मित्यर्थः एकः तुल्यः, कर्मणां धनुर्धारणादीनां परिकरः सन्नाहः साधारणः समानः, आत्मत्योः अवयवयोः मधुरत्वमेव मनोहरत्व-मपि, अत्रैवशब्दोऽप्यर्थः । सदृशं तुल्यं, गम्भीरता दुरवगाहप्रकृतिकत्व'

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तद् द्रष्टुं चिरमुत्सुकोऽस्मि कतरो वां रामभद्रः पुनः
सर्वक्षत्रवधव्रती भृगुपतिर्येनावकीर्णीकृतः ॥३९॥

लक्ष्मणः । (सविनयमिव ।) आर्य सांक्रन्दने ! (न) लक्ष्मण-स्तावदहम् ।

वाली । अयमप्यपरो दाशरथिः कौशिकान्तेवासी रामः ।

लक्ष्मणः । अथ किम् ।

वाली । (सहर्षोल्लासम् । किञ्चिदुच्चैः ।) भो रामभद्र! एष त्रैवर्ण्यमात्रव्यवसितजगतो भार्गवस्यास्त्रगर्भा-दाकृष्टक्षत्रजातिस्त्वमसि पथि गिरामद्य नः सुप्रभातम् । कक्षोषस्त्रेदसद्यःशमितदशमुखास्फोटकण्डूविकारो वीरश्रीदो भुजस्त्वां परिचरतु चिरं चक्षुषी नन्दतां च ॥४०॥

च तस्यैव समानैव, युवयोरिति सर्वत्र सम्बन्धः । पुनः किन्तु येन सर्वेषां क्षत्राणां वधव्रती वधदीक्षितः भृगुपतिः परशुरामः अव-कीर्णीकृतः भ्रष्टक्षत्रवधव्रत इत्यर्थः, अवकीर्णी क्षतव्रत इत्यमरः । कतः सः रामभद्रः वां युवयोर्मध्ये कतरः ? तत् द्रष्टुं चिरम् उत्सुकः कौतुकवान् अस्मि । तदित्यत्र तमिति पाठे तं रामभित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ३९ ॥

(न) सांक्रन्दने ! संक्रन्दन इन्द्रः तस्यापत्यं पुमान् सांक्रन्दनिः तत्सम्बुद्धौ । संक्रन्दनो दुश्चवनस्तुराषाण्मेघवाहन इत्यमरः ।

एष इति । त्रयाणां वर्णानां क्षत्रव्यतिरिक्तानां ब्राह्मणवैश्य-शूद्राणामित्यर्थः समाहारः त्रिवर्णं तस्य भावः त्रैवर्ण्यं तदेव त्रैव-र्ण्यमात्रं तस्मिन् व्यवसितं स्थापितं जगत् , येन तथाविधस्य निःक्ष-त्रियां पृथ्वीं कृतवत इति भावः भार्गवस्य परशुरामस्य अस्त्रगर्भात्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (इदं सहर्षम् ।) स एष महाबाहुः संक्रन्दनसूनुः ।

येन वीरेण गुप्तायां किष्किन्धायामियं मही ।
रावणाभिभवक्लान्ता शश्वदुच्छ्वासमश्नुते ॥४१॥

(इति परिक्रामति ।)

लक्ष्मणः । महाभाग ! अयमार्यः । इत इतो भवान् ।

वाली । (उपसृत्य ।) रामभद्र !

सुरासुराणामक्षभिर्दीव्यतां सभिको मुनिः ।
अद्य मे नारदस्तुष्टो येनासि भुजगोचरः ॥४२॥

कुठाराभ्यन्तरात् आकृष्टा निःसारिता क्षत्रजातिः येन तादृशः क्षत्रियगणोऽर्गवस्य जेतेति भावः एष त्वं गिरां वचसां पथि अस्मि भवसि, तस्मात् अद्य नः अस्माकं सुप्रभातं शोभनं दिनमित्यर्थः । कक्षः भुजामूलं तस्य कक्षस्वेदेन उष्णघर्मजलेन सद्यः सपदि शमितः शान्तिं नीतः दशमुखस्य रावणस्य आस्फोटकण्डूः युद्धकण्डूः विकारः येन तथोक्तः रावणदर्पक्षयकर इति भावः, वीरेषु आद्यः श्रद्धा अनुरागः तद्युक्तः भुजः मनेति शेषः त्वां परिचरतु सेवतां त्वया सह युद्धमाचरत्विति भावः, चक्षुषी नयने च चिरं नन्दताञ्च आनन्दमनुभवताञ्च । स्रग्धराछन्दः ॥ ४० ॥

येनेति । रावणस्य अभिभवेन क्लान्ता इयं मही पृथ्वी येन वीरेण गुप्तायां रक्षितायां रावणाभिभवादिति शेषः किष्किन्धायाम् अधिष्ठायेति शेषः शश्वत् सततम् उच्छ्वासं सुनिश्वासं स्वास्थ्यमिति भावः अश्नुते भजते । अनुष्टुब्वृत्तम् ॥ ४१ ॥

सुरासुराणामिति । अक्षभिः प्राणैः दीव्यतां क्रीडतां युद्धं कुर्वतामिति भावः सुरासुराणां देवासुराणां सभिकः द्यूताध्यक्षः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । महावीर ! किमुच्यते । मूर्धाभिषिक्तोऽसि समरशौण्डानाम् (प) । तथाहि ।

देवः स त्वामसूत द्विषदुपमृदितखर्वधूवेणिबन्ध-
प्रेक्षाधारालवैरप्रसृमरसमरोड्डामरौजा विडौजाः ।
यो विद्योतत्खातबाणव्रणनिवहनिभं निर्भरोद्भङ्गुरभ्रू-
भीमः श्रीमद्भिरङ्गैरुदवहत रुषा रञ्यदक्ष्णां सहस्रम् ।४२।

अपिच ।

वन्दीकृत्य जगद्विजित्वरभुजस्तम्भौघदुःसञ्चरं
रक्षोराजमपि त्वया विदधता सन्न्यासमाधित्रतम् ।

मुनिः नारदः अद्य मे मम तुष्टः, येन भुजगोचरः मद्बाहुपतितः असि । कलहप्रियो नारदः त्वां मद्बाहुपतितं दृष्ट्वा परितुष्यतीति भावः ॥ ४२ ॥

(प) मूर्धाभिषिक्तः राजा । समरशौण्डानां संग्रामभक्तानां संग्रामख्यातानां, शौण्डो मत्तेऽपि विख्याते इति मेदिनी ।

देव इति । स देवः विडौजाः उन्द्रः त्वाम् असूत जनयामास । यः द्विषद्भिः शत्रुभिः असुरैरिति यावत् उपमृदितस्य आक्रान्तस्य खर्वधूनां सुरसुन्दरीणां वेणिबन्धस्य केशपाशस्य प्रेक्षया दर्शनेन धारालं तीक्ष्णं यत् वैरं तेन प्रसृमरं प्रसारि उड्डामरम् उत्कटं ओजः तेजः यस्य तथोक्तः अतएव रुषा क्रोधेन निर्भरम् अत्यर्थम् उद्भङ्गुरया कुटिलया भ्रुवा भीमः भीषणः सन् श्रीमद्भिः अङ्गैः विद्योतात् पश्चात् उत्खाता ये बाणाः शराः शत्रुप्रयुक्ता इति शेषः तेषां व्रणनिवहनिभं क्षतनिचयतुल्यं रञ्यत् रक्तीभवत् अक्ष्णां नेत्राणां सहस्रम् उदवहत दधार । स्रग्धराछन्दः ॥ ४३ ॥

वन्दीकृत्येति । त्वया जगतां विजित्वरैः विजयिभिः भुजस्तम्भौघैः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रत्यक्षीकृतकार्त्तवीर्य्यचरितामुन्मुच्य रेवां समं
सर्वाभिर्महिषीभिरम्बुनिधयो विश्वेऽपि विस्मापिताः ॥४४॥

वाली। (विहस्य।)

चिराय रात्रिञ्चरवीरचक्र-
माराङ्कवैत्रानिक! पश्यतस्त्वाम्।
सुधासधर्माणमिमां च वाचं
न शृण्वतस्तृप्यति मानसं मे ॥४५॥

बाहुरूपसन्नानिवहैः सहस्रबाहुभिरित्यर्थः कार्त्तवीर्य्यस्येति भावः दुःसञ्चरं ततो निःसर्त्तुमशक्यमिति यावत् यद्वा तथाविधबाहुरूपसन्न-निचयैः विंशतिबाहुभिरिति यावत् दुःसञ्चरं दुर्धर्षमित्यर्थः रक्षो-राजमपि रावणमपि वा कथान्येषामित्यपिशब्दार्थः। यन्दीकृत्य कक्षायां निःक्षिप्येति यावत् सन्न्यासमाधिव्रतं सन्न्यासमाधाननियमं विदधता कुर्वता सता, प्रत्यक्षीकृतम् अक्षिगोचरीकृतं कार्त्तवीर्य्यस्य चरितं यया तथोक्तां रेवायां तस्य सततं जलक्रीडनकारित्वात् तत्तीरे च तस्य राजधानीस्थितेश्चेति भावः। रेवां नर्मदां, रेवा तु नर्मदा सोमोद्भवा मेखलकन्यकेत्यमरः। उन्मुच्य विहाय सर्वाभिः महि-षीभिः नदीभिरिति भावः समुद्राणां नदीपतित्वादिति भावः समं सह विश्वेऽपि सर्वेऽपि अम्बुनिधयः समुद्राः विस्मापिताः विस्मयं गमिताः। रेवा तु पत्या समुद्रेण सहितापि दृष्टकार्त्तवीर्य्यचरितत्वात् न विस्मितेति भावः। पुरा जयाय समुपस्थितं रावणं कार्त्तवीर्य्यः सहस्रबाहुभिः निर्जित्य कारायां बबन्धेति पुराणम्। शार्दूलविक्री-डितं वृत्तम् ॥ ४४ ॥

चिरायेति। चिराय सततमिति यावत् रात्रिञ्चरवीरचक्राणां राक्षसवीरसमूहानां मारः मारणं वध इत्यर्थः आङ्कः चिह्नं यस्य तथोक्ते संग्रामे इत्यर्थः वैत्रानिकः विधेनिपुणः तत्सम्बुद्धौ। त्वां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

किन्तु

येनाच्छिद्य समस्तपार्थिवकुलप्राणान्तकं कार्मुकं
रामः सम्प्रति लक्षितो भृगुभुवामुत्सर्गसिद्धां स्रुचम् ।
द्रष्टुं वीर ! चिराय धाम्न भवतस्तद्भूर्भुवःस्वस्त्रयी-
हृन्मर्मव्रणरोपणौषधमिमौ बाहू बहूत्तास्यतः ॥४६॥

रामः । (सस्मितम् ।)

नन्वेतदधिमौर्वीकं युद्धसर्वस्वदक्षिणम् ।
सज्जमस्त्येव मे रक्षोलक्ष्मीमूलहरं धनुः ॥४७॥

पश्यतः अवलोकयतः सुधासधर्माणम् अमृतसदृशीम् इमां वाचं तवेति शेषः शृण्वतश्च मे मम मानसं न हृष्यति न सन्तुष्टं भवति ? अपितु हृष्यत्येवेत्यर्थः । यद्वा न हृष्यति पुनः पुनः तव दर्शनं तव वाक्याद्भुतश्रवणञ्च कर्त्तुमिच्छामीति भावः । उपजातिवृत्तम् ॥४५॥

येनेति । येन समस्तस्य पार्थिवकुलस्य क्षत्रियकुलस्य प्राणान्तकं जीवनापहारकं कार्मुकं भार्गवीयमिति भावः आच्छिद्य आकृष्य भार्गवहस्तादिति शेषः सम्प्रति रामः परशुरामः भृगुभुवां भृगुवंशीयानाम् उत्सर्गसिद्धां स्वभावसिद्धां स्रुचं यज्ञपात्रविशेषं लक्षितः प्रापितः तस्य वीर्य्यक्षयेणेति भावः । हे वीर ! भवतः तत् भूर्भुवःस्वस्त्रयाः त्रिलोक्या इत्यर्थः हृन्मर्मणः हृदयमर्मणः यत् व्रणं क्षतं तस्य रोपणौषधम् उपशमौषधस्वरूपं त्रिलोकीशान्तिस्थापनमिति यावत् धाम तेजः द्रष्टुम् इमौ बाहू मनेति शेषः चिराय बहु यथा तथा उत्तास्यतः उत्सुकीभवतः । शार्दूलविक्रीडितं वृत्तम् ॥४६॥

नन्विति । अधिगता आरूढा मौर्वी ज्या यत्र तथोक्तं, युद्धमेव सर्वस्वदक्षिणा यस्य तादृशं रक्षसां लक्ष्म्या मूलहरं मे मम एतत् धनुः सज्जं प्रस्तुतम् अस्त्येव विद्यत एव । नन्विति सम्बोधने । अनुष्टुब्वृत्तम् ॥ ४७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तन्महाभागोऽपि शस्त्रमादत्ताम् (फ) ।

वाली । (विहस्य ।) साधु भो महाक्षत्रिय ! यथाधर्मम-भिदधासि । किन्तु

नयो हि साङ्ग्रामिक एष दोषतां
यदात्मजातिप्रतिबद्धमायुधम् (ब) ।
अयःकुशीभिः कपयो न शक्तिण-
स्तलश्च मुष्टिश्च नखाश्च सन्ति नः ॥४८॥

लक्ष्मणः । आर्य्य ! साधूक्तं महाभागेन । नित्योपनत-स्वाङ्गशस्त्रैव तैरश्वी (भ) जातिः ।

रामः । (विहस्य । धनुरास्फालयन् ।) अहह !

स्वर्विघ्नप्रसरेण रावणिरसौ यद् दुर्यशोभागिनं
चक्रे गौतमयापयन्वितनुजस्थामानमाखण्डलम् ।

(फ) आदत्तां गृह्णातु ।

(ब) नयः नीतिः । साङ्ग्रामिकः संग्रामसम्बन्धी । दोषतां वाङ्मयशालिनाम् । आत्मजातीति आत्मनः जातिः तत्र प्रतिबद्धं सम्बद्धम् । आयुधम् अस्त्रम् ।

अयःकुशीभिरिति । कपयः वानराः अयःकुशीभिः लोहफालैः न शक्तिणः न शस्त्रवन्तः, लोहफालं शस्त्रं न व्यवहरन्तीति भावः । नः अस्माकं कपीनामिति भावः तलश्च चापटश्च मुष्टिश्च नखाश्च सन्ति, तलमुष्ट्यादय एव स्वाङ्गानि अस्माकमिति भावः ॥ ४८ ॥

(भ) नित्येति नित्यं सततम् उपगतं सुलभत्वेनोपस्थितमित्यर्थः स्वाङ्गमेव शस्त्रं यस्याः तथाविधा । तैरश्वी पायवी ।

स्वरिति । असौ रावणिः रावणसुतो मेघनादः स्वर्विघ्नप्रसरेण

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कक्षागर्त्तकुलीरतां गमयता वीर! त्वया रावणं
तत्संमृष्टमहो विशल्यकरणी जागर्त्ति सत्पुत्रता ॥४९॥
सोऽपि त्वमस्माकमधुना दैवेन शरव्योक्तो(म)ऽसि।

वाली। (सरोषम्।) आः काकुत्स्थ!

अस्मद्दोर्मूलकूलङ्कषविषमभुजग्रन्थिभङ्गप्रसङ्ग-
क्रोशल्लङ्केशदत्तत्रिभुवनविजयख्यातिसर्वस्वदायः।
यः कश्चिद्विक्रमोऽयं स खलु करचुलिक्षत्रसाधारणत्वा-
दन्तर्सन्दायमानो विजितभृगुपतिं त्वामजित्वा दुनोति ॥५०॥

स्वर्गविघ्नकरणेन स्वर्गजयेनेति यावत् गौतमशापेन मन्त्रितं निरुद्धं भुजयोः स्थाम स्थैर्यं बलमित्यर्थः यस्य तथाभूतं, पुरा अहल्यामभिगतम् इन्द्रं तव संग्रामे बाहुबलं नश्यतीति शपामेति पुराणम्। आखण्डलम् इन्द्रं यत् दुर्यशोभागिनं पराजयकरणेनेति भावः चक्रे कृतवान्, हे वीर! त्वया रावणं, कक्षा एव गर्त्तः तत्र कुलीरतां कर्कटतां बहुभुजत्वादिति भावः गमयता प्रापयता सता तत् दुर्यशः संमृष्टं प्रोञ्छितम्। अहो आश्चर्यं विशल्यं क्रियते अनयेति विशल्यकरणी दुःखहारिणीति यावत् सत्पुत्रता उत्कृष्टपुत्रशालित्वमित्यर्थः जयति उत्कर्षाधानं करोतीत्यर्थः। इन्द्रजिता पिता इन्द्रः जित इति इहा त्वं तत्पितरं रावणं तथा कृत्वा जितवानिति तव सत्पुत्रत्वमिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ४९ ॥

(म) शरव्योक्तः लक्ष्योक्तः शरेण विद्ध इति यावत्।

अस्मदिति। अस्माकं दोर्मूलं भुजामूलं कक्षेत्यर्थः तदेव कूलं तत् कषति अभिभवतीति तथोक्तो यो विषमभुजग्रन्थिः भीषणविंशतिभुजरूपो ग्रन्थिः तस्य भङ्गप्रसङ्गेन कक्षया निर्भराच्छादनेनेति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदेहि । विमर्दक्षमां भुवमवतरावः ।

(इति निष्क्रान्तौ ।)

गुहः । (स्वगतम् ।) दिष्ट्या फलित(य)मस्माकं मनोरथेन ।

लक्ष्मणः । (नेपथ्याभिमुखमवलोक्य ।) इदमन्यतो वानरद्वयमार्यस्य पार्ष्णिग्राहमिव संभ्रमादनुप्लवते (र) । तद्दमपि धनुरारोपयामि ।

गुहः । (इदं सहर्षम् ।) कुमार कुमार ! अलमावेगेन(ल) । नन्वयं सुग्रीवो रामभद्रगुणानुरागेण वालिमत्सरेण च द्विगुणितोत्साहः समरसीमान(व)मापतति ।

भावः क्रोधता चीत्कारं कुर्वता लङ्केशेन रावणेन दत्तः त्रिभुवनविजयख्यातिरेव सर्वस्वदायः सर्वधनरूपं देयं वस्तु यस्मै तथाविधः अयं लङ्केश्वरपराजयविषयक इति यावत् यः कश्चित् विक्रमः मदीयः अस्तीति शेषः स खलु निश्चये करचुलिचलसाधारणत्वात् करचुलिः कार्त्तवीर्यार्जुनस्यादिपुरुषः स एव चलः करचुलिचलः तद्वंशीयश्च कार्त्तवीर्यस्तदाख्यया प्रसिद्धः तस्य साधारणत्वात् समत्वात् मया यथा रावणो जितः तथा कार्त्तवीर्येणापि जित इति भावः । अन्तर्मन्दायमानः मनसि मन्दमिव आचरन् तुच्छमिवात्मानं मन्यमान इति भावः विजितभृगुपतिं भार्गवजेतारं त्वाम् अजित्वा इनोति तापयति मामिति शेषः । शार्दूलविक्रीडितं वृत्तम् ॥ ५० ॥

(य) फलितं सिद्धम् ।

(र) पार्ष्णिग्राहमिव शत्रुभावेन पृष्ठानुधावीव । संभ्रमात् त्वरातिशयात् । अनुप्लवते अनुधावति ।

(ल) आवेगेन संभ्रमेण ।

(व) समरसीमानं युद्धक्षेत्रम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । दिष्ट्या स एष वैकर्त्तनिः (श) । अथापरः कः ।

गुहः । अयमपि किष्किन्धेश्वरस्कन्धावारैकवीरो (ष) भगवतः प्रभञ्जनस्य पारस्त्रैणेयः (स) पुत्रो हनूमान् ।

लक्ष्मणः । (सहर्षम् ।) कथमयमसावाञ्जनेयः । अयं हि ब्रह्मशापपरिक्लिष्टस्ववीर्य्यज्ञानयन्त्रितः ।

अन्यैरपि भुवं वीरैः कीर्य्यमाणामुपेक्षते ॥५१॥

नियतमनेन सख्या (ह) हृदयशल्यमस्माकमुद्धरिष्यते । इदं तु वर्त्तमानमेकतुलायुद्ध(क्ष)मार्य्यस्य । जयलक्ष्मीपरिग्रह-

---

(श) वैकर्त्तनिः विकर्त्तनः सूर्य्यः तस्य सुतः सुग्रीव इत्यर्थः ।

(ष) किष्किन्धेति किष्किन्धेश्वरस्य वालिनः स्कन्धावारः सेना तत्र एकवीरः अद्वितीयवीरः ।

(स) प्रभञ्जनस्य वायोः । पारस्त्रैणेयः परस्त्री अञ्जना तस्यां जातः ।

ब्रह्मशापेति । ब्रह्मणः शापेन । पुरा हनूमतः वीर्य्यातिशयं दृष्ट्वा सन्तुष्टो ब्रह्मा अनेन वीर्य्येणासौ मम सृष्टिं संहरेदित्याशङ्कमानः तं स्वतस्ते पराक्रमज्ञानं न भवेदिति शशापेति पुराणम् । परिक्लिष्टं व्याहतं यत् स्ववीर्य्यज्ञानं तेन यन्त्रितः अवरुद्धः सन् अन्यैरपि वीरैः कीर्य्यमाणाम् आकुलीक्रियमाणामित्यर्थः भुवं पृथिवीम् उपेक्षते दृष्ट्वापि न पश्यतीत्यर्थः । अनुष्टुब्वृत्तम् ॥ ५१ ॥

(ह) सख्या मित्रेण हनूमतेति शेषः यद्वा सहायेन, सखा मित्रसहाययोरिति विश्वः ।

(क्ष) एकतुलायुद्धम् एका तुला तोलनदण्डः तया युद्धं द्वयोरेवान्योन्यं धर्मयुद्धमित्यर्थः नात्र कस्यचित् साहाय्यावसर इति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यौतके यशसि (क) वयमयं वा सुग्रीवो वा न केचिदंगद-
धिकारिणः ।

गुहः । (ससंभ्रमम् ।) कुमार ! पश्य पश्य ।

सप्त तालानयं भित्त्वा वालिप्रहरणीकृतान् ।
हत्वा च वालिनं बाणो रामतूणीरमागतः ॥५२॥

अहह (ख) ।

प्राणैः समं कनकपुष्करकण्ठमाला-
सूत्रेण दशरथये विहितातिथेयः ।
दिक्कूलमुद्दहयशःसरिदादिशैलः
शेते स वीरशयने कपिचक्रवर्त्ती ॥५३॥

(क) जयेति जयलक्ष्म्याः विजयश्रियाः परिग्रहः परिणय इत्यर्थः तत्र यत् यौतकं श्वशुरादिभिः प्रीतैः जामात्रे दत्तं धनं परिणयलब्धं धनमिति यावत् तस्मिन् यशसि यश एवात्र विजयलक्ष्म्याः परिणये यौतकमिति भावः । विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत् । मैत्रमौद्वाहिकञ्चैव दायादानां न तद् भवेदिति वचनेन परिणयलब्धस्याविभाज्यत्वप्रतिपादनादिति भावः ।

सप्तेति । अयं बाणः शरः रामप्रहित इति शेषः वालिना प्रहरणीकृतान् अस्त्रीकृतान् युगपत् रामं प्रति प्रहरणार्थं प्रक्षिप्तानिति यावत् सप्ततालान् तालद्रुमान् भित्त्वा विदार्य वालिनं हत्वा निर्भिद्य च रामस्य तूणीरम् आगतः । अनुष्टुब्वृत्तम् ॥ ५२ ॥

(ख) अहह खेदे ।

प्राणैरिति । स कपिचक्रवर्त्ती वानरराजः प्राणैः समं सह कनकपुष्करकण्ठमालासूत्रेण काञ्चनकमलकण्ठदाम्ना दाशरथये रामाय

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (सखेदम् ।) हा देव संक्रन्दन ! (ग) क्व पुनरीदृशं महावीरप्रकाण्डमात्मजं सहस्रेणापि लोचनैरालोकयिष्यसि ।

(नेपथ्ये दुन्दुभिध्वनिर्मङ्गलगीतिश्च ।)

गुहः । (सहर्षम् ।) कथमयमार्य्यजाम्बवदभिमन्त्रितैः शातकुम्भकलशै(घ)र्नीलः कुमारसुग्रीवमभिषिञ्चति । स्वयं चास्य देवो दाशरथिः कार्त्तस्वरपुण्डरीकमालया (ङ) कण्ठमलङ्करोति ।

लक्ष्मणः । प्रियतरं नः ।

(नेपथ्ये ।)

भो भो वानराच्छभल्लगोलाङ्गूलयूथपतयः ! सर्वानेव वो महाराजः सुग्रीवः समाज्ञापयति । 'सज्जन्तु भवन्तः सर्वाणि यौवराज्योपकरणानि । अयमहं सीतादेव्याः

यिष्टितं कृतम् आतिथेयम् अतिथिसत्कारो येन तथाभूतः, दिगेव कूलं दिक्कूलं तत् उद्वहतीति दिक्कूलसुद्वहा या यश एव सरित् नदी तस्याः आदिशैलः प्रभवपर्वतः यथा पर्वतः नद्याः प्रभवः तथा दिग्व्यापिनः यशसः प्रभव इति भावः वीरशयने रणभूमाविति भावः गेते । वसन्ततिलकं वृत्तम् ॥ ५२ ॥

(ग) संक्रन्दन ! इन्द्र !

(घ) शातकुम्भकलशैः काञ्चनकुम्भैः ।

(ङ) कार्त्तस्वरपुण्डरीकमालया काञ्चनपद्मदाम्ना ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रवृत्तिं(च)मन्वेष्टुं प्रहित्य (छ) हनूमन्तमूर्ध्वमौहूर्त्तिके लग्ने (ज) कुमारमङ्गदमभिषेक्ष्यामि' इति ।

लक्ष्मणः ।

उत्सवः सोऽयमस्माकं सर्वथा हृदयङ्गमः ।

किन्तु वाली विलीनोऽयं व्यथयिष्यति वासवम् ॥५४॥

(अन्तरिक्षे पुष्पवृष्ट्यनन्तरम् ।) जय जय जगत्पते रामभद्र !

लक्ष्म्या वालिनिबर्हणप्रशमितद्वैराज्यवैराग्यया

किष्किन्धायतनैकदैवतमयं तारापतिर्दीप्यते ।

नप्तारं युवराजमङ्गदमपि श्रुत्वातिहर्षादभू-

दस्राम्भःवृषतीवमौक्तिकमयो गुम्फः सहस्रेक्षणः ॥५५॥

(च) प्रवृत्तिं वार्त्ताम् ।

(छ) प्रहित्य प्रेष्य ।

(ज) ऊर्ध्वमौहूर्त्तिके मुहूर्त्तात् ऊर्ध्वम् ऊर्ध्वमौहूर्त्तिकं तस्मिन् लग्ने राशिविशेषस्य उदये शुभसमये इति भावः, राशीनामुदयो लग्नमित्यमरः ।

उत्सव इति । अयं सः उत्सवः अङ्गदयौवराज्यनिबन्धन इति भावः अस्माकं सर्वथा सर्वैः प्रकारैः हृदयङ्गमः मनोरमः । किन्तु अयं विलीनः विलयं गतः वाली वासवम् इन्द्रं व्यथयिष्यति सन्ताप-यिष्यति स्वमरणजनितशोकेनेति भावः । अनुष्टुब्वृत्तम् ॥५४॥

लक्ष्म्येति । वालिनः निबर्हणेन विनाशेन प्रशमितम् अपनीतं द्वैराज्येन राजद्वयेन वालिसुग्रीवरूपेण वैराग्यं विरागः यस्याः एक-स्मिन् सुस्थितेरभावादिति भावः तथाभूतया लक्ष्म्या राजश्रिया किष्किन्धा एव आयतनं स्थानं तस्य एकम् अद्वितीयं दैवतम् अधि-ष्ठातृदेवः अयं तारापतिः सुग्रीवः दीप्यते राजते । सहस्रेक्षणः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । प्रियात् प्रियतरं नः । वयस्य गुह ! तदेहावामपि महोत्सवसंविभागिनौ (झ) भवावः ।

(इति निष्क्रान्तौ ।)

इति सुग्रीवाभिषेको नाम पञ्चमोऽङ्कः ।

षष्ठोऽङ्कः ।

(ततः प्रविशति माल्यवान् ।)

माल्यवान् । (सर्वतोऽवलोक्य सखेदम् ।) अहह कष्टम् ।

दग्धाः प्रदीप्तपावकपरिचयपिण्डस्यहेमवेश्मानः ।
क्षणमुत्पुच्छयमाने हनुमति लङ्कापुरोद्देशाः ॥१॥

इन्द्रः अपि नप्तारं पौत्रम् अङ्गदं युवराजं यौवराज्ये अभिषिक्तं श्रुत्वा अतिहर्षात् अश्रूणि अश्रुजलानि तेषां पृषतौघा बिन्दुसमूहा एव मौक्तिकानि मुक्ताफलानि तन्मयः तदात्मकः गुम्फः ग्रन्थनं आनन्दाश्रुबिन्दुमुक्ताखचितशरीर इति भावः अभूत् । शार्दूलविक्रीडितं वृत्तम् ॥५५॥

(झ) महोत्सवसंविभागिनौ महोत्सवस्य अंशहारिणौ ।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्येण कृता
अनर्घराघवपञ्चमाङ्कव्याख्या समाप्ता ।

दग्धा इति । हनुमति क्षणम् उत्पुच्छयमाने पुच्छं लाङ्गूलम् उत्क्षिपति सति लङ्कापुरोद्देशाः लङ्काप्रदेशाः प्रदीप्तस्य प्रज्वलितस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

निजकिरणौघप्रमुषितनिम्नोन्नतरूपकर्मभेदेषु ।
मणिभवनेषु क्षयानुज्वालाः फलतोऽनुमीयन्ते ॥२॥

(विमृश्य ।) अहो दुर्निवारता भवितव्यतायाः ।

दोःसन्दोहवशंवदत्रिभुवनश्रीगर्वसर्वङ्कषः
कैलासोद्धरणप्रचण्डचरितो वीरः कुबेरानुजः ।
यत्रायं स्वयमस्ति सेयममरावत्यापि वन्द्या पुरी
नीता मर्कटकेन कामपि दशां धिग्दैवमावश्यकम् ॥३॥

भावकस्य परिचयेन सङ्गेन पिण्डस्थानि पिण्डीभूतानि हेमवेश्माणि काञ्चनगृहाणि येषु तथाभूताः सन्तः दग्धाः भस्मीकृताः । आर्या-वृत्तम् ॥१॥

निजेति । निजकिरणौघेन प्रकर्षेण मुषिता अपहृताः निम्नो-न्नतरूपाः कर्मभेदाः शिल्पविशेषाः येषां तथाविधेषु मणिभवनेषु रत्न-गृहेषु क्षयानुज्वालाः अग्निशिखाः फलतः फलेन दाहादिकार्यादिति भावः अनुमीयन्ते लक्ष्यन्ते । मणिप्रभया निम्नोन्नतानि न दृश्यन्ते परम् अग्निदाहस्तत्तत्कार्यध्वंसेन अनुमीयते इति भावः । आर्या-वृत्तम् ॥ २ ॥

दोःसन्दोहेति । दोष्णां भुजानां सन्दोहेन समूहेन वशंवदायाः वशं गतायाः श्रियाः लक्ष्म्याः गर्वस्य सर्वं कषतीति तथोक्तः, कैलासस्य उद्धरणे प्रचण्डं चरितं यस्य तथाभूतः कुबेरस्य अनुजः कनीयान् अयं वीरः रावणः यत्र स्वयम् अस्ति अधिवसति, सेयम् अमरावत्यापि वन्द्या पुरी लङ्का मर्कटकेन चुद्रेण वानरेण कामपि अनिर्वचनीयां शोचनीयामिति भावः दशाम् अवस्थां नीता प्रापिता, आवश्यकम् अवश्यमेवेत्यर्थः दैवं प्रतिकूलमिति शेषः धिक् निन्दामीत्यर्थः एतादृश-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

न किञ्चिदेतद्वा रावणदुर्णयेन (क) । (सखेदमाकाशे ।) आः पौलस्त्य !

विद्याश्चतुर्दश चतुर्षु निजाननेषु
सम्बाधदुःस्थितवतीरवलोक्य वेधाः ।
ताभ्योऽपराणि नियतं दश ते मुखानि
स्वस्य प्रणप्तुरकरोत् स कथं जडोऽसि ॥४॥

(क्षणं च ध्यात्वा सव्यथम् ।) कथमेवं विशीर्य्यतीव (ख) नः कुलमिदम् ।

खरादीनवधीद्रामो वलमत्तं च मारुतिः ।
स्वयं निष्क्रामयामास दशास्यस्य विभीषणम् ॥५॥

रमणीयस्य वस्तुनोऽकाण्डे वैपरीत्यकरणादिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २ ॥

(क) रावणेति रावणस्य दुर्णयेन दुराचारेण ।

विद्या इति । वेधाः ब्रह्मा चतुर्षु निजाननेषु निजमुखेषु चतुर्दश विद्याः, अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा । छन्दसां विचितिश्चैव षड़ङ्गो वेद उच्यते ॥ इति पुराणोक्ताः, सम्बाधेन सङ्कटावस्थानेन दुःस्थितवतीः क्लेशेन स्थिताः अवलोक्य ताभ्यः विद्याभ्यः, तादर्थ्ये चतुर्थी । अपराणि दश मुखानि स्वस्य प्रणप्तुः प्रपौत्रस्य ते तव नियतं निश्चितम् अकरोत्, सः चतुर्दशविद्याभिज्ञस्त्वं कथं जड़ः विमूढ़ इत्यर्थः असि भवसि । वसन्ततिलकं वृत्तम् ॥ ४ ॥

(ख) विशीर्य्यतीव क्षयं गच्छतीव ।

खरादीनिति । रामः खरादीन् राक्षसान्, मारुतिर्हनूमान्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अलं वा दुर्विहितमतीतमुपालभ्य (ग) । सम्प्रति सिन्धो-रुदीचि (घ) तीरे निवेशितस्कन्धावारो (ङ) दाशरथिः किमारम्भ (च) इति कथं प्रतीमः (छ) । (पुरो दृश्य ।) कथं राघवचरितानि चरितुं प्रहितयोः (ज) शुकसारणयोः सारणः ।

(प्रविश्य ।)

सारणः । जयतु जयतु कनिष्ठमातामहः ।

माल्यवान् । (अभिनन्द्य समीपमुपवेश्य च ।) वत्स सारण ! क्वचिदसुनैव पदेन सुग्रीवकटकादागतोऽसि ।

सारणः । अथ किम् ।

माल्यवान् । तद्यथानुभवमभिधीयतां तावत् ।

सारणः । सारसंख्ये वनौकसा(झ)मस्मन्मुखेनैव शतशः

यत्सम् अत्यं तदाख्यं रावणकुमारञ्च अवधीत् । दशास्यः रावणश्च स्वयं विभीषणं निष्क्रामयामास दूरीचकार । अनुष्टुब्वृत्तम् ॥ ५ ॥

(ग) दुर्विहितम् अनौचित्येन आचरितम् । अतीतं गतम् । उपालभ्य तिरस्कृत्य ।

(घ) उदीचि उत्तरे ।

(ङ) निवेशितेति निवेशितः स्थापितः स्कन्धावारः सेना येन तथोक्तः ।

(च) किमारम्भः किमाचारः किं करोतीति भावः ।

(छ) प्रतीमः जानीमः ।

(ज) चरितुं विज्ञातुम् । प्रहितयोः प्रेरितयोः ।

(झ) सारसंख्ये सारः बलं संख्या एकत्वादिगणना ते । वनौकसां वानराणाम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रतीतिं(ञ) मातामहेनालमुक्ता । अधुना तु सेतुबन्धनाय(ट) मिलितेषु वानरसैनिकेषु वानरमूर्त्तिधरोऽप्यहं महाराज-विभीषणेन (ठ) (इत्यर्धोक्ते समयम् ।) आर्य्य ! चिरसंवा-सेन रामराजधानीप्रवादो (ड) मामनुबध्नाति (ढ) ।

माल्यवान् । (साकूतम् ।) किमभिमिलितः कनिष्ठवत्सो राघवेण ।

सारणः । अथ किम् ।

माल्यवान् । (क्षणमिव स्तब्धं स्थित्वा निःश्वस्य ।) वत्स ! निः-शङ्कमभिधेहि ।

सारणः । कुमारविभीषणेन ज्ञात्वा संयम्य (ण) चाहं रामस्य दर्शितः ।

माल्यवान् । (साशङ्कम् ।) ततस्ततः ।

(ञ) शतशः शतं शतं वारानित्यर्थः । प्रतीते ज्ञाते । पूर्व-मस्माभिरुक्तां मातामहेन च ज्ञातमिति भावः ।

(ट) सेतुबन्धनाय सेतुबन्धनाय ।

(ठ) महाराजविभीषणेति विभीषणस्य महाराजत्वव्यपदेशात् भयमिति भावः ।

(ड) चिरसंवासेन दीर्घकालसहवासेन वानरसैनिकेषु भेदप्रयो-जनमिति भावः । रामेति रामस्य राजधानी समुद्रतीरस्थसैनानिवेश-प्रदेश इति यावत् तस्यां प्रवादः प्रसिद्धिः । तत्र सर्वेऽपि विभीषणं महाराजेति व्यपदिशन्ति मयापि तदभ्यस्तमिति भावः ।

(ढ) अनुबध्नाति अनुसरति ।

(ण) संयम्य बद्ध्वा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सारणः । ततश्च राघवेण निजसचिवनिर्विशेषमुपगृह्य (त) पुरस्कृत्य च प्रस्थितोऽस्मि ।

माल्यवान् । सहर्षम् ।) किमुच्यते, यावद्द्रव्यभावी गुणो हि विजिगीषूणामुदात्तता (थ) । विशेषेण पुनरयं रामभद्रः । यतः ।

अभेदेनोपास्ते कुमुदमुदरे वा स्थितवतो
विपक्षाद्भोजादुपगतवतो वा मधुलिहः ।
अपर्याप्तः कोऽपि स्वपरपरिचर्यापरिचय-
प्रबन्धः साधूनामवमनभिसन्धानमधुरः ॥६॥

अथ शुकः किमासीत् ।

सारणः । अहमपि न जानामि ।

(त) निजेति निजसचिवेभ्यः नास्ति विशेषो यत्र तत् यथा तथा उपगृह्य स्वसमीपं नीत्वा ।

(थ) यावदिति विजिगीषूणाम् उदात्तता महोन्नतत्वं गुणः यावद्द्रव्यभावी यावदेव द्रव्यं गुणश्च तत्परिमित इत्यर्थः ।

अभेदेनेति । कुमुदम् उदरे स्वाभ्यन्तरे स्थितवतः स्थितात् वा विपक्षात् शत्रोः अब्जोजात् पद्मात् उपगतवतो वा उपगतात् वा मधुलिहः भ्रमरान् अभेदेन अविशेषेण उपास्ते परिचरति । अयं साधूनाम् अनभिसन्धानमधुरः अनभिसन्धानेन उपकारानुपकारपर्यालोचनविरहेण मधुरः मनोहरः कोऽपि वचनातीत इत्यर्थः स्वपरपरिचर्यापरिचयप्रबन्धः आत्मपराभेदपरिचयानुसरणमित्यर्थः अपर्याप्तः समधिक इत्यर्थः भवतीति शेषः । शिखरिणीवृत्तम् ॥ ६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

माल्यवान् । (विहस्य ।) वत्स विभीषणस्य रामोपश्लेषेण स्वकुल्यं व्यसन(द)मिति प्रमुग्धोऽस्मि ।

सारणः । आर्य्य ! तथा धर्मवृत्तिरार्य्यसन्तानस्य कुमारः (ध) कथं ज्यायांसं भ्रातरमवधूय (न) प्रतिपक्षवर्त्ती संवृत्तः ।

माल्यवान् । वत्स ! दशग्रीवं पृच्छ । (निःश्वस्य ।) अथवा दैवम् ।

सारणः । आर्य्य ! यदि श्रवणार्होऽस्मि तदा निवेदय ।

माल्यवान् । वत्स ! केसरिकलत्रसम्भवेन प्रभञ्जनसूनुना (प) विलुण्ठितामशोकवनिकामवलोक्य राजा तवायं विभीषणमवोचत् । यथा—'वत्स ! पश्य मनुष्यपोतद्वयावष्टम्भेन (फ) दुरात्मना कपिकीटेन कथं विजृम्भितम्' (ब) इति ।

(द) रामोपश्लेषेण रामाश्रयेण । स्वकुल्यं निजकुलसम्बन्धीत्यर्थः । व्यसनं विपद् ।

(ध) धर्मवृत्तिः धर्मनिष्ठः । आर्य्यसन्तानः भद्रवंशोद्भवः । कुमारः विभीषणः ।

(न) अवधूय परित्यज्य ।

(प) केसरीति केसरिणः वानरभेदस्य कलत्रं भार्या अञ्जनेत्यर्थः तद्गर्भजातेन । प्रभञ्जनसूनुना वायुपुत्रेण ।

(फ) मनुष्येति मनुष्यपोतयोः मानवार्भकयोः रामलक्ष्मणयोः द्वयं तस्य अवष्टम्भेन आश्रयेण ।

(ब) विजृम्भितम् अनुचितम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सारणः । ततस्ततः ।

माल्यवान् । ततो विभीषणः प्रणम्य व्यज्ञिपत, 'देव ! जातिं मानय मानुषीमभिमुखो दृष्टस्त्वया हैहयः स्मृत्वा वालिभुजौ न साम्प्रतमवज्ञातुञ्च ते वानराः । तत् पौलस्त्य ! महाग्निहोत्रिणमहं त्वामेतदभ्यर्थये सीतामर्पय मुञ्च च क्रतुभुजः काराकुटुम्बीकृतान्' ॥७॥

सारणः । (सवज्ञमानाश्चर्य्यम् ।) अहह 'वालिभुजौ' इति ब्रुवता मातामहेन किमपि आरितोऽस्मि । अर्य्य !

किमाचक्षे सेतुक्षितिधरशिरःश्रेणिकपणैः
प्रकोष्ठे नीरोमणः कपिभटभुजस्तम्भनिबहान् ।
सुमेरोर्मात्सर्य्यादनतिचिरसंरूढमृदुभिः
गिरीभिर्विन्ध्यो यद्भरमपि न सोढुं परिवृढः ॥८॥

जातिमिति । मानुषीं मनुष्यसम्बन्धिनीं जातिं मानय आदिश्यस्व, त्वया अभिमुखः संग्रामे इति शेषः हैहयः दृष्टः, तेन त्वं संग्रामे पराजित इति भावः । वालिनः वानरराजस्य भुजौ बाहू स्मृत्वा ते वानराश्च अवज्ञातुं न साम्प्रतं न युक्तं, युक्ते हे साम्प्रतं स्याने इत्यमरः । तत् तस्मात्, हे पौलस्त्य ! पुलस्त्यनन्दन ! अहं महान्तम् अग्निहोत्रिणम् अग्निहोत्रपरायणं याज्ञिकमित्यर्थः धर्मनिष्ठमिति भावः त्वाम् एतत् अभ्यर्थये प्रार्थये, सीताम् अर्पय, रामाय प्रतिदेहीत्यर्थः, काराशु बन्धनागारेषु कुटुम्बीकृतान् अवरुद्धानिति भावः क्रतुभुजः देवान् मुञ्च त्यज । शार्दूलविक्रीडितं वृत्तम् ॥ ७ ॥

किमिति । सेतवे सेतुबन्धनार्थं क्षितिधराणां पर्वतानां शिरःश्रेणयः शृङ्गसमूहाः तेषां कपणैः पर्वणैः प्रकोष्ठे कफोणेरधोभागे नीरोमणः लोमरहितान् कपिभटानां वानरवीराणां भुजा एव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सामङ्कम् ।) ततस्ततः ।

माल्यवान् । ततश्च रोषान्धतामिस्रे (भ) मज्जता राक्षसराजेन तथा चेष्टितं यथा विपक्षमप्याश्रितः ।

सारणः । (सखेदमाकाशे ।) हा देव पुलस्त्यनन्दन ! कथं भवतैव वैधर्म्यदृष्टान्तेन मानतो (म) मूलोच्छेदनिमित्तान्निवर्त्तिष्यते (य) लोकः । (सभ्यर्थनञ्च ।)

अरिषड्वर्ग एवायमस्यास्तात ! पदानि षट् ।
तेषामेकमपि छिन्दन् खञ्जयेद्भ्रमरीं श्रियम् ॥९॥

स्तम्भनिवहाः तान् किम् आचक्षे किं ब्रवीमि ? विन्ध्योऽपि सुमेरोः मात्सर्य्यात् द्विषेषात् अनतिचिरं संरूढानि सङ्गतानि अतएव सुदृढानि कोमलानि तैः शिरोभिः शृङ्गैः यद्भरं देवां वानरभटभुजस्तम्भनिवहानां भरम् अपि सोढुं न परिदृढः न शक्तः । पुरा सुमेरुजिगीषया विन्ध्यो वर्द्धित इति कथा पूर्वकल्पादुसन्धेया । शिखरिणीवृत्तम् ॥ ८ ॥

(भ) रोषेति रोषः क्रोध एव अन्धतामिस्रं गाढान्धकारं तस्मिन् । रोषान्धतमसे इति वा पाठः । तत्र ध्वान्ते गाढेऽन्धतमसमित्यमरः ।

(म) वैधर्म्येति विगतो धर्मः यस्य स विधर्मः तस्य भावः वैधर्म्यं विरुद्धो धर्म इति यावत् तेन दृष्टः कल्पः नाशः यस्य तथाभूतेन । यद्वा वैधर्म्यं विपरीतधर्माचरणं तस्य दृष्टान्तेन निदर्शनेन । मानतः अहङ्कारात् ।

(य) निवर्त्तिष्यते अपयास्यति त्यक्ष्यति इति शेषः तव दुराचारेण सर्व एव त्वां परित्यक्ष्यन्तीति भावः ।

अरीति । हे तात ! रावण ! अस्याः भ्रमरीरूपायाः श्रियाः अरिषड्वर्गः अरीणां कामादीनां षड्वर्गः कामक्रोधलोभमोहमद-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(मन्त्रिणं प्रति।) आर्य्य! यत् सत्यं राघवेण व्यूढां वानरवरूथिनी(र)मुत्प्रेक्ष्य शङ्के, विभीषण एव यद्यस्माकं कुलतन्तु(ल)रवशिष्यते।

माल्यवान्। (निःश्वस्य।) वत्से! द्वयोरपि कटकयो(व)स्तत्त्वज्ञोऽसि तत्किमिदानीमुचितम्।

सारणः। आर्य्य! नन्वेवं ब्रवीमि, राजपुत्रोऽङ्गदोऽसौ बालो नवबुद्धिरामपात्रमिव यद्यदाधीयते तत्तदाचुचूषति (श)।

माल्यवान्। ततः किम्।

सारणः। ततश्च भवतः पितृवैरिणौ रामसुग्रीवौ

मात्सर्य्यरूप इति यावत् षट् पदानि चरणाः। तेषां पदानाम् एकम् अन्यतममपि छिन्दन् खण्डयन् भ्रमरीं भ्रमरीरूपां भ्रमणशीलां वा चञ्चलामिति यावत् श्रियं लक्ष्मीं खञ्जय खञ्जां कुरु। षड्वर्गीयप्रथमस्य कामस्य छेदने सीताया राघवे समर्पणं तेन लक्ष्मीः स्थिरा भविष्यतीति भावः। अनुष्टुब्वृत्तम्॥ ९॥

(र) व्यूढां परिगृहीताम्। वानरवरूथिनीं कपिसेनाम्।

(ल) कुलतन्तुः वंशसूत्रम् यद्वा ततुरपत्यं तथाच कुलधरसन्तान इति भावः।

(व) कटकयोः सैन्ययोः।

(श) आमपात्रमिव आमम् अपक्वं पात्रं शरावादि तद्वत्। आधीयते आरोप्यते खल्वपरीति भावः। आचुचूषति अतिशयेन पिबति। तत्रैव यदुच्यते तत् भद्रमभद्रं वा न विविच्य गृह्णातीति भावः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्यापाद्य (घ) किष्किन्धायां भवन्तमभिषिच्य वालिमो-
द्वृदस्यात्मानमनृणमिच्छाम इति गूढप्रणिधिमुखेन (ङ)
दशकन्धराटेशमभिधाय सुग्रीवशिविरादपवाह्यते तस्मिन्न-
पक्रान्ते (च) तु खण्डहर्षिभयोपजापजर्जरमवेक्षमाणो(छ)
वानरपतिः शिथिलितरामप्रयोजनः (क) स्यात् ।

माल्यवान् । (सस्मितम् ।) वत्स ! साधु समर्थयसे (ख) ।
किं पुनः स्वयमङ्गदो गर्भरूपोऽभिनवोज्ज्वलयौवराज्यसुखो-
पलालितो दुरपवाह (ग) एव । ये चास्य मातापितृवन्ध-

(घ) व्यापाद्य विनाश्य ।

(ङ) गूढप्रणिधिमुखेन गुप्तचरमुखेन ।

(च) अपवाह्यते बहिष्क्रियते अङ्गद इति शेषः । तस्मिन् अङ्गदे । अपक्रान्ते अपवाहिते सति ।

(छ) अर्हिभयं स्वपक्षप्रभवं भयं, महीभुजामर्हिभयं स्वपक्षप्रभवं भयमित्यमरः । तथा उपजापः भेदः, सभौ भेदोपजापावित्यमरः । अन्योन्यविच्छेदकरणमित्यर्थः ताभ्यां जर्जरम् आकुलम् । अवेक्षमाणः पश्यन् ।

(क) शिथिलितेति शिथिलितं त्यक्तं रामस्य प्रयोजनं कार्यं येन तथाभूतः ।

(ख) समर्थयसे मन्त्रयसि ।

(ग) गर्भरूपः बालकः । अभिनवेति अभिनवेन उज्ज्वलेन दीप्तिमता सम्मानवतेति भावः यौवराज्येन यत् सुखं तेन उपलालितः वर्द्धितः । दुरपवाहः सुग्रीवकटकात् अपवहिष्कार्य इति यावत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वस्ते सुग्रीवस्यापि सम्बन्धिनः कथमेनमुत्तिष्ठमानमनुजानीयुः (घ)।

सारथः । यथा दृष्टमार्येण । किञ्च कालापेक्षी दण्डनीतिप्रयोगः (ङ)। तथा कथमपि महोत्साहैः कपिभिः सेतुकर्मणि प्रवृत्तं यथैतावता कालेन सत्तोणमहार्णवो रामः सुवेलशैलोपत्यकामध्यास्ते (च)।

नाट्यवान् । (सविस्मयाद्भुतम् ।) अहह !

असौ मनुष्यमात्रेण लङ्घितो यदि सागरः ।

प्रतापो दशकण्ठस्य भुवनैरपि लङ्घितः ॥१०॥

(सखेदं च ।)

पौलस्त्यस्य सुरासुरेन्द्रशिरसां निर्माल्यमङ्घ्रिद्वयं

कुर्वाणेन रघूद्वहेन घटिते सेतौ निधावम्भसाम् ।

(घ) उत्तिष्ठमानं सुग्रीवेण विरोधाय यतमानमित्यर्थः । अनुजानीयुः अनुमन्येरन् ।

(ङ) कालापेक्षी कालं समयम् अपेक्षते इति तथोक्तः । दण्डनीतिप्रयोगः दण्डार्थं विपक्षदमनार्थं नीतिः षाड्गुण्यविधानं तस्याः प्रयोगः यथायथं व्यवहारः ।

(च) सुवेलेति सुवेलस्य लङ्कादीपवर्त्तिन इति भावः शैलस्य पर्वतस्य उपत्यकाम् आसन्नभूमिम्, उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः । अध्यास्ते अधितिष्ठति ।

असाविति । मनुष्यमात्रेण सामान्येन मनुष्येणेत्यर्थः असौ सागरः यदि लङ्घितः उत्तीर्णः, तदा दशकण्ठस्य रावणस्य प्रतापः अपि भुवनैः लङ्घितः । अनुष्टुब्वृत्तम् ॥१०॥

पौलस्त्यस्येति । पौलस्त्यस्य रावणस्य अङ्घ्रिद्वयं चरणयुगलं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अद्योन्मुद्रयति स्वहस्तविधृतं राजीवमिन्दो रविः
प्रत्यावृत्तरसस्य चामृतभुजामिन्दोः स्वदन्ते कलाः ॥११॥

(विन्दस्य ।) वत्स सारण ! वालिवधविशुद्धपार्ष्णि(छ)रनेक वानरानीकनायकेन साक्षा(ज)दुपकृतेन सख्या सुग्रीवेण महापक्षस्य हनूमच्चरितज्ञातास्मदीयवृत्ते(झ)रयमेव सुविहितसकलाभियास्यत्कर्मणस्तस्याभियोगसमयः (ञ) ।

सुरासुरेन्द्राणां शिरांसि तेषां निर्माल्यं त्याज्यमिति भावः निर्माल्यं देवैस्त्यज्यते इति भावः कुर्वाणेन करिष्यतेति भावः, भविष्यत्सामीप्ये प्रयोगोऽयम् । रघूद्वहेन रामेण अम्भसां निधौ सागरे सेतौ घटिते बद्धे सति अद्य रविः सूर्यः इन्दुः दीप्तः सन् स्वहस्तविधृतं निजकरधृतं राजीवं पद्मम् उन्मुद्रयति विकासयति, अमृतभुजां देवानां प्रत्यावृत्तः पुनरावृत्तः रसः स्वादः यस्य तथाभूतस्य इन्दोश्चन्द्रस्य कलाः स्वदन्ते रोचन्ते च । पूर्वं रावणभयात् सूर्यस्य सम्यक्प्रकाशो देवानाञ्च चान्द्रीयसुधापानं नासीदिदानीन्तु तेषामकुतोभयं स्वस्वव्यापाराधिकारो भवतीति भावः । अत्रामृतभुजामिति रुच्यर्थयोगे चतुर्थी विहितायामपि सम्बन्धविवक्षया षष्ठी । शार्दूलविक्रीडितं वृत्तम् ॥११॥

(छ) वालीति वालिनः वधेन विशुद्धः विरहित इति यावत् पार्ष्णिः पृष्ठगतुः यस्य तथोक्तस्य वालिनैव तस्य पार्ष्णिग्राहेण भाव्यं स्थितम् इदानीन्तु तद्विरहात् पृष्ठगतुहीनस्येति भावः ।

(ज) साक्षात् स्वयम् ।

(झ) महापक्षस्य वृहत्सहायस्य । हनूमदिति हनूमतश्चरितेन लङ्कादाहादिना ज्ञाता अस्मदीया वृत्तिः व्यापारः सामर्थ्यं येन तथाभूतस्य ।

(ञ) सुविहितेति सुष्ठु विहितं कृतं सकलं समस्तं अभियास्यतः विपक्षाभिमुखं गमिष्यतः कर्म येन तथोक्तस्य तस्य रामस्य । अभियोगसमयः आक्रमणकालः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सारथः। आर्य! अयमेवात्मद्रव्यप्रकृतिसम्पन्नो नयस्याधिष्ठानं (ट) विजिगीषुरिति प्रथमोदाहरणं दाशरथिः (ठ)।

मात्स्यवान्। (स्तम्भं नाटयित्वा (ड)।

यत्तस्मिन्निहतेऽपि वालिनि वयं क्षुद्रास्तथैवास्महे
तद् युक्तं भुजयोर्बलादपि बलं दुर्गस्य दुर्निग्रहम्।
मर्त्येनापि जगद्विलक्षणगुणग्रामेण रामेण तु
द्वे गव्यूतिशते हि नाम कियती तीर्णोऽयमर्णोनिधिः॥१२॥

(ट) आत्मेति आत्मनः द्रव्याणि सम्पदः, बाहुश्रुत्यं तपस्त्यागः श्रद्धा यज्ञक्रिया क्षमा। भावशुद्धिर्दया सत्यं नियमश्चात्मसम्पद इति नीतिशास्त्रोक्ता इति यावत्। प्रकृतयः, अमात्यराष्ट्रदुर्गाणि कोषो दण्डश्च पञ्चमः। एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः। एताः पञ्च तथा मित्रं सप्तमः पृथिवीपतिः। सप्तप्रकृतिकं राज्यमित्युवाच बृहस्पतिरिति नीतिशास्त्रोक्ताः, ताभिः सम्पन्नः युक्तः। नयस्य नीतेः अधिष्ठानम् आश्रयः।

(ठ) प्रथमोदाहरणम् आद्यो दृष्टान्तः। दाशरथिः रामः।

(ड) स्तम्भं नाटयित्वा स्तम्भवत् क्षणं स्थित्वेत्यर्थः।

यदिति। तस्मिन् वालिनि निहतेऽपि क्षुद्राः निर्बोधा इति भावः. वयं यत् तथैव पूर्ववदेव आस्महे सुस्थिताः स इत्यर्थः तत् युक्तम् उचितं, यतः भुजयोः बाह्वोः बलादपि दुर्गस्य बलं दुर्निग्रहं दुरतिक्रममिति यावत् अस्माकं सत्तद्रूपं यत् दुर्गमस्ति तत् रामस्य बाहुबलेन नातिक्रम्यते इति बुद्ध्या अस्माभिः सुस्थितमिति भावः। तु किन्तु मर्त्येनापि मनुष्येणापि जगतां विलक्षणः गुणग्रामः गुणसमूहः यस्य तादृशेन रामेण द्वे गव्यूतिशते क्रोशयुगशते हि रवधारणे कियती

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(दीर्घमुष्णं च निःश्वस्य । आकाशे ।)

तर्षार्त्तिव्यतिलेलिहानरसनारम्यैर्मुखैरष्टभिः
क्रन्दन्ती क्रमशः पपौ दशमुखी वत्सस्य यस्याः स्तनौ ।
वत्से नैकषि ! विश्वंवीरजननीसीमन्तमुक्तामणिः
सा तादृग्भवती कथं गुणवतः पुत्रस्य किं द्रक्ष्यति ॥१३॥

सारथः । शान्तं शान्तम् । प्रतिहतममङ्गलम् (ठ) । अनर्थशङ्कीनि बन्धुहृदयानि भवन्ति । किं च आर्य !

किम्परिमाणे नाम सम्भावनायाम् अल्पे इत्यर्थः, अयम् अर्णोनिधिः शतयोजनपरिमितः समुद्र इति यावत् तीर्णः लङ्घितः । अम्भोऽर्णस्तोयपानीयमित्यमरः । सागरदुर्गमस्थान् रक्षसोऽपि अन्यानपि अस्माकं नष्टेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १२ ॥

तर्षेति । हे वत्से नैकषि ! निकषायाः पुत्रि ! वत्सस्य रावणस्य दशानां मुखानां समाहारः दशमुखी तर्षया पिपासया वा आर्त्तिः पीड़ा तया व्यतिलेलिहानाः पुनः पुनरास्वादेन लालसा वा रसना जिह्वाः ताभिः रम्यैः मनोज्ञैः अष्टभिर्मुखैः क्रन्दन्ती सती यस्याः भवत्याः स्तनौ क्रमशः पपौ पीतवती द्वाभ्यां मुखाभ्यां स्तनद्वयं पीयते अपराणि अष्टौ रुदन्तीति भावः । सा विश्वेषां वीराणां या जनन्यः तासां सीमन्तमुक्तामणिः शिरोभूषणभूतेति यावत् ताभ्यः श्रेष्ठेति भावः तादृक् तथाविधा भवती गुणवतः पुत्रस्य रावणस्य कथं केन प्रकारेण किं विनाशमिति भावः द्रक्ष्यति ? अमङ्गलत्वात् विनाशमितिपदस्थाने किंपदं प्रयुक्तमिति बोध्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

(ठ) प्रतिहतम् अस्माभिर्विनाशितं भवतीति शेषः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri.

भुजनिवहविहङ्गिकावलम्बी
निविड़गुणौघधृतोऽपि राज्यभारः ।
स्वयमपि दशकन्धरे धुरीणे
स्खलति यदि स्खलनं तदास्य रूपम् ॥१४॥

भाल्यवान् । (अश्रूणि स्तम्भयन् ।) वत्स !

विद्वानपाद्वृत्तमिव स्वभाग्यं
न तावदात्मानमहं ब्रवीमि ।
महामुनेर्विश्रवसस्तपोभि-
र्निवापबीजं यदि नः कुलं स्यात् ॥१५॥

(प्रविश्य पटीक्षेपेण (ण) संभ्रान्तः शुकः ।)

भुजेति । भुजनिवहः बाहुसमूह एव विहङ्गिका वाक इति प्रसिद्धा तस्याम् अवलम्बते इति तथोक्तः, निविड़ेन घनेन प्रभूतेनेति यावत् गुणौघेन शौर्यादिना रज्जुसङ्घेन च शिक्येनेति यावत् धृतः अपि राज्यभारः स्वयं दशकन्धरे रावणे धुरीणे धूर्वहेऽपि, धूर्वहे धुर्य्यधौरेयधुरीणाः मधुरन्धरा इत्यमरः । स्खलति च्यवति यदि तदा अस्य राज्यभारस्य स्खलनं रूपं प्रकृतिरिति यावत् एककन्धराद् भारस्खलनं सम्भवति दशकन्धरात्तु तदसम्भवमिति भावः । पुष्पिताग्रा-वृत्तम् ॥ १४ ॥

विद्वानिति । स्वभाग्यं निजशुभादृष्टम् अपाद्वृत्तमिव अपगतमिव विद्वान् जानन् अहं तावत् आत्मानं न ब्रवीमि आत्मसौभाग्यविरहेण मम कुलरक्षणं न सम्भवतीति भावः महामुनेः विश्रवसः रावणपितुः तपोभिः निवापस्य जलाञ्जलिदानस्य बीजं कारणभूतं नः अस्माकं कुलं यदि स्यात् तिष्ठेत् । यदि अस्माकं कुलं तिष्ठेत् तद् महामुने-स्तपोबलमेव हेतुर्नास्माकं भाग्यबलमिति भावः । उपजातिवृत्तम् ॥१५॥

(ण) पटीक्षेपेण जवनिकाप्रसारणेन ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शुकः ।

प्रहस्तधूम्राक्षमहोदरादीन्
व्यापाद्य सेनाधिपतीनमात्यान् ।
स एष लङ्कामुपरुध्य रामः
शाखामृगैरर्णवमातनोति ॥१६॥

माल्यवान् । (सविषादम् ।) पुरस्तादेव (त) दृष्टमिदमस्माभिः । देशकालव्यवहितस्यापि प्रमेयग्रामस्य यथामुखीनमादर्शतलं हि स्थविरबुद्धिः (थ) । (विमृश्य । आकाशे ।) साधु रामभद्र! साधु । विजिगीषोरदीर्घसूत्रता (द) हि कार्यसिद्धिरवश्यम्भावः (ध) ।

सारणः । सखे शुक! अथ किंविधानो यातुधानेश्वरः (न) ।

प्रहस्तेति । स एष रामः प्रहस्तादीन् सेनाधिपतीन् अमात्यान् सचिवान् व्यापाद्य निहत्य शाखामृगैः वानरैः लङ्काम् उपरुध्य संरुध्य अर्णवं समुद्रम् आतनोति विस्तारयति । शाखामृगरूपसमुद्रेण लङ्कामावृणोतीति भावः । उपजातिवृत्तम् ॥ १६ ॥

(त) पुरस्तादेव पूर्वमेव ।

(थ) देशकालेति देशेन कालेन च व्यवहितस्य अन्तरितस्य प्रमेयग्रामस्य ज्ञेयवस्तुनिचयस्य । यथामुखीनं मुखानुरूपमित्यर्थः । आदर्शतलं दर्पणतलम् । स्थविरबुद्धिः वृद्धप्रज्ञा । वृद्धा आदर्शस्थितमिव पदार्थं सर्वं बुद्ध्या पश्यन्तीति भावः ।

(द) अदीर्घसूत्रता चिप्रकारिता ।

(ध) अवश्यम्भावः निश्चितं कारणमिति भावः ।

(न) किंविधानः किमाचारः । यातुधानेश्वरः राक्षसपतिः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शुकः । (सखेदस्मितम् ।) सखे ! किं तस्य विधानम् (प) ।

श्रुत्वा दाशरथी सुवेलकटके साटोपमर्द्धे धनु-
ष्टङ्कारैः परिपूरयन्ति ककुभः प्रोञ्छन्ति कौक्षेयकान् ।
अभ्यस्यन्ति तथैव चित्रफलके लङ्कापतेस्तत् पुन-
र्वैदेहीकुचपत्रवल्लिरचनाचातुर्य्यमर्द्धे कराः ॥१७॥

माल्यवान् । (निःश्वस्य ।) हा वत्स रावण ! कथमद्यापि सैव हृदयपरिस्पन्दमुद्रा (फ) । (शुकं प्रति ।) वत्स ! अद्य गोपुरगौल्मिकबलाध्यक्षेण (ब) वत्सेन नरान्तकेन किं प्रतिपन्नम् (भ) ।

(प) तस्य यातुधानेश्वरस्य । विधानम् आचरणम् ।

श्रुत्वेति । लङ्कापतेः रावणस्य अर्द्धे कराः दशहस्ता इत्यर्थः सुवेलस्य पर्वतस्य कटके नितम्बे दाशरथी रामलक्ष्मणौ श्रुत्वा साटोपं ससम्भ्रमं सत्वरमित्यर्थः धनुष्टङ्कारैः धनुर्निनादैः ककुभः दिशः परिपूरयन्ति तथैव कौक्षेयकान् करवालान्, कौक्षेयको मण्डलाग्रः करवालः कृपाणवदित्यमरः । प्रोञ्छन्ति मार्जन्ति तेजयन्तीत्यर्थः । तथैव अस्मे अर्द्धे कराः पुनः किन्तु चित्रफलके वैदेह्याः कुचयोः स्तनयोः या पत्रवल्लिः पत्रावली तस्याः रचना लिखनं तत्र चातुर्यं नैपुण्यमित्यर्थः अभ्यस्यन्ति पुनः पुनः करणेन अभ्यस्तं कुर्वन्तीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥

(फ) हृदयेति हृदयस्य परिस्पन्दः चापल्यं तस्य मुद्रा अवष्टम्भः ।

(ब) गोपुरेति गोपुरं पुरद्वारं, गोपुरन्तु पुरद्वारीत्यमरः । तत्र यानि गौल्मिकबलानि सैनिकयोधाः तेषाम् अध्यक्षः अधिपतिः तेन ।

(भ) प्रतिपन्नम् आचरितम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शुकः । (निःश्वस्य ।) मातामह ! कृतैव कुमारेण द्वारमर्य्यादा (म) । परमङ्गदेन सोऽपि । (इत्यर्धोक्ते सारणमधोमुखस्तिष्ठति ।)

माल्यवान् । हा वत्स दशग्रीवनन्दन ! कथमिदं तव द्रष्टुमेतावन्तं कालमस्माकमायुः (य) ।

(नेपथ्ये ।)

भो भो महापार्श्वप्रभृतयः सैनिकाः !
व्यावर्त्तध्वमुपाध्वमुद्धुरशरज्वालामुखीं मातरं
देवीमस्त्रमयीं प्लवङ्गपशवः पश्यन्ति पृष्ठानि वः ।
चेतः शक्रजितोऽपि लक्ष्मणवधे बद्धोत्सवं मध्यमः
पौलस्त्यः स्वयमायुधं विधृतवानद्यापि रामाद्भयम् ॥१८॥

सारणः । (श्रुत्वा सहर्षम् ।) आर्य ! जातं जातमवलम्ब-

(म) कुमारेण मरान्तकेन । द्वारमर्य्यादा द्वाररक्षणम् ।

(य) आयुर्जीवनम् ।

व्यावर्त्तध्वमिति । व्यावर्त्तध्वं निवर्त्तध्वं युद्धात् मा पलायध्वमिति भावः, उद्धुरा उत्कटा शराणां ज्वाला तेज एव मुखं यस्याः तादृशीम् अस्त्रमयीं मातरं देवीम् अस्त्राधिष्ठातीं देवतामित्यर्थः उपाध्वं सेवध्वं, प्लवङ्गपशवः वानरपशवः वः युष्माकं पृष्ठानि पश्यन्ति पराङ्मुखत्वादिति भावः । शक्रजितः इन्द्रजितः अपि चेतः मनः लक्ष्मणस्य वधे बद्धोत्सवम् उद्युक्तमित्यर्थः, मध्यमः पौलस्त्यः पुलस्त्यनन्दनः कुम्भकर्णः इत्यर्थः अपि स्वयम् आयुधम् अस्त्रं विधृतवान्, अद्यापि इदानीमपि रामात् भयम् ? एतयोः संग्रामे विद्यमानयोः न कुतोऽपि भयं भवतीति शेषः । शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नम् । यदयं प्रतिबुध्य (र) कुमारकुम्भकर्णः पुरस्कृत्य (ल) च मेघनादमभ्यमित्रीणः (व) संवृत्तः ।

भाष्यवान् । (निःश्वस्य ।) स्वस्ति विजयेतां रामलक्ष्मणौ कुम्भकर्णमेघनादौ ।

शुकः । (सविषादमात्मगतम् ।) शान्तं शान्तम् । कथमविशिष्टकर्तृकर्मभाव(श)मुभयत्र द्विवचनं प्रयुक्तमार्येण ।

भाष्यवान् । (सखेदम् ।) वत्सौ शुकसारणौ ! अद्य खल्वियं राक्षसलक्ष्मीः सर्वथा कुम्भकर्णमवलम्ब्य वर्तते । इदं तु न विद्मः ।

अग्रजं वा दशग्रीवमनुजं वा विभीषणम् ।
अन्वयव्यतिरेकाभ्यां वीरः कर्मभिषेक्ष्यति ॥१९॥

(नेपथ्ये ।)

(र) प्रतिबुध्य जागरित्वा ।

(ल) पुरस्कृत्य अग्रे कृत्य ।

(व) अभ्यमित्रीणः अमित्रस्य शत्रोरभिमुखीनः ।

(श) अविशिष्टेति अविशिष्टः अविशेषेण उक्तः शर्ट कर्मभावः यत्र तत् । रामलक्ष्मणाविति कुम्भकर्णमेघनादाविति च प्रथमाद्वितीयाद्विवचनयोरभेदादिति भावः ।

अग्रजमिति । वीरः कुम्भकर्णः अग्रजं ज्येष्ठं दशग्रीवं वा अनुजं कनिष्ठं विभीषणं वा कम् अन्वयव्यतिरेकाभ्यां सत्त्वासत्त्वाभ्यामित्यर्थः अभिषेक्ष्यति अभिषिक्तं करिष्यति । जये रावणं पराजये विभीषणम् अभिषेक्ष्यतीति भावः । अनुष्टुब्वृत्तम् ॥ १९ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मा भैष्टं कमठेन्द्रपन्नगपती ! कश्चिन्न वैशेषिको
भूमेरद्य भरः पतिः पलभुजामाज्ञापयत्येष वाम् ।

शुकः । (सहर्षम् ।) नूनमस्मदीयैर्विशेषेण किमपि विक्रान्तम् ।

(माल्यवानवधत्ते ।)

(पुनर्नेपथ्ये ।)

दोःशैलौ हरता पृथक् पृथगथो मूर्द्धानमुत्क्षिप्तुना
रामेणापि लघूकृतं पतति यत्तत्कौम्भकर्णं वपुः ॥२०॥

माल्यवान् । हा वत्स ! (इति मूर्च्छितः पतति ।)

उभौ । (साश्रु ।) आर्य ! समाश्वसिहि समाश्वसिहि ।

माल्यवान् । (आश्वस्य ।) वत्सौ ! जीवतो रामभद्रस्य

मा भैष्टेति । हे कमठेन्द्रपन्नगपती कूर्मराजशेषनागौ ! एष पलं मांसं भुञ्जते इति पलभुजो राक्षसाः तेषां पतिः रावणः वां युवाम् इति आज्ञापयति युवां मा भैष्टं भीतिं मा कुरुतम् अद्य भूमेर्भरः कश्चित् वैशेषिकः विशेषभवः न भवेदिति शेषः कुम्भकर्णशरीरपतनेनाधिको भरः स्यादिति भयं युवाभ्यां नैव कार्यं कथमित्याह दोःशैलाविति यत् यतः पृथक् दोःशैलौ भुजपर्वतौ हरता छिन्दता अथानन्तरं पृथक् मूर्द्धानम् उत्क्षिप्तुना ऊर्द्ध्वं क्षिपता रामेणापि लघूकृतं भारशून्यीकृतं तत् कौम्भकर्णं वपुः कुम्भकर्णशरीरं पतति, कुम्भकर्णशरीरस्य त्रिधा विभज्य कर्त्तनात् विभिन्नस्थानेषु पातनाच्च भाराधिक्यविरहेण युवयोर्भयं नास्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मैथिलीहरणादेत(घ)दस्माभिरान्तरेण चक्षुषा विषयीकृतमेव (स)। किमिदानीं समाश्वसितव्यमस्ति ।

शुकः । धिक्कष्टम् । कौम्भकर्णं वपुः पतति एतदपि देवेनाज्ञापयितव्यम् (ह)।

माल्यवान् । वत्स ! अद्यापि रावणस्याज्ञा। नूनमन्योन्येषां वैहासिकाः कपयो दशकण्ठमुल्लुण्ठयन्ति (च)।

सारणः । आः क्षुद्राः !

यद्यस्ति वीर्यमस्त्येव तत्कर्म कथयिष्यति ।
मेघनादमजित्वैव धिक् प्रहासविभीषिकाम् ॥२१॥

(नेपथ्ये ।)

(घ) मैथिलीहरणात् सीताहरणात् हेतोः । एतत् दुर्घटनं कुम्भकर्णादिनिधनरूपमिति भावः ।

(स) आन्तरेण चक्षुषा ज्ञानचक्षुषेत्यर्थः । विषयीकृतं दृष्टं ज्ञातमिति भावः ।

(ह) देवेन महाराजेन रावणेन । आज्ञापयितव्यम् आदेष्टव्यम् ।

(च) अन्योन्येषां परस्परेषां मध्ये वैहासिकाः हास्यकराः परिहासशीला इति यावत् उल्लुण्ठयन्ति उपहसन्ति ।

यदीति । यदि वीर्यम् अस्ति, अस्त्येव तत् वीर्यं कर्मभूतं कर्मचरितं कथयिष्यति प्रकटयिष्यति, चरितेनैव तत् प्रकाश्यते इति भावः । मेघनादम् इन्द्रजितम् अजित्वैव प्रहासविभीषिकाम् उपहासरूपभयप्रदर्शनम् धिक् । अनुष्टुब्वृत्तम् ॥ २१ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भो भो यूथपतयः ! विलुम्पन्तु (क) भवन्तो लङ्कागोपुरप्राकारतोरणानि (ख) ।

संनद्धेन्द्रायुधमविरलारब्धिगीर्वाणवाण-
श्रेणीवर्षं तदवजगृहे येन दुष्टग्रहेण ।

माल्यवान् । (सोद्वेगम् ।) आः ! किमनेन श्रावयितव्योऽस्मि । (इति कर्णौ पिदधाति ।)

(पुनर्नेपथ्ये ।)

दृष्ट्वा काञ्चित् प्रहरणमयीं वीरयज्वानमिष्टिं
दिष्ट्या सोऽयं समुपशमितः शक्रजिल्लक्ष्मणेन ॥२२॥

माल्यवान् । सत्योऽयम् अतिदुःखो निर्दुःखः इति

(क) विलुम्पन्तु विध्वंसयन्तु ।

(ख) लङ्केति लङ्कापुरस्य गोपुरं द्वारं प्रकाराः प्राचीराः तोरणानि बहिर्द्वाराणि । तोरणोऽस्त्री बहिर्द्वारमित्यमरः ।

संनद्धेति । येन दुष्टः ग्रहः शनैश्चरादिरूपः तेन पक्षे दुष्टः ग्रहः आग्रहः अभिसन्धिर्यस्य तथोक्तेन दुरात्मनेति भावः संनद्धं समुद्यतम् इन्द्रायुधं शक्रधनुर्यत्र तथोक्तम् अविरलारब्धि अविश्रामप्रवृत्तं तत् गीर्वाणानां देवानां बाणश्रेणीव वर्षं वृष्टिरित्यर्थः पक्षे गीर्वाणानां देवानां युध्यमानानामिति भावः बाणश्रेणीनां वर्षम् अवजगृहे संरुद्धं देवाः पराजिता इति भावः । काञ्चित् प्रहरणमयीम् अस्त्रमयीं, वीरो यज्वा याज्ञिको यत्र तादृशीम् इष्टिं यज्ञं दृष्ट्वा दिष्ट्या दैवेन दैवरूपिणेति भावः लक्ष्मणेन सोऽयं शक्रजित् मेघनादः समुपशमितः निहत इत्यर्थः । यज्ञकर्मणा च लोकैरवग्रहशान्तिः क्रियते इति ध्वनिः । मन्दाक्रान्तावृत्तम् ॥ २२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लोकप्रवादः (ग) य(घ)दस्मिन्नपि समूलघातमभिघ्नति व्यतिकरे तथैव श्वसिमः (ङ) ।

शुकः । (ऊर्ध्वमवलोक्य ।) यथा समन्तादम्बरचरविमानवीथयः ककुभां (च) मुखानि पर्य्यवष्टभ्नन्ति (छ) तथा शङ्के (ज) दुर्वारदारुणक्रोधवडवानलनिपीयमानशोकसमुद्रो दाशरथिविजयाय संनह्यते (झ) देवः ।

सारणः । (सविषादमात्मगतम् ।) कष्टम् । कथं दाशरथिविजयायेत्यविशिष्टोपपत्तिककर्तृकर्मकारकार्थविषयं (ञ) वयस्यवचनम् ।

(ग) अतिदुःख इति अतिशयितं दुःखं यस्य सः निर्दुःखः दुःखरहित इति लोकानां प्रवादः प्रसिद्धिः सत्यः ।

(घ) तत् यतः ।

(ङ) अभिघ्नति अभिघातं कुर्वति । व्यतिकरे विपाके इन्द्रजिद्धिनरूपे इति भावः । तथैव पूर्ववदेव श्वसिमः जीवामः ।

(च) अम्बरचरेति अम्बरचराणां खेचराणां विमानवीथयः देवयानपङ्क्तयः । ककुभां दिशाम् ।

(छ) पर्य्यवष्टभ्नन्ति सञ्चरन्ति अवरुन्धन्तीत्यर्थः ।

(ज) शङ्के मन्ये ।

(झ) दुर्वारेति दुर्वारः अनिवार्यः अतएव दारुणः उत्कटः क्रोध एव वडवानलः तेन निपीयमानः निःशेषं यथा तथा क्षयं नीयमानः शोकसमुद्रः यस्य तथाभूतः सर्वथा क्रोधेन शोकं परित्यजन्निति भावः । दाशरथिविजयाय दाशरथेः रामस्य विजयाय । संनह्यते वद्धपरिकरो भवतीत्यर्थः ।

(ञ) दाशरथीति अविशिष्टा अविशेषेण उक्ता उपपत्तिः प्रतीति-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

माल्यवान् । (उत्थाय ।) तदस्माभिरपि जरसा दूषित(ट)-स्यात्मनः प्रक्षालनाय प्राप्तं शस्त्रधारातीर्थम् (ठ)। (इति शुकसारणौ निष्क्रान्तः ।)

(विष्कम्भकः ।)

(ततः प्रविशति विद्याधरद्वयमाकाशयानेन ।)

निरातङ्कः । अहो ! बहोः काला(ड)दनया गगनवीथ्या देवेन्द्रमिव (ढ) सञ्चरावहे । (अधोऽवलोक्य ।)

लङ्कोपनिवेद्यनन्दनवनस्रक्तोरणश्लाघिनी
युद्धार्थं दशकण्ठविक्रमसखी यस्यां समन्तादिमाः ।
रथ्यालोकनकौतुकोन्मुखवधूसंकीर्णकर्णीरथा
ग्राः किं कथयामि यान्ति यदमी न व्योम्नि वैमानिकाः॥२२

र्यत्र तथाभूतः कर्त्तृकर्मकारकयोः यः अर्थः तद्विषयं वयस्यस्य मित्रस्य वचनं तथाच दाशरथेर्विजय इति समासे दाशरथेरिति कर्त्तरि कर्मणि च षष्ठ्योगे षष्ठीविधानात् दाशरथिकर्त्तृकविजयलाभ इति दाशरथि-कर्मकरावणकर्त्तृकविजयलाभश्चेत्यर्थद्वययोगात् अविशिष्टोभयत्रिककर्त्तृ-कर्मकारकत्वमिति भावः ।

(ट) जरसा वार्द्धकेन । दूषितस्य अभिभूतस्य ।

(ठ) शस्त्रधारातीर्थं शस्त्रधारा एव तीर्थं पुण्यक्षेत्रम् । शस्त्रा-घातेन प्राणान् त्यक्ष्यामीति भावः ।

(ड) बहोः कालात् बहुकालात् परमित्यर्थः ।

(ढ) गगनवीथ्या आकाशमार्गेण । निरातङ्कमिव निःशङ्कमिव राक्षसानां निधनादिति भावः ।

देवेन्द्रेति । देवेन्द्रेण उपनिवेद्या रावणप्रीणनार्थं प्रदेया या नन्दनवनस्रक् नन्दनवनीयपुष्पमाला तच्छोभितेन तोरणेन वरिष्ठेन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(दृष्ट्वा सकौतुकम्।) सखे हेमाङ्गद!

एताः पश्य पलादपत्तनभुवः सौवामणीनां दृशा-
मस्राम्भोभिरदेवमातृकगृहारामाभिरामश्रियः।
एतासु प्रतिघातिविक्रमकथोपालम्भवैतण्डिकैः
क्लृप्तेन्द्रध्वजिनीजयानुकृतिभिर्डिम्भैरपि क्रीडितम् ॥२४॥

स्थायिनी आदरिणी दशकण्ठस्य वारणस्य विक्रमस्य पराक्रम-सङ्गिनी इयं लङ्का दृश्यते इति शेषः। यस्यां लङ्कायां समन्तात् चतुर्दिक्षु इमाः युद्धस्य आलोकने यत् कौतुकं तेन उन्मुखाभिः वधूभिः राक्षसमहिलाभिः संकीर्णाः व्याप्ताः कर्णीरथाः स्त्रीरथा यासु ताः रथ्याः राजमार्गान् किं कथयामि? अपितु अनिर्वचनीयतया कथयितुं न शक्नोमीत्यर्थः। यत् यतः रावणस्त्रीणां राजमार्गविचरणादिति भावः अमी वैमानिका विमानचारिणो देवाः व्योम्नि आकाशे न यान्ति न सञ्चरन्ति राक्षसमहिलानां सन्दर्शनभयादिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ २३ ॥

एता इति। सुत्रामा इन्द्रः तस्य इमाः सौवामण्यः तासां दृशां नेत्राणां अस्राम्भोभिरश्रुजलैः अदेवमातृकाः नद्यम्बुपालिताः, देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नश्रीहिपालितः। स्वाश्रदीमातृको देवमातृकस्य यथाक्रममित्यमरः। ये गृहारामाः गृहोपवनानि तैः अभिरामा मनोहारिणी श्रीः शोभा यासां ताः एताः पलादपत्तनभुवः राक्षसनगरीः पश्य अवलोकय। एतासु राक्षसनगरीषु डिम्भैरपि बालकैरपि क्लृप्ता कृता इन्द्रस्य ध्वजिनीनां सेनानां जयानुकृतिः पराजयानुकरणं यैः तथाभूतैः अतएव प्रतिघातिनां विपक्षाणां विक्रमकथासु उपालम्भे अधिक्षेपे वैतण्डिकैः वितण्डा विवादः प्रयोजनमेषामिति तथोक्तैः सद्भिः क्रीडितम्। रावणेन देवसेनानां यथा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्वितीयः । सखे रत्नचूड ! किमुच्यते ।

रक्षांसीति पुरापि संशृणुमहे वीरस्तु कस्तादृशो
जागर्त्ति स्म जगत्त्रयीविपदलङ्कर्मीणदोर्विक्रमः ।
शश्वद् द्वारभुवि प्रशस्तिरचनावर्णायमानेक्षण-
श्रेणीसंभृतगोत्रभिन्मयजयस्तम्भो यथा रावणः ॥२५॥

रत्नचूडः । सखे हेमाङ्गद ! पश्य पश्य । पौलस्त्यपत्तन-
प्रतोलीषु दीयमाने सन्नाहपटहे (ण)

पराजयः कृतः अतस्ता बालका अपि तदनुकरणरूपां क्रीडां कुर्वन्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

रक्षांसीति । पुरापि पूर्वमपि रक्षांसि सन्तीति शेषः इति संशृणुमहे अस्माभिः परस्परं श्रुतमित्यर्थः । व्यतीहारे आत्मनेपदम् । तु किन्तु जगतां त्रयी त्रिलोकीत्यर्थः तस्या विपदः अलङ्कर्मीणः समर्थः दोर्विक्रमः बाहुबलं यस्य तथाभूतः त्रिभुवनविजयीति भावः (किं बहुना) शश्वत् निरन्तरं द्वारभुवि द्वारदेशे प्रशस्तिरचना प्रशंसायाः लिपिरित्यर्थः रावणस्येति भावः तस्या वर्णायमाना अक्षरायमाणा वर्णमालेवेत्यर्थः या ईक्षणश्रेणी नयनपङ्क्तिः सहस्रं नेत्राणीति भावः तैः संभृतः युक्तः यः गोत्रभित् इन्द्रः तन्मयः तदात्मकः जयस्तम्भः यस्य तथोक्तः रावणो यथा तादृशो वीरः कः जागर्त्ति स्म न कोऽपीत्यर्थः । राक्षसेषु रावणसदृशो वीरो न कदापि श्रुत इति पर्यवसितोऽर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ २५ ॥

(ण) पौलस्त्येति पौलस्त्यस्य रावणस्य पत्तनं नगरं तस्य प्रतोलीषु रथ्यासु । दीयमाने ताड्यमाने इति भावः सन्नाहपटहे संग्रामवादित्रभेदे ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दिग्दन्तावलदन्तमौक्तिकमयद्वारस्तोरणस्रग्विणो
गीर्वाणाधिपतिप्रतीष्टनिगडोन्मृष्टान्यवन्दीशुचः ।
वीरश्रीसहपांसुकेलिसुहृदो मन्दोदरीबन्धुता-
कौटीरासुरसुन्दरीसुरभयः क्षुभ्यन्ति रक्षोगृहाः ॥२६॥

हेमाङ्गदः । (विहस्य ।) नूनमिदानीमत्र
दृष्ट्वा राघवमेकराक्षसवनस्वच्छन्ददावानलं
जानक्यां निजवल्लभस्य परमं प्रेमाणमालोक्य च ।
काङ्क्षन्ती मुहुरात्मपक्षविजयं भङ्गञ्च मुग्धा मुहु-
र्ध्यायन्ती ध्रुवमन्तरालपतिता मन्दोदरी वर्त्तते ॥२७॥

दिगिति । दिशां दन्तावलाः हस्तिनः तेषां दन्ता मौक्तिकास्तत्कुम्भभवा इति भावः तन्मयं द्वारं तोरणस्रक् तोरणमाला च यथाक्रमं दन्तमयं द्वारं मौक्तिकमयी तोरणस्रगिति भावः तद्वन्तः, गीर्वाणाधिपतिना देवेन्द्रेण प्रतीष्टा गृहीताः सोढा इति यावत् निगड़ोन्मृष्टानां निगड़बद्धानाम् अन्यानां स्वव्यतिरिक्तानां वन्दीनाम् कृतकृतानां स्त्रीणां शुचः शोका येषु तथोक्ताः, वीरश्रिया सह पांसुकेलिः धूलिक्रीड़ा तत्सुहृदः तत्सङ्गिनः इत्यर्थः, मन्दोदरी असुरकन्येति भावः तया या बन्धुता सख्यं तया कौटीरः गर्वः यासां, कौटीरस्तु मतो गर्वे इति शाश्वतः । तथाभूता या असुरसुन्दर्यः ताभिः सुरभयः मनोज्ञाः, रक्षोगृहाः राक्षसानां गृहाणि क्षुभ्यन्ति क्षुब्धा भवन्ति चञ्चला भवन्तीति यावत् सत्राहपटहनादादिति भावः । शार्दूलविक्रीड़ितं वृत्तम् ॥ २६ ॥

दृष्ट्वेति । मन्दोदरी राघवं रामम् एकः अद्वितीयः राक्षसा एव वनानि तेषां तेषु वा स्वच्छन्दः स्वेच्छाप्रवृत्तः दावानलः तं दृष्ट्वा जानक्यां सीतायां निजवल्लभस्य निजकान्तस्य रावणस्य परमं प्रेमाणम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूड़ः । (सकरुणस्मितम् ।) वयस्य ! विबुधराजविजयं-विक्रमक्रीतचेतसा (त) वृद्धपितामहेन स्वयं परमेष्ठिना(थ) प्रतिष्ठितेन्द्रजिन्नामधेयशेषस्य तादृशस्य तनूजस्य (द) शुचा विचेष्टमानामरातिग्रहिणी(ध)मपि नैवमुपक्रोष्टु(न)-मर्हसि । (पुरोऽवलोक्य च ।) हस्तदक्षिणेन कथमयं द्विधा (प) विभज्यते महाजनः । (निरूप्य च सभटाकौतुकम् ।) सखे ! पश्य पश्य ।

अनुरागम् आलोक्य दृष्ट्वा च मुग्धा विमूढा अतएव मुहुः पुनः पुनः आत्मपक्षाणां राक्षसानामित्यर्थः विजयं विशिष्टं जयं काङ्क्षन्ती अभिलषन्ती मुहुश्च भङ्गं पराजयं ध्यायन्ती चिन्तयन्ती सती भ्रुवं निश्चयेन अन्तरालपतिता जयपराजयचिन्तयोर्मध्यवर्त्तिनी वर्त्तते । स्वपक्षीयजये रावणः सीताप्रेमबद्धो मां परित्यक्ष्यति, शत्रूणां जये मम वैधव्यमित्युभयथैव ममानिष्टमिति चिन्ताकुला तिष्ठतीति भावः । शार्दूलविक्रीड़ितं वृत्तम् ॥ २७ ॥

(त) विबुधेति विबुधानां राजा विबुधराज इन्द्रः तस्य विजये यो विक्रमः तेन क्रीतं वशं गतं चेतः यस्य तथाभूतेन ।

(थ) परमेष्ठिना ब्रह्मणा ।

(द) प्रतिष्ठितेति प्रतिष्ठितं संस्थापितमित्यर्थः दत्तमिति यावत् इन्द्रजित् इति नामधेयं शेषः यस्य तथाविधस्य । तादृशस्य महावीरस्येति भावः । तनूजस्य पुत्रस्य मेघनादस्येति शेषः ।

(ध) विचेष्टमानां व्याकुलतया विचरन्तीमित्यर्थः । अरातिग्रहिणीं शत्रुमहिषीम् ।

(न) उपक्रोष्टुं विनिन्दितुम् ।

(प) द्विधा भागद्वयेनेत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

न्यञ्चन्यञ्चद्धरित्रीधृतचरणभरश्चन्द्रहासैकदृष्टि-
र्व्यावल्गद्यौगपद्योत्सुकसकलभुजाक्रान्तदिक्चक्रवालः ।
क्रोधक्रूराचिरक्तोत्पलरचितवियत्तोरणस्रग्वि बिभ्र-
द्वक्त्राणि प्रत्यनीकप्रसरसरभसो निर्जिहीते दशास्यः ॥२८॥

हेमाङ्गदः । (निर्वर्ण्य ।) अहो ! दृष्टचरम(फ)प्यस्य सांग्रामिकमोजायितमयातयाममिव (ब) भीषयते । सखे रत्नचूड़ !

मरुत्वद्भ्रोलिचण्डघटितघोरश्वयथुना
निसर्गोदग्रेण प्रसभमुरसा पीतगगनः ।

न्यञ्चदिति । न्यञ्चन्ती न्यञ्चन्ती अतिशयेन खिन्नीभवन्ती वा धरित्री पृथ्वी तस्यां धृतः अर्पितः चरणभरः येन तथोक्तः, चन्द्रहासे निजकरवाले एका केवला दृष्टिर्यस्य तथाभूतः, व्यावल्गद्भिः सञ्चलद्भिः यौगपद्येन समकालत्वेन उत्सुकैः सव्यापारव्यग्रैरित्यर्थः सकलैः भुजैः बाहुभिः विंशत्येति भावः आक्रान्तं दिक्चक्रवालं दिङ्मण्डलं येन तथाविधः, क्रोधेन क्रूराणि भीषणानि अचीणि एव नेत्राण्येव रक्तोत्पलानि तैः रचिता वियति आकाशे तोरणस्रग् यैः तथाभूतानि वक्त्राणि मुखानि बिभ्रत् दधानः, प्रत्यनीकेषु प्रतिभटेषु प्रसराय अभिगमाय सरभसः सवेगः स्वराजानित्यर्थः, दशास्यः रावणः निर्जिहीते निर्गच्छति लङ्कापुरादिति शेषः । खण्डराहुत्वम् ॥ २८ ॥

(फ) दृष्टचरमपि दृष्टपूर्वमपि ।

(ब) ओजायितं ओजस्विता प्रताप इति यावत् । अयातयाममिव अजीर्णमिव अपरिभुक्तमिव वा यवनिरिति यावत्, यत् जीर्णं परिभुक्तञ्च यातयामं तदुच्यते [illegible] ।

मरुत्वदिति । अयं [illegible] दशास्यः रावणः उरसः अस्य गन्तोति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रियं देवद्रीचीं निजभुजवनोद्दामकरिणी-
मयं कुर्वन् वीरः स्मरसि कथमासीद्दशमुखः ॥२९॥

रत्नचूडः । सखे ! किमुच्यते । महतामप्युपरि किम-
प्ययं रावणः ।

एनं कल्पतरूद्भवैरसुकरव्याजैः सदा भूषणै-
राराध्नोति सुराधिपः किमपरं दीनो नदीनां पतिः ।
दण्डाधिक्यभयात् कथं कथमपि स्कन्धोपनेयान् मणी-
नप्यस्मै परिशोधयत्यपदिशन्निःसम्पदः स्वाकरान् ॥३०॥

मरुत्वान् इन्द्रः तस्य दम्भोलिना वज्रेण क्षणम् अल्पकालं न तु चिर-
मिति भावः घटितः क्षतः घोरः दीर्घः क्षयवुः शोथः स्फीततेति
भावः यस्य तादृशेन निसर्गोदयेन स्वभावविशालेन उरसा वक्षसा
प्रसभं सम्यक् यथा तथा पीतम् आक्रान्तं गगनम् अन्तरीक्षं येन
तथाभूतः सन् देवान् अञ्चतीति देवद्रीची तां देवसम्बन्धिनीमित्यर्थः
श्रियं लक्ष्मीं निजभुजवनस्य उद्दामकरिणीं मत्तहस्तिनीं कुर्वन् कथम्
आसीत् तत् स्मरसि ? शिखरिणीवृत्तम् ॥ २९ ॥

एनमिति । सुराधिपः इन्द्रः कल्पतरूद्भवैः कल्पवृक्षप्रसूतैः असु-
कराणि असुलभानि व्यज्यन्ते इति तथोक्तैः वस्तुमूल्येनापि दुष्प्रापै-
रिति भावः भूषणैः अलङ्कारैः एनं रावणं सदा आराध्नोति सेवते ।
किमपरं वक्तव्यमिति शेषः, नदीनां पतिः समुद्रः दीनः दुःखितः सन्
दण्डाधिक्यभयात् दण्डोऽस्त्येव अधिको मा भूदिति प्रत्याशयेति भावः ।
स्वाकरान् निजोत्पत्तिस्थानानि निःसम्पदः रत्नशून्यानिति यावत्
अपदिशन् कुर्वन् अस्मै रावणाय स्कन्धोपनेयानपि स्कन्धबाह्यानपि
स्थूलानिति भावः मणीन् रत्नानि परिशोधयति ददातीत्यर्थः ।
शार्दूलविक्रीडितं वृत्तम् ॥ ३० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हेमाङ्गदः (सभयम्।) कथमयं परापतित (भ) एवासमस-
मरहर्षहेषमाणवनायुजवाजिनिवहवितीर्णकीनाशकासर-
कर्णज्वरेण प्रजविना (म) रथेन कार्मुकपाणि(य)र्महावीरः।

रत्नचूड़ः। (सभयाद्भुतम्।)

कल्पान्तक्रूरसूरोत्करविकटमुखो मानुषद्वन्द्वयुद्ध-
क्रीड़ाकण्डूयदूर्जस्वलसकलभुजालोकभूयोविलज्जः।
संभूयोत्तिष्ठमानस्वपरबलमहाशस्त्रसम्पातभीमा-
मुर्वीं गीर्वाणगोष्ठीगुरुमदनिकषो नैकषेयः पिधत्ते॥३१॥

(भ) परापतितः आगतः।

(म) असमेति असमे अतुल्ये समरे संग्रामे यो हर्षः तेन हेषमाणो ह्रेषाशब्दं कुर्वन् यः वनायुजवाजिनिवहः वनायुजाख्यदेश-भवाश्वनिवहः तेन वितीर्णः दत्तः कीनाशकासरस्य यमसहिषस्य, कीनाशः कर्षके क्षुद्रे कृतान्तोपांशुघातिनीति विश्वः। कर्णज्वरः श्रवणव्याधिः यस्य तथाभूतेन। प्रजविना प्रकृष्टवेगवता।

(य) कार्मुकपाणिः धनुष्पाणिः।

कल्पान्तेति। कल्पान्ते प्रलयकाले क्रूरः दारुणः यः सूरोत्करः सूर्यसमूहः तद्वत् विकटानि भीषणानि मुखानि यस्य तथोक्तः, मानुषद्वन्द्वेन मानवयुगलेन रामलक्ष्मणद्वयेनेति भावः यत् युद्धं तदेव क्रीड़ा तया कण्डूयन्तः कण्डूतिं कुर्वन्तः ऊर्जस्वलाः बलवन्तः ये सकला भुजाः विंशतिबाहव इति भावः तेषाम् आलोकेन दर्शनेन भूयः अधिकं यथा तथा विलज्जः लज्जितः, मानुषौ भुजचतुष्टयवन्तौ एताभ्यां सह मम विंशतिभुजस्य युद्धं लज्जाकरमिति भावयन्निति भावः। गीर्वाणगोष्ठीनां देवसमाजानां गुरुर्गर्हान् यः मदः गर्वः यमेव सर्वो-परिवर्त्तिन इत्यहङ्कार इत्येवंरूप इति यावत् तस्य निकषः कषण-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हिमाङ्गदः । (सकौतुकम् ।) सखे ! दक्षिणतः (र) पश्य तावत् ।

अगस्त्याज्ञासद्यःशमितविपुलोच्छ्रायविषमा-
नुदस्यन्तः सेतावलगितवतो विन्ध्यशिखरान् ।
शिरःसंख्यासत्याकृतदशमुखालोकरभसा-
दुपेत्यातित्रस्ताश्चपलमपसर्पन्ति कपयः ॥३२॥

रत्नचूडः । (दृष्ट्वा सहासम् ।)

शस्त्रीकृतान् कपिभिरापततो मुदैव
विक्रम्य चन्दनतरून् दधते पलादाः ।

प्रस्तरः विध्वंसक इति भावः, नैकपेयः निकषात्मजः रावणः संभूय मिलित्वा उत्तिष्ठमानानाम् उद्यमं कुर्वतां स्वपरबलानां स्वसैन्यानां विपक्षसैन्यानाञ्चेत्यर्थः महद्भिः शस्त्रसम्पातैः भीमां भीषणाम् उर्वीं पृथ्वीं पिबन्ते आच्छादयति निजशरीरेण शस्त्रवर्षणेन वेति शेषः । स्रग्धराछन्दः ॥ ३१ ॥

(र) दक्षिणतः दक्षिणस्यां दिशि ।

अगस्त्येति । अगस्त्यस्य मुनेः आज्ञया सद्यः शमिताः विपुलोच्छ्रायेण महोन्नत्या विषमाः तीव्राः तान्, सेतौ सेतुबन्धने अलगितवतः अलग्नान् सेतुबन्धनार्थमानीतान् किन्तु आधिक्येन प्रयोजनाभावात् परित्यक्तानिति भावः विन्ध्यशिखरान् विन्ध्यगिरिशृङ्गाणीत्यर्थः उदस्यन्तः उत्क्षिपन्तः कपयः वानराः उपेत्य समीपं गत्वा शिरसां मूर्ध्नां संख्यया गणनया सत्याकृतः ज्ञातः यः दशमुखः रावणः तस्य आलोकरभसात् दर्शनसंभ्रमात् अतिशयेन त्रस्ताः भीताः सन्तः चपलं यथा तथा अपसर्पन्ति अपगच्छन्ति पलायन्ते इत्यर्थः । शिखरिणीछन्दः ॥ ३२ ॥

शस्त्रीकृतानिति । मलं मांसम् अदन्ति खादन्तीति पलादाः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्सङ्गिनस्तु भुजगाः क्षणपाशबन्ध-
दुःखासिकामवयवेषु दिशन्त्यमीषाम् ॥३३॥

हेमाङ्गदः । (विहस्य ।) इतोऽपि तावत्

रक्षःस्वयंवरविडम्बपराङ्मुखीभिः
पुष्पोत्करे सुरवधूभिरनुज्झितेऽपि ।
शस्त्रीकृतेन तरुणा हरिणा हतोऽसौ
नक्तञ्चरः स्वपिति तत्कुसुमावकीर्णः ॥३४॥

रत्नचूडः । (चिरं विभाव्य ।) सखे ! पश्य पश्य !

राक्षसाः कपिभिः वानरैः शस्त्रीकृतान् प्रहरणीकृतान् आपततः आगच्छतः चन्दनतरून् विक्रम्य उत्पुत्येति यावत् सुदैव हर्षेणैव दधते धारयन्ति । तु किन्तु तत्सङ्गिनः तत्स्था इति यावत् भुजगाः सर्पाः अमीषां पलाशानाम् अवयवेषु अङ्गेषु क्षणं पाशबन्धेन दुःखासिकां दुःखेन अवस्थानं दिशन्ति जनयन्ति । चन्दनतरुषु भुजगास्तिष्ठन्तीति प्रसिद्धिः । वसन्ततिलकं वृत्तम् ॥ ३३ ॥

रक्ष इति । रक्षसां संग्रामहतानामिति भावः स्वयंवर एव विडम्बः तिरस्कारः गर्हणव्यापार इति यावत् तस्मात् पराङ्मुखीभिः विमुखीभिः सुरवधूभिः सुराङ्गनाभिः पुष्पोत्करे पुष्पसमूहे अनुज्झितेऽपि, अदृष्टेऽपि संग्रामहता वीराः स्वर्गं गच्छन्ति तांश्च सुराङ्गनाः पुष्पवृष्ट्याभिनन्द्य स्वयं वृण्वन्तीति शास्त्रं किन्तु राक्षसानाम् अतिदुराचारतया तेषां स्वयंवरणे विलम्ब इति भावः । हरिणा वानरेण शस्त्रीकृतेन तरुणा हतः असौ नक्तञ्चरः राक्षसः तस्य तरोः कुसुमैः अवकीर्णः अभिवृतः सन् स्वपिति निद्राति रणभूमाविति शेषः । वसन्ततिलकं वृत्तम् ॥ ३४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वतनुरुचिभिर्दीर्घाङ्गीं द्यामितः सृजतां निजै-
रथ विदधतः कायाभोगैरकाण्डतमस्विनीम् ।
दधति नितरामुद्दीप्राणामधस्छिदुरश्रियो
हरिहुतभुजां धूमच्छायाममी रजनीचराः ॥३५॥

हेमाङ्गदः । (सस्मितम् ।) सखे ! पश्य पश्य ।

किमपि कपयः कर्माश्चर्यं महातरुशस्त्रिणो
विदधति यथा दिक्कूलेभ्यस्तथापसरत्यमूः ।
ध्रुवमवपतद्रक्षःश्रेणीविमुक्तनभोऽन्तर-
प्रतिभरणिकानिःस्यामानो दशाननकीर्त्तयः ॥३६॥

स्वतन्विति । छिदुरा भङ्गुरा विनश्वरी श्रीः शोभा येषां तथा-भूताः क्रमेण जयलाभादिति भावः, अमी रजनीचराः राक्षसाः निजैः स्वीयैः कायाभोगैः देहविस्तारैः अकाण्डे अकाले तमस्विनीं तामसीं रात्रिं विदधतः जनयन्तः सन्तः कृष्णवर्णत्वादिति भावः, स्वतनुरुचिभिः निजदेहकान्तिभिः हृतः अस्मिन् प्रदेशे दीर्घाङ्गीं दीर्घदिवसां द्याम् आकाशं सृजतां कुर्वतां पिङ्गलवर्णत्वादिति भावः अधः निम्नदेशे भुवीत्यर्थः नितराम् अत्यर्थम् उद्दीप्राणां जयलाभेन दीप्यमानानामित्यर्थः हरयः वानरा एव हुतभुजः अग्नयः तेषां धूमच्छायां धूमकान्तिं दधति धारयन्ति । वानरा भूमिष्ठाः पिङ्गल-वर्णा दीप्यमानाश्चेति अग्निसाम्यम् । राक्षसास्तु रथारूढत्वादुपरि-वर्त्तिनः पराजयलाभेन भङ्गुरश्रियः कृष्णवर्णाश्चेति धूमसाम्यमिति भावः । उपमालङ्कारः । हरिणीवृत्तम् ॥ ३५ ॥

किमपीति । कपयः वानराः महातरुशस्त्रिणः महातरुप्रह-रणाः सन्तः किमपि आश्चर्यं कर्म यथा विदधति कुर्वन्ति, तथा अमूः दशाननकीर्त्तयः रावणयशांसि अवपतन्तीभिः रणभूमाविति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (ससंभ्रमम् ।) अहह ! दारुणमुपस्थितम् ।

रक्षोनिपिष्टकपिमुक्तमहीध्रचूर्ण-
पूर्णान्तराभिरिषुवृष्टिभिरुज्जिहानः ।
रोषाट्टहासदहनप्रसरैस्तडित्वां-
लङ्काधिपः किमपि सन्तमसं तनोति ॥३७॥

हेमाङ्गदः । (क्षणं निर्वर्ण्य ।) अहो ! क्षुद्रैरपि संभूय भूयोभि(ल)रेको महान् सुकरः कदर्थयितुम् (व) । यतः ।

दृप्यद्दिक्पालदन्तावलबहलमदावग्रहोग्राभिरक्षां
ताराभिर्दीप्यमानं दिशि विदिशि दशग्रीवमुद्ग्रीवयन्तः ।

शेषः रक्षसां श्रेणीभिः विमुक्तं विरहितं यत् नभोऽन्तरम् आकाश-मध्यं तस्य प्रतिभरणिकया प्रतिपूरणेनेत्यर्थः निर्नास्ति स्थाम वर्त्म यासां तथाभूताः चीणा इत्यर्थः दिक्कूलेभ्यः अपसरन्ति । हरिणी-वृत्तम् ॥ ३६ ॥

रक्ष इति । रक्षोभिः निपिष्टः निःशेषेण पिष्टः कपिभिर्मुक्तः निक्षिप्तः यः महीध्रः पर्वतः तस्य चूर्णेन रजोरूपेणेति भावः पूर्णं व्याप्तम् अन्तरं यासां ताभिः इषुवृष्टिभिः बाणवर्षैः उज्जिहानः उद्गच्छन् उद्यन् लङ्काधिपः रावणः रोषेण ये अट्टहासाः घोरहसि-तानि एव दहनप्रसराः अग्निविस्ताराः तैः तडित्वान् विद्युत्वान् दीप्तिमान् सन्निति भावः अथच लङ्काधिप एव उडित्वान् मेघ इति व्यस्तरूपकम् । किमपि अनिर्वचनीयं सन्तमसं गाढान्धकारं तनोति विस्तारयति । वसन्ततिलकं वृत्तम् ॥ ३७ ॥

(ल) संभूय मिलित्वा । भूयोभिः बहुभिः ।

(व) कदर्थयितुं क्लेशयितुम् अभिभवितुमित्यर्थः ।

दृप्यदिति । निःशेषं यत् सेतुपथनं सेतुबन्धनं तस्मात् समधिकैः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एते निःशेषसेतुग्रथनसमधिकैः शस्त्रिणः शैलपादै-
रुद्दामानः कपीन्द्रा रजनिचरपुरीमुत्तरेण प्लवन्ते ॥३८॥

रत्नचूडः । (सविषादम् ।) हन्त महद्विषममिव पश्यामि । यदमी निष्कृपक्षुपाणपाश्यमानप्रतिभटविकटोरःकपाटक-ण्टकितकपोलभित्तयः सन्तानपातिनीभिरनीकरुधिरधारा-भिरतिप्रहृष्टवीरपाणगोष्ठीमहोत्सवाः (ग) समन्तादभिद्र-वन्ति यातुधानाः (घ) प्लवङ्गमयूथपतीन् ।

हेमाङ्गदः । (सहर्षम् ।) सखे ! कृतं विषादेन । यदेष

अवशिष्टैरित्यर्थः शैलपादैः पर्वतखण्डैः शस्त्रिणः आयुधवन्तः एते उद्दामानः उच्छृङ्खलाः कपीन्द्राः महाकपयः, दृप्यतां दर्पशालिनां दिक्पालदन्तावलानां दिग्गजानां वहलः प्रभूतो यो मदः दानवारि तस्य अवपहे वृष्टिप्रतिबन्धे उपाभिः क्रूराभिः अक्ष्णां नेत्राणां ताराभिः दिशि विदिशि दीप्यमानं दशग्रीवं रावणम् उद्गता ग्रीवा यस्य स उद्ग्रीवः तं कुर्वन्तः सन्तः रजनिचरपुरीं लङ्काम् उत्तरेण लङ्कायाः उत्तरस्यां दिशीत्यर्थः प्लवन्ते उत्पतन्ति । स्रग्धराछन्दः ॥३८॥

(ग) निष्कृपेति निष्कृपैः दारुणैः कृपाणैः करवालैः पाश्यमाना विदार्यमाणाः प्रतिभटानां विपक्षाणां विकटाः ये उरःकपाटाः विशालवक्षःस्थलानीत्यर्थः तैः दृष्टैरिति भावः कण्टकितः रोमाञ्चितः कपोलभित्तिरस्याकमिति भावः येषां तथोक्ताः । सन्तानपातिनीभिः प्रवाहिणीभिरिति यावत् । अनीकेति अनीकानां सैन्यानां रुधिर-धाराभिः । अतिप्रहृष्टेति अतिशयेन प्रहृष्टः हृष्टिं गतः वीराणां पान-गोष्ठीमहोत्सवः सुरापानसमितिवत् महान् उत्सवः उल्लासः येषां तथाभूताः ।

(घ) यातुधानाः राक्षसाः, प्लवङ्गमः पुण्यजनो नैर्ऋतो यातु-रक्षसी इत्यमरः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशमुखशरपीड़ितापयानो-
द्यमपरिपुच्छयमानवानराणि ।
सरभसमभिसान्त्वयन् बलानि
द्विषमभियोधयति प्लवङ्गराजः ॥ ३९ ॥

रत्नचूडः । (दृष्ट्वा सखेदहासाद्भुतम् ।) अहह!

अस्त्राणि प्लवगाधिपेन विहिताः पौलस्त्यवक्षःस्थलो-
सङ्घट्टानलदत्तदाविपदः सीदन्ति भूमीरुहाः ।
उत्पाट्य प्रहितश्च शैलशिखरो लङ्केन्द्रहस्तावली-
निष्पिष्टो निजकुञ्जनिर्झरजलैर्जम्बालपिण्डायते ॥४०॥

दशमुखेति । प्लवङ्गराजः सुग्रीवः दशमुखस्य रावणस्य शरैः पीड़िता व्यथिता अतएव अपयानं पलायनं तस्य उद्यमे उपक्रमे परिपुच्छयमानाः पुच्छम् उत्क्षिपन्तः वानराः येषु तानि बलानि सैन्यानि अभिसान्त्वयन् प्रियवचनेन प्रोत्साहयन्निति भावः सरभसं सत्वरं द्विषं शत्रुं रावणम् अभियोधयति युद्धार्थमाभिमुख्येन गच्छतीत्यर्थः । पुष्पिताग्रावृत्तम् ॥ ३९ ॥

अस्त्राणीति । प्लवगाधिपेन सुग्रीवेण अस्त्राणि विहिताः आयुधत्वेन निक्षिप्ता इत्यर्थः भूमीरुहाः वृक्षाः पौलस्त्यस्य रावणस्य वक्षःस्थल्यां सङ्घट्टेन सङ्घर्षणेनेत्यर्थः यः अनलः अग्निः उत्थित इति भावः तेन दत्ता दाविपत् वनाग्निव्यसनं येषां तथाभूताः सन्तः दग्धा इति भावः सीदन्ति अवसादं गच्छन्ति । तथा उत्पाट्य शैलादिति शेषः प्रहितः रावणं प्रति निक्षिप्तः शैलशिखरश्च लङ्केन्द्रस्य रावणस्य हस्तावलीभिः भुजसमूहैः निष्पिष्टः चूर्णितः सन् निजस्य स्वनिष्ठस्येति यावत् कुञ्जस्य काननस्य निर्झरजलैः जम्बालपिण्डायते कर्दमपिण्ड इवाचरति । शार्दूलविक्रीड़ितं वृत्तम् ॥ ४० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हेमाङ्गदः । (विहस्य ।) सखे ! दशकन्धरमधिकृत्य न किञ्चिदेतत् ।

तथैतेनोद्धृत्य स्फटिकशिखरी सोऽपि विदधे
समन्तादामूलत्रुटितवसुधाबन्धविधुरः ।
अमुं येनाद्यापि त्रिपुरहरनृत्यव्यतिकरः
पुरस्तादन्येषामपि शिखरिणामुल्लसयति ॥४१॥

किञ्च तर्कयामि ।

शस्त्रीकृतस्तरुवरो हरिपुङ्गवेन
लङ्केन्द्रवक्षसि मृणालमृदुः पपात ।
तत्र स्थितैस्तु कुसुमैः कुसुमेषुरेनं
सीतावियोगविधुरं दृढमाजघान ॥४२॥

तथेति । एतेन रावणेन सोऽपि स्फटिकशिखरी कैलासपर्वतः तथा तेन प्रकारेण उद्धृत्य उत्क्षिप्य समन्तात् आमूलं त्रुटितेन छिन्नेन वसुधाबन्धेन पृथिवीबन्धनेन विधुरः विहस्तः विदधे कृतः, येन अद्यापि त्रिपुरहरस्य शङ्करस्य नृत्यव्यतिकरः नर्त्तनलीला अन्येषां शिखरिणां पर्वतानां पुरस्तात् पूर्वम् अमुं कैलासम् उल्लसयति चालयति । शिखरिणीवृत्तम् ॥ ४१ ॥

शस्त्रीकृत इति । हरिपुङ्गवेन वानरराजेन शस्त्रीकृतः प्रहरणीकृतः तरुवरः महावृक्षः लङ्केन्द्रस्य रावणस्य वक्षसि मृणालमिव मृदुः कोमलः सन् पपात । तु पुनः कुसुमेषुः कामः तत्र तरुवरे स्थितैः कुसुमैः निजशरभूतैरिति भावः सीतावियोगेन विधुरं कातरम् एनं रावणं दृढम् आजघान प्रहृतवान् । वसन्ततिलकं वृत्तम् ॥४२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (विहस्य ।) सखे ! किमुच्यते महासत्त्ववता-मुपरि खल्वसौ रावणः । तथाहि ।

खेषूत्क्षत्य हुतेषु मूर्धसु जवादग्नेः स्फुटित्वा वहि-
र्व्याकीर्णेष्वलिकेषु देवलिपिभिर्दृष्टापि रामायणम् ।
चित्तेनास्खलितेन यस्तदधिकं ब्रह्माणमप्रीणयत्
कस्तस्मै प्रथमाय मानिषु महावीराय वैरायते ॥४३॥

हेमाङ्गदः । सखे ! पश्य पश्य भयानकमद्भुतं च वर्त्तते ।

विशिखौघविकीर्णगण्डशैले
तरुसंचूर्णितशक्तितोमरे च ।
कपिराक्षसराजयोरजस्रं
तुमुले भान्ति तलातलिप्रपञ्चाः ॥४४॥

खेष्विति । उत्क्षत्य छित्त्वा खेषु निजेषु मूर्धसु शिरःसु हुतेषु सत्सु जवात् वेगात् अग्नेः अग्निकुण्डात् स्फुटित्वा वहिः व्याकीर्णेषु प्रकटितेषु अलिकेषु ललाटेषु देवलिपिभिः विधातृलिखिताक्षरैः रामायणं रामकर्त्तृकमात्मानो वधमिति यावत् दृष्टापि यः अस्खलितेन अविचलितेन चित्तेन तदधिकं तस्मात् पूर्वमादित्यर्थः अधिकं यथा तथा ब्रह्माणं अप्रीणयत् तोषयामास, मानिषु मानवत्सु प्रथमाय श्रेष्ठायेत्यर्थः तस्मै महावीराय रावणायेति शेषः कः वैरायते तं प्रति वैरमाचरतीत्यर्थः न कोऽपीति यावत् । शार्दूलविक्रीडितं वृत्तम् ॥४३॥

विशिखेति । विशिखौघेन शरसमूहेन विकीर्णाः विक्षिप्ताः निराकृता इति यावत् गण्डशैलाः गिरिच्युतस्थूलोपलाः, गण्डशैलास्तु च्युताः स्थूलोपला गिरेरित्यमरः । सुग्रीवप्रहिता इति भावः यत्र तादृशे, तरुभिः संचूर्णिताः शक्तयः तोमराश्च अस्त्रविशेषाः रावण-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नूनमिदानीं

श्वासोर्मिप्रतिबन्धतुन्दिलगलप्रच्छन्नहारावली-
रत्नैरापतयालुभिः कृतफणप्राग्भारभङ्गभ्रमः ।
श्रोत्राभावनिरन्तरालमिलितैः स्तब्धैः शिरोभिर्भुवं
धत्ते वानरवीरविक्रमभराद् भुग्नैर्भुजङ्गाधिपः ॥४५॥

(सविषादम् ।) अहह ! बाहुयन्त्रेणापीड्य वानरराजं सुग्रीवं किमाह रावणः ।

अस्मद्बाहुवनान्दोलसुलभं फलमाप्नुवन् ।
नियुद्धलाघवक्लान्त शाखामृग ! सुखी भव ॥४६॥

प्रहिता इति भावः यत्र तथाभूते, कपिराजसुराजयोः सुग्रीवरावणयोः अजस्रम् अनवरतं तुमुले घोरे संग्रामे इति शेषः तलातलिप्रपञ्चाः तलैश्चपेटैश्च तलैश्च प्रहृत्य यत् युद्धं वृत्तं तत् तलातलि तत्प्रपञ्चाः तद्विस्ताराः भान्ति राजन्ते ॥ ४४ ॥

श्वासेति । भुजङ्गाधिपः सर्पराजः वानरवीरस्य सुग्रीवस्य विक्रमभरात् पदविक्षेपभारात् आपतयालुभिः पुनः पुनः पतनशीलैः श्वासोर्मीणां निःश्वासतरङ्गाणां प्रतिबन्धेन तुन्दिलात् उच्छूनात् गलात् प्रच्छन्नायाः हारावल्याः रत्नैः कृतः जनितः फणानां सहस्रसंख्यकानामिति भावः प्राग्भारस्य विस्तारस्य भङ्गभ्रमः त्रोटनभ्रान्तिर्यस्य तथाभूतः सन् श्रोत्राभावेन कर्णविरहेण सर्पजातेश्चक्षुःश्रवस्त्वादिति भावः निरन्तरालम् अविच्छिन्नं यथा तथा मिलितैः स्तब्धैः निश्चलैः किन्तु भुग्नैः अवनतैः शिरोभिः सहस्रफणमण्डलैरिति यावत् भुवं पृथिवीं धत्ते धारयति । शार्दूलविक्रीडितं वृत्तम् ॥ ४५ ॥

अस्मदिति । हे शाखामृग ! नियुद्धे बाहुयुद्धे, नियुद्धं बाहुयुद्धे स्यादित्यमरः । यत् लाघवं क्षिप्रहस्तत्वं तेन क्लान्तः तत्सम्भ्रमौ ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः। (सहर्षम्।) सखे! करणकौशलमोचितात्मा विपक्षदुर्वचनलुप्यमानहृदयो हृदयङ्गम(स)मभिदधाति वानरेन्द्रः।

विंशत्या युगपत्क्षमैरपि भुजैराकर्षणच्छेदयो-
रच्छिन्नं दशमं शिरः कथयति छिन्नानि यानि क्रमात्।
तान्याराद्रमहेश्वराणि भवतः शीर्षाणि तुल्यं दश
छिन्दानो दशभिर्नखैर्यदि पुनः शाखामृगेन्द्रः सुखी ॥४७॥

अपिच। रे रे राक्षस!

अस्माकं बाहुवनेन भुजनिवहेन यः आन्दोलः कम्पनं पीडनमिति यावत् तेन सुलभं फलं मृत्युरूपमिति भावः आप्नुवन् लभमानः सन् सुखी भव। अनुष्टुब्वृत्तम् ॥ ४६ ॥

(स) करणेति करणस्य इन्द्रियस्य उपायस्य वा कौशलेन नैपुण्येन मोचितः त्याजितः रावणेनेति भावः आत्मा शरीरं यस्य तथाभूतः। विपक्षेति विपक्षस्य रावणस्य दुर्वचनेन लुप्यमानं भिद्यमानं हृदयं यस्य तथोक्तः। हृदयङ्गमं मनोज्ञम्।

विंशत्येति। आकर्षणच्छेदयोः युगपत् समकालं क्षमैः समर्थैः विंशत्या भुजैः अच्छिन्नं दशमं शिरः यानि क्रमात् छिन्नानि कथयति, आराद्रः सेवितः महेश्वरः यैः तानि भवतः दश शीर्षाणि दशभिर्नखैः यदि पुनः छिन्दानः निकृन्तन् भवामीति शेषः तदा शाखामृगः अहं सुखी स्यामिति शेषः। दशमं शिरः यानि छिन्नानि कथयति तानि दशशीर्षाणीत्यसम्भवं प्रत्युत नव शीर्षाणीति युक्तं तदत्र अन्यकृतः प्रमाद इव प्रतिभातीति चिन्त्यम्। शार्दूलविक्रीडितं वृत्तम् ॥ ४७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दशमुखवधनाट्यसूत्रधारो
रघुपतिरस्य च पारिपार्श्वकोऽहम् ।
प्रकरणफलबीजभावकाना-
ममृतभुजां समुपास्महे समाजम् ॥४८॥

इत्यभिदधानेनैवोत्प्लुत्य निर्दयं शिरसि ताडितो रथध्वज-दण्डावलम्बी कथञ्चिदाखसिति रावणः। (सर्वतोऽवलोक्य सहर्षम् ।) सखे ! पश्य पश्य ।

यन्माल्यग्रथनावशेषविकलैः सन्तानकैर्नाकिनां
भर्त्रे गर्भगमेव दाम निभृतं स्वर्मालिकैर्गुम्फितम् ।
तस्मिन्नद्य दशास्यमूर्द्धनि नवप्रस्तावनामापदां
पश्यन्तो रभसौघभर्त्सितभियः क्रोशन्ति नः स्यन्दनाः ॥४९॥

दशेति । रघुपतिः, दशमुखस्य वध एव नाट्यम् अभिनेयं वस्तु तस्य सूत्रधारः प्रधाननटः । अहम् अस्य रघुपतेः पारिपार्श्विकः, सूत्रधारेण सहितः संलापं प्रकरोति यः । सूत्रधारस्तो वापि स भवेत् पारिपार्श्विक इत्युक्तलक्षणः । प्रकरणं नाटकविशेषः तस्य फलं प्रतिपाद्यरूपं बीजं कारणं नायकादिव्यापारविशेष इति भावः तद्भावकानाम् अनुभवितॄणां पक्षे प्रकृष्टं करणम् उत्प्लुतादि तस्य फलं कार्यं ताडनादि तस्य बीजं कर्कशवचनादिकं तद्भावकानाम् अनुभवितॄणाम्, अमृतभुजाम् अमृतमिव अमृतं नाटकास्वादजनितं सुखं भुञ्जते इति तथोक्तानां सहृदयानामित्यर्थः पक्षे देवानां समाजं सभां पक्षे समूहं समुपास्महे आराधयामः तव वधेनेति शेषः । पुष्पिताग्रावृत्तम् ॥ ४८ ॥

यदिति । यस्य दशास्यस्य मूर्ध्नः माल्यं दाम, तस्य ग्रथनात् गुम्फनात् अवशेषाणि परित्यक्तानीति भावः विकलानि विश्रीकानीति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हेमाङ्गदः। (सविषादम्।) अहह! सोऽप्याखास्य दशकण्ठेनापि मुष्टिना ताडितो मूर्च्छितः कपीन्द्रो नीलहनूमद्ग्रामाश्वास्यमानोऽपसार्यते (ङ)।

रत्नचूडः। सखे! प्रधनस्य (च) हि प्रथमे पर्वणि शतक्रत्वो (क) विजयन्ते पराजीयन्ते च वीराः। तत्र को विषादः।

हेमाङ्गदः। (अन्यतोऽवलोक्य।) सखे रत्नचूड! दिष्ट्या वर्धसे यदयमनुप्राप्तः।

कुशिकसुतसपर्यादृष्टदिव्यास्त्रतन्त्रो
भृगुपतिसहयुध्वा वीरभोगीणबाहुः।

भावः तैः सन्तानकैः कल्पवृक्षविशेषकुसुमैः नाकिनां देवानां भर्त्रे इन्द्राय इन्द्रार्थमित्यर्थः, तादर्थ्ये चतुर्थी। गर्भगमेव केशमध्यगतमेव दाम माल्यं, केशमध्ये तु गर्भकमित्यमरः। स्वर्गालिकैः स्वर्गोद्यानपालैः निभृतम् अतिगुप्तं यथा तथा गुम्फितं ग्रथितम्, अद्य तस्मिन् दशास्यमूर्द्धनि रावणशिरसि आपदां नवप्रस्तावनां नवां सूचनां पश्यन्तः अवलोकयन्तः नः अस्माकं स्यन्दनाः रथाः रभसौघेन हर्षातिशयेन भर्त्सिता निराकृता भीः भयं येषां तथाभूताः सन्तः क्रोशन्ति घर्घरशब्दं कुर्वन्ति। शार्दूलविक्रीडितं वृत्तम् ॥ ४९ ॥

(ङ) अपसार्यते अपनीयते।

(च) प्रधनस्य युद्धस्य, प्रधनं बलनाशयोरिति विश्वः।

(क) पर्वणि काण्डे इत्यर्थः। शतक्रत्वः शतवारानित्यर्थः।

कुशिकेति। कुशिकसुतस्य विश्वामित्रस्य सपर्यायां यज्ञे दृष्टं दिव्यम् अस्त्रतन्त्रम् अस्त्रशास्त्रं येन तथोक्तः, भृगुपतीति भृगुपतिना

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दिनकरकुलकेतुः कौतुकोत्तानचक्षु-
र्बहुमतरिपुकर्मा कार्मुकी रामभद्रः ॥५०॥

रत्नचूडः । (सहर्षं रामभवलोक्य रावणं प्रति ।) राक्षसराज!

बालेनापि विलूनधूर्जटिधनुःस्तम्भेन बाहुप्रभि-
र्येन स्वेदयता मनोहरमृजूचक्रे मुनिर्भार्गवः ।
संप्राप्तो रघुनन्दनः किमपरं तेनाधुना नेष्यते
धन्यो वालिसमानकर्तृकवधश्लाघातिभूमिं भवान् ॥५१॥

हेमाङ्गदः । (सकौतुकम् ।) सखे! तूष्णीमास्वहे (ख)

सहयुध्वा सह युद्धवान्, वीरभोगीशौ वीरयोग्यौ बाहू यस्य तथाविधः, दिनकरकुलकेतुः सूर्यवंशध्वजः, कौतुकेन उत्ताने विस्फारिते इति यावत् चक्षुषी यस्य तथोक्तः, बहुभिर्जयैरिति भावः मतम् आदृतं रिपुषु शत्रुषु कर्म यस्य तादृशः, कार्मुकी धनुष्मान् रामभद्रः अनुप्राप्त इति पद्यगतेनान्वयः । मालिनीवृत्तम् ॥ ५० ॥

बालेनेति । बालेन शिशुनापि विलूनः भग्नः धूर्जटेः शिवस्य धनुःस्तम्भः येन तथाभूतेन बाहुप्रभिः बाह्वोः उद्भवैः बलैरिति भावः स्वेदयता घर्माक्तीकुर्वता येन भार्गवो मुनिः परशुरामः मनोहरं मनोज्ञं यथा तथा ऋजूचक्रे सरलीकृतः दमित इति भावः, स रघुनन्दनः संप्राप्तः समागतः । अपरं किं वक्तव्यमिति शेषः अधुना तेन रघुनन्दनेन भवान् वालिनः वालिवधस्येति भावः समानः कर्ता यस्य तादृशो यो वधः रामकर्तृक इति भावः तेन या श्लाघा प्रशंसा तस्याः अतिभूमिम् अतिशयं नेष्यते प्रापयिष्यते अतः धन्यः पुण्यवान् भवानित्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ५१ ॥

(ख) आस्वहे तिष्ठावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तावत् । शृणुवः किं ब्रवीति रावणः । (कर्णं दत्त्वा ।) वयमेवमाह । साधु रे क्षत्रियकिंभ ! साधु ।

यत्कन्यामभिलषता निमिपतेर्न स्थाणवीयं मया
दोर्लीलातुलितावतारितहरग्रावणापि रुग्णं धनुः ।
तद् द्रक्ष्यन्त्यधुना कियन्तमवधिं यावद्भवानित्यमी
देवेन्द्रद्विपदानदुर्दिनभिदो रौद्रार्चिषो मार्गणाः ।५२।

(सविस्मयम् ।) कथमद्यापि तृणीकृतजगत्त्रयः स एवास्य तावन्नहङ्कारग्रन्थिः ।

रत्नचूडः । (सोत्प्रासस्मितम् ।) सखे ! कथमिदमेव भवन्तं विस्मापयते (ग) ।

यदिति । निमिपतेः जनकस्य कन्यां सीताम् अभिलषता मया दोर्लीलया भुजविलासेन तुलितः पश्चात् अवतारितः हरग्रावा शङ्करगिरिः कैलास इत्यर्थः येन तथाभूतेनापि समर्थेनापीति भावः । ग्रावाणौ शैलप्राषाणावित्यमरः । यत् यतः स्थाणवीयं शाम्भवम् अतः धनुः न भग्नम् इष्टदेवस्येश्वरस्य मानभङ्गभियेति भावः । तत् तस्मात् अधुना देवेन्द्रद्विपस्य ऐरावतस्य दानं मदवारि तस्य दुर्दिनं वर्षणं तद्भिदः तच्छोषिण इति यावत्, रौद्राः तीव्राः अर्चिषः येषां तथाभूताः अमी मार्गणाः शराः मदीया इति शेषः कियन्तम् अवधिं कालं यावत् भवान् इति द्रक्ष्यन्ति ? भवन्तमवलोकयिष्यन्ति ? न तु चिरं द्रक्ष्यन्ति अविलम्बमेव भवन्तं संहरिष्यन्तीति भावः । भवानिति निपातेनाभिहितत्वात् प्रथमा । शार्दूलविक्रीडितं वृत्तम् ॥ ५२॥

(ग) विस्मापयते विस्मितं करोति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मानाध्मातः स्वां किलोत्कृत्य ताव-
न्मूर्धश्रेणीमेकशेषोत्तमाङ्गः ।
स्त्रीमर्धाङ्गे वञ्चयित्वा मुखेन
प्रीतः शम्भोरेकपादे पपात ॥५३॥

(ऊर्ध्वमवलोक्य च सवितर्कम् ।) भगवतो दिवस्पतेरिव रथो दाशरथिमुपतिष्ठते ।

हेमाङ्गदः । (इदा सहर्षम् ।) सखे ! स एवायं किं न पश्यसि । लोचनमार्गसहस्रचन्द्रकमेचकितमाहेन्द्रकवच-हस्तो मातलिः (ङ) । (क्षणं निर्वर्ण्य विहस्य च ।)

मानाध्मात इति । मानेन आध्मातः पूरितः अतिमानीत्यर्थः अयं रावण इति अध्याहार्यम् । किलेति प्रसिद्धौ स्वां निजां मूर्धश्रेणीं शिरःश्रेणीम् उत्कृत्य छित्त्वा एकमेव शेषम् उत्तमाङ्गं शिरः यस्य तथाभूतः मुखेन तेनैव एकेन मुखेन प्रीतः सन्तुष्टः सन् अर्धाङ्गे वर्त्तमानामिति शेषः स्त्रीं गौरीमिति भावः वञ्चयित्वा त्यक्त्वा शम्भोः हरगौरीरूपस्येति भावः एकपादे पपात प्रणिपातम् अकरोत् न तु स्त्रिया गौर्याः पादे इति भावः मानोन्नतत्वात् गौरीमपि न गणयामासेति भावः । शालिनीवृत्तं, मात्तौ गौ चेच्छालिनी वेदलोकैरिति तल्लक्षणात् ॥ ५३ ॥

(घ) दिवस्पतेरिन्द्रस्य ।

(ङ) लोचनेति लोचनानां नेत्राणां मार्गसहस्रे चन्द्रकेण रन्ध्रेण मेचकितः अलङ्कृतः माहेन्द्रकवचः इन्द्रवर्म हस्ते यस्य तादृशः । मातलिः इन्द्रसारथिः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विविधमणिमयूखमञ्जरीभिः
कृतसुरचापसहस्रसन्निपाते ।
अधिसमरमहारयद् विमाने
निजमपि कार्मुकमत्र देवराजः ॥५४॥

(आकाशे कर्णं दत्त्वा ।) किमाह रावणप्रतीहारः (च) । अरे पुरुहूतसूत ! (छ) ।

दर्पोऽयं भवतः सुरासुरचमूदोःकाण्डकण्डूविष-
ज्वालाजाङ्गलिकेन जङ्गलभुजां पत्त्वापि न त्वार्जितः ।
येनैन्द्रे रथवर्मणी रघुशिशोरस्योपनीते त्वया
राजद्विष्टमिदं विधाय स कथं शक्रोऽपि वर्त्तिष्यते ॥५५॥

विविधेति । देवराज इन्द्रः अधिसमरं समरे, विभक्त्यर्थे अव्ययीभावः । विविधानां विचित्राणां मणीनां मयूखमञ्जरीभिः किरणराजिभिः कृतः आरोपितः सुरचापानां शक्रधनुषां सहस्रस्य सन्निपातः समावेशः यस्मिन् अत्र विमाने निजं कार्मुकं धनुरपि अहारयत् प्रेषयामास । पुष्पिताग्रावृत्तम् ॥ ५४ ॥

(च) रावणप्रतीहारः रावणद्वारपालः रावणसूतो वा ।

(छ) पुरुहूतसूत ! देवराजसारथे !

दर्प इति । सुरासुराणां देवासुराणां वासम्बः सेनाः तासां ये दोःकाण्डाः भुजस्तम्बाः तेषां कण्डूरेव विषज्वाला तस्याः जाङ्गली विषप्रशमनविद्या तां वेत्तीति जाङ्गलिकः विषवैद्य इत्यर्थः तेन, जाङ्गली विषविद्यायामिति मेदिनी । तत्कण्डूप्रशमनकारिणेति यावत् सुरासुरदर्पहारिणेति भावः, जङ्गलं मांसं भुञ्जते इति जङ्गलभुजः तेषां राक्षसानामित्यर्थः जङ्गलं, निर्जनस्थाने लिखिङ्गां पिशितेऽस्त्रियामिति मेदिनी । पत्त्वा रावणेनापि भवतः अयं दर्पः अहङ्कारः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (श्रुतिमभिनीय ।) किमाह रामः । सत्यमिदं भोः । यच्छीलः (ज) स्वामी तच्छीलास्तस्य प्रकृतयः (झ) । यदेवमपि स्वामिनो मूलोच्छेदिना दुर्णयेन विकत्थन्ते (ञ)

हेमाङ्गदः । (आकाशे कर्णं दत्त्वा ।) किमाह रावणः अरे तापसवटो !

क्रोधेन ज्वलिता मुहूर्त्तमनु च स्वैरेव निर्वापिताः
क्लीवैरश्रुमहोर्मिभिर्मखभुजां पत्युः सहस्रं दृशः ।
यैर्दृष्टा भुवनत्रयीविजयिभिः सर्वङ्कषाः सन्त्यमी
ते सम्प्रत्यपि मे नयापनययोर्निर्वाहमूलं भुजाः ॥५६॥

न त्यजितः ? येन त्वया ऐन्द्रे इन्द्रसम्बन्धिनी रथवर्मणी स्यन्दनकवचे अस्य रघुशिशोः रामस्य उपनीते दत्ते इति यावत् स भवान् इदं राजद्विष्टं राजद्रोहं विधाय कृत्वा मत्तः सन् कथं केन प्रकारेणापि वर्त्तिष्यते जीविष्यति ? नैव कथमपि जीविष्यतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ५५ ॥

(ज) यच्छीलः यत्स्वभावः ।

(झ) प्रकृतयः अमात्याः ।

(ञ) दुर्णयेन दुराचारेण । विकत्थन्ते श्लाघन्ते ।

क्रोधेनेति । भुवनत्रयीविजयिभिः त्रिभुवनजेतृभिः यैः भुजैः मुहूर्त्तं क्षणं क्रोधेन ज्वलिताः अनु च पश्चाच्च स्वैरेव निजैरेव क्लीवैः विफलैः अश्रुमहोर्मिभिः निर्वापिताः निरुद्धीकृताः मखभुजां देवानां पत्युः इन्द्रस्य सहस्रं दृशः नेत्राणि दृष्टाः, सर्वङ्कषाः सर्वविद्रावणा इति यावत् ते अमी मे मम भुजाः बाहवः नयापनययोः नीतिदुर्नीत्योः निर्वाहे मूलं सम्प्रत्यपि इदानीमपि सन्ति । यभिरेव भुजैस्त्वां निहनिष्यामीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ५६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (कर्णं दत्त्वा विहस्य ।) किमाह रामः ।

छित्त्वा मूर्ध्नः किमिति स हतो धूर्जटिर्यद्यमीषां
दोःस्तम्भानां त्रिभुवनजयश्रीरियं वास्तवी ते ।
मूर्धानो वा न खलु भवतो दुर्लभाः सम्भवेयु-
र्यद् देवस्य त्वमसि जगतां शिल्पिनोऽपि प्रपौत्रः ॥५७॥

यत् पुनर्ब्रवीषि । 'सम्प्रत्यपि ते भुजाः सन्ति' इति तद्-
धुनैव ज्ञास्यन्ते ।

हेमाङ्गदः । (कर्णं दत्त्वा ।) किमाह रावणः—अरेरे राज-
न्यडिम्भ ! भवतः पुराणपितामहेन बहु तावदनरण्येनैव
ज्ञातम् (ट) । इदानीं भवानपि ज्ञास्यति ।

छित्त्वेति । यदि ते तव अमीषां दोःस्तम्भानां बाहुरूपस्तम्भानाम्
इयं त्रिभुवनजयश्रीः वास्तवी वस्तुतः स्वशामर्थ्येनैव सिद्धेति यावत्
तदा मूर्ध्नः शिरांसि छित्त्वा स धूर्जटिः शिवः किमिति कथं हतः
प्रार्थितः त्रिभुवनजयश्रियमिति शेषः । मस्तकच्छेदनसाहसस्य तव
अयास्तवमित्याह मूर्धान इति । यत् यतः त्वं जगतां शिल्पिनः स्रष्टुः
देवस्य ब्रह्मण इत्यर्थः प्रपौत्रः अपि अतः भवतः मूर्धानः वा शिरांसि
च न खलु नैव दुर्लभाः सम्भवेयुः सुलभा एवेति भावः । त्वया
ज्ञातं यत् मम शिरांसि यावन्ति छिन्नानि भवन्ति तावन्त्येव मम
प्रपितामहः पुनर्योजयिष्यति तत् कथं शिरःकर्त्तनात् मम भयमिति
बुद्ध्यैव त्वया स्वशिरांसि छित्त्वा शङ्करस्तोषितः वास्तवं तव न साह-
सिकत्वमिति भावः । मन्दाक्रान्ताछन्दः ॥ ५७ ॥

(ट) अनरण्येनैव ज्ञातम्, अनरण्यो रावणेन रणे निहत इति
पुराणम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (कर्णं दत्त्वा विहस्य ।) किमाह रामः—अरेरे राक्षसीपुत्र !

न दूये नः पूर्वं नृपतिमनरण्यं यदवधी-
र्जयो वा मृत्युर्वा युधि भुजभृतां कः परिभवः ।
जितं तु त्वां कारागृहविनिहितं हैहयपतेः
पुलस्त्यो यद्भिक्षामकृत कृपणस्तद् व्यथयति ॥५८॥

हेमाङ्गदः । (कर्णं दत्त्वा ।) किमाह रावणः—आः क्षत्रियवटो वाचाट ! कथमपूर्वशिल्पी (ठ) रजनिचरेन्द्रचरितचन्द्रेऽपि लक्ष्म लिखसि (ड) । तदयं न भवसि (ढ) ।

हेमाङ्गदः । (ससंभ्रममवलोक्य ।) कथमुपक्रान्तमेव शरसहस्रदुर्दिनं (ण) मन्दोदरीदयितेन ।

रत्नचूडः । कथं मैथिलीवल्लभेनापि प्रत्युपक्रान्तमेव । (विहस्य ।)

न दूये इति । नः अस्माकं पूर्वं पूर्वपुरुषम् अनरण्यं नृपतिं यत् अवधीः हतवानसि, तेन न दूये न परितप्ये, भुजभृतां बाहुशालिनां युधि युद्धे जयो वा मृत्युर्वा भवति तत्र परिभवः अवमाननं कः ? नैवेत्यर्थः । तु किन्तु पुलस्त्यः तव पितामहः कृपणः दीनः सन् हैहयपतेः कार्त्तवीर्यस्य कारागृहविनिहितं बन्धनागारनिक्षिप्तं जितं पराभूतं त्वां भिक्षां यत् अकृत कृतवान् तत् भिक्षणं व्यथयति तापयति । शिखरिणीवृत्तम् ॥ ५८ ॥

(ठ) अपूर्वशिल्पी नूतनचित्रकरः ।

(ड) लक्ष्म कलङ्कम् । लिखसि चित्रयसि ।

(ढ) न भवसि न जीवसि ।

(ण) उपक्रान्तम् आरब्धं शरसहस्रदुर्दिनं शरसहस्रवर्षणम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पतन्ति रामभद्रेण खण्डिता रावणेषवः ।
पूर्वार्द्धैः फलिभिर्वेगात् पश्चार्द्धैः पक्षिभिश्चिरात् ॥५८॥

किञ्च ।

अक्षेषु केतुदण्डे च सारथौ च हयेषु च ।
खेलन्ति राघवेन्द्रस्य स्यन्दने रामपत्रिणः ॥६०॥

हेमाङ्गदः । (सभयम् ।) अहह ।

अन्धकारीकृतव्योमा बाणवर्षेण रावणः ।
रामारूढं तिरोधत्ते शताङ्गं शातमन्यवम् ॥६१॥

(चिरं दृष्ट्वा सविस्मयम् ।) सखे !

नानाविधानि शस्त्राणि शस्त्रैर्नानाविधैरपि ।
इमौ हि प्रतिकुर्वाते न कश्चिदतिरिच्यते ॥६२॥

पतन्तीति । राममद्रेण खण्डिता द्विधाकृताः रावणस्य इषवः शराः फलिभिः लोहाग्रवद्भिः पूर्वार्द्धैः वेगात् पक्षवद्भिः पश्चार्द्धैः चिरात् विलम्बादित्यर्थः वातावरुद्धगतित्वयेनेति भावः पतन्ति । अनुष्टुब्वृत्तम् ॥ ५९ ॥

अन्धकारीकृतेति । बाणवर्षेण अन्धकारीकृतं व्योम आकाशं येन तथाभूतो रावणः रामेण आरूढं शातमन्यवम् ऐन्द्रं शताङ्गं रथं, शताङ्गः स्यन्दनो रथ इत्यमरः । तिरोधत्ते आच्छादयति बाणवर्षेणेति भावः । अनुष्टुब्वृत्तम् ॥ ६१ ॥

नानेति । इमौ रामरावणौ नानाविधैरपि शस्त्रैः नानाविधानि शस्त्राणि प्रतिकुर्वाते विफलीकुरुतः इत्यर्थः हीति अवधारणे । कश्चित् कोऽपि अनयोरिति शेषः न अतिरिच्यते न अतिरिक्तो भवति तुल्यतयैवानयोर्युद्धं वर्त्तते इति भावः ॥ ६२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । एवमेतत् ।

यद्रावणो बहुभिरेष भुजैः करोति
तद्राघवः प्रतिकरोति भुजद्वयेन ।
कर्म द्वयोर्यदपि तुल्यफलं तथापि
रक्षोभटाद्दशगुणं नरवीरशिल्पम् ॥६३॥

हेमाङ्गदः । (विहस्य ।) सखे !

विंशत्यापि भुजैरेष द्वौ भुजावभियोधयन् ।
अदूषितद्वन्द्वयुद्धमर्य्यादो दशकन्धरः ॥६४॥

(सखेदमयं च ।) कथमयं रावणो माहेन्द्रस्यन्दनात् (त)

तस्यारिबलभीमस्य ध्वजदण्डस्य लाञ्छनम् ।
दर्पदीप्तः क्षुरप्रेण मायूरं पिच्छमच्छिनत् ॥६५॥

यदिति । एषः रावणः बहुभिरेव विंशत्येति भावः भुजैः बाहुभिः यत् करोति, राघवः रामः भुजद्वयेन तत् प्रतिकरोति प्रतिविधत्ते । यदपि यद्यपि द्वयोः रामरावणयोः कर्म तुल्यफलं समफलं कृतिप्रतिकृतिभ्यामिति भावः, तथापि नरवीरस्य रामस्य शिल्पं चातुर्य्यं रक्षोभटात् राक्षसवीरात् दशगुणं वर्त्तते इति शेषः । वसन्ततिलकं वृत्तम् ॥ ६३ ॥

विंशत्येति । एषः दशकन्धरः रावणः विंशत्यापि भुजैः द्वौ भुजौ रामस्येति शेषः अभियोधयन् युद्धं कारयन्, न दूषिता द्वन्द्वयुद्धस्य मर्य्यादा नियमः येन तथोक्तः वर्त्तते इति शेषः । परिहासोक्तिरियम् । अनुष्टुब्वृत्तम् ॥ ६४ ॥

(त) माहेन्द्रस्यन्दनात् ऐन्द्ररथात् ।

तस्येति । दर्पेण दीप्तः रावणः क्षुरप्रेण तदाख्येन अस्त्रेणेन्द्रः तस्य प्रसिद्धस्य अरिबलानां शत्रुसैन्यानां भीमस्य भयङ्करस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (सहर्षम् ।) सखे ! पश्य पश्य कुलिशकेतु-क्षेतनविमाननाविलक्षक्रुद्धेन (थ)

दिक्पालद्विपदर्पदानलहरीसौरभ्यगर्भानिलैः
पक्षैरेव समस्तराक्षसकथाकल्पान्तकर्णेजपाः ।
दीयन्ते रघुपुङ्गवेन कतिचित्पौलस्त्यमौलिष्वमो
पौलोमीनयनाम्बुसीकरकणावग्राहिणो मार्गणाः ॥६६॥

हेमाङ्गदः । (सखेदाश्चर्यम् ।) कथं किरीटपरम्परापरिभवमसृष्यमाणेन बाणवर्षाद्वैतमातन्वता (द) राक्षसराजेन ।

ध्वजदण्डस्य लाञ्छनं चिह्नभूतं मायूरं पिच्छम् अच्छिनत् चिच्छेद । अनुष्टुब्वृत्तम् ॥ ६५ ॥

(थ) कुलिशेति कुलिशकेतोरिन्द्रस्य केतनं ध्वजदण्डः तस्य विमानेन या विलक्षः लज्जितः क्रुद्धः तेन ।

दिक्पालेति । रघुपुङ्गवेन रामेण दिक्पालद्विपानाम् ऐरावतानां दर्पेण या दानलहरी मदवारिराजिः तस्याः सौरभ्यं सौगन्ध्यं गर्भे येषां तादृशाः अनिलाः वायवः येषां तथाभूतैः पक्षैः पुङ्खैः समस्तानां राक्षसकथानां कल्पान्तस्य प्रलयस्य कर्णेजपाः सूचकाः, कर्णेजपः सूचकः स्यादित्यमरः । पौलोम्याः पुलोमदुहितुः शच्याः नयनाम्बूनाम् अश्रूणां ये सीकरकणाः जलबिन्दवः तेषाम् अवग्राहिणः प्रतिबन्धिनः शच्याः शोकहारिण इति भावः अमी कतिचित् मार्गणाः शराः पौलस्त्यस्य रावणस्य मौलिषु किरीटेषु दीयन्ते निक्षिप्यन्ते । मौलिः किरीटधम्मिल्लावित्यमरः । शार्दूलविक्रीडितं वृत्तम् ॥ ६६ ॥

(द) किरीटेति किरीटानां मुकुटानां परम्परा श्रेणिः तस्याः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विदेहकन्याकुचकुम्भकोटि-
कठोरतासाक्षिणि सायकोऽयम् ।
रामस्य जन्मान्तरमेलकार-
श्रीकौस्तुभे वक्षसि हा निखातः ॥६७॥

(सम्यगवलोक्य ।) सखे !

एकेनैव निवातकङ्कटभिदा लङ्कापतेः पत्रिणा
विद्धोऽयं यदि नाम कोऽपि जगतामुल्लाघनो राघवः ।
चक्षुर्वर्त्मसहस्रनिःसरदसृग्धारौघभाङ्गारिणा
माहेन्द्रेण तु वर्मणा विहसते वीरः सहस्रं व्रणान् ॥६८॥

परिभवम् अनुभ्यमाणेन असहमानेन । बाणवर्षाद्वैतम् अद्वितीयं बाणवर्षणमित्यर्थः आतन्वता विस्तारयतेत्यर्थः ।

विदेहेति । विदेहकन्यायाः सीतायाः कुचौ स्तनौ कुम्भाविव तयोः कोटेः अग्रभागस्य या कठोरता काठिन्यं तस्य साक्षिणि अनुभाविनीति यावत्, जन्मान्तरे मूर्त्तिभेदे विष्णुदेहे इति यावत् मेलकारौ सङ्गिनावित्यर्थः श्रीकौस्तुभौ लक्ष्मीकौस्तुभाख्यमणी यस्य तादृशे, रामस्य वक्षसि अयं सायकः शरः निखातः निक्षिप्तः । हा इति खेदे । उपजातिवृत्तम् ॥ ६७ ॥

एकेनैवेति । एकेनैव, निवातं नास्ति वातः वायुप्रवेश इति यावत् यत्र तथाभूतं दृढमित्यर्थः कङ्कटम् उरस्त्रदं वर्मेति यावत्, उरस्त्रदः कङ्कटक इत्यमरः । भिनत्तीति तथोक्तेन, लङ्कापतेः रावणस्य पत्रिणा शरेण जगतां कोऽपि अनिर्वचनीयचरित इति भावः उल्लाघनः रोगशान्तिकरः उत्पातध्वंसीत्यर्थः, उल्लाघो निर्गतो गदादित्यमरः । उल्लाघो निरुज इति वैयाकरणाश्च । अयं वीरः राघवः रामः यदि नाम विद्धः, तु किन्तु चक्षुषां वर्त्मसहस्रात् रन्ध्रसहस्रात्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (सहर्षम् ।) राघवेणापि
सीतास्तनस्तवककुङ्कुमपङ्कलोप-
सङ्कल्पपातकिनि वक्षसि रावणस्य ।
न्यस्तः शरो विबुधकुञ्जरदन्तघात-
रूढ़व्रणार्बुदचतुष्टयमध्यवर्ती ॥६९॥

हेमाङ्गदः । (कर्णं दत्त्वा सविस्मयम् ।) एकेन सव्यपाणिना विशिखमुत्खाय (घ) किमाह रावणः—साधु रे मनुष्यडिम्भ ! साधु ।

निःसरतः निर्गच्छतः अक्षतधारौघस्य रक्तप्रवाहसमूहस्य झङ्कारिणा झङ्कारशब्दवता माहेन्द्रेण ऐन्द्रेण वर्मणा कवचेन सहस्रं व्रणान् क्षतानि विदृणुते प्रकाशयति । वर्मणः महेन्द्रशरीरवर्त्तिनां सहस्रनेत्राणां प्रकाशयत्स्वरक्षणेन प्रस्तुतत्वात् तद्वर्माद्यतदेहस्य रामस्य एकाङ्गे क्षतेऽपि सहस्रनेत्रवर्त्मभ्यः शोणितस्रावात् सहस्रव्रणशालित्वमिव प्रकाशते इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ६८ ॥

सीतेति । सीतायाः स्तनौ स्तवकाविव पुष्पगुच्छाविव तयोः कुङ्कुमपङ्कस्य काश्मीरद्रवस्य लोपे खण्डने वैधव्यादिति आलिङ्गनादिति वा भावः । यः सङ्कल्पः इच्छा तेन पातकिनि पातकयुक्ते, लेपेति पाठे सीतायाः स्तनस्तवकयोः कुङ्कुमपङ्कस्य लेपः आश्लेषेणेति भावः तत्र यः सङ्कल्पः तेन पातकिनि पापयुक्ते, रावणस्य वक्षसि शरः विबुधकुञ्जरस्य ऐरावतस्य दन्तैः चतुर्भिरिति भावः तस्य चतुर्दन्तत्वादिति भावः । घातेन प्रहारेण रूढ़ानां जातानां व्रणार्बुदानां मांसपिण्डीभूतक्षतदेशानां चतुष्टयस्य मध्यवर्त्ती यथा तथा न्यस्तः निखातः । वसन्ततिलकं वृत्तम् ॥ ६९ ॥

(घ) सव्यपाणिना दक्षिणहस्तेन । विशिखं शरं उत्खाय उत्क्षिप्य ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्रैविक्रमः सकलदानवजीवितव्य-
विद्यासमाप्तिलिपिरेष सुदर्शनो मे ।
यस्मिन् निपत्य हृदये दलितारजाल-
ज्योतिस्तुषारमयमाभरणं बभूव ॥७०॥

अस्मिन्नपि रुधिरदर्शनं कुर्वाणेन भवता दर्शितेयं सुरासुर-वीरातिशायिनी हस्तवत्ता (न) ।

रत्नचूडः । अहह ! विपक्षगिरामुद्गारेण सर्वग्रन्थि-गुरुणा दूरं (प) दीप्यमानस्य

सुविनिहितचन्द्रहासव्रणकिणवलयोपहसितहारेषु ।
रामस्य मार्गणगणाः पतन्ति दशकण्ठकण्ठेषु ॥७१॥

त्रैविक्रम इति । त्रैविक्रमः त्रिविक्रमो विष्णुः तत्सम्बन्धी, सकलानां दानवानां जीवितव्यं जीवनमेव विद्या तस्याः समाप्ति-लिपिः समापक इत्यर्थः दानवगणप्राणान्तक इति यावत्, एष सुदर्शनः चक्राकारास्त्रविशेषः यस्मिन् मे मम हृदये निपत्य पतित्वा दलितं खण्डितं यत् आरजालं चक्रप्रान्तसमूहः तस्य ज्योतिषा प्रभया तुषार-मयं शिशिरमयम् अतिशीतलमिति भावः आभरणं भूषणं बभूव । सुदर्शनास्त्रप्रहारेण व्यथा दूरे आस्तां प्रत्युत तज्ज्योतिषा मम हृद-यस्य शोभैवाभूदिति भावः । वसन्ततिलकं वृत्तम् ॥ ७० ॥

(न) हस्तवत्ता प्रशस्तहस्तशालित्वम् ।

(प) विपक्षगिरां शत्रुवचसाम् उद्गारेण उच्चारणेन । सर्वेति सर्वैर्ग्रन्थिभिः गुरुर्महान् तेन । दूरम् अतिमात्रम् ।

सुविनिहितेति । रामस्य मार्गणगणाः शरसमूहाः सुष्ठु विनिहितस्य प्रहितस्य कर्त्तनार्थमिति भावः चन्द्रहासस्य खड्गस्य ये व्रणाः क्षतानि तेषां किणवलयैः किणमण्डलैः उपहसितः हारो येषु तथाभूतेषु दशकण्ठस्य रावणस्य कण्ठेषु पतन्ति । आर्याछन्दः ॥७१॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

हेमाङ्गदः । (सचमत्कारम् ।) सखे ! पश्य पश्य—अनुरूपवीरसंवादप्रमोदभरद्विगुणितावष्टम्भसंक्षोभितभुवनत्रयस्य निरन्तरप्रहीयमाणबाणपञ्जरमध्यवर्त्तिना (फ) रामभद्रेण क्रीडाशकुन्तकौतुकं पूर्य्यते (ब) राक्षसराजस्य । नूनमिदानीम्

उदञ्चन्यञ्चद्भूविहृतनिभृतानामनुफणं
मणीनां विद्युद्भिः क्षणमुषितपातालतिमिरः ।
भुजक्रीडावल्गद्दशमुखपदन्यासगरिम-
प्रगल्भैर्निःश्वासैरजनि भुजगानामधिपतिः ॥९२॥

(फ) अनुरूपेति अनुरूपेण सुसदृशेन वीरसंवादेन वीरसम्मेलनेन यः प्रमोदभरः हर्षातिशयः तेन द्विगुणितः यः अवष्टम्भः गर्वः तेन संक्षोभितं भुवनत्रयं येन तथोक्तस्य । निरन्तरेति निरन्तरम् अजस्रं प्रहीयमाणाः प्रक्षिप्यमाणा बाणाः पञ्जरमिव तस्य मध्यवर्त्तिना मध्यस्थितेन ।

(ब) क्रीडेति क्रीडाशकुन्तस्य क्रीडापक्षिणः कौतुकं कौतूहलम् । पूर्य्यते सफलीक्रियते ।

उदञ्चदिति । भुजगानाम् अधिपतिः वासुकिः, उदञ्चन्ती उच्चमन्ती रावणपदन्यासभरविरहादिति भावः तथा न्यञ्चन्ती तत्पदन्यासभरादिति भावः या भूः पृथ्वी तया हेतुना विहृतानि प्रकाशं गतानि निभृतानि सङ्कुचितानि यथाक्रममिति भावः तेषाम् अनुफणं प्रतिफणं मणीनां रत्नानां विद्युद्भिरिव विद्युद्भिः प्रभाभिरिति यावत् क्षणे क्षणे मुषितं नाशितं पातालतिमिरं रसातलान्धकारं येन तथाभूतः, भुजक्रीडया बाहुलीलया बल्गन् सञ्चरन् यो दशमुखः रावणः तस्य पदन्यासस्य यो गरिमा गौरवं तेन प्रगल्भाः दीर्घाः तैः,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (सभयमवलोक्य ।) सखे ! एवमेतत् ।

रक्षोविक्षोभवेगोच्छलितजलनिधिव्यक्तमातङ्गचक्र-
क्रुध्यद्दिङ्नागमुक्तोद्धरणगुरुभरामद्य नागाधिराजः ।
अङ्गैरङ्गेषु मग्नैरविरलवलिना वामनेनातिपीवना
देहेनापङ्गुवानः फणफलकपरीणाहमुर्वीं बिभर्त्ति ॥७३॥

(ऊर्ध्वमवलोक्य ।) कथमितस्ततो वैमानिकैरपक्रम्यते (भ) गगनतलात् ।

हेमाङ्गदः । (सचमत्कारम् ।) अहो त्रिभुवनभयङ्करमायोधनमुपक्रान्तं महावीराभ्याम् । तथाहि ।

निःश्वासैः उपलक्षित इति शेषः, विशेषणे तृतीया । अजनि जातः । शिखरिणीवृत्तम् ॥ ७२ ॥

रक्ष इति । नागाधिराजः वासुकिः, रक्षसः धारणस्य विक्षोभः रणे विचरणं तस्य वेगेन उच्छलितः वेलातिक्रान्तः यः जलनिधिः समुद्रः तेन हेतुना व्यक्तानि प्रकटानि दर्शनं गतानीत्यर्थः यानि मातङ्गचक्राणि जलहस्तिसमूहाः, मातङ्गनक्रेति पाठे व्यक्ता ये मातङ्गा जलहस्तिनः नक्रा जलजन्तुभेदाश्च तेभ्यः क्रुध्यद्भिः दिङ्नागैः दिग्गजैः मुक्तं त्यक्तं यत् उद्धरणम् उत्कृष्टं धारणं तेन हेतुना गुरुर्महान् भरः यस्याः तथोक्तां, दिग्गजानां पृथ्वीधारणं पुराणप्रसिद्धम् । उर्वीं पृथ्वीम् अविरलवलिना घनत्रिवलीयुक्तेन वामनेन खर्वेण अतिपीवना अतिस्थूलेन देहेन फणफलकपरीणाहं फणसमूहविस्तारम् अपङ्गुवानः सङ्कोचयन् अतएव अङ्गेषु मग्नैः गूढैः अङ्गैः उपलक्षितः सन् अद्य बिभर्त्ति धारयति । स्रग्धरावृत्तम् ॥ ७३ ॥

(भ) अपक्रम्यते पलाय्यते ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ध्यायत्ययं गाधिसुतादधीतान्
दिव्यास्त्रमन्त्रान् मनुवंशवीरः ।
ब्रह्मोपदिष्टामिह शस्त्रविद्या-
मसौ तदाकाङ्क्षति राक्षसेन्द्रः ॥७४॥

तदावामप्यपसरावः । (इत्यपसृत्यासाते ।)

हेमाङ्गदः । (सलज्जादवलोक्य ।) सखे ! यथा भुवनसंक्षोभ-(म)स्तथा तर्कयामि तामिस्रं भानवीयेन, भानवीयं राहवीयेण (य) राहवीयं वैष्णवीयेन, वैष्णवीयं पौष्पकेतवेन (र) पौष्पकेतवं च पाशुपतेना(ल)स्त्रमस्त्रेण प्रतिकुर्वाणयोः पुलस्त्यकाकुत्स्थकुलैकवीरयोस्तुमुलमायोधनं वर्तते ।

रत्नचूडः । सखे ! क्षतिप्रतिक्षतीनामविशेषेऽपि (व)

ध्यायतीति । अयं मनुवंशवीरः रामः गाधिसुतात् विश्वामित्रात् अधीतान् शिक्षितान् दिव्यास्त्रमन्त्रान् ध्यायति चिन्तयति । असौ राक्षसेन्द्रः इह रथचेले तदा तस्मिन् काले पुरेति भावः ब्रह्मणा उपदिष्टां शस्त्रविद्याम् आकाङ्क्षति आलोचनार्थमिति शेषः । इन्द्रवज्रावृत्तम् ॥ ७४ ॥

(म) भुवनसंक्षोभः भुवनानां संक्षोभः विप्लवः ।

(य) तामिस्रं तमिस्रा तामसी रात्रिर्देवता अस्येति तथोक्तम् अस्त्रमिति शेषः । भानवीयेन भानुः सूर्यः देवता यस्य तथोक्तेन अस्त्रेणेति शेषः । भानवीयं सूर्यदैवतम् । राहवीयेन राहुदैवतेन ।

(र) पौष्पकेतवेन पुष्पकेतुः कामः तद्दैवतेन ।

(ल) पाशुपतेन पशुपतिदेवताकेन ।

(व) अविशेषेऽपि अभिन्नतायामपि साम्येऽपीत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जेतव्यमिति रामस्य मर्तव्यमिति रावणस्य निर्णयनिर्भरो-(ग)ऽयं सर्वास्त्रमोक्षः । विशिखमुखोपस्थायिनीनां (घ) च पुनर्देवतानामवलीयानाटोपः कल्प्यते (ङ) । तथाहि ।

यद्दैवतं क्षिपति पत्रिषु राक्षसेन्द्रः
स्नेहेन तद्रघुपतेर्मृदु सन्निधत्ते ।
यां देवतामुपदधाति च रामभद्र-
स्त्रासादसौ दशमुखस्य शनैरुपैति ॥७५॥

(नेपथ्ये ।)

(ग) निर्णयेति निर्णयस्य निश्चयस्य निर्भरः अतिशयः यस्मिन् तथाभूतः ।

(घ) सर्वेति सर्वेषाम् अस्त्राणां मोक्षः प्रयोगः । अनेन शस्त्रेण रामो हन्तव्यः मया च जेतव्यमिति रावणस्य निश्चयः, अनेन शस्त्रेण रावणो हन्तव्यः मया च जेतव्यमिति रामस्य निश्चयः सर्वेषु एव अस्त्रप्रयोगेषु अस्तीति भावः । विशिखेति विशिखानां शराणां मुखेषु उपतिष्ठन्तीति तथोक्तानाम् ।

(ङ) अवलीयान् दुर्बल इत्यर्थः । आटोपः संभ्रमः कार्येषु व्यापतेति भावः । कल्प्यते क्रियते उभयोर्भावविशेषेणेति भावः ।

यद्दैवतमिति । राक्षसेन्द्रः रावणः पत्रिषु शरेषु मध्ये यद्दैवतम् अस्त्रमिति शेषः क्षिपति प्रयुङ्क्ते, तत् रघुपतेः रामस्य रामं प्रतीत्यर्थः स्नेहेन मृदु यथा तथा सन्निधत्ते सन्निहितं भवति । रामभद्रस्य यां देवताम् उपदधाति आवाहयति प्रयुज्यमाने अस्त्रे इति शेषः, असौ देवता दशमुखस्य त्रासात् भयात् शनैः मन्दं यथा तथा उपैति उपगच्छति । वसन्ततिलकं वृत्तम् ॥ ७५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यद्यत् कृत्यं दशमुखशिरस्तस्य तस्यैव कान्तौ
संक्रामन्त्यामतिशयवती शेषवक्त्रेषु लक्ष्मीः ।
यो यः कृत्तो दशमुखभुजस्तस्य तस्यैव वीर्यं
लब्ध्वा दृप्यन्त्यधिकमधिकं बाहवः शिष्यमाणाः ॥७६॥

(नेपथ्ये कलकलः ।)

उभौ । (सहर्षरोमाञ्चमाकर्ण्य ।) अये ! शब्दोपष्टम्भसंवर्त्तकेन कर्मणा निर्मितानि त्रिभुवनकोषस्य (ङ) कोऽयमिन्द्रियाणि प्रीणयति ।

(पुनर्नेपथ्ये कलकलः ।)

उभौ । (सभयाद्भुतम् ।) अये ! कथमयं कपटकण्ठीरववैकुण्ठकण्ठकठोरकोलाहलकाहलो (च) महानिर्घोषो

यदिति । यत् यत् दशमुखस्य रावणस्य शिरः कृत्तं छिन्नं, तस्य तस्यैव शिरसः कान्तौ दीप्तौ संक्रामन्त्यां सत्यां शेषवक्त्रेषु अवशिष्टेषु मुखेषु लक्ष्मीः कान्तिः अतिशयवती आत्यन्तिकीत्यर्थः भवतीति शेषः । यो यो दशमुखस्य भुजः बाहुः कृत्तः छिन्नः तस्य तस्यैव भुजस्य वीर्यं लब्ध्वा शिष्यमाणाः अवशिष्टा बाहवः अधिकम् अधिकं दृप्यन्ति दर्पयुक्ता भवन्ति । मन्दाक्रान्तावृत्तम् ॥ ७६ ॥

(ङ) शब्दोपष्टम्भेति शब्दानाम् उपष्टम्भः ज्ञानं तस्य संवर्त्तकेन रुम्पादकेन । कर्मणा अदृष्टजनकव्यापारेण । निर्मितानि सृष्टानि । त्रिभुवनकोषस्य त्रिलोकीभाण्डागारस्य ।

(च) कपटेति कपटेन कण्ठीरवः सिंहः तद्रूपः यो वैकुण्ठः विष्णुः नृसिंहाकृतिर्नारायण इत्यर्थः तस्य कण्ठात् यः कठोरकोलाहलः भीषणनिनादः तद्वत् काहलः प्रचण्डः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रजाकोषभङ्गमपर्वणि प्रक्रमते (क) । नूनं चेदानीं काल-
कूटोपदिग्धैरिव (ख) कण्ठध्वनिभिरेव मूर्च्छयतो (ग)
भुवनानि भैरवस्य (घ) स्मरति सभयमद्य परमेष्ठी ।

(पुनर्नेपथ्ये ।)

दिव्यास्त्रैर्भूर्भुवःस्वस्त्रितयडमरणोड्डामरैर्योधयित्वा
लूनोत्क्षिप्तैः शिरोभिर्दशभिरभिनभो दर्शितैकादशार्कः ।
काकुत्स्थेनावकीर्णो निजविशिखशिखायोगपीठोपहूत-
ब्रह्मास्त्रेणाधिशेते रजनिचरपतेर्वीरशय्यां कबन्धः ॥७७॥

(क) प्रजाकोषभङ्गं ब्रह्माण्डक्षयम् । अपर्वणि अकाण्डे अकाले इति यावत् । प्रक्रमते आरभते ।

(ख) कालकूटेति कालकूटेन हलाहलेन उपदिग्धैरिव लिप्तैरिव ।

(ग) मूर्च्छयतः मोहयतः ।

(घ) भैरवस्य संहाररूपिणो हरस्येत्यर्थः । स्मरणार्थधातुयोगे कर्मणि षष्ठी ।

दिव्यास्त्रैरिति । काकुत्स्थेन रामेण भूः पृथ्वी भुवः अन्तरीक्षं स्वः स्वर्गः तेषां त्रितयस्य त्रयस्य डमरणं चमत्करणं तेन उड्डामरैः तेजस्वैः दिव्यास्त्रैः योधयित्वा युद्धं कारयित्वा निजविशिखशिखा स्वीयशराग्रभाग एव योगपीठं योगासनं तत्र उपहूतम् आमन्त्रितं यत् ब्रह्मास्त्रं तेन लूनानि निशातानि उत्क्षिप्तानि ऊर्ध्वं नीतानि तैः दशभिः शिरोभिः अभिनभः नभसि, विभक्त्यर्थे अव्ययीभावः । दर्शिता एकादश अर्काः सूर्याः येन तथाविधः, रावणशिरांसि दश प्रकृतः सूर्यश्चैक इति एकादशानां सूर्याणां दर्शनमिति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उभौ । (श्रुत्वा सहर्षसम्भ्रमसूर्ध्वमवलोक्य सविस्मयमन्योन्यम् ।) पश्य पश्य प्रलयकालकरालकालानलज्वालापुञ्जपिञ्जराणि (ङ) रावणशिरांसि । (सत्वरमुपसृत्य चाधस्तात्पश्यतः ।)

हेमाङ्गदः । (सकरुणम् ।) हा महावीरप्रकाण्ड लङ्केश्वर ! पर्य्यवसितो(च)ऽसि ।

भिन्नैरावणगन्धसिन्धुरशिरःसम्पातिभिर्मौक्तिकैः
शश्वद्विश्वजयप्रशस्तिरचनावर्णावलीशिल्पिने ।
नाकान्तःपुरिकाकपोलविलसत्काश्मीरपत्राङ्कुर-
श्रीविन्यासविलासभीषणभुजस्तम्भाय तुभ्यं नमः ॥७८॥

अवकीर्णः पातितः रजनिचरपतेः राक्षसेन्द्रस्य कबन्धः शिरःशून्यं कलेवरं, कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरे इत्यमरः । वीरशय्यां रणभूमिम् अधिशेते आश्रित्य स्वपितीत्यर्थः । स्रग्धराछन्दः ॥७७॥

(ङ) प्रलयेति प्रलयकाले कल्पान्ते कराल: भीषणः यः कालानलः रौद्राग्निः तस्य ज्वालापुञ्जः शिखासमूहः तेन पिञ्जराणि पिङ्गलवर्णानि प्रलयाग्निना दह्यमानानीवेति भावः ।

(च) पर्य्यवसितः समाप्तिं गतः ।

भिन्नैरावणेति । हे रावणेत्यध्याहार्य्यं, भिन्नं खण्डितं त्वयेति भावः ऐवारणस्य ऐरावतस्य गन्धसिन्धुरस्य गन्धगजस्य शिरः मस्तकं तस्मात् सम्पातिभिः सम्पतनशीलैः मौक्तिकैः मुक्ताफलैः शश्वत् सततं विश्वजयस्य त्रिभुवनविजयस्य या प्रशस्तिरचना प्रशंसालिपिः तस्याः वर्णावलीनाम् अक्षरपङ्क्तीनां शिल्पिने निर्मात्रे नाकान्तःपुरिकाणां स्वर्गकामिनीनां कपोलेषु विलसन् स्फुरन् यः काश्मीरपत्राङ्कुरः कुङ्कुमरचितपत्रावलीप्ररोहः तस्य श्रीविन्यासेन शोभार्पणेन यो विलासः उत्सवः तस्य भीषणाः भयङ्कराः भुजा एव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(निर्वर्ण्य।) सखे रत्नचूड !

ध्रुवं पतितपङ्क्तिकन्धरकबन्धपीडाभरा-
न्निजावनमनक्रमोन्नमितचक्रवालाचलम् ।
महीवलयमर्द्धकुण्डलितविग्रहाधारक-
प्रतीष्टफणमण्डलो वहति काद्रवेयाधिपः ॥७९॥

रत्नचूडः । सखे ! सर्वमतिशायि (छ) रावणस्य । पुरापि (ज) खलु

स्तम्भा यस्य तथाभूताव तद्भयार्त्ताः सुरसुन्दर्य्यः सर्वं विलासं परित्यज्य विपण्णाः स्थिता इति भावः । तुभ्यं नमः अस्त्विति शेषः । शार्दूलविक्रीड़ितं वृत्तम् ॥ ७८ ॥

ध्रुवमिति । कद्रोस्तदाख्याया दक्षकन्यायाः कश्यपपत्न्याः अपत्यानि पुमांसः काद्रवेयाः सर्पाः तेषाम् अधिपः वासुकिः, अर्द्धं यथा तथा कुण्डलितः सङ्कोचितः विग्रहः देह एव आधार एव आधारकः, स्वार्थे कनुप्रत्ययः । तेन प्रतीष्टम् अवलम्बितं फणमण्डलं फणसहस्रमित्यर्थः येन तथाभूतः सन्, पतितः पङ्क्तिकन्धरस्य दशग्रीवस्य यः कबन्धः शिरःशून्यं शरीरं तेन पीड़ाभरात् व्यथातिशयात् निजेन स्वकीयेन अवनमनक्रमेण उन्नमिताः चक्रवालाचलाः कुलपर्वताः, महेन्द्रो मलयः सह्यो हिमवान् गन्धमादनः । विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वता इत्युक्ताः यस्मिन् तत् यथा तथा महीवलयं भूमण्डलं वहति धारयति । महीवलयस्य अधोगमनेन भूधराणामुच्चत्वं भवतीति भावः । ध्रुवम् उत्प्रेक्षे । पृथ्वीवृत्तं, जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुरिति तल्लक्षणात् ॥ ७९ ॥

(छ) अतिशायि अतिशयितम् ।

(ज) पुरापि पूर्वमपि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

चलति जगतीजेत्रे यत्र स्वभोगिचमूभटै-
र्वलयितमहादेहस्तम्भो बिभर्त्ति भुवस्तलम् ।
प्रचलदखिलक्ष्माभृन्मूलोपलव्यतिघट्टितो-
ल्वणमणिशिलाजल्पाकीभिः फणाभिरहीश्वरः ॥८०॥

इदानीं पुनरुत्क्रान्तवायुरतिदुर्वहो (झ) देहबन्धः ।

हेमाङ्गदः । (अन्यतोऽवलोक्य ।) कथमियं दशकन्धरस्य कबन्धाभिमुखी शोकविह्वला मन्दोदरी निशाचरीभिरपक्रध्यते (ञ) । (कर्णं दत्त्वा । आकाशे ।) कष्टम् । चपलकपिकुलानुक्रियमाणकरुणकाकुप्रकारकातरस्वरा (ट) मन्दोदरी किमाह महावीरवरवर्णिनी ।

चलन्नीति । जगतीनां भुवनानां जेता एव जेत्रः तस्मिन् यत्र रावणे चलति सति अहीश्वरः नागराजः स्वभोगिचमूभटैः निजसर्पसैन्यैरित्यर्थः वलयितः वेष्टितः भयादिति भावः महान् देह एव स्तम्भः यस्य तथाभूतः सन्, प्रचलतां रावणचरणविन्यासभरादिति भावः अखिलानां समस्तानां क्ष्माभृतां पर्वतानां मूलोपलैः मूलप्रस्तरैः व्यतिघट्टिताः सङ्घर्षिताः उल्वणाः उज्ज्वला या मणिशिला फणस्थरत्नरूपाः शिलाः तासां जल्पाकीभिः कथयित्रीभिः प्रकाशयित्रीभिरिति यावत् फणाभिः भुवस्तलं बिभर्त्ति धारयति । हरिणीवृत्तम् ॥ ८० ॥

(झ) उत्क्रान्तवायुः निर्गतप्राणवायुरित्यर्थः । अतिदुर्वहः अतिशयेन वोढुमशक्यः नागराजेनेति शेषः । सजीवितापेक्षया जीवितशून्यस्य भारवत्त्वातिशयादिति भावः ।

(ञ) अपक्रध्यते आकृष्य नीयते ।

(ट) चपलेति चपलेन अधीरेण कपिकुलेन वानरसमूहेन अनु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Herjtage Foundation,Kolkata. Digitization: eGangotri.

भूयिष्ठानि मुखानि चुम्बति भुजैर्भूयोभिरालिङ्गते
चारित्रव्रतदेवतापि भवता कान्तेन मन्दोदरी ।
हा लम्बोदरकुम्भमौक्तिकमणिस्तोमैर्ममैकावली-
शिल्पे वागधमर्णिकस्य भवतो लङ्केन्द्र ! निद्रारसः ॥८१॥

उभौ । (सखेदम् ।) इदमशक्यानुभवं चक्षुःश्रोत्रस्य । प्रतिक्लतानां विद्विषामपि व्यसन(ठ)मतिमात्र हृदयम-

---

क्रियमाणः साहस्यं नीयमानः करुणः शोकपूर्णः काकुप्रकारः दीनरूपः कातरः व्याकुलः स्वरः यस्याः तथाभूता ।

भूयिष्ठानीति । हे लङ्केन्द्र ! चरित्रव्रतस्य सतीत्वरूपनियमस्य देवता अधिष्ठात्री देवीत्यर्थः अतिसाध्वीत्यर्थः अपि मन्दोदरी भवता कान्तेन दशाननेन विंशतिभुजेन चेति भावः हेतुना भूयिष्ठानि बहूनि मुखानि चुम्बति, तथा भूयोभिः बहुभिः भुजैः आलिङ्गते आश्लिष्यते । तस्या बहुमुखचुम्बनस्य बहुभुजालिङ्गनस्य दुर्लभत्वेऽपि मम सत्या अपि तत्तत् सुलभमस्तीति भावः । हा खेदे, लम्बोदरस्य गजाननस्य कुम्भे ये मौक्तिकमणयः तेषां स्तोमैः निचयैः मम एकावली एकसरं मालां तस्याः शिल्पे रचने वाचा वाक्येन अधमर्णिकस्य ऋणिकस्य भवतः निद्रारसः ? निद्रायामनुरक्तिः ? नोचित एष इति भावः । गणेशं निर्जित्य तस्य कुम्भविनिर्गतमौक्तिकैः एकावलीं रचयित्वा तुभ्यं दास्यामीत्यङ्गीकारवचसा त्वं मम अधमर्णः आसीः, इदानीं तत् ऋणमपरिशोध्य तव निद्रायाम् अन्याङ्गनायाम् अनुरागो नोचित इति तात्पर्यम् । शार्दूलविक्रीडितं वृत्तम् ॥८१॥

(ठ) चक्षुःश्रोत्रस्य चक्षुषी श्रोत्रे चेति चक्षुःश्रोत्रं, समाहारद्वन्द्वः । तस्य । अशक्यानुभवं चक्षुषा द्रष्टुं श्रोत्रेण च न शक्यते इति भावः । प्रतिक्लतानां पराजितानाम् विद्विषामपि शत्रूणामपि । व्यसनं विपत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization; eGangotri.

र्माणि छिनत्ति। (सविमर्शम्।) अहह! न किञ्चिदनीषत्करं (ड) नाम कृतान्तस्य।

वन्दारुवृन्दारकवृन्दवन्दी-
मन्दारमालामकरन्दबिन्दून्।
मन्दोदरीयं चरणारविन्द-
रेणूत्करैः कर्करतामनैषीत् ॥८२॥

(नेपथ्ये।)

नीयन्ते वनदेवताभिरमरक्षौणीरुहो नन्दनं
नीतो वल्लभपालकेन च निजामुच्चैःश्रवा मन्दुराम्।
रक्षोभिश्च विभीषणप्रणयिभिः कारागृहान्मोचित-
स्वर्वन्दीवदनावलोकनिविडव्रीडो विडौजाः कृतः ॥८३॥

(ड) अनीषत्करं दुष्करमित्यर्थः।

वन्दार्विति। इयं मन्दोदरी चरणारविन्दयोः पदपङ्कजयोः रेणूत्करैः धूलिनिचयैः वन्दारवः वन्दनशीलाः ये वृन्दारकाः देवाः तेषां वृन्दस्य समूहस्य या वन्द्याः वृतहृताः स्त्रियः तासां चरणनिपतितानामिति भावः मन्दारमालायाः कोशपाशस्थितायाः इति भावः मकरन्दबिन्दून् पुष्परसकणान् कर्करतां काठिन्यमित्यर्थः, कर्करः कठिनेऽन्यवदिति मेदिनी। अनैषीत् प्रापयामास। इन्द्रवज्रावृत्तम् ॥ ८२ ॥

नीयन्ते इति। वनदेवताभिः वनाधिष्ठातृदेवीभिर्देवीभिः अमरक्षौणीरुहः देवतरवः नन्दनं देवोद्यानं नीयन्ते प्राप्यन्ते। वल्लभपालकेन अश्वपालेन, यक्षाणां सुहृद्भुजां स स्याद्वल्लभपालक इति हारावली। उच्चैःश्रवाः निजां मन्दुरां वाजिशालां, वाजिशाला तु मन्दुरेत्यमरः। नीतः प्रापितः। विभीषणप्रणयिभिः विभीषण-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रत्नचूडः । (सहर्षम् ।) सखे ! तदेहि । लङ्केश्वरकाराधिवासचिरप्रवास्तव्यं बन्धुवर्गमीक्षावहे (ढ) । (इति परिक्रामन्तौ विलोक्य सहर्षमन्योन्यम् ।) सखे ! पश्य पश्य, प्रहारजर्जरवलीमुखाच्छभल्लगोलाङ्गूलग्रामसंवल्गनवल्गितसुग्रीवो लक्ष्मणनिहितधन्वा (ण) विभीषणभुजावलम्बी विजयश्रिया किमपि प्रदीप्तरमणीयो रामभद्रः । अयं हि सम्प्रति

पौलस्त्यन्यस्तशक्तिव्रणकिणकणिकालक्ष्मणो लक्ष्मणोरः-
पीठान्निर्मुक्तलज्जो विबुधपुरवधूकृष्टपुष्पाभिषेकः ।

सुहृद्भिः रक्षोभिः राक्षसैः विड़ौजा इन्द्रः काराग्टहात् मोचितानां स्वर्वन्दीनां स्वर्गीयहृठङ्कृतसहितानां वदनावलोकेन सुखसन्दर्शनेन निविड़ा घना व्यतिशायिनीत्यर्थः व्रीड़ा लज्जा भया एता मच्छरणा न परित्राता इति धियेति भावः यस्य तथाभूतः कृतः । शार्दूलविक्रीड़ितं वृत्तम् ॥ ८३ ॥

(ढ) लङ्केश्वरेति लङ्केश्वरस्य रावणस्य काराधिवासे काराग्टहे चिरं दीर्घकालं वसतीति प्रवास्तव्यः तम् । ईक्षावहे पश्यावः ।

(ण) प्रहारेति प्रहारेण रावणशरैरिति भावः जर्जराः व्यतिव्यथिता इत्यर्थः ये वलीमुखा वानराः अच्छभल्ला भल्लूकाः गोलाङ्गूलाः गोवत् लाङ्गूलं येषां तथाभूता वानरविशेषा इति यावत् तेषां ग्रामस्य समूहस्य संवल्गने सान्त्वने वल्गितः चेष्टितः सुग्रीवो यस्य तादृशः सुग्रीवसुखेन कपिसैन्यानि क्षतविक्षतानि प्रीणयन्निति भावः । लक्ष्मणेति लक्ष्मणे विनिहितं न्यस्तं धनुः येन तथोक्तः ।

पौलस्त्येति । पौलस्त्येन रावणेन न्यस्ता प्रहिता या शक्तिरस्त्रविशेषः तस्याः व्रणस्य क्षतस्य किणकणिका किणलेशः लक्ष्म चिह्नं यस्य तथाभूतात् लक्ष्मणस्य उरःपीठात् वक्षःस्थलादित्यर्थः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सद्यो नप्तारमन्यं रजनिचरपुरीभद्रपीठप्रतिष्ठं
दृष्ट्वा तुष्यत्पुलस्त्यो जगति विजयते जानकीजानिरेकः ॥८४॥

(इति निष्क्रान्तौ ।)

इति दशग्रीवनिग्रहो नाम षष्ठोऽङ्कः ।

सप्तमोऽङ्कः ।

(नेपथ्ये ।)

तमिस्रामूर्च्छालत्रिजगदगदङ्गारकिरणे
रघूणां गोत्रस्य प्रसवितरि देवे सवितरि ।

निर्मुक्ता निर्गलिता लज्जा यस्य तथोक्तः । लक्ष्मणोरः शक्तिविद्धं दृष्ट्वा तत्प्रशमनेनापि रामस्य लज्जा न गता इदानीं रावणं हत्वा सा लज्जा गतेति भावः । विबुधपुरस्य स्वर्गस्य वधूभिर्विद्याधरीभिरित्यर्थः क्लृप्तः रचितः कृत इति यावत् पुष्पैः अभिषेकः यस्य तथाविधः । सद्यः तत्क्षणात् रावणवधात् परमेवेत्यर्थः अन्यं नप्तारं पौत्रं विभीषणमिति यावत् रजनीचरपुर्याः लङ्कायाः भद्रपीठे सिंहासने प्रतिष्ठा यस्य तादृशं दृष्ट्वा तुष्यन् पुलस्त्यः यस्य तथोक्तः एकः अद्वितीयः, जानकी जाया यस्य स जानकीजानिः रामः जगति विजयते सर्वोत्कर्षेण वर्त्तते । स्रग्धराद्वृत्तम् ॥ ८४ ॥

इति श्रीजीयानन्दविद्यासागरभट्टाचार्य्येण कृता
अनर्घराघवषष्ठाङ्कव्याख्या समाप्ता ।

तमिस्रेति । तमिस्रा तामसी रात्रिरेव मूर्च्छा तद्वत् तद्विद्रा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पुरःस्थे दिक्पालैः सह परगृहावासवचनात्
प्रविष्टा वैदेही दहनमथ शुद्धा च निरगात् ॥१॥

अयमपि

एकैकानि शिरांसि राक्षसचमूचक्रस्य हुत्वा निजे
तेजोऽग्नौ दशकण्ठमूर्धभिरथो निर्माय पूर्णाहुतिम् ।
अद्य स्वस्त्ययनं समाप्य जगतो लङ्केन्द्रवन्दीकृतां
सीतामप्यवलोक्य शोकरभसव्रीडाजडो राघवः ॥२॥

मूर्च्छालं यद्वा तमिस्रायां मूर्च्छालं मूर्च्छितं यत् त्रिजगत् तस्य अग-दङ्कारः औषधं किरणः यस्य तथोक्ते, रघूणां गोत्रस्य कुलस्य प्रसवितरि जनयितरि देवे सवितरि सूर्ये, दिक्पालैः इन्द्रादिभिः सह पुरःस्थे पुरोवर्त्तिनि सति, परगृहे आवासः स्थितिः तस्य वचनं पर-गृहस्था इयं भ्रष्टचारित्रेत्येवंरूपमिति भावः तस्मात् दहनम् अग्निं प्रविष्टा वैदेही सीता अथ दहनप्रवेशादनन्तरं शुद्धा पूता च सती निरगात् उत्तस्थावित्यर्थः । शिखरिणीवृत्तम् ॥ १ ॥

एकैकानीति । अद्य अस्मिन् दिवसे राघवः रामः राक्षसचमूचक्रस्य राक्षससेनानिचयस्य एकैकानि शिरांसि निजे तेजोऽग्नौ प्रतापानले हुत्वा अथानन्तरं दशकण्ठस्य रावणस्य मूर्धभिः शिरोभिः दशभिरिति यावत् पूर्णाहुतिं पूर्णहोमं निर्माय कृत्वा जगतः स्वस्त्ययनं मङ्गल-कार्यं समाप्य सम्पाद्य लङ्केन्द्रेण रावणेन वन्दीकृतां सीताम् अवलोक्य च शोकेन निर्दोषाणां रावणसहयासिनां रक्षसां वधजनितेनेति भावः रभसेन हर्षेण विशुद्धायाः सीताया लाभजनितेनेति भावः । रभसो वेगहर्षयोरित्यमरः । व्रीडया निष्करुणेन मया स्वतः शुद्धां सीतां जानतापि अग्निप्रवेशं कारितेति लज्जयेत्यर्थः जड़ः विमुग्धः आसी-दिति शेषः । शार्दूलविक्रीड़ितं वृत्तम् ॥ २ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

क्रमेण च

सहैव सुग्रीवविभीषणाभ्यां
सौमित्रिसीतापरिपूर्णपार्श्वः ।
उपैति वैवस्वतवंशवृत्त-
मेध्यामयोध्यामथ पुष्पकेण ॥३॥ (युग्मम्)

(ततः प्रविशति विमानयानेन विजयाभिरामो रामः सीता-
लक्ष्मणौ सुग्रीवविभीषणौ च ।)

सुग्रीवः । (रामं प्रति ।) देव !

किंकुर्वाणपयोधिसेवितगृहोद्यानाधुनालोक्यतां
लङ्केयं रघुवंशविक्रमकथाबीजप्ररोहस्थली ।
देवेनात्र दशानस्य दशभिश्छिन्नैः शिरोभिः क्रमा-
देकैकेन शतं शतं शतमखस्यामोदिता दृष्टयः ॥४॥

सहैवेति । अथानन्तरमेव सुग्रीवविभीषणाभ्यां सह सौमित्रि-
र्लक्ष्मणः सीता च ताभ्यां परिपूर्णौ पार्श्वौ यस्य तथाभूतः वामे सीतां
दक्षिणे लक्ष्मणं निधायेति भावः पुष्पकेण विमानेन वैवस्वतवंशानां
सूर्यवंशानां वृत्तेन चरितेन मेध्यां पूताम् अयोध्याम् उपैति
गच्छति । उपजातिवृत्तम् ॥ ३ ॥

किमिति । अधुना इदानीं किंकुर्वाणानि किमाचाराणि
पयोधिसेवितानि समुद्रमध्यवर्तीनि गृहाणि उद्यानानि उपवनानि च
यस्याः तथाभूता, रघुवंशस्य विक्रमस्य कथाया बीजस्य प्ररोहस्थली
उत्पत्तिस्थानम् इयं लङ्का आलोक्यतां दृश्यताम् । अत्र देवेन भवते-
त्यर्थः दशाननस्य क्रमात् छिन्नैः दशभिः शिरोभिः एकैकेन शतमखस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । देवि वैदेहि ! दृश्यतामितो (क) लङ्कां पूर्वेण (ख) सुवेलं पश्चिमेन (ग) ।

त्वदर्थीयक्रव्यात्कपिकुलकबन्धव्यतिकरैः
करालेयं भूमिर्भुवनभयमद्यापि तनुते ।
अभूवन्नम्भोधेरिह रुधिरमय्यो युवतयः
सहस्रं साहस्रास्त्रिदिवयुवतीनां च पतयः ॥५॥

अपिच ।

उद्यम्य दृष्टनिजपन्नगरत्नमाला-
नस्त्राणि चन्दनतरूनुपरि भ्रमन्तः ॥

इन्द्रस्य शतं शतं दृष्टयः नेत्राणि आमोदिताः तोषिताः । शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

(क) इतः अस्मात् प्रदेशात् ।

(ख) पूर्वेण पूर्वस्यां दिशीत्यर्थः ।

(ग) पश्चिमेन पश्चिमायां दिशीत्यर्थः ।

त्वदर्थीयेति । त्वमेव अर्थः प्रयोजनं यस्य स त्वदर्थीयः रावणोऽस्त्वेति भावः तस्य क्रव्यात्कपिकुलयोः रावणस्य क्रव्यात्कुलं मम च कपिकुलं तयोः कबन्धव्यतिकरैः शिरःशून्यकलेवरसम्बन्धैः कराला भीषणा इयं भूमिः अद्यापि भुवनस्य भयं तनुते जनयति । इह अस्यां भूमौ अम्भोधेः समुद्रस्य रुधिरमय्यः सहस्रं युवतयः नद्य इति भावः त्रिदिवयुवतीनां सुराङ्गनानां साहस्राः सहस्रपरिमाणाः पतयश्च अभूवन् । संग्रामहता वीराः स्वर्गं गताः सुराङ्गनाभिः सङ्गच्छन्ते इति शास्त्रादिति भावः । शिखरिणीवृत्तम् ॥ ५ ॥

उद्यम्येति । इह अस्मिन् प्रदेशे कपयः वानराः मेघनादस्य मायातमोभिः मायाकल्पितान्धकारैः अपलपिताम् आवृतां द्याम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्यां ज्योतिरिङ्गणमयीमिह मेघनाद-
मायातमोऽपलपितां कपयो वितेनुः ॥६॥

सीता । अज्जउत्त ! अवि इध ज्जेव्व भुअंगपासबन्धणं सीदाए अणुहाविदा (घ) तुह्मे (१) ।

रामः । आं मैथिलि ! आम् ।

चर्वितपीनाहिगणष्ठणिति विनिष्ठूतफणिमणिरभीक्ष्णम् ।
घनबन्धनवैधुर्यं व्यधुनोदिह नौ स विहगेन्द्रः ॥७॥

---

(१) आर्यपुत्र ! अपि इहैव भुजङ्गपाशबन्धनं सीतयानुभाविता यूयम् ।

आकाशं दृष्टानि निजानि पन्नगरत्नमात्राणि चन्दनतरुस्थितसर्प-शिरोमणिमात्राणि येषु तानि चन्दनतरून् अस्त्राणि प्रहरणानि उद्यम्य उद्धृत्य उपरि ऊर्ध्वदेशे भ्रमन्तः सन्तः ज्योतिरिङ्गणमयीमिव खद्योतव्याप्तामिव, खद्योतो ज्योतिरिङ्गण इत्यमरः । वितेनुः विस्तार-यामासुः । अन्धकारे यथा खद्योताः विस्फुरन्ति तथा मायान्धकारे चन्दनतरूपायुधेषु उद्यतेषु तत्स्थानं भुजङ्गानां शिरोरत्नानि आकाशे भान्ति खेति भावः । वसन्ततिलकं वृत्तम् ॥ ६ ॥

(घ) अनुभाविताः अनुभवं कारिताः ।

चर्वितेति । इह अस्मिन् प्रदेशे चर्वितः भक्षितः पीनः स्थूलः अहिगणो भुजङ्गसंघः येन तथोक्तः । चर्वितपीतेति पाठे, चर्वितः पश्चात् पीतः चर्वणेन द्रवीभूतत्वात् पानविषयीकृत इत्यर्थः अहिगणो येन तथोक्तः । अभिक्ष्णं पुनः पुनः ठण् इति विनिष्ठूतः उद्गीर्णः मणिः सर्पशिरोरत्नं येन तथाविधः स विहगेन्द्रः पक्षीन्द्रो गरुडः नौ आवयोः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विचिन्त्य सस्मितम् ।) अहो वैषम्यमस्या जातेः (ङ) ।

द्वे तावत्करणे रसान् रसयितुं शब्दांश्च रूपाणि च
श्रोतुं द्रष्टुमथैकमिन्द्रियमुरोगत्यै निगूढं पदम् ।
अन्येष्वप्यशनेषु सत्सु जगतः प्राणाः स्वदन्तेतरां
मातः कद्रु ! यदि प्रसौति भवती भूयः सुतानीदृशान् ॥८॥

(सर्वे हसन्ति ।)

सीता । (सस्मेहस्मितं लक्ष्मणमवलोक्य रामं प्रति ।) अज्ज-उत्त ! सोमित्तिकित्तिकन्दलीए उप्पत्तिखेत्तं कदरो उण संणिवेसो (च) । (२)

---

(२) आर्यपुत्र ! सौमित्रिकीर्त्तिकन्दल्या उत्पत्तिक्षेत्रं कतरः पुनः सन्निवेशः ।

घनं महत्, बन्धनेन नागपाशबन्धनेन वैधुर्यं व्यथां व्यधुनोत् अपनीतवानित्यर्थः । आर्याछन्दः ॥ ७ ॥

(ङ) वैषम्यं वैपरीत्यम् । अस्या जातेः सर्पजातेरित्यर्थः ।

द्वे इति । रसान् आस्वादनीयानि द्रव्याणीत्यर्थः रसयितुम् आस्वादयितुं द्वे तावत् करणे इन्द्रिये रसनारूपे इति यावत् द्विजिह्वत्वादिति भावः । करणं साधकतमं चेत्यमरः । अथ किञ्च शब्दांश्च रूपाणि च श्रोतुं द्रष्टुम् एकम् इन्द्रियं, चक्षुः-श्रवणात् चक्षुषैव दर्शनश्रवणे सम्पाद्येते इति भावः । उरसा वक्षः-स्थलेन गत्यै गमनाय निगूढं गुप्तं पदम् अस्तीति शेषः । अन्येषु अशनेषु भोजनीयेषु सत्सु अपि जगतः प्राणाः वायव इत्यर्थः स्वदन्तेतराम् अतिशयेन स्वदन्ते रोचन्ते इत्यर्थः । हे मातः कद्रु ! भवती यदि भूयः पुनः ईदृशान् एवम्भूतान् सुतान् पुत्रान् प्रसौति जनयति नान्येति भावः । शार्दूलविक्रीडितं छन्दः ॥ ८ ॥

(च) सौमित्रिकीर्त्तिकन्दल्याः सौमित्रेर्लक्ष्मणस्य कीर्त्तिर्यशः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (सहर्षरोमाञ्चम् ।) देवि मैथिलि ! अयमितो हस्तदक्षिणेन दशरथदशकन्धरस्कन्धावारैकप्रवीरयो(छ)र्लक्ष्मणमेघनादयोर्द्वन्द्वयुद्धव्यतिकरसाक्षी सुवेलपादः (ज) ।

सीता । जहिं एव्व । (३)

अणुराअरोमकण्टअसेअजलेहिं णिसाअरी कावि ।
उद्दीविअणिव्वाविअदइदचिदाणलमणुमरेदि ॥९॥ (४)

रामः । आं जानकि ! आम् । इदमेव तल्लक्ष्मणवीरलक्ष्मीस्वयंवरकौतुकागारम् (झ) । इह हि

---

(३) यत्रैव ।

(४) अनुरागरोमकण्टकस्वेदजलैर्निशाचरी कापि ।
उद्दीपितनिर्वापितदयितचितानलमनुम्रियते ॥९॥

तस्याः कन्दली नवः अङ्कुरः तस्याः, कन्दली स्याद् गुल्मभेदे नवाङ्कुरे इति विश्वः । सन्निवेशः स्थानम् ।

(छ) दशरथेति दशरथदशकन्धरयोः स्कन्धावारेषु सैन्येषु एकवीरयोः अद्वितीययोधयोः ।

(ज) द्वन्द्वयुद्धेति द्वन्द्वयुद्धस्य व्यतिकरः सम्बन्धः तस्य साक्षी साक्षात् द्रष्टा । सुवेलपादः सुवेलस्य गिरेः पादः प्रत्यन्तदेशः ।

अनुरागेति । कापि निशाचरी राक्षसी मेघनादपत्नीति भावः अनुरागात् यः रोमकण्टकानि रोमाञ्चाः स्वेदजलानि च तैः उद्दीपितः निर्वापितश्च दयितस्य चितानलः तम्, अनुरागजनितरोमाञ्चेन उद्दीपितम् अनुरागजनितस्वेदजलेन च निर्वापितं चिताग्निमित्यर्थः । अनुम्रियते अनुप्रविशतीत्यर्थः ॥९॥

(झ) लक्ष्मणेति लक्ष्मणवीरलक्ष्म्याः स्वयंवरस्य कौतुकागारं क्रीडामन्दिरम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आनीतद्रोणशैलेन सौमित्रेः शल्यहारिणा ।
अक्रियन्त जगन्त्येव निःशल्यानि हनूमता ॥१०॥

सीता । (स्मृतिमभिनीय सानुरागम् ।) अज्जउत्त ! किक्किन्धेसरक्खन्धावारधुरंधरो रहुउलकुटुम्बविहुरबन्धू (ञ) सो कहिं हणूमन्तो । (५)

रामः । देवि निमिराजनन्दिनि !
चुक्षे निशाचरपतौ रविबिम्बवर्त्ती
तातो मया दशरथः स्वयमेव दृष्टः ।
तस्याज्ञया रघुपुरीं प्रहितः पुरैव
राज्याभिषेकविधिसंभृतये हनूमान् ॥११॥

---

(५) आर्यपुत्र ! किष्किन्धेश्वरस्कन्धावारधुरन्धरो रघुकुलकुटुम्बविधुरबन्धुः स कुत्र हनूमान् ।

आनीतेति । आनीतः द्रोणशैलः पर्वतविशेषः येन तथोक्तेन, सौमित्रेः लक्ष्मणस्य शल्यहारिणा शल्यास्त्रव्यथां नाशयता हनूमता जगन्ति एव निःशल्यानि शल्यशून्यानि अक्रियन्त कृतानि । अनुष्टुब्वृत्तम् ॥ १० ॥

(ञ) किष्किन्धेति किष्किन्धेश्वरस्य सुग्रीवस्य स्कन्धावारेषु धुरन्धरः धुराधारणक्षमः । रघुकुलकुटुम्बेषु रघुवंशीयेषु ये विधुराः आपन्नाः तेषां बन्धुः मित्रम् ।

चुक्षे इति । निशाचराणां पत्यौ रावणे इत्यर्थः चुक्षे क्षयं गते सति रविबिम्बवर्त्ती सूर्यमण्डलस्थः तातः पिता दशरथः मया स्वयं दृष्टः, तस्य तातस्य अनुज्ञया पुरैव पूर्वमेव राज्याभिषेक एव विधिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विमानवेगनाटितकेन।) देवि! प्रणम्यतामयमितो भगवान-
म्बुराशिः।
लक्ष्मीरस्य हि यादः कृष्णोरःस्थापि सुभटभुजवसतिः।
इन्दुः स च मृड़चूड़ामणिरपि जगतामलङ्कारः॥१२॥
(सविमर्शञ्च।)

स्यादेव तोयममृतप्रकृतिर्यदि स्या-
न्नैकान्तमद्भुतमिदं पुनरद्भुतं नः।
लक्ष्मीतुषारकरकौस्तुभपारिजात-
धन्वन्तरिप्रभृतयो यदपां विवर्त्तः॥१३॥

तस्य संभृतये सम्भाराय आयोजनायेत्यर्थः हनूमान् रघुपुरीम् अयोध्यां प्रहितः प्रेषितः। वसन्ततिलकं वृत्तम्॥ ११॥

लक्ष्मीरिति। कृष्णस्य नारायणस्य उरसि वक्षसि तिष्ठतीति तथोक्ता तथा सुभटानां सुवीराणां भुजेषु बाहुषु वसतिः वासः यस्याः तथाभूतापि लक्ष्मीः स च मृड़स्य हरस्य चूड़ामणिः शिरोरत्नं जगताम् अलङ्कारः भूषणम् इन्दुः चन्द्रः अस्य अम्बुराशेः समुद्रस्य यादः हि जलजन्तुभेद एव, यादांसि जलजन्तव इत्यमरः। अस्मा-देतानयोरुद्भवादिति भावः। आर्याछन्दः॥ १२॥

स्यादिति। यदि तोयं जलम् अमृतप्रकृतिः अमृतस्य सुधारसस्य प्रकृतिः मूलं कारणं समगुणं वा स्यात् भवेत् तदा स्यादेव भवेदेव अमृतप्रकृतिकत्वमस्य उचितमेवेति यावत्। प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे इत्यमरः। प्रकृतिर्गुणसाम्ये स्यादिति विश्वः। इदम् एकान्तम् अत्यन्तम् अद्भुतम् आश्चर्यं न, अमृतस्य द्रवीभूत-वस्तुत्वात् समुद्रोत्पन्नत्वाच्चेति भावः। इदं पुनः नः अस्माकम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच देवि !

आकण्ठदृष्टशिरसाप्यविभाव्यपृष्ठ-
पार्श्वोदरेण चिरमृग्भिरुपास्यमानः ।
नाभीसरोरुहजुषा चतुराननेन
शेते किलात्र भगवानरविन्दनाभः ॥१४॥

(सीता वन्दते ।)

लक्ष्मणः । यत्सत्यमुत्सर्पिणी धर्मोत्तराणां (ट) सिद्धिः ।

अद्भुतम् आश्चर्यं प्रतिभातीति शेषः, यत् लक्ष्मीः श्रीः तुषारकरचन्द्रः कौस्तुभं पारिजातः सुरतरुविशेषः तथा धन्वन्तरिः वैद्यकशास्त्रप्रवर्त्तयिता स्वर्गचिकित्सकः प्रभृतिर्येषां ते अपां जलानां विवर्त्तः परिणामः एषां तोयस्य च वैसादृश्यात् विरुद्धगुणत्वाच्चेति भावः । वसन्ततिलकं वृत्तम् ॥ १३ ॥

आकण्ठेति । अत्र अम्बुराशौ अरविन्दं पद्मं नाभौ यस्य स विष्णुरित्यर्थः आकण्ठं कण्ठपर्य्यन्तं दृष्टानि शिरांसि यस्य तथोक्तेनापि अविभाव्यपृष्ठपार्श्वोदरेण अज्ञातपृष्ठपार्श्वजठरेण कण्ठपर्य्यन्तशिरोदर्शनेनापि अस्य पृष्ठादिकं कीदृशं न विभावयितुं शक्यते चतुर्मुखत्वादिति भावः । नाभीसरोरुहजुषा नाभिपद्मस्थितेन चतुराननेन ब्रह्मणा चिरं दीर्घकालं व्याप्य ऋग्भिः वैदिकमन्त्रविशेषैः उपास्यमानः स्तूयमानः सन् शेते स्वपिति किलेति प्रसिद्धौ । वसन्ततिलकं वृत्तम् ॥ १४ ॥

(ट) उत्सर्पिणी वर्द्धमाना भवतीति यावत् । धर्मः उत्तरः प्रधानं येषां तथोक्तानां धर्मनिष्ठानामित्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation, Kolkata. Digitization: eGangotri.

जरयतु जगत्कल्पोच्छित्तौ पिपर्त्तु पयोधरान्
वहतु वडवावक्त्रज्योतिर्दधातु सुधाभुजः ।
भवतु वपुषा यावांस्तावानगस्त्यरुषा पुन-
र्निधिरयमपामीषत्पानस्तपांसि ! नमोऽस्तु वः ॥१५॥

रामः । (सवड्डमानम् ।) वत्स ! किमुच्यते—

मुनेः कलशजन्मनो जयति कापि गम्भीरता
यया चुलुकमम्भसामपि निधिः समुत्पद्यते ।
अमुष्य पुनरीक्ष्महे न विवरीतुमुत्तुङ्गतां
यया भवति नोच्चकैरहह सोऽपि विन्ध्याचलः ॥१६॥

जरयत्विति । अयम् अपां निधिः समुद्रः कल्पोच्छित्तौ सृष्टि-संहारकाले जगत् जरयतु जीर्णं करोतु आप्लावनेन विध्वंसयत्वित्यर्थः । जरयत्वित्यत्र जनयत्विति पाठे कल्पोच्छित्तौ प्रलयावसाने जगत् जनयतु उत्पादयतु, एतस्माद्वा आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निरग्नेरापः, अद्भ्यः पृथिवीति श्रुतेः । पयोधरान् मेघान् पिपर्त्तु पूरयतु, वडवाया अश्वाया वक्त्रज्योतिः मुखानलं वहतु, सुधाभुजो देवान् दधातु पुष्णातु अमृतदानेनेति भावः । वपुषा शरीरेण यावान् यत्परिमाणः तावान् तत्परिमाणो भवतु, पुनः किन्तु अगस्त्यस्य रुषा कोपेन ईषत्पानः सुखपेयः, तस्मात् हे तपांसि ! वः युष्मभ्यं नमः अस्तु तपोरूपधर्मनिष्ठानां न किमप्य-साध्यमिति भावः । अगस्त्यस्य समुद्रपानवार्त्ता प्रायुक्तेत्यत्र न पुनरुक्ता । हरिणीवृत्तम् ॥ १५ ॥

मुनेरिति । कलशात् कुम्भात् जन्म यस्य तथाभूतस्य मुनेरगस्त्यस्य कापि अनिर्वचनीयेत्यर्थः गम्भीरता दुरवगाहप्रकृतिकत्वं जयति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच वत्स ! दुरगाहगम्भीरस्वभावानि महतां चरितानि । तथाहि ।

जगद्विगमघस्रघस्मरसहस्रभानुप्रभा-
परिक्वथितपिण्डितो लवणकूटमेवार्णवः ।
अयं क्षणमभूदथ ज्वलति कालरुद्रानले
चटच्चटदिति स्फुटन्न भवति स्म यावत् क्षणात् ॥१७॥

सीता । अज्जउत्त ! जलणिहिमज्झवट्टिणो लङ्कापोद-

सर्वोत्कर्षेण वर्त्तते इत्यर्थः । यया गम्भीरतया अम्भसां निधिरपि समुद्रोऽपि चुलुकं गण्डूषः समुत्पद्यते गण्डूषीक्रियते इत्यर्थः । अमुष्य अगस्त्यस्य उत्तुङ्गतां महोन्नतत्वं विवरीतुं प्रकटयितुं न पुनः नैव दृष्टान्ते प्रभवामः । यया उत्तुङ्गतया सोऽपि विन्ध्याचलः उच्चकैः न भवति न पुनर्वर्द्धते इति भावः अहह आश्चर्यम् । पृथ्वीवृत्तम् ॥ १६ ॥

जगदिति । अयम् अर्णवः समुद्रः जगतां विगमस्य अवसानस्य यः घस्रं दिनं, घस्रो दिनाहनी इत्यमरः । तत्र घस्मरः अद्मरः यः सहस्रभानुः सूर्यः तस्य प्रभया तेजसा परिक्वथितः अतिपक्वः अतएव पिण्डितः पिण्डाकारतां प्रापितः सन् लवणकूटमेव लवणराशिरेव, पुञ्जराशी तूत्करः कूटमस्त्रियामित्यमरः । क्षणं क्षणमात्रेण अभूत् । अथानन्तरं कालरुद्रानले संहारकरुद्राग्नौ ज्वलति सति क्षणात् चटच्चटदिति अव्यक्तध्वनिनेति भावः स्फुटन् सन् यावत् न भवति स्म क्षणमात्रेण विनाशं गतः भस्मीभूत इति यावत् । तस्मात् महतां किमसाध्यमिति भावः । पृथ्वीवृत्तम् ॥ १७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्स जम्बूदीवोवसंजमणखिङ्खलेव्व को एसो पडिहासदे (ठ) । (६)

रामः । देवि मेदिनीनन्दिनि ! पतितपौलस्त्यजगद्विजयकेतुदण्डानुकारो ककुत्स्थकुटुम्बदुःखसंविभागदायादस्य वानरपतेः कीर्त्तिमयो(ड)ऽयं महासेतुः ।

सीता (सहर्षम् ।) दिट्ठिआ (ढ) अज्जउत्तदंसणपच्चासाए बन्धप्परोहणमहौसहं (ण) सेदुबन्धो दीसइ । (अञ्जलिं बद्ध्वा ।) भअवं ! णमो दे । (७)

---

(६) आर्यपुत्र ! जलनिधिमध्यवर्तिनो लङ्कापोतस्य जम्बूद्वीपोपसंयमनशृङ्खलेव क एष प्रतिभासते ।

(७) दिष्ट्या आर्यपुत्रदर्शनप्रत्याशाया बन्धप्ररोहणमहौषधं सेतुबन्धो दृश्यते । भगवन् ! नमस्ते ।

(ठ) जलनिधेर्मध्यवर्त्तिनः । लङ्कापोतस्य लङ्कारूपवहित्रस्य । जम्बूद्वीपोपसंयमनेति जम्बूद्वीपे उपसंयमनं बन्धनं तस्य शृङ्खलेव लोहनिर्मितरज्जुरूपवस्तुविशेष इव । पोतो हि महत्या रज्ज्वा तीरे बध्यते इति दिक् ।

(ड) पतितेति पतितः पौलस्त्यस्य जगद्विजयस्य केतुदण्डः जगद्विजयसूचकध्वजदण्डः तदनुकारी पौलस्त्यनिधनेन तस्य ध्वजदण्डस्यापि पतनादिति भावः । ककुत्स्थेति ककुत्स्थकुटुम्बस्य ककुत्स्थपरिजनस्य अस्मदादेरिति भावः दुःखस्य संविभागः सम्यक् विभागः तस्य दायं विभाज्यद्रव्यम् आदत्ते इति दायादः अंशहरः तस्य । वानरपतेः सुग्रीवस्य । कीर्त्तिमयः कीर्त्तिमयः ।

(ढ) दिष्ट्या भाग्येन ।

(ण) बन्धप्ररोहणेति बन्धस्य स्थापनस्य प्ररोहणम् अङ्कुरोद्भवनं तदेव महौषधं महौषधस्वरूप इत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । देवि विश्वम्भरासम्भवे ! पश्य पश्य ।

यथा दूरापातिविदिवयुवतीनेत्रसुलभा-
मपां भर्त्ता हारावलिवलयलक्ष्मीं वितनुते ।
तथायं माणिक्यस्फटिककनकग्रावशिखरै-
रशून्यात्मा सेतुः प्रभवति महानायक इव ॥१८॥

अपिचास्मिन् बध्यमाने

शैलप्रवेशात् प्रचलीभवद्भिः
कल्लोलकूटैरभिताड़ितानाम् ।
आसीन्निवृत्याचलगामिनीना-
मम्भोधिरेव प्रभवो नदीनाम् ॥१९॥

यथेति । अपां भर्त्ता समुद्रः, दूरात् आपतन्तीति दूरापातीनि विदिवयुवतीनां देवाङ्गनानां यानि नेत्राणि तासां खेचरत्वात् नेत्राणां दूरापातित्वमिति भावः तेषां सुलभां सुदर्शनीयामिति यावत् हारावलीवलयस्य हारावलीवेष्टनस्य पृथिव्या इति भावः लक्ष्मीं श्रियं यथा वितनुते विस्तारयति धत्ते इति यावत् तथा अयं माणिक्यस्फटिककनकग्रावशिखरैः माणिक्यमयैः स्फटिकमयैः काञ्चनमयैश्च शैलशृङ्गैरित्यर्थः अशून्यात्मा पूरितावयवः सेतुः महानायक इव महान् मध्यमणिरिव हारावल्या इति भावः । नायको नेतरि श्रेष्ठे हारमध्यमणावपीति कोषः । प्रभवति प्रकर्षेण तिष्ठतीत्यर्थः । शिखरिणीवृत्तम् ॥ १८ ॥

शैलेति । शैलानां प्रवेशात् जलमध्ये इति भावः प्रचलीभवद्भिः प्रकर्षेण चञ्चलीभूतैः कल्लोलकूटैः तरङ्गराशिभिः अभिताड़ितानाम् आहतानाम् अतएव निवृत्य अचलगामिनीनां यत एवागतास्तत्रैवा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सुग्रीवं प्रति ।) सखे !

तथा सेतुश्रद्धोत्कलितकपिनिचिप्तगिरिशि-
प्रतिष्ठावर्द्धिष्णुः क्षणमथ नदीभिः प्रतिवहन् ।
समुत्खातक्षौणीधरकुहरपूर्त्तिव्यतिकर-
प्रमृष्टाहङ्कारः क्वरसि तदवस्थो निधिपाम् ॥२०॥

सुग्रीवः । देव ! भवच्चरितचित्रशालिकाया(त)मस्माकं

चलेषु गच्छन्तीनामिति यावत् नदीनाम् अम्भोधिरेव समुद्र एव प्रभव उत्पत्तिस्थानम् आसीत् । नदीनां पर्वता एव प्रभवाः, अत्र तु शैलप्रवेशात् कल्लोलताडनेन पराहत्य पर्वतानेव प्रति गच्छन्त्यः सद्यः समुद्रादिव प्रसृता इति भावः । इन्द्रवज्रावृत्तम् ॥ १९ ॥

तथेति । तथा सेतुश्रद्धया सेतुकरणानुरागेण उत्कलितैः उत्सुकैः कपिभिः वानरैः निक्षिप्तानां शिखरिणां पर्वतानां प्रतिष्ठया स्थित्या वर्द्धिष्णुः वर्द्धनशीलः, क्षणं तत्क्षणमात्रेण नदीभिः प्रतिवहन् प्रातिकूल्येन गच्छन्, अथानन्तरं समुत्खातानां समुत्पाट्य निक्षिप्तानामिति यावत् क्षौणीधराणां पर्वतानां कुहराणि विवराणि, कुहरं सुषिरं विवरं बिलमित्यमरः । तेषां पूर्त्तिः पूरणं स्वप्रवाहैरिति भावः तस्य व्यतिकरेण सम्बन्धेन समूहेन वा प्रमृष्टः अपनीतः अहङ्कारः अहं महानिति बुद्धिः यस्य तथाभूतः बहुभिः प्रवाहैरपि कुहराणामपूरणीयत्वादिति भावः । तदवस्थः बन्धनस्थ इत्यर्थः अपां निधिः समुद्रः यदासीदिति शेषः तत् क्वरसि ? अत्र वाक्यार्थः कर्मतयान्वेति ॥ शिखरिणीवृत्तम् ॥ २० ॥

(त) भवदिति भवतः चरितमेव चित्रशालिका आलेख्यगृहं तत्र तत्स्वरूपे इत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

चेतसि किं किं नाम न लिखितमस्ति। अपिच।

सेतूद्योगे सपदि लवणादन्यमन्तस्तिमिभ्यः
कालेनापां मधुरमपि हि स्वादमुद्भेदयन्त्यः।
शैलक्षेपोच्छलितसलिलव्यूहतुच्छे समन्ताद्
वारां पत्यौ पटुतररयं निम्नगाः सन्निपेतुः ॥२१॥

विभीषणः। देव मनुवंशमौक्तिकमणे!

सद्यः पीत्वा दरीभिर्जलधिमथ चिराद् दृष्टमैनाकबन्धु-
प्रीतिप्रौढाश्रुपूरद्विगुणमहिमभिर्निर्झरैः पूरयन्तः।
ये विन्यस्ताः पुरस्तान्निशि निशि निवहैरोषधीनां ज्वलद्भि-
स्ते दृश्यन्ते तदात्वोषितकपिशिखिविरस्मारिणः सेतुशैलाः ॥२२॥

सेतूद्योगे इति। सेतोर्बन्धस्य उद्योगे उपक्रमे सपदि तत्क्षणात् शैलानां क्षेपात् पातनात् उच्छलितैः सलिलव्यूहैः जलसङ्घातैः तुच्छे विशृङ्खलतां नीते इति भावः वारां पत्यौ जलनिधौ निम्नगाः सद्यः कालेन अन्तस्तिमिभ्यः अन्तर्गतेभ्यः तिमिमत्स्येभ्यः, तादर्थ्ये चतुर्थी। लवणात् अन्यम् अतएव मधुरम् अपां जलानां स्वादम् उद्भेदयन्त्यः जनयन्त्यः सद्यः पटुतरः उत्कटतरः रयः वेगः यस्मिन् तत् यथा तथा समन्तात् सन्निपेतुः सन्निपतन्ति स्म। लवणे समुद्रजले नदीनां मधुरजलानां सम्पातात् माधुर्यं सम्पद्यते इति भावः। मन्दाक्रान्तावृत्तम् ॥ २१ ॥

सद्य इति। पुरस्तात् प्रथमं विन्यस्ताः विनिपातिताः सेतुर्धमिति भावः सद्यः पातनमात्रेणैव दरीभिः गुहाभिः जलधिं पीत्वा अथ जलधिपानानन्तरं दृष्टे मैनाक एव बन्धौ समुद्रगर्भस्थिते इति भावः या प्रीतिः तया हेतुना प्रौढैः प्रवृद्धैः अश्रुपूरैः आनन्दजनितनेत्रा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सीता। (सस्मितम्।) अज्जउत्त! गौरीगुरुणो गिरिन्दस्स जुवराओ (थ) जलणिहिगब्भवसदी मेणाओ जाणामि पक्खच्छेदं पि विणा थावरीभूदो (द)। (८)

रामः। (विहस्य।) आं जानकि! आम्।

क्रौञ्चं विमुच्य पुत्रञ्च पितरञ्च हिमालयम्।
प्रविश्य जलधिं पक्षौ रचतानेन किं कृतम् ॥२३॥

सीता। (हसन्ती पुष्पकं प्रति।) विमाणराअ! गअणम-

---

(८) आर्यपुत्र! गौरीगुरोर्गिरीन्द्रस्य युवराजो जलनिधिगर्भवसतिर्मैनाको जानामि पक्षच्छेदमपि विना स्थावरीभूतः।

स्थुनिवहैः द्विगुणः महिमा माहात्म्यम् आधिक्यमित्यर्थः येषां तैः निर्झरैः पूरयन्तः ये सेतवैलाः, ते निशि निशि प्रतिरात्रं ज्वलद्भिः ओषधीनां निवहैः समूहैः तदात्वे तत्काले, तत्कालस्तु तदात्वं आदित्यवरः। उषितानां कृतावस्थानानां कपीनां वानराणां शिबिराणि सैन्यानि तेषां आरिथः आरकाः दृश्यन्ते ओषधीनां तेजसा पर्वतानां पिङ्गलवर्णकपिसाम्यादिति भावः। स्रग्धराछन्दः ॥ २२ ॥

(थ) गौरीगुरोः गिरीन्द्रस्य हिमालयस्येत्यर्थः। युवराजः युवा पुत्रः।

(द) स्थावरीभूतः एकत्र समुद्रमध्य एव स्थितेरिति भावः।

क्रौञ्चमिति। क्रौञ्चं तदाख्यं गिरिं पुत्रं पितरं हिमालयञ्च विमुच्य त्यक्त्वा जलधिं प्रविश्य पक्षौ रचता अनेन मैनाकेन किं कृतम्? अयुक्तं कृतमिति भावः। नास्य सतोरपि पक्षयोः स्थावरतापनीता, न वा पुत्रस्नेहः नापि पितृभक्तिरिति सर्वथा दुर्दैवमस्येति भावः ॥ २३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गगचक्कमणकोदूहलुल्लसिअमाणसाओ (द) । ता उव्व-मेहि (ध) दाव । (९)

रामः । (सकौतुकस्मितम् ।) देवि रत्नगर्भागर्भरत्नय-लाके ! पश्य पश्य ।

यथा यथा परं व्योम विमानमधिरोहति ।
तथा तथापसर्पन्ति परतः परितो दिशः ॥२४॥

किञ्च ।

आसन्नतपनाश्मानत्वचः पुष्पकपीडिताः ।
गगनार्णवयादांसि स्फिम्यन्ति स्तनयित्नवः ॥२५॥

---

(९) विमानराज ! गगनमार्गचङ्क्रमणकौतूहलोल्लसितमानसाः । तदुत्तमय तावत् ।

(द) गगनेति गगनमार्गस्य चङ्क्रमणे पुनः पुनः सञ्चरणे कौतूहलेन उल्लसितं मानसं यस्याः तथाभूता ।

(ध) उत्तमय ऊर्ध्वम् उत्पत ।

यथेति । विमानं यथा यथा परम् ऊर्ध्वं व्योम आकाशम् अधिरोहति उत्पतति, तथा तथा दिशः परतः परं स्थानं परितः समन्तात् अपसर्पन्ति पलायन्ते दिङ्निर्णयो न स्यादिति भावः । अनुष्टुब्वृत्तम् ॥ २४ ॥

आसन्नेति । आसन्नेन सन्निहितेन तपनेन सूर्येण तत्तेजसेति भावः आश्मानाः शुष्काः त्वच इव त्वचः वाह्यदेशा इति भावः येषां तथोक्ताः तथा पुष्पकेण विमानेन पीडिताः खण्डीकृता इति भावः, गगनमेव अर्णवः समुद्रः तस्य यादांसि जलजन्तुभूताः, स्तनयित्नवः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच।

अमी ते गम्भीरस्तनितरवरौद्रा नयनयो-
रनायुष्यं पुष्यन्त्यवतमसमुच्चैर्जलमुचः।
विसर्पद्भिर्येषामुपरि परमिन्दोः परिमलै-
रसंबाधज्योत्स्नातिमिरचयचित्रं वियदभूत् ॥२६॥

सुग्रीवः। (अधोऽवलोक्य सकौतुकं रामं प्रति॥ देव! दूरा-
दवाग(न)वलोकय तावत्।

निह्नुतोन्नतनतप्रविभक्तिः स्वस्ववर्णविनिविष्टपदार्था।
अम्बुराशिपरिवेषवती भूस्वित्रकुष्टिमिव प्रतिभाति ॥२७॥

मेघाः स्तिम्यन्ति आर्द्रतां नयन्तीति यावत्। यद्यपि स्तिमिर् आर्द्रीभावे इत्यस्य दैवादिकस्याकर्मकत्वं तथापि अन्तर्भूतण्यर्थो बोद्धव्यः। अनुष्टुब्वृत्तम् ॥ २५ ॥

अमी इति। अमी गम्भीरं स्तनितं गर्जितमेव रवः तेन रौद्राः भीषणाः उच्चैर्मेघान्तः जलमुचः मेघाः ते तव नयनयोः अनायुष्यम् अनायुःप्रयोजकं दर्शनगतिव्याघातकमिति भावः अवतमसम् अल्पं तमः, क्षीणेऽवतमसं तम इत्यमरः। पुष्यन्ति पुष्टं कुर्वन्ति स्वल्पेन तमसा नयने आवृण्वन्तीति भावः। इन्दोश्चन्द्रस्य उपरि ऊर्ध्वं परम् अधश्च विसर्पद्भिः सञ्चरद्भिः येषां मेघानां परिमलैः विमर्दैः गन्धै-रिति यावत् न सम्यक् बाधा व्याघातः यस्याः तथाभूता ज्योत्स्ना तिमिरचयश्च चन्द्रिका ज्योत्स्ना चन्द्रिकातिमिरचयश्चेति भावः ते चित्रं शबलं वर्णं शुक्लवर्णं चण्डश्च कृष्णवर्णं वियत् आकाशम् अभूत्। शिखरिणीवृत्तम् ॥ २६ ॥

(न) अवाक् अध इत्यर्थः।

निह्नुतेति। निह्नुता गोपिता उन्नतनतयोः प्रविभक्तिः प्रकटो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच देव !

अयमनेन महोदधिभोगिना
वलयितो वसुधाफणमण्डलः ।
जगदनर्घमवाप्य भवादृशं
किमपि रत्नमहङ्कुरुतेतराम् ॥२८॥

सीता । (पुरो दर्शयन्ती ।) को एसो कप्पाणलज्जाला-कलावकढिज्जमाणजलणिहिलवणत्थवकणिम्मलअब्भंलिह-सिहरसहस्समहुरो महीहरो पलोइज्जदि (प) । (१०)

---

(१०) क एष कल्पानलज्वालाकलापकथ्यमानजलनिधिलवणस्तवक-निर्मलाभ्रंलिहशिखरसहस्रमधुरो महीधरः प्रलोक्यते ।

विभागः यस्याः तथोक्ता, स्वेषु स्वेषु वर्णेषु शुक्लपीतादिषु विनिविष्टाः पदार्थाः वस्तूनि यस्याः तादृशी, दूरत्वात् शुक्लादिवर्णवत्त्वेनैव पदार्था ज्ञायन्ते न तु विशेषेणेति भावः । अम्बुराशिः समुद्र एव परिवेषः वेष्टनं तद्वती भूः पृथ्वी चित्रम् आश्चर्यं कृत्रिममिव द्वीपमिवेति भावः प्रतिभाति राजते । रथोद्धताद्वत्तं, रात् परैर्नरलैरथोद्धतेति तल्लक्षणात् ॥ २७ ॥

अयमिति । अनेन महोदधिरेव भोगी भुजङ्गः तेन वलयितः वेष्टितः अयं वसुधा पृथिवी एव फणमण्डलः जगताम् अनर्घम् अमूल्यं दुष्प्रापमिति यावत् भवादृशं किमपि अनिर्वचनीयं रत्नम् अवाप्य प्राप्य अहङ्कुरुतेतराम् अतिशयेन अहङ्करोति । द्रुतविलम्बितं वृत्तं, द्रुतविलम्बितमाह नभौ भराविति तल्लक्षणात् ॥२८॥

(प) कल्पानलेति कल्पानलस्य प्रलयाग्नेः ज्वालाकलापेन शिखासमूहेन कथ्यमानस्य जलनिधेः समुद्रस्य लवणस्तवकवत् लवण-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विभीषणः । देवि !

पुरः प्रालेयशैलोऽयं यस्मिन् मकरकेतवे ।
मृतसञ्जीवनी दुर्गा महौषधिरजायत ॥२९॥

सीता । (सकौतुकम् ।) अवि इध ज्जेव चन्दसेहरणअणा-
अले आहुदीभूदो भअवं मम्महो । (११)

विभीषणः । आं देवि ! आम् । इयमुत्तरेण देवदारु-
वनलेखा विषमशरदुरन्तसाक्षिणी (फ) ।

---

(११) अपि इहैव चन्द्रशेखरनयनानले आहुतीभूतो भगवान् मन्मथः ।

राशिवत् निर्मलेन विशदेन अभ्रंलिहेन मेघसर्पिना शिखराणां शृङ्गाणां सहस्रेण मधुरः मनोहरः । प्रलोक्यते दृश्यते ?

पुर इति । पुरः अग्रतः अयं प्रालेयशैलः हिमालयः वर्त्तते इति शेषः, यस्मिन् प्रालेयशैले मकरकेतवे कामाय मदनजीवनार्थ-मिति यावत्, तादर्थ्ये चतुर्थी । मृतः सञ्जीव्यते अनयेति मृत-सञ्जीवनी दुर्गा गौरी एव महौषधिः अजायत उदपद्यत । नेत्रा-नलेन दग्धः कामः गौरीपरिणयात् परं हरेण पुनर्जीवनं प्रापित इति पुराणम् । अतएव मृतस्य कामस्य पुनर्जीवनदानात् गौर्यां महौषधित्वं युक्तमिति भावः । अनुष्टुब्वृत्तम् ॥ २९ ॥

(फ) उत्तरेण उत्तरस्यां दिशि । देवदारुवनलेखा देवदारुवन-श्रेणी । विषमेति विषमशरस्य कामस्य दुरन्तः दुरवसानं दाह इत्यर्थः तस्य साक्षिणी साक्षाद्द्रष्ट्री ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पुरा पुरां भेत्तुरिह त्रिनेत्री-
शृङ्गाटके तुल्यरुषि स्थितेऽपि ।
धग्धग्धगित्यज्वलदेकमन्ये
तद्धूमपीडामपि नासहेताम् ॥३०॥

रामः । किमुच्यते ।

नीललोहितललाटलाञ्छने
लोचने जयति कोपपावकः ।
रक्षितस्य जगदन्तहेतवे
यस्य संज्वलनमात्मभूरभूत् ॥३१॥

सीता । (रामं प्रति ।) अज्जउत्त ! तधा णिरणुक्कोसो(व)

पुरेति । पुरा पूर्वम् इह अस्मिन् देवदारुवने पुरां भेत्तुः त्रिपुरारेः त्रिनेत्री नेत्रत्रयमेव शृङ्गाटकं वारिकण्टकं सिङ्घाड़ा इति प्रसिद्धं, शृङ्गाटकं भवेद्वारिकण्टके च चतुष्पथे इति मेदिनी । तस्मिन् तुल्यरुषि समक्रोधे स्थितेऽपि एकं तृतीयं नेत्रमित्यर्थः धक् धक् धक् इति इत्थम् अज्वलत् ज्वाल । अन्ये द्वे नेत्रे तस्य धूमपीडामपि न असहेतां निमीलिते एव आस्तामिति भावः । उपजातिवृत्तम् ॥ ३० ॥

नीलेति । नीललोहितस्य हरस्य ललाटलाञ्छने भालभूषणे लोचने नेत्रे कोपपावकः कोपाग्निः जयति सर्वोत्कर्षेण वर्त्तते । जगताम् अन्तहेतवे संहारार्थं रक्षितस्य यस्य कोपपावकः कोपाग्निः जयति सर्वोत्कर्षेण वर्त्तते । जगताम् अन्तहेतवे संहारार्थं रक्षितस्य यस्य कोपपावकस्य आत्मभूः कामः संज्वलनं सन्धुक्षणकाष्ठम् अभूत् । रथोद्धतावृत्तम् ॥ ३१ ॥

(व) निरनुक्रोशः निर्दयः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कधं उण पडिणिवुत्तो (भ) महादेओ देवीए (म)। (१२)

रामः ।

स्मरपरिभवनिःसहायदीर्घै-
रथ सुभगङ्करणैरियं तपोभिः ।
तदकृत यदसौ निजेऽपि देहे
जयति जगत्पतिरात्मनाद्वितीयः ॥३२॥

विभीषणः । (सपरिहासम् ।)

चिरमनया तपसित्वा कपालविषविषधरैकचित्तस्य ।
चक्रे हरस्य मूर्त्तिः फलमर्धं फलदमर्धञ्च ॥३३॥

---

(१२) आर्यपुत्र ! तथा निरनुक्रोशः कथं पुनः प्रतिनिवृत्तो महादेवो देव्या ।

(भ) प्रतिनिवृत्तः क्रोधादिति शेषः ।

(म) देव्या गौर्या ।

स्मरेति । इयं देवी पार्वती स्मरस्य कामस्य परिभवेन निःसहायं सहायाभावः तेन हेतुना दीर्घाणि महान्तीत्यर्थः तैः, पूर्वं स्मरसाहाय्येन देवं वशीकर्त्तुमना आसीत् ततस्तदभावीकरणात् सहायाभावमवलोक्य महत्तप एव सहायोऽवलम्बित इति. भावः । असुभगा सुभगा क्रियते एभिरिति तथोक्तानि तैः तपोभिः तत् अकृत कृतवती, यत् असौ जगत्पतिर्हरः निजे देहेऽपि आत्मना द्वितीयः द्वयोः पूरणः अर्द्धनारीश्वरः सन्नित्यर्थः जयति सर्वोत्कर्षेण वर्त्तते । पुष्पिताग्राद्वृत्तम् ॥ ३२ ॥

चिरमिति । अनया गौर्या चिरं सुदीर्घकालं तपसित्वा तपश्चरित्वा कपालः नरशिरः कङ्कालं विषं गरलं द्वयेति पाठे द्वयो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सीता । (विहस्य तं प्रति सकौतुकम् ।) कदरम्मि उण संणिवेसे (य) भअवदीए सव्वमङ्गलाए पाणिग्गहणमङ्गलं आसी । (१३)

विभीषणः । इदं पुरस्तादोषधिप्रस्थं नाम नगराजनगरम् । अत्र हि

सम्प्रदातरि महौषधीमये भूधरे सुखमुवाह पार्वतीम् ।
मूढकङ्कणफणीन्द्रनिर्भयां तारकेश्वरकिशोरशेखरः ॥३४॥

---

(१३) कतरस्मिन् पुनः सन्निवेशे भगवत्याः सर्वमङ्गलायाः पाणिग्रहणमङ्गलमासीत् ।

नाहनभूतो वृषभः विषधरः भुजङ्गः एषु एकं केवलं चिह्नं यस्य तथाभूतस्य हरस्य अर्द्धं मूर्त्तिः शरीरं फलं तस्यास्तदर्द्धस्य लाभात् यदि लभ्यते तदेव फलमिति भावः अपरमर्द्धं फलदम् अभीष्टदाह । गौरीतपसा वशं गतो हरोऽर्द्धनारीश्वरोऽभूदिति भावः । आर्याछन्दः ॥ ३२ ॥

(य) सन्निवेशे प्रदेशे ।

सम्प्रदातरीति । महौषधिमये महत्य ओषध्यः लताविशेषाः तन्मये तद्बहुले इति यावत् भूधरे हिमवति सम्प्रदातरि सम्यक् प्रदानकर्त्तरि सति तारकाणां ताराणाम् ईश्वरश्चन्द्रः किशोरः शिशुः बालश्चन्द्र इत्यर्थः शेखरं शिरोभूषणं यस्य तथाभूतः हरः मूढः विवश इति यावत् । हिमालयस्य हिमस्य महौषधीनाञ्च प्रभावादिति भावः कङ्कणरूपः वलयरूपः फणीन्द्रः भुजङ्गराजः तस्मात् निर्भयां भयरहितां पार्वतीं सुखम् उवाह परिणयति स्म । रथोद्धतावृत्तम् ॥ ३४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । आं देवि ! इहैव

पितरि निजतुहिनसम्पत्कल्पितहेमन्तविभ्रमे गौरी ।
निर्भदभुजङ्गभूषणमभीषणं प्रियकरं भेजे ॥३५॥

सीता । (सस्मितम् ।) अज्जउत्त ! अवि एदस्सिं जेव्व मअणतणुदहणवइअरणिरप्पणो पुडमविस्ससन्तोए (र) गोरीए चन्दचूडो संवडिदो (ल) णिअसरीरेण । (१४)

रामः । (विहस्य ।) आं देवि !

एतस्यां हि तुषारभूधरशिरःसीम्नि प्रियार्द्धेन च
स्वेनार्द्धेन च तादृशे पशुपतौ वृत्तेऽर्द्धनारीश्वरे ।

---

(१४) आर्यपुत्र ! अस्यैतस्मिन्नेव मदनतनुदहनव्यतिकरनिरात्मीयः स्फुटमविश्वसन्त्या गौर्या चन्द्रचूडः संवटितो निजशरीरेण ।

पितरीति । निजतुहिनसम्पदा कल्पितः कृतः हेमन्तस्य कृतो-विभ्रमः विलासः विशिष्टा भ्रान्तिर्यत्र येन तथाभूते पितरि सति गौरी निर्भदः निरौद्धत्यः भुजङ्ग एव भूषणं यस्य तादृशम् अतएव अभीषणम् अभयङ्करं प्रियस्य हरस्य करं भेजे जपाहेत्यर्थः । अर्धार्द्धवृत्तम् ॥ ३५ ॥

(र) मदनेति मदनस्य तनुदहनं शरीरदाहः तद्व्यतिकरेण तत्सम्बन्धेन तद्वेतुनेति यावत् निरात्मीयः आत्मीयरहितः निःसङ्गाभिलाषीति भावः अतः स्फुटं सम्यक् अविश्वसन्त्या मामपि परित्यज्य चण्डेन गमिष्यतीति धिया विश्वासमकुर्वत्या इति यावत् ।

(ल) संवटितः योजितः ।

एतस्यामिति । एतस्यां हि अत्रैव तुषारभूधरसीम्नि हिमालयप्रदेशे प्रियाया गौर्या अर्द्धेन स्वेन निजेन अर्द्धेन च पशुपतौ तादृशे तथाभूते अर्द्धनारीश्वरे वृत्ते जाते सति तदा गौर्याः सखीभिः सप्रह-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शेषेणार्द्धयुगेन सप्रहसनं गौरीसखीभिस्तदा
चक्रे दक्षिणवामयोर्विनिमयादन्योऽर्द्धनारीश्वरः ॥३६॥

अपिच ।

सम्भोगानतिरिच्यमानविभवो यद्विप्रलम्भो रस-
स्तद्दिव्यं मिथुनं परस्परपरिस्यूतं नमस्कुर्महे ।
एकस्याः प्रतिबिम्बसंभृतविपर्यासे मुहुर्दर्पणे
सव्याङ्गस्थितिकौतुकं शमयति स्वामी स यत्रापरः ॥३७॥

भनं सहासं यथा तथा शेषेण अर्द्धयुगेन गौर्या अपरेण अर्द्धेन शिवस्य च अन्येन अर्द्धेनेत्यर्थः दक्षिणवामयोः विनिमयात् विपर्यासात् दक्षिणे गौर्या अर्द्धं वामे हरस्यार्द्धमिति वैपरीत्यादिति भावः अन्यः अर्द्धनारीश्वरः चक्रे कृतः । शार्दूलविक्रीडितं वृत्तम् ॥३६॥

सम्भोगेति । यदित्यव्ययं यस्येत्यर्थः यस्य विप्रलम्भः प्रियतमा-प्राप्त्यवस्थाविशेषरूपः रसः शृङ्गारः स चतुर्द्धा । तदुक्तं दर्पणे, यत्र तु रतिः प्रलष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ । स च पूर्वराग-मानप्रवासकरुणात्मकश्चतुर्द्धा स्यात् । श्रवणाद् दर्शनाद् वापि मिथः संरूढरागयोः । दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते । श्रवणन्तु भवेत्तत्र दूतवन्दिसखीमुखात् । इन्द्रजाले च चित्रे च साक्षात् स्वप्ने च दर्शनम् । अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंप्रलापाश्च । उन्मादोऽथ व्याधिर्जड़ता मृतिश्चेति दशात्र कामदशाः । अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचिन्तनम् । उन्मादश्चापरिच्छेदश्चेतना-चेतनेष्वपि । अलक्ष्यवाक् प्रलापः स्याच्चेतसो भ्रमणाद् भ्रमः । व्याधिस्तु दीर्घनिःश्वासपाण्डुताक्षयतादयः । जड़ता हीनचेष्टत्वम-ङ्गानां मनसस्तथेत्यादि । विस्तरभयादन्यत्र लिखितम् । सम्भोगात्, दर्शनस्पर्शनादीनि निषेवेते विलासिनौ । यत्रानुरक्तावन्योन्यं सम्भोगो-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विभीषणः । देव !

स्वच्छन्दैकस्तनश्रीरुभयमतमिलन्मौलिचन्द्रः फणीन्द्र-
प्राचीनावीतवाही सुखयतु भगवानर्द्धनारीश्वरो वः ।
यस्यार्द्धे विश्वदाहव्यसनविषमरं ज्योतिरर्द्धे कपोत-
द्वाभ्यं चान्योन्यवेगग्रहतिसिमसिमाकारि चक्षुस्तृतीयम् ॥ ३८

ऽयसुदाहृत इत्युक्तलक्षणात् उभयोः सम्भेलनरूपादिति यावत् अनति-
रिच्यमानः अनधिक इति यावत् विभवः सामर्थ्यं यस्य तथाभूतः
सर्वत्रैव सम्भोगापेक्षया विप्रलम्भस्यैवाधिक्यं दृश्यते इह तु तद्वैप-
रीत्यमिति भावः । परस्परपरिस्यूतम् अन्योन्यमिलितं तत् दिव्यं
मिथुनं स्त्रीपुंसौ नमस्कुर्महे वन्दामहे । यत्र मिथुने दर्पणे आदर्शे
प्रतिबिम्बेन संभृतः संजातः विपर्यासः वैपरीत्यं वामं दक्षिणं दक्षिणं
वाममित्येवं रूपं यस्य तादृशे सति शुद्धः पुनः पुनः एकस्या गौर्याः
सव्याङ्गे वामाङ्गे स्थितिरवस्थानं तेन कौतुकम् अपरः स्वामीः सः
हरः शमयति शान्तिं नयति । शरीरस्य वामांशे मां धारयतीति
स्वसौभाग्याय शुद्धायां गौर्यां दर्पणे वामं दक्षिणं दक्षिणञ्च रामं
दृश्यते इत्याशयेन हरेण पश्य तावत् दक्षिणे किं वामे च किमिति
गौर्यै प्रदर्शनात् तत् कौतुकं शुद्धरपनीतमिति निष्कर्षः । शार्दूल-
विक्रीडितं वृत्तम् ॥ ३७ ॥

स्वच्छन्देति । स्वच्छन्दा स्वतन्त्रा द्वितीयस्तनेन असंश्लिष्टेति
यावत् एकस्य स्तनस्य श्रीः शोभा यत्र तथोक्तः, उभयमतः उभाभ्यां
स्वीकृतः उभयसाधारण इत्यर्थः मौलिचन्द्रः शेखरेन्दुः यस्य तथा-
भूतः फणीन्द्रः भुजङ्गराज एव प्राचीनावीतं दक्षिणस्कन्धे तिर्यग्-
भावेन परिहितं यज्ञसूत्रमित्यर्थः वहतीति तथोक्तः, उपवीतं
यज्ञसूत्रं प्रोद्धृते दक्षिणे करे । प्राचीनावीतमन्यस्मिन् निवीतं कण्ठ-
लम्बितमित्यमरः । भगवान् अर्द्धनारीश्वरः वः युष्मान् सुखयतु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

स्वेदार्द्रवामकुचमण्डलपत्रभङ्ग-
संशोषिदक्षिणकराङ्गुलिभस्मरेणुः ।
स्त्रीपुंनपुंसकपदव्यतिलङ्घनी वः
शम्भोस्तनुः सुखयतु प्रकृतिश्चतुर्थी ॥३९॥

(अन्यतश्च दर्शयन् ।)

सुखीकरोतु । यस्य अर्द्धनारीश्वरस्य अर्द्धे विश्वेषां जगतां दाहे व्यसनम् आसक्तिः तेन विस्फुरं प्रसरणशीलं ज्योतिः तेजोरूपमित्यर्थः, अर्द्धे अन्यस्मिन्निति शेषः कृपया विश्वदाहदर्शनादिति भावः उद्यत् उद्गच्छत् वाष्पम् अश्रु यस्मात् तथाभूतञ्च अतएव अन्योन्यस्य परस्परस्य अग्नेर्वाष्पस्य चेत्यर्थः वेगप्रकृत्या वेगसंश्लेषेण सिमसिमाकारि सिमसिमारूपमव्यक्तं शब्दं कुर्वत् अग्नौ स्वल्पजलसंयोगे सिमसिमाशब्दः सञ्जायते इति भावः । तृतीयं चक्षुः नयनम् अस्तीति शेषः । स्रग्धरावृत्तम् ॥ ३८ ॥

स्वेदार्द्रेति । स्वेदार्द्रस्य हरस्य कामावेशेन कराङ्गुलिस्पर्शजनितसत्त्वोद्रेकादिति भावः वामकुचमण्डलस्य यः पत्रभङ्गः पत्रावलीरचना तत्संशोषी दक्षिणकराङ्गुले हरस्येति भावः भस्मरेणुः यस्यां तथाभूता स्त्रीपुंनपुंसकपदव्यतिलङ्घनी स्त्रीपुंनपुंसकानां पदं स्थानं तस्य व्यतिलङ्घनी अतिक्रामणी स्त्रीलिङ्गपुंलिङ्गक्लीबलिङ्गैरवाच्येति भावः अर्द्धनारीश्वरतन्वाः स्त्रीत्वं वक्तुं न शक्यते पुरुषत्वात्, स्त्रीत्वं वक्तुं न शक्यते सस्त्रीकत्वात्, क्लीबत्वञ्च वक्तुं न शक्यते स्त्रीत्वपुंस्त्वयोः सत्त्वादिति भावः । अतएव चतुर्थी प्रकृतिः लिङ्गं प्रकृतिर्योनिलिङ्गयोरिति विश्वः । शम्भोः तनुः अर्द्धनारीश्वरमूर्त्तिः वः युष्मान् सुखयतु । वसन्ततिलकं वृत्तम् ॥३९॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आधत्ते दनुसूनुसूदनभुजाकेयूरवज्राङ्कुर-
व्यूहोल्लेखपदावलीवलिमयैरङ्कैर्मुदं मन्दरः ।
आधारीकृतकूर्मपृष्ठकर्षणप्रक्षीणमूलोऽधुना
जानीमः परतः पयोधिमथनादुच्चैस्तरोऽयं गिरिः ॥४०॥

रामः । (निर्वर्ण्य स्मितम् ।)

तत्तादृक्फणिराजरज्जुकर्षणं संरूढपक्षच्छिदा-
घातात्तुदमप्यहो कथमयं मन्याचलः सोढवान् ।

आधत्ते इति । मन्दरः गिरिविशेषः दनुसूनूनां दानवानां सूदनस्य संहारिणः विष्णोरित्यर्थः भुजासु बाहुषु चतसृष्विति भावः ये केयूराः अङ्गदाः भूषणविशेषा इति यावत् तेषां वज्राङ्कुर-व्यूहैः हीरकाङ्कुरनिचयैः उल्लेखेन उद्घर्षणेन याः पदावल्यः रेखासमूहाः ता एव वलयः उदररेखाविशेषाः तन्मयैः तद्युक्तै-रित्यर्थः अङ्कैः अवयवैः मुदम् आनन्दम् आधत्ते जनयति । अधुना इदानीम् अयं गिरिः आधारीकृतेन कूर्मस्य पृष्ठेन कर्षणात् घर्ष-णात् प्रक्षीणं मूलं यस्य तथाभूतः अतएव पयोधिमथनात् समुद्र-मन्थनात् परतः पूर्वम् उच्चैस्तरः अत्युच्चैः आसीदिति शेषः एतत् जानीमः सम्भावयामः । पूर्वं विष्णुना समुद्रमन्थनार्थं मन्दरः बाहुभि-र्वहन् कूर्मपृष्ठे स्थापितः, ततश्च तस्य बाहुकेयूरहीरकवर्षणेनास्य मध्यभागेषु वलिरूपा रेखा जाताः कूर्मपृष्ठघर्षणेन च मूलदेशस्य क्षीणतरीदानीन्ननापेक्षया पूर्वावस्थाया उच्चत्वमिति भावः । शार्दूल-विक्रीडितं वृत्तम् ॥ ४० ॥

तदिति । अयं मन्याचलः मन्दरः तत् प्रसिद्धं तादृक् तथा-विधं दृढमिति भावः फणिराजः वासुकिरेव रज्जुः तया कर्षणं मन्थनं संरूढा जाता या पक्षच्छिदा पक्षयोः छेदः तस्या घातेन घर्ष-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एतेनैव दुरात्मना जलनिधेरुत्थाप्य पापामिमां
लक्ष्मीमीश्वरदुर्गतव्यवहृतिव्यस्तं जगन्निर्मितम् ॥४१॥

सीता । (सोद्वेगम् ।) इमिणा क्खेव्व मत्थुसेसीकिददु-
द्दसाअरेण (व) चन्दमुद्दरिअ पडसिद्दभत्तुणो इत्थिआजणस्स
उवरि चारहली विद्दत्ता (अ) । (१५)

(सर्वे हसन्ति ।)

---

(१५) अनेनैव मन्थशेषीकृतदुग्धसागरेण चन्द्रमुद्धृत्य प्रोषितभर्तृ-
कस्य स्त्रीजनस्योपरि चारहली विस्तीर्णा ।

णेन अरन्तुदमपि मर्मव्यथाजनकमपि कथं केन प्रकारेण सोढ़वान्
अहो आश्चर्यम् । एतेनैव दुरात्मना दुष्टचित्तेन जलनिधेः समुद्रात्
इमां पापां चापल्यात् दुर्वृत्तामिति यावत् लक्ष्मीम् उत्थाप्य उद्धृत्य
जगत् ईश्वरो धनी दुर्गतः दरिद्रः इति व्यवहृत्या व्यवहारेण व्यस्तं
दुस्थमिति यावत् निर्मितं कृतम् । पूर्वं लक्ष्म्या विरहेण सर्वमेव जगत्
तुल्यावस्थम् अतः न कस्यापि केनापि सह विसंवादः आसीत्, ततश्च
लक्ष्मीसद्भावेन परस्परं विसंवादाकुलमभूदिति भावः । शार्दूलविक्री-
ड़ितं वृत्तम् ॥ ४१ ॥

(व) मन्थिति मन्थ तक्रविशेषः, मण्ड' दधिभवत् मन्थित्यमरः ।
तदेव शेषो यस्य तथाभूतः कृतः दुग्धसागरो येन तादृशेन दुग्धसागरं
विलोड़यतेति भावः अनेनैव मन्दरेणेत्यर्थः ।

(अ) चारहली पौरुषमित्यर्थः, दैशिकप्रयोगोऽयम् । नन्
सीतायाः स्वात्मानमुद्दिश्य अयमुपालम्भो न युज्यते तस्याः प्रोषित-
भर्तृकात्वाभावादिति चेन्न मायामृगस्य वधार्थं कियन्तं कालम्-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विभीषणः। (तदेव रामवक्त्रं (घ) भावयन्।) अहह।

प्रचेतुमुदधौ लक्ष्मीं भूयोऽपि वलते मनः।
किन्तु प्रचिप्त एवार्थे पुनरायाति चन्द्रमाः ॥४२॥

(विष्टम्भ चाकाशे।)

कस्मैचित् कपटाय कैटभरिपूरःपीठदीर्घालयां
देवि! त्वामभिवाद्य कुप्यसि न चेत्तत् किञ्चिदाचक्ष्महे।
यत्ते मन्दिरमम्बुजन्म किमिदं विद्याग्टहं यच्च ते
नीचान्नीचरतोपसर्पणमपामेतत् किमाचार्य्यकम् ॥४३॥

वधिं कृत्वा रामे देशान्तरं गत्वा पुनरदर्शनं गतवति तस्याः प्रोषितभर्तृकात्वस्य सिद्धेः। तदुक्तं, कुतश्चित् कारणाद् यस्याः पतिर्देशान्तरं गतः। दत्त्वावधिं भृत्यार्त्ता सा भवेत् प्रोषितभर्तृकेति॥

(घ) रामवक्त्रं रामस्य सुवचनम्।

प्रचेतुमिति। मनः भूयोऽपि पुनरपि लक्ष्मीम् उदधौ समुद्रे प्रचेतुं वलते चेष्टते, किन्तु प्रचिप्त एव दैवनिर्बन्धेनेति भावः चन्द्रमाः पुनः आयाति आगच्छति उत्तिष्ठति। तथाचागमः, सूर्याचन्द्रमसौ पश्चिमसमुद्रं प्रविश्य पूर्वसमुद्रे योत्तिष्ठत इति। लक्ष्मीपरिग्रह एव जगतां दुर्व्यवहारस्य बीजमिति धिया विभीषणस्योक्तिः। अनुष्टुब्वृत्तम्॥ ४२॥

कस्मैचिदिति। हे देवि लक्ष्मि! चेत् यदि न कुप्यसि न क्रोधं करोषि, तत् तदा कस्मैचित् कपटाय वञ्चकाय कैटभरिपोर्नारायणस्य उरः वक्षःस्थलमेव पीठं दीर्घः दीर्घकालीनः आलयः वासस्थानं यस्याः तथोक्तां त्वाम् अभिवाद्य नमस्कृत्य किञ्चित् आचक्ष्महे ब्रूमः, यत् ते तव मन्दिरं गृहम् अम्बुजन्म पद्मम् इदं किं विद्याग्टहं शिक्षास्थानम् आपाततः दर्शनमात्रेण मनोहरत्वं कण्टककीर्णनालत्वं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (सहासम् ।) हन्त ! सुरासुरमल्लभटीतूर्य्यतालनर्त्तकी सकलराजकुलखलीकारखर्जूला साहसिकजनसहस्रशस्त्रान्धकारखेलनखद्योती मधुमथनजीमूतविलासविद्युल्लता किमेवमुपालभ्यते (स)। इयं हि,

गुणवद्भिः सह सङ्गममुच्चैः पदमाप्तुमुत्सुका लक्ष्मीः ।
वीरकरवालवसतिर्ध्रुवमसिधाराव्रतं चरति ॥४४॥

पद्मस्य यथा, तथा तव आपातरमणीयत्वं किन्तु परिणामवैरस्यमिति भावः । यच्च ते तव नीचात् नीचतरोपसर्पणम् अतिनीचजनसेवित्वमित्यर्थः एतत् किम् अपां जलानाम् आचार्यकम् आचार्यकर्म उपदेश इत्यर्थः पद्मसङ्गेन जलसम्पर्कात् जलानि यथा नीचात् नीचं गच्छन्ति तथा त्वया शिक्षितमिति भावः । लक्ष्मीरापातरम्या परिणामविरसा नीचगामिनी चेति तात्पर्यार्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ४३ ॥

(स) सुरासुरेति सुरासुरमल्लानां देवासुरवीराणां भटीतूर्य्ये रणवाद्यविशेषे तालेन नर्त्तकी नर्त्तनशीला । सकलेति सकलानां राजकुलानां नृपवंशीयानां खलीकारे वञ्चने खर्जूला कण्डूतिमती सततासक्तेति यावत् । साहसिकेति साहसिकाः जनाः वीरा इत्यर्थः तेषां सहस्रस्य शस्त्रान्धकारेषु अनवरतशरवर्षणेष्विति भावः यत् खेलनं क्रीडनं विचरणमित्यर्थः तस्मिन् खद्योती ज्योतिरिङ्गणपक्षिणी । मधुमथनेति मधुमथनः कृष्ण एव जीमूतः मेघः तेन विलासे सङ्गे विद्युल्लता सौदामनी । किं कथम् एवम् इत्थम् उपालभ्यते अधिक्षिप्यते तिरस्क्रियते इत्यर्थः ।

गुणवद्भिरिति । वीराणां करवाले वसतिः वासो यस्याः तथाभूता लक्ष्मीः गुणवद्भिः सह सङ्गमेव उच्चैः पदम् आप्तुं सम्-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सीता । (साभ्यसूयमिव ।) णिअदेव्वदुव्विलासविआरालसो (ह) लोओ लच्छीदेवीए दुज्जसवअणाइं गाएदि । (पुरो दर्शयन्ती ।) को एसो दीसदि दिअसकूडीकिदजोण्हाविच्छड्डपडिरूवो (च) गिरी । (१६)

विभीषणः । देवि !

सोऽयं कैलासशैलः स्फटिकमणिभुवामंशुजालैर्ज्वलद्भि-
श्छाया पीतापि यत्र प्रतिकृतिभिरुपस्थाप्यते पादपानाम् ।
यत्रोपान्तोपसर्पत्तपनकरधृतस्यापि पद्मस्य मुद्रा-
मुद्दामानो दिशन्ति त्रिपुरहरशिरश्चन्द्रलेखामयूखाः ॥४५॥

---

(१६) निजदैवदुर्विलासविचारालसो लोको लक्ष्मीदेव्या दुर्यशोवचनानि गायति । क एष दृश्यते दिवसकूटीकृतज्योत्स्नाविच्छर्दप्रतिरूपो गिरिः ।

सुत्सुका सती असिधाराव्रतम् असिधारायां भ्रमणरूपं व्रतं चरति अनुतिष्ठति । ध्रुवम् उत्प्रेक्षे । आर्याछन्दः ॥ ४४ ॥

(ह) निजेति निजस्य स्वस्य दैवदुर्विलासस्य दुर्दैवस्येति यावत् विचारे विवेके अलसः अपटुरित्यर्थः ।

(च) दिवसेति दिवसानां कूटं राशिः दिवसकूटम् अदिवसकूटं दिवसकूटं कृता दिवसकूटीकृता सा ज्योत्स्ना चन्द्रिका तस्या विच्छर्दः विस्तारः तस्य प्रतिरूपः तुल्यः ।

सोऽयमिति । सोऽयं कैलासशैलः कैलासपर्वतः दृश्यते इति शेषः, यत्र स्फटिकमणिभुवां स्फटिकशिलासम्भूतानां पादपानां ज्वलद्भिः अंशुजालैः मयूखनिचयैः पीतापि निगीर्णापि छायाया प्रतिकृतिभिः प्रतिबिम्बैः उपस्थाप्यते व्यज्यते । यत्र उद्दा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । हन्त, शतधा दृश्यमानोऽपि न चक्षुरकौतुकं (क) करोति ।

गिरिः कैलासोऽयं दशवदनकेयूरविलस-
न्मणिश्रेणीपत्राङ्कुरमकरमुद्राङ्कितशिलः ।
अमुष्मिन्नारुह्य स्फटिकमयसर्वाङ्गविमले
निरीक्षन्ते यक्षाः फणिपतिपुरस्यापि चरितम् ॥४६॥

अपिच ।

दशमुखभुजदण्डमण्डलीनां
दृढपरिपीडनपीतमेखलोऽयम् ।

मामः विकसराः त्रिपुरहरस्य शङ्करस्य शिरसि या चन्द्रलेखा चन्द्रकला तस्याः मयूखाः किरणाः, उपान्ते प्रान्तदेशे उपसर्पतः विचरतः तपनस्य सूर्यस्य करैः किरणैः धृतस्यापि स्पृष्टस्यापि मन्नस्य शुद्धां सङ्कोचं दिशन्ति कुर्वन्ति । स्रग्धराछन्दः ॥ ४५ ॥

(क) अकौतुकं कौतुकशून्यम् ।

गिरिरिति । अयं कैलासो गिरिः दशवदनस्य रावणस्य केयूरेषु अङ्गदेषु विलसन्तीनां स्फुरन्तीनां मणिश्रेणीनां हीरकपङ्क्तीनां पत्राङ्कुराणां मकराणां मकराकृतीनां मुद्रया रेखाविशेषेण अङ्कितः चिह्नितः शिला यस्य तथाभूतः । स्फटिकमयैः सर्वाङ्गैः विमले विशदे अमुष्मिन् पर्वते आरुह्य यक्षाः देवयोनिविशेषाः फणिपतिपुरस्य वासुकिनगरस्य पातालस्यापि चरितं व्यवहारं निरीक्षन्ते पश्यन्ति । शिखरिणीवृत्तम् ॥ ४६ ॥

दशमुखेति । अयं स्फटिकगिरिः दशमुखस्य रावणस्य भुजा एव दण्डमण्डलम्: दण्डसमूहाः तेषां दृढपरिपीडनेन पीता अभि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जलगृहकवितर्दिकासुखानि
स्फटिकगिरिर्गिरिशस्य निर्मिमीते ॥४७॥

विभीषणः । (सीतां प्रति ।) देवि ! दृश्यन्तामम्मी ।

कैलासाद्रितटीषु धूर्जटिजटालङ्कारचन्द्राङ्कुर-
ज्योत्स्नाकन्दलिताभिरिन्दुदृषदामद्भिर्नदीमातृकाः ।
गौरीहस्तगुणप्रदत्तवपुषः पुष्यन्ति धात्रेयक-
भ्रातृस्नेहसहोढ़षण्मुखशिशुक्रीड़ासुखाः शाखिनः ॥४८॥

भूतेति यावत् मेखला यस्य तथाभूतः सन् गिरिशस्य शम्भोः जल-
गृहमेव जलगृहकं जलयन्त्रगृहं तस्य वितर्दिका वेदिका तया
सुखानि, स्याद् वितर्दिस्तु वेदिकोत्तरः । निर्मिमीते करोति ।
पुष्पिताग्राद्वृत्तम् ॥ ४७ ॥

कैलासेति । कैलासाद्रितटीषु कैलासपर्वततटेषु शाखिनः वृक्षाः,
धूर्जटेः शिवस्य जटानाम् अलङ्कारः भूषणभूतः यश्चन्द्राङ्कुरः चन्द्रलेखा
तस्य ज्योत्स्नाभिः कन्दलिताभिः पल्लविताभिः इन्दुदृषदां चन्द्रकान्त-
मणीनाम् अद्भिः जलैः चन्द्रमणिनिःसृतैरिति भावः नदी माता
येषां तादृशाः नदीजलैरिव पोषिता इति भावः, गौर्या हस्तगुणेन
हस्तलालनेन प्रदत्तं प्रकर्षेण वृद्धिं गतं वपुः शरीरं येषां तथोक्ताः
तथा धात्रेयकस्य धात्री उपमाता गौरीति भावः तस्या अपत्यं पुमान्
धात्रेयकः स चासौ भ्राता चेति धात्रेयकभ्राता स्कन्द इति यावत्
तस्य स्नेहेन सहोढं सहप्राप्तं सुलभमिति यावत् षण्मुखशिशुना
बालकेन कार्त्तिकेयेन क्रीड़ासुखं येषां तथाभूताः सन्तः पुष्यन्ति
विकसन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ ४८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri.

अपिचास्य नित्यमधित्यकावासी परमेश्वरः ।
सहस्राक्षैरङ्गैर्नमसितरि नीलोत्पलमयी-
मिवात्मानं मालामुपनयति पत्यौ मखभुजाम् ।
जिघृक्षौ च क्रीडारभसिनि कुमारे सह गणै-
र्हसन् वो भद्राणि द्रढ़यतु मृडानीपरिवृढः ॥४९॥

किञ्च ।

यन्नाट्यभ्रमिघूर्णमानवसुधाचक्राधिरूढ़े भृशं
भेरी पार्श्वनिविष्टवासरनिशाचक्रे परिभ्राम्यति ।
तैजस्यस्तड़ितो भवन्तु शतशो दृष्टा हि जाताः कथं
तामस्योऽपि स वः पुनातु जगतामन्तेष्टियज्वा विभुः ॥५०॥

सहस्राक्षैरिति । मखभुजां देवानां पत्यौ इन्द्रे सहस्राक्षैः सहस्रनयनयुक्तैः अङ्गैः कलेवरैः नमसितरि नतिं कुर्वति अतएव आत्मानं स्वं नीलोत्पलमयीं मालामिव उपनयति प्रापयति क्रीडारभसिनि खेलनासक्ते कुमारे कार्त्तिकेये जिघृक्षौ ग्रहीतुमिच्छौ सति तां मालारूपामिन्द्रकलेवरयष्टिमिति शेषः चक्षुषाम् उत्पलसाम्यात् मालात्वेन भ्रान्तिरिति भ्रान्तिमदलङ्कारः । साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितेति दर्पणे । मृडानीपरिवृढः गौरीकान्तः गणैः प्रमथवर्गैः सह हसन् वः युष्माकं भद्राणि शुभानि द्रढयतु दृढ़ीकरोतु विदधात्वित्यर्थः । शिखरिणीवृत्तम् ॥ ४९ ॥

यन्नाट्येति । जगताम् अन्त्येष्टिः अन्त्ययज्ञः तस्या यज्वा याज्ञिकः स विभुः परमेश्वरः वः युष्मान् पुनातु पवित्रीकरोतु । कोऽसावित्याह, यन्नाट्येति । यस्य विभोः नाट्ये नर्त्तने या भ्रमिः भ्रमणं तया घूर्णमानं यत् वसुधाचक्रं भूमण्डलं तत्र अधिरूढ़े

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः ।

जयति परिमुषितलक्ष्मा भयादनुपसर्पतेव हरिणेन ।
इह केसरिकरजाङ्कुरकुटिला हरमौलिविधुलेखा ॥५१॥

सीता । (सपरिहासम् ।) एदस्स दंदसूअणरकरोडिमुण्डमालामण्डणस्स मसाणवासिणो (ख) भूसणता ज्जेव्व रोहिणीवल्लहस्स(ग) कलङ्को, किं तवस्सिणा कुरङ्गएण(घ) । (१९)

---

(१७) एतस्य दंदशूकनरकरोटिमुण्डमालामण्डनस्य श्मशानवासिनो भूषणतैव रोहिणीवल्लभस्य कलङ्कः, किं तपस्विना कुरङ्गकेण ।

तदुपरिवर्त्तिनीति यावत् पार्श्वयोः निविष्टं भ्रान्तं वासरनिशाचक्रं दिवारात्रं दिवारात्रसमूहः यस्य तथाभूते मेरौ परिभ्राम्यति सति शतशः वज्रश इति यावत् तैजसः तेजोरूपाः तामसोऽपि तमोरूपा अपि जाताः तडितः कथं जाता उत्पन्ना इष्टाश्च भवन्तु हि आश्चर्यमेतदिति भावः । मेरौ भ्रमति तत्पार्श्ववर्त्तिनोर्दिनरात्रयोरपि भ्रमणेन यथाक्रमं तेजसस्तामसस्य विद्युतः सञ्चरन्तीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ५० ॥

जयतीति । इह अस्मिन् कैलासतटे हरमौलिविधुलेखा हरशिरश्चन्द्रकला केसरिणः सिंहस्य करजाङ्कुरः नखाग्रं तद्वत् कुटिला वक्रा अतएव भयात् सिंहनखराघातत्रासादित्यर्थः अनुसर्पतेव पलायमानेनेव हरिणेन मृगेण परिमुषितं परिहृतं लक्ष्म यत्र तथाभूता निष्कलङ्केति भावः जयति राजते । आर्याद्वृत्तम् ॥ ५१ ॥

(ख) दंदशूकेति दंदशूकः पन्नगः नरकरोटिः ब्रह्मकपालास्थि मुण्डमाला च मण्डनं भूषणं यस्य तथाभूतस्य । श्मशानवासिनः हरस्येति भावः ।

(ग) रोहिणीवल्लभस्य चन्द्रस्य ।

(घ) कुरङ्गकेण क्षुद्रमृगेण, अल्पार्थे कन्प्रत्ययः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विभीषणः । (विहस्य ।) शङ्के भगवानपि न मृगाङ्कम-
लङ्कारकामः कलयति (ङ) । तथाहि ।

सहचरपिशाचपरिषत्प्रसत्तये कामचारतो रजनीम् ।
कारयितुमिव कपाली शिरसि निशाकरमयं वहति ॥५२॥

(सर्वे हसन्ति ।)

रामः । (सबहुमानम् ।)

श्रीकण्ठस्य कपर्दबन्धनपरिश्रान्तोरगग्रामणी-
सन्दष्टां मुकुटावतंसकलिकां वन्दे कलामैन्दवीम् ।
या बिम्बप्रतिपूरणाय परितो निष्पीड्य सन्दंशिका-
यन्त्रेणेव ललाटलोचनशिखिज्वालाभिरावर्त्यते ॥५३॥

(ङ) अलङ्कारकामः भूषणार्थी । कलयति धारयति ।

सहचरेति । अयं कपाली हरः सहचराणां सङ्गिनां पिशाचानां परिषदः समूहस्य प्रसत्तये प्रसादार्थं सन्तोषार्थमिति यावत् कामचारतः स्वेच्छातः रजनीं कारयितुमिव निशाकरं चन्द्रं वहति, पिशाचानां निशाचरत्वात् तेषां सन्तोषाय अयं निशां करोतीति हेतोः निशाकरं धारयतीति निष्कर्षः । आर्याछन्दः ॥ ५२ ॥

श्रीकण्ठस्येति । श्रीकण्ठस्य हरस्य कपर्दः जटाजूटः, कपर्दोऽस्य जटाजूट इत्यमरः । तस्य बन्धनेन संयमनेन परिश्रान्तः क्लान्तः यः उरगग्रामणीः सर्पराजः वासुकिरित्यर्थः, ग्रामणीर्नायिते प्रभाविति विश्वः । तेन सन्दष्टां कवलितां मुकुटस्य अवतंसकलिकाम् अलङ्करणकलिकाम्, इन्दोरियम् ऐन्दवी तां कलां वन्दे प्रणमामि । या बिम्बप्रतिपूरणाय सम्पूर्णं मण्डलं कर्तुमित्यर्थः परितः उभयोः प्रान्तयोः निष्पीड्य धृत्वा सन्दंशिका साँडासीति प्रसिद्धा एव यन्त्रः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(पुष्पकं प्रति।) विमानराज! मनागुन्नम्यताम् (च)। आलोकयतु मैथिली सुमेरुशिखराणि।

विभीषणः। (सीतां प्रति।) देवि! पश्य पश्य।

मेरोर्मेदुरयन्ति सम्मदमधःसम्पातिभिर्ज्योतिषा-
माटोपैर्विटपोपरिस्थिततरुच्छायाभृतोऽधित्यकाः।
निष्पीतासु च मासि मासि विबुधैरिन्दोः कलासु क्रमा-
दुद्दामप्लवमानलाञ्छनमृगच्छिन्नाग्रदर्भाङ्कुराः॥५४॥

स च वासुकिरूप इति भावः तेन ललाटलोचनशिखिनः ललाटाग्नेः ज्वालाभिः शिखाभिः आवर्त्यते इव द्रवीक्रियते इव। अन्यदपि हिरण्यादिकं तथा पूरणाय सन्दंशिकया धृत्वा अग्निज्वालया आवर्त्यते इति लौकिकम्। शार्दूलविक्रीडितं वृत्तम्॥ ५३॥

(च) उन्नम्यताम् ऊर्ध्वं गम्यताम्।

मेरोरिति। अधःसम्पातिभिः अधःसञ्चारिभिः ज्योतिष्कैः सूर्यादीनाम् आटोपैः तेजःसमूहैरित्यर्थः विटपोपरिस्थिततरुच्छायां बिभ्रतीति तथोक्ताः तथा मासि मासि प्रतिमासं क्रमात् विबुधैः देवैः निष्पीतासु भक्षितासु इन्दोश्चन्द्रस्य कलासु, पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि तद्वैरिति रघुवंशे कालिदासः। उद्दामम् उच्छृङ्खलं यथा तथा प्लवमानेन चन्द्राङ्के नित्यलभावेन धारणात् पूर्वं प्लवनराहित्यमासीत् इदानीं विबुधैस्तस्य चर्वितत्वात् प्लवनप्रत्यूहाभावेनेति भावः। लाञ्छनमृगेण कलङ्करूपिणा हरिणेन छिन्नम् अग्रं येषां तथाभूताः दर्भाङ्कुराः कुशप्ररोहा यासु तथाभूताः अधित्यका ऊर्ध्वभूमयः, उपत्यकाद्रेरधस्ता भूमिरूर्ध्वमधित्यकेत्यमरः। मेरोः सुमेरुगिरेः सम्मदं शोभां मेदुरयन्ति पुष्टां कुर्वन्ति वर्द्धयन्तीति यावत्। शार्दूलविक्रीडितं वृत्तम्॥ ५४॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (सीतां प्रति ।)

एतासु पर्वतनितम्बतटीषु पश्य
मध्यन्दिनेऽपि हरिचन्दनवाटिकेयम् ।
पक्षस्थितद्युमणिबिम्बतयातिदीर्घ-
च्छायावितानमधुरा मुदमादधाति ॥५५॥

अपिच ।

भूमेः स्वर्णतया फलोत्तरतरुक्षेरस्य मेरोस्तटी-
सीमन्तोऽयमनूरुसारथिरथप्रस्थानघण्टापथः ।
अस्मिन्नुद्ध्रियते कथञ्चन हयैरुद्दामचण्डातप-
ज्वालाजालविलीनकाञ्चनशिलाजम्बालमग्नः प्रधिः ॥५६॥

एतास्विति । एतासु पर्वतस्य सुमेरोः नितम्बतटीषु कटकप्रदेशेषु इयं हरिचन्दनवाटिका देवदारुवनश्रेणी मध्यन्दिनेऽपि मध्याह्नेऽपि पक्षे पार्श्वे स्थितं द्युमणेः सूर्यस्य बिम्बं मण्डलं यस्य तत्तया अतिदीर्घच्छायया मधुरा मनोहारिणी सती मुदम् आनन्दम् आदधाति जनयति पश्य अवलोकय । अत्र वाक्यार्थः कर्मतया-न्वेति । वसन्ततिलकं वृत्तम् ॥ ५५ ॥

भूमेरिति । भूमेः स्वर्णतया काञ्चनमयतया फलोत्तरैः फल-प्रधानैः फलपूर्णैरिति भावः तरुभिः क्षेरस्य मेरोः अयं तटीसीमन्तः अनूरुसारथेः सूर्यस्य रथप्रस्थापने स्यन्दनसञ्चालने घण्टापथः प्रशस्तमार्गविशेषः । अस्मिन् घण्टापथे हयैः सूर्याश्वैः उद्दामचण्डातपानाम् उत्कटप्रचण्डसूर्यकिरणानां ज्वालाजालेन विलीना द्रवीभूता या काञ्चनशिला सैव जम्बालः कर्दमः तत्र मग्नः प्रधिः नेमिः उद्ध्रियते । घण्टापथः संसरणमिति, नेमिः स्त्री स्यात् प्रधिः पुमानिति चामरः । शार्दूलविक्रीडितं वृत्तम् ॥ ५६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(निरूप्य च सहर्षस्मितम् ।) कथमुपर्युपरि पुष्करावर्त्तकान-
भ्रमुवल्लभः (छ) । (विलोक्य ।)

अद्यायं विबुधेन्द्रबान्धवबधूसंभुक्तसन्तानक-
स्रग्दाम्नीममरावतीं विहरते निर्वैरमैरावणः ।
यं दोर्मात्रपरिच्छदो युधि मुदोत्क्षिप्य प्रतीच्छन् मुहुः
सन्नेने दशभिर्निजैरपि मुखैः सांराविणं रावणः ॥५७॥

सुपीकः । सत्यमगोचरे गिरां दशकण्ठक्रीडितानि(ज) ।
एकैके निवसन्ति ते भुजभृतः कस्मै निगृह्णामहे
वीरक्षेत्रमियं पुनर्वसुमती पौलस्त्यमाबिभ्रती ।

(छ) पुष्करावर्त्तकान् मेघविशेषान्, उपर्युपरियोगे द्वितीया । अभ्रमुवल्लभः ऐरावतः ।

अद्येति । अद्य इदानीम् अयम् ऐरावणः ऐरावतः विबुधेन्द्रस्य देवराजस्य बान्धवाः देवाः तेषां वधूभिः अङ्गनाभिः संभुक्तं सन्तानकस्रजां देवतरुविशेषपुष्पमालानां दाम समूहः यस्यां तथाभूतां अमरावतीं देवनगरीं निर्वैरं निर्विरोधं यथा तथा विहरते विचरति । दोर्मात्रं बाहुमात्रं परिच्छदो यस्य तथाभूतः अस्मादीनां कथा दूरे आस्तां केवलबाहुमात्रसहाय इति भावः रावणः युधि युद्धे यम् ऐरावणं मुदा अवलीलयेत्यर्थः उत्क्षिप्य उर्ध्वं निक्षिप्य मुहुः पुनः पुनः प्रतीच्छन् बाहुभिः गृह्णन् दशभिः निजैः मुखैरपि सांराविणं सम्भूय रवं सिंहनादमिति भावः सन्नेने कृतवान् । शार्दूलविक्रीडितं वृत्तम् ॥ ५७ ॥

(ज) अगोचरे गिराम्, गिरां वाचाम् अगोचरे अविषये । दशकण्ठचरितं वाचामगम्यमिति भावः ।

एकैके इति । एकैके अनेके इत्यर्थः ते प्रसिद्धाः भुजभृतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वाली त्वाह्वममानमेनमपि यच्चक्रे क्रते चक्षुषी
पश्यामः श्रवसी क्रते च शृणुमस्तद्वक्तुमल्पे वयम् ॥५८॥

रामः । (सवज्ञमानम् ।)

स किं वाच्यो वाली भुजकुलिशमूलेन दशतो
दशग्रीवं यस्य प्रतिजलधि सन्ध्याविधिरभूत् ।
कथं वा निर्वाच्यः स च दशमुखो यस्य दमने
मनागासीद्वालिव्ययचरितमेवोपकरणम् ॥५९॥

बाहुशालिनः निवसन्ति पृथिव्यां तिष्ठन्ति, कस्मै भुजभृते निगृह्णामः भुजभृतं निन्दामि न कमपीत्यर्थः । कस्मै इति सम्प्रदानविवक्षया कर्मणि चतुर्थी । पौलस्त्यं रावणम् आबिभ्रती धारयन्ती इयं वसुमती पृथ्वी पुनः किन्तु वीरक्षेत्रं वीरपुरुषप्रदर्शिणीत्यर्थः । वाली तु एनं रावणमपि आह्वयमानं विजयाय स्पर्द्धमानं यत् चक्रे यथा परिभूतवानित्यर्थः तत् चक्षुषी क्रते इति हेतोः पश्यामः, श्रवसी कर्णौ क्रते इति हेतोः शृणुमः । क्रते इति विधात्वेत्यूह्यं कर्तृपदम् । किन्तु वयं तत् रावणवालिनोर्वीरयोश्चरितमिति भावः वक्तुं वयम् अल्पे अक्षमा इत्यर्थः । अलौकिकपौरुषावेताविति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ५८ ॥

स इति । स वाली किं वाच्यः ? न किमपि वक्तुं शक्य इत्यर्थः । भुज एव कुलिशं वज्रं तस्य मूलेन कक्षयेत्यर्थः दशग्रीवं रावणं दशतः पीडयतः यस्य वालिनः प्रतिजलधि जलधौ जलधौ सन्ध्याविधिः सन्ध्यावन्दनम् अभूत् । स च दशमुखः रावणः कथं वा केन प्रकारेण वा निर्वाच्यः निःशेषं वक्तुं शक्यः ? न कथमपीत्यर्थः । यस्य दशमुखस्य दमने विनाशने मनाक् एकदेशतः वालिनः व्ययः विनाशनमेव चरितं तदेव उपकरणं सामग्री आसीत् रावण-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सीता । (रामं प्रति) अज्जउत्त ! किं उण एदं दलिद-कप्पूरसलाआमलक्कगोरअं (झ) गअणङ्गणे दीसइ । (१८)

विभीषणः । (सीतां प्रति ।) देवि ! चन्द्रलोकोपकण्ठ(ञ)-मधिरूढो विमानराजः । दृश्यतां च भगवानयम् ।

यं प्राक्प्रत्यगवाग्रुदञ्चि ककुभां नामानि संबिभ्रतं
ज्योत्स्नाजालझलज्झलाभिरभितो लुम्पन्तमन्धं तमः ।
प्राचीनादचलादितस्त्रिजगतामालोकबीजाद्वहि-
र्निर्यान्तं हरिणाङ्कमङ्कुरमिव द्रष्टुं जनो जीवति ॥६०॥

---

(१८) आर्यपुत्र ! किं पुनरेतद्दलितकर्पूरशलाकाखण्डगौरं गगनाङ्गणे दृश्यते ।

बधार्थमेव वालिवधः कृतः अन्यथा वालिसहायस्य तस्य अशक्यविनाशत्वमिति भावः । शिखरिणीवृत्तम् ॥ ५९ ॥

(झ) दलितेति दलितं यत् कर्पूरशलाकाखण्डं तद्वत् गौरं शुभ्रम्, अवदातः सितो गौर इत्यमरः ।

(ञ) चन्द्रलोकेति चन्द्रलोकस्य उपकण्ठं समीपम् ।

यमिति । यत्र प्रथमम् अञ्चति सा प्राक् प्राची पूर्वा दिगित्यर्थः, यत्र प्रतीपमञ्चति सा प्रत्यक् प्रतीची पश्चिमा दिगित्यर्थः, यत्र अवाञ्चति तिर्यक् याति सा अवाक् दक्षिणा दिगित्यर्थः, यत्र उदञ्चति सा उदक् उत्तरा दिगित्यर्थः एवंरूपाणि ककुभां दिशां नामानि संबिभ्रतं धारयन्तं ददतमिति भावः सूर्याचन्द्रमसोर्गतिवशेनैव प्राच्यादिव्यवहारादिति भावः अभितः समन्तात् ज्योत्स्नाजालस्य झलज्झलाभिः आस्फालैः आविर्भावैरिति यावत्, स्फादास्फाले झलज्झलेति हारावली । अन्धं तमः गाढान्धकारं लुम्पन्तं हरन्तम् इतः अस्मात् जगताम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

स श्रीकण्ठकिरीटकुट्टिमपरिष्कारप्रदीपाङ्कुरो
देवः कैरववन्धुरन्धतमसप्राग्भारकुक्षिम्भरिः ।
संस्कर्त्ता निजकान्तिमौक्तिकमणिश्रेणीभिरेणीदृशां
गीर्वाणाधिपतेः सुधारसवतीपौरोगवः प्रोद्गात् ॥६१॥

अपिच ।

प्राणायामोपदेष्टा सरसिरुहवने यौवनोन्मादलीला-
गोष्ठीनां पीठमर्दस्त्रिभुवनवनितानेत्रयोः प्रातराशः ।

आलोकस्य उद्योतस्य, आलोको दर्शनोद्योतावित्यमरः । बीजात् हेतुभूतात् प्राचीनात् अचलात् उदयाचलादित्यर्थः अङ्कुरमिव बहिः निर्यान्तं निर्गच्छन्तं अन्योऽप्यङ्कुरो बीजाद् बहिर्निर्गच्छतीति दृश्यते । यं हरिणाङ्कं चन्द्रं द्रष्टुं जनः जीवति यस्य दर्शनं जनस्य जीवनकारणमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥६०॥

स इति । श्रीकण्ठस्य हरस्य किरीटं मुकुटमेव कुट्टिमः गृहविशेषः तस्य परिष्कारे विकासे प्रदीपाङ्कुरः क्षुद्रदीपः, अन्धतमसानां गाढान्धकाराणां प्राग्भारेण समूहेन कुक्षिम् उदरं बिभर्त्तीति तथोक्तः गाढान्धकारध्वंसीत्यर्थः, निजकान्तय एव मौक्तिकमणयः तेषां श्रेणीभिः अतिशयैरित्यर्थः एणीदृशां मृगनयनानां स्त्रीणां संस्कर्त्ता अलङ्कारकः, गीर्वाणानां देवानां अधिपतेः इन्द्रस्य सुधायाः अमृतस्य या रसवती पाकस्थानं, रसवती पाकस्थानं महानसमित्यर्थः । तस्याः पौरोगवः अध्यक्षः, पौरोगवस्तदध्यक्ष इत्यमरः । कैरवाणां कुमुदानां बन्धुः स देवः प्रोद्गात् प्रकर्षेण उदियाय । शार्दूलविक्रीडितं वृत्तम् ॥ ६१ ॥

प्राणायामेति । सरसिरुहाणां पद्मानां वने प्राणायामस्य प्राणवायुनिरोधविशेषस्य लक्षणया निमीलनस्येत्यर्थः प्राणायामे च निमी-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

क्षामायुष्टोमयज्वा शमितकुमुदिनीमौनमुद्रानुरागः
शृङ्गाराद्वैतवादी विभवति भगवानेष पीयूषभानुः ॥६२॥

लक्ष्मणः । (विलोक्य सकौतुकम् ।)

कर्णोत्तंसयवाङ्कुरं करतले कृत्वा हसित्वा मिथः
संहृतः पुरहूतपौरयुवतीवर्गेण कौतूहलात् ।
आसार्त्तिक्षुभितोऽयमङ्कहरणः कुर्वीत किं किं कला-
कन्यामिन्दुमयीमजस्रघटनोद्भाटप्रथावस्थिताम् ॥६३॥

लनस्य लज्जावादिति भावः उपदेष्टा आचार्यः पद्मनिमीलनकर इति भावः । यौवनेन तारुण्येन य उन्मादः चापल्यं तस्य नीलालोलीनां विलासातिशयानामित्यर्थः पीठमर्दः अनुनायकभेदः । उक्तं च भरतेन, पीठमर्दो विटश्चैव विदूषक इति त्रयः । शृङ्गारे सर्वसचिवा नायकस्यानुनायका इति । त्रिभुवनवनितानां त्रिलोकीसङ्घातानां नेत्रयोः, स्त्रीणां बहुत्वेऽपि नेत्रयोरिति द्वित्वं जात्यपेक्षमिति बोध्यम् । प्रातराशः प्रातर्भोजनं, कामिनः किञ्चित् भुक्त्वा यथा रतेषु प्रवर्त्तन्ते तथा कामिन्यस्य प्रथमं चन्द्रं दृष्ट्वा सञ्जातमन्मथवेगाः कामिषु प्रवर्त्तन्ते इति भावः । प्रातराशः कल्यवर्त्तः प्रातर्भोजनमित्यपीति छायावली । कामस्य आयुष्टोमे आयुर्द्विकरयागे यज्वा याज्ञिकः होतेत्यर्थः, कामप्रज्वालक इति भावः । शमितः शान्तिं नीतः कुमुदिनीनां मौनं तूष्णीम्भावः मुद्रा निमीलनञ्च तयोः अनुरागः येन तथोक्तः कुमुदिनीविकासक इति भावः । शृङ्गारः रसविशेषः तस्य अद्वैतं द्वितयराहित्यं वदतीति तथोक्तः शृङ्गार एव रसोऽस्ति नान्य इतिवादीत्यर्थः । भगवान् एष पीयूषभानुः अमृतरश्मिः विभवति विशेषेण भवति उदेतीत्यर्थः । स्रग्धराछन्दः ॥ ६२ ॥

कर्णोत्तंसेति । पुरहूतस्य इन्द्रस्य पौरयुवतीवर्गेण सुराङ्गनागणेनेत्यर्थः कौतूहलात् कर्णोत्तंसः कर्णभूषणं यो यवाङ्कुरः तं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुग्रीवः ।

रोमन्थप्रचलौष्ठसंपुटसुखासीनश्चिरं कौतुकाद्
दृष्ट्वा सिद्धवधूभिरङ्कहरिणस्तालैरथोत्त्रासितः ।
मा भाङ्क्षीदनुमासनव्यघटनानिःसन्धिबन्धं वपुः
शीतांशोः क्षुभितस्तु शल्यवदयं दुःखाय वर्त्तिष्यते ॥६४॥

अपिच ।

करतले दत्वा मिथः परस्परं हसित्वा संहतः आकारितः अतएव त्रासस्य भोजनस्य आर्त्त्या पीड़या बुभुक्षयेत्यर्थः क्षुभितः अयम् अङ्कहरिणः चन्द्रस्य क्रोड़वर्त्ती मृगः अजस्रं घटनाया उद्घाटेन चालनेन स्वयं यथा तथा अवस्थितास् इन्दुमयीं चान्द्रीमित्यर्थः कलाकन्यां कलारूपां कन्यां किं किं कुर्वीत ? अपितु यथाङ्कुर-भक्षणलोभात् निरन्तरं विपर्य्यस्तां कुर्वीतेत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ६३ ॥

रोमन्थेति । चिरं दीर्घकालं रोमन्थेन उद्गीर्य्य चर्वणेन प्रचलं चञ्चलं यत् ओष्ठसंपुटं तेन सुखासीनः रोमन्थावस्थायां सुख-मवस्थित इत्यर्थः, अथानन्तरं सिद्धवधूभिः सिद्धानां देवयोनिविशे-षाणां वधूभिः अङ्कनाभिः कौतुकात् दृष्ट्वा तादृशं सुखावस्थितमिति भावः तालैः करतलशब्दविशेषैः उत्त्रासितः भीषितः अयम् अङ्क-हरिणः क्रोड़वर्त्ती मृगः असुलासं प्रतिमासं नव्यघटनया प्रतिमासं नूतनः क्षयः ततश्च नूतना वृद्धिरिति नवीननिर्माणेन निःसन्धिः सन्धिशून्यः बन्धः स्थितिः यस्य तथोक्तं शीतांशोश्चन्द्रस्य वपुः शरीरं मा भाङ्क्षीत् भग्नं न करोतु, तु किन्तु क्षुभितः सन् शल्य-वत् हृदयविद्धशल्यास्त्रमिव दुःखाय क्लेशाय वर्त्तिष्यते भविष्यति शार्दूलविक्रीडितं वृत्तम् ॥ ६४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एतस्य कलामेकामनमृतमयूखस्य पार्वतीरमणः ।
वर्णावलिमिव वहति प्रतिमासं घट्यमानस्य ॥६५॥

राजः । (सादरं प्रणम्य ।)

त्वं गीर्वाणगणाय नित्यमनृतश्राद्धं भवद्दीधिति-
र्धात्रीकर्म च वीरुधां विदधती धत्ते जगज्जीवितम् ।
सोम ! त्वामनिधाय मूर्धनि भवेत् कः कालकूटं गिलन्
कण्ठे तच्छलकालपाशवलयालीढोऽपि मृत्युञ्जयः ॥६६॥

(सीतां प्रति ।)

नेत्राणां मधुपर्कसत्रमुदधेः सर्वाङ्गमेदस्करः
शृङ्गारस्य रसायनं मखभुजां पीयूषगङ्गापतिः ।

एतस्येति । पार्वतीरमणः शम्भुः प्रतिमासं घट्यमानस्य नूतनीक्रियमाणस्येत्यर्थः एतस्य अमृतमयूखस्य चन्द्रस्य एकां कलां वर्णावलीमिव यावतो वारान् घटितोऽयं तावद्वारपङ्क्तिमिवेत्यर्थः वहति धारयति । आर्याछन्दस् ॥ ६५ ॥

त्वमिति । हे सोम चन्द्र ! गीर्वाणगणाय देवगणाय देवगणस्यर्थमिति भावः नित्यं सततम् अमृतश्राद्धम् अमृतरूपं श्राद्धादत्तं हव्यमित्यर्थः असीति शेषः । भवतः दीधितिः मयूखः वीरुधां लतानां धात्री उपमाता तस्याः कर्म पोषणरूपं विदधती कुर्वाणा सती जगतां जीवितं प्राणान् धत्ते परिपालयति रक्षतीत्यर्थः । त्वां मूर्धनि शिरसि अनिधाय निहितमकृत्वा कालकूटं हलाहलं गिलन् भक्षयन् तच्छलेन कालकूटव्याजेन कालपाशवलयालीढः यमबन्धनरज्जुवेष्टितः अपि कः मृत्युञ्जयः मृत्युविजयी भवेत् ? न कोऽपीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ॥ ६६ ॥

नेत्राणामिति । नेत्राणां मधुपर्कः दधिघृतमधुप्रस्तुतं द्रव्यं तस्य सत्रं यज्ञः भोजनशाला च इत्यभिप्रेति भावः अतीवा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

देवः किं सुमहे महेश्वरशिरोनेपथ्यरत्नाङ्कुरः
क्षीरोदार्णवशुक्तिमौक्तिकमयं दाक्षायणीनायकः ॥ ६७॥

सीता । (हसन्ती ।) अज्जउत्त ! समाणकुलसीलरूवजो-व्वणाणं वि सवत्तीणं (ट) सीसे दिण्णो धणाए दक्खगोत्त-धवलाए (ठ) रोहिणीए चलणो । जेण रोहिणीरमणो ज्जेव्व भअवं चन्दो सुणीअदि (१९)

---

(१९) आर्यपुत्र ! समानकुलशीलरूपयौवनानामपि सपत्नीनां

नन्ददायकत्वादिति भावः । सत्रमाच्छादने यज्ञे सदादाने क्लेऽपि चेत्यमरः । उदधेः समुद्रस्य सर्वाङ्गेषु सर्वावयवेषु नेदस्करः मांस-दृष्टिकरः चन्द्रदर्शनेनास्य वर्द्धनादिति भावः । शृङ्गारस्य रसस्य रसायनं पुष्टिकरं औषधविशेषः उद्दीपकत्वादिति भावः । मख-भुजां देवानां पीयूषस्य अमृतस्य गङ्गापतिः गङ्गाध्यक्षः । यद्यपि गङ्गा स्यान्नन्दिराष्ट्रहृदिति कोषात् गङ्गाशब्दस्य नदिराष्ट्रहे एव मुख्यत्वं तथापि लक्षणयात्र राष्ट्रहृदात्रे प्रयोगः । अथवा गङ्गा खनिः तस्याः पतिः । गङ्गा खनौ सुरानेहे इति मेदिनी । महेश्वरस्य शिरोनेपथ्यं शिरोभूषणम्, आकल्पवेषौ नेपथ्यमित्यमरः । तस्य रत्नाङ्कुरः क्षीरकणबिन्दुः । क्षीरोदार्णवः क्षीरसागरः एव शुक्तिः तस्याः मौक्तिकं मुक्ताफलं, दाक्षायणीनां दक्षकन्यानां अश्विनीप्रभृ-तीनां सप्तविंशतितारानां नायकः पतिः, दाक्षायणोऽश्विनीत्यादितारा इत्यमरः । अयं देवश्चन्द्रः अस्तीति शेषः किं सुमहे ? कथमेनं स्तोतुं शक्नुमः न कथमपीत्यर्थः । अपरिमितगुणशालित्वात् स्तोतुमशक्य इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ६७ ॥

(ट) सपत्नीनाम् एकपतिकानाम् अश्विनीप्रभृतीनाम् ।

(ठ) दक्षगोत्रधवलया दक्षस्य प्रजापतेः गोत्रं कुलं तत्र धवला सुन्दरी तया, धवलः सुन्दरेऽमले इति विश्वः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (विहस्य ।) आं जानकि !

प्रियोपभोगतुल्येऽपि ताराणां सप्तविंशतेः

धत्ते किमपि सौभाग्यमञ्जरीमिह रोहिणी ।६८॥

(स्वगतं रूपवतु ।)

दलितकुमुदकोषोद्यद्दूषोपचार-

क्षणशमितचकोरीचन्द्रिकापानजाड्याः ।

अभिसृमरमृगाक्षीमूकदूत्यः स्वदन्ते

शशिमणिमकरन्दोत्कन्दलाश्चन्द्रभासः ॥६९॥

शीर्षे दत्तो मन्यया दक्षगोत्रधवलया रोहिण्या चरणः । येन रोहिणीरमण एव भगवांश्चन्द्रः शूयते ।

प्रियेति । इह जगति रोहिणी सप्तविंशतेः सप्तविंशतिसंख्यानां, विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोरित्यमरादेकत्वम् । ताराणां प्रियेण उपभोगः सम्भोगः तस्य तुल्येऽपि साम्येऽपीत्यर्थः सर्वासु समकालसम्भोगेऽपीति भावः किमपि अनिर्वचनीयहेतुमिति यावत् सौभाग्यं प्रियशाल्यं तस्य मञ्जरीं ख्यातिमिति भावः धत्ते धारयति । अनुष्टुब्वृत्तम् ॥ ६८ ॥

दलितेति । दलितात् विकसितात् कुमुदकोषात् कैरवमध्यात् उद्यता उद्गच्छता जघ्नाम् उपचारेण समूहेन क्षणात् शमितं शान्तिं नीतं चकोरीणां पक्षिणीविशेषाणां चन्द्रिकापानेन जाड्यं जड़ता शीतलत्वमित्यर्थः याभिः ताः अभिसृमराणाम् अभिसारिणीनां मृगाक्षीणां कामिनीनां मूकाः वाक्यरहिता दूत्यः नायकसंयोगविधायिन्यः दूतीनां वाक्येनैव उभयोः नायकनायिकयोः सम्मेलनकारित्वम् आसान्तु विना वाक्यं सम्मेलनकारित्वमिति दूतीव्यप-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

तैः सर्वज्ञीभवदभिसृतानेत्रसिद्धाञ्जनैर्वा
नीरन्ध्रैर्वा त्रिभुवनदृशामन्धपट्टैस्तमोभिः ।
व्याप्तं पृथ्वीवलयमखिलं चालयन्नुच्छलद्भि-
र्ज्योत्स्नाजालैरयमुदयते शर्वरीसार्वभौमः ॥७०॥

अपिच जगतामनुग्रहाय

उद्यंयति कलमन्द्रैः कण्ठतालैरलीनां
कुमुदमुकुलकोषु व्यञ्जयन्नङ्गहारान् ।
मदमुखरचकोरीतोषकर्मान्तिकोऽयं
तुहिनरुचिरधामा दक्षिणं लोकचक्षुः ॥७१॥

देशः । शशिमणीनां चन्द्रकान्तानां मकरन्देन अस्रुतस्रावेण उत्कन्दलाः उद्गतपल्लवाः चन्द्रभासः इन्दुकिरणाः खदन्ते रोचन्ते प्रीतिं जनयन्तीति यावत् । मालिनीवृत्तम् ॥ ६९ ॥

तैरिति । अयं शर्वरीसार्वभौमः निशानाथः सर्वज्ञीभवन्तीनाम् अखिलकामकलाभिज्ञानेन चतुराणामिति भावः अभिसृतानाम् अभिसारिणीनां, कान्तार्थिनी तु या याति सङ्केतं साभिसारिकेति लक्षणोक्तानामित्यर्थः नेत्रसिद्धाञ्जनैर्वा सिद्धाञ्जनं नाम नेत्रौषधविशेषः तदञ्जनेत्राणाम् अन्धकारेऽपि दृष्टिर्ज्वलतीति प्रसिद्धम् । नीरन्ध्रैः सान्द्रैर्वा, वाशब्दस्तूत्प्रेक्षायाम् । त्रिभुवनस्य दृशां नेत्राणाम् अन्धपट्टैः अन्धीकरणरूपाच्छादनैरित्यर्थः तैः प्रसिद्धैः तमोभिः तिमिरैः व्याप्तम् अखिलं समस्तं पृथ्वीवलयं भूमण्डलम् उच्छलद्भिः विकासं गच्छद्भिः ज्योत्स्नाजालैः चालयन् अभिषिञ्चन् उदयते उद्गच्छति । मन्दाक्रान्तावृत्तम् ॥ ७० ॥

उदयतीति । मदमुखराणां चकोरीणां तोष एव कर्मान्तः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इदं चास्य

प्राचीनाचलचुम्बिचन्द्रमणिभिर्निर्व्यूढपाद्यं निजै-
र्नियांसैरुडुभिर्निजेन वपुषा दत्तार्घलाजाञ्जलि ।
अन्तःप्रौढकलङ्कतुच्छमभितः सान्द्रं परिस्तीर्यते
विम्बादङ्कुरभग्ननैशिकतमःसन्दोहमिन्दोर्महः ॥३२॥

एनञ्च

कर्मस्थानम् अस्यास्तीति तथोक्तः चकोरीणां सन्तोषक इत्यर्थः, दर्शिणं दाक्षिण्यजनकं प्रीतिप्रदमिति भावः लोकानां जगतां चक्षुः नेत्रभूतः, अयं तुहिनवत् रुचिरं मनोज्ञं धाम रश्मिर्यस्य स चन्द्रः कला मधुरास्फुराटाः मन्द्राः गम्भीराः तैः अलीनां भ्रमराणां कण्ठतालैः कण्ठा एव तालाः सङ्गीतक्रियामानानि तैः कुमुदानां सुकुलकेषु सुकुटसमूहेषु अङ्कहारान् अङ्कविशेषान्, अङ्कहारोऽङ्कविशेष, इत्यमरः । व्यञ्जयन् प्रकटयन् सन् उदयति उद्गच्छति । मालिनी-वृत्तम् ॥ ३१ ॥

प्राचीनेति । प्राचीनाचलं पूर्वाचलं चुम्बन्तीति तथोक्ता ये चन्द्रमणयः चन्द्रकान्ताः तैः निर्व्यूढं सम्पादितं दत्तमित्यर्थः पाद्यं पादोदकं यस्मै तत् । निजैः स्वीयैः नियांसैः सारभूतैः उडुभिः नक्षत्रैः निजेन वपुषा अङ्गेन दत्तः अर्घरूपो लाजाञ्जलिः यस्मै तथोक्तम् उडूनां शुभ्रत्वेन वर्त्तुलत्वेन च लाजसाम्यम् । अन्तःप्रौढेन अभ्यन्तरस्थितेन उत्कटेन कलङ्केन तुच्छं हीनम्, अङ्कुर एव भग्नः नैशिकः निशाभवः तमसां सन्दोहः समूहः येन तथाभूतं सान्द्रं निविडम् इन्दोश्चन्द्रस्य बिम्बात् प्रसृतमिति शेषः महः तेजः अभितः समन्तात् परिस्तीर्यते व्याप्नोति । शार्दूलविक्रीडितं वृत्तम् ॥ ३२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मृगराजकरजभङ्गुरकिंशुककलिकावतंसिकाः सदृशः ।
भयसङ्कुचदङ्कहरिणवहलोज्ज्वलमिन्दुमीक्षन्ते ॥७३॥

विभीषणः ।

इन्दोरेककलाया रुद्रेणोद्धृत्य मूर्द्धनि धृतायाः ।
स्थानमिव तुच्छमेतत्कलङ्करूपेण परिणमते ॥७४॥

(विहस्य रामं प्रति ।)

रोदसीकूपमण्डूकः कियदेष प्रकाशते ।
चन्द्रमा यदयं देव ! त्वत्कीर्त्तेः प्रतिगर्जति ॥७५॥

मृगराजेति । सदृशः रमण्यः मृगराजस्य सिंहस्य करजवत् नखरवत् भङ्गुरा कुटिला किंशुककलिका पलाशकोरकः अवतंसः कर्णभूषणं यासां तथाभूताः सत्यः भयेन पलाशकलिकायां सिंहनखर-भ्रमजनितेनेति भावः सङ्कुचन् देहसङ्कोचमापद्यमान इत्यर्थः यः अङ्कहरिणः क्रोडस्थमृगः तेन हेतुना वहलोज्ज्वलम् अत्यन्तसुज्ज्वलं हरिणाङ्कप्रसारेण अधिकांशस्य प्रच्छादनविरहादिति भावः इन्दुं चन्द्रम् ईक्षन्ते पश्यन्ति । आर्याछन्दः ॥ ७३ ॥

इन्दोरिति । रुद्रेण हरेण उद्धृत्य आहृत्य मूर्द्धनि शिरसि धृतायाः गृहीतायाः इन्दोश्चन्द्रस्य एकया कलया तुच्छं शून्यं स्थान-मिव एतत् कलङ्करूपेण परिणमते पर्य्यवस्यति । आर्याछन्दः ॥७४॥

रोदसी इति । हे देव ! रोदसी द्यावापृथिव्योर्मध्यं, रोदस्य रोदसी चेति दिवि भूमौ पृथक् पृथगित्यमरः । एव कूपः तस्य मण्डूकः भेकस्वरूपः एष चन्द्रमाः कियत् किम्परिमाणं यथा तथा प्रकाशते, यत् यस्मात् अयं तव कीर्त्तेः प्रतिगर्जति स्पर्द्धते । तव कीर्त्तिसदृशमेतस्य प्रकाशनमिति भावः । अनुष्टुब्वृत्तम् ॥ ७५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सीता । (स्मितम् ।) जाणामि अज्जउत्तस्स कित्तिकन्तीहिं पडिस्सद्धं कदुअ पराजिदेण संपदि भअवदा हरिणङ्केण कलङ्कसंवदी विढत्ता (ड) । (२०)

(सर्वे हसन्ति । रामः अयते ।)

सीता । (रामं प्रति ।)

सारम्भं सिरिवच्छलञ्छणभुआपज्जत्थमन्थाअल-
क्खोभोच्छलिदद्दुद्धसिन्धुलहरीगब्भच्छईसच्छअम् ।
को गायेदि ण दे रहूणँ पहुणो अन्धारपक्खन्तरा-
संतुट्टन्तमिअङ्कमण्डलमलक्खुद्दामगोरं जसम् ॥७६॥ (२१)

---

(२०) जानाम्यार्यपुत्रस्य कीर्त्तिकान्तिभिः प्रतिस्पर्द्धां कृत्वा पराजितेन संप्रति भगवता हरिणाङ्कसंहतिरर्जिता ।

(२१) सारम्भं श्रीवत्सलाञ्छनभुजापर्यस्तमन्थाचल-
क्षोभोच्छलितदुग्धसिन्धुलहरीगर्भच्छविसदृशम् ।
को गायति न ते रघूणां प्रभोरन्धकारपक्षान्तरा-
संतुष्यन् मृगाङ्कमण्डलखण्डोद्दामगौरं यशः ॥७६॥

(ड) कलङ्कसंहतिः कलङ्कसमूहः । अर्जिता अधिगता ।

सारम्भमिति । आरम्भेण सहितं प्रथममिति यावत् परतः कथम्भूतं वर्णयिष्यते तन्न जाने इति भावः । श्रीवत्सेति श्रीवत्सलाञ्छनो विष्णुः तस्य भुजाभिः बाहुभिः पर्य्यस्तः निक्षिप्तः यः मन्थाचलः मन्दर इत्यर्थः तस्य क्षोभेन विलोडनेन उच्छलितस्य आलोडितस्य दुग्धसिन्धोः क्षीरोदस्य लहरीणां तरङ्गाणां गर्भस्य मध्यस्य या छविः कान्तिः तत्सदृशम् अतिशुभ्रमित्यर्थः । अन्धकारेति अन्धकारपक्षस्य कृष्णपक्षस्य अन्तरा मध्ये संतुष्यन् क्षयं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

राम । (सहर्षस्मितम् ।) अयि प्रिये प्रियवादिनि !
चन्द्रलोकादपि परं पदमारोपयन्ति माम् ।
अमूरमृतबिन्दूनामनुप्रासास्तवोक्तयः ॥७७॥

विभीषणः । (सानुरागम् ।)
अद्योर्वीतलमूलघर्षणवशादुन्मृष्टचूडामणि-
श्रेणिश्रीपरिपीतपीवरतमःपूरे पुरे भोगिनाम् ।
कर्णाभावनिरस्तकुण्डलरवव्यासङ्गमाधुन्वता
मूर्ध्नः पन्नगपुङ्गवेन सुभगं त्वत्कीर्त्तिराकर्ण्यते ॥७८॥

गच्छत् यत् मृगाङ्कमण्डलं चन्द्रमण्डलं तस्य खण्डवत् उद्दामगौरम् अतिधवलम् ॥ ७६ ॥

चन्द्रलोकादपीति । अमृतबिन्दूनाम् अनुप्रासाः अनुरूपाः अमूः तव उक्तयः वचनानि मां चन्द्रलोकात् अपि परं पदम् आरोपयन्ति आरोहयन्ति । अनुष्टुब्वृत्तम् ॥ ७७ ॥

अद्येति । अद्य इदानीम् उर्वीतलस्य पृथ्वीतलस्य मूले यत् घर्षणं तद्वशात् उन्मृष्टानाम् उत्तेजितानां चूडामणिश्रेणीनां शिरोरत्नसमूहानां श्रिया प्रभया परिपीतः विनाशितः पीवरः स्थूलः सान्द्र इति यावत् तमसाम् अन्धकाराणां पूरः निचयः यस्य तथाभूते भोगिनां भुजङ्गानां पुरे नगरे पाताले इत्यर्थः, पन्नगपुङ्गवेन नागराजेन वासुकिनेत्यर्थः कर्णाभावात् चक्षुःश्रवस्त्वयेति भावः निरस्तः कुण्डलानां कर्णभूषणविशेषाणां व्यासङ्गः प्रत्यूहः यत्र तत् यथा तथा मूर्ध्नः शिरांसि सहस्रमिति शेषः आधुन्वता कम्पयता सता तव कीर्त्तिः सुभगं सुष्ठु यथा तथा आकर्ण्यते श्रूयते । कर्णाभावेन कुण्डलपरिधानाभावः तदान्दोलनजनितशब्दाभावेन सुखेन कीर्त्तिश्रवणञ्चेति बोध्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ ७८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विहस्य ।)

भोगीन्द्रः प्रमदोत्तरङ्गसुरगीसङ्गीतगोष्ठीषु ते
कीर्त्तिं देव ! शृणोतु विंशतिशती यच्चक्षुषां वर्त्तते ।
रक्ताभिः सुरसुन्दरीभिरभितो गीतां तु कर्णद्वयो-
दुःस्थः श्रोष्यति नाम किं स हि सहस्राक्षो न चक्षुःश्रवाः ॥७९॥

रामः । (विलक्षस्मितेन विभीषणस्कन्धमनुगृह्य चन्द्रं सीतामुखं च क्षणमालोक्य स्वगतम् ।)

आरब्धे दयितामुखप्रतिसमे निर्मातुमस्मिन्नपि
व्यक्तं जन्मसमानकालमिलितामंशुच्छटां वर्षति ।
आस्यद्रोहिणि रोहिणीपरिवृढे पर्य्यङ्कपङ्केरुहः
सङ्कोचादतिदुःस्थितस्य न विधेस्तच्छिल्पमुन्मीलितम् ॥८०॥

भोगीन्द्र इति । हे देव ! भोगीन्द्रः वासुकिः उरगीणां भुजङ्गीनां सङ्गीतगोष्ठीषु प्रमदेन हर्षेण उत्तरङ्गम् उद्गतकौतूहलं यथा तथा ते तव कीर्त्तिं शृणोतु श्रोतुं पारयतु, यत् यतः तस्य चक्षुषां विंशतिशती सहस्रद्वयमित्यर्थः वर्त्तते । सहस्रफणत्वेन चक्षुषां सहस्रद्वयं चक्षुःश्रवस्त्वाच्च श्रोत्राणामपि सहस्रद्वयमिति तस्य तव चरितश्रवणयोग्यतास्तीति भावः । तु किन्तु सहस्राक्षः कर्णयोर्द्वयी कर्णद्वयी तया दुःस्थः दुःखितः अतएव अभितः समन्तात् रक्ताभिः रक्तकण्ठीभिः सुरसुन्दरीभिः गीतां तत्कीर्त्तिमिति शेषः किं नाम कथं नाम श्रोष्यति श्रोतुं शक्ष्यति ? नैव श्रोतुं शक्ष्यतीत्यर्थः, यतः असौ चक्षुःश्रवा चक्षुरेव श्रवः श्रवणेन्द्रियं यस्य तथाभूतः न । शार्दूलविक्रीडितं वृत्तम् ॥ ७९॥

आरब्धे इति । अस्मिन्नपि रोहिणीपरिवृढे रोहिणीवल्लभे चन्द्रे दयितायाः सीतायाः मुखस्य प्रतिसमे प्रतिरूपे निर्मातुं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सीतां प्रति ।)

अनेन रम्भोरु ! भवन्मुखेन
तुषारभानोस्तुलया धृतस्य ।
जनस्य नूनं परिपूरणाय
ताराः स्फुरन्ति प्रतिमानखण्डाः ॥८१॥

किञ्चान्यदपि

गोत्रे साक्षादजनि भगवानेष यत्पद्मयोनिः
शय्योत्थायं यदखिलमहः प्रीणयन्ति द्विरेफान् ।

स्रष्टुम् आरब्धे व्यक्तं स्फुटं यथा तथा जन्मसमानकाले निर्माण-समकाले मिलितां सङ्गताम् अंशुच्छटां किरणश्रेणीं वर्षति अतएव आत्मनः स्वस्य द्रोहिणि अनिष्टकारिणि स्वकिरणेन पद्मसङ्कोच-कारित्वादिति भावः सति पर्यङ्कस्य आसनभूतस्य पङ्केरुहः पद्मस्य सङ्कोचात् जातमात्रचन्द्रकिरणस्पर्शादिति भावः अतिदुःस्थितस्य अतिशयेन दुःखावस्थितस्य विधेः ब्रह्मणः तच्छिल्पं सीतामुखानुरूप-चन्द्रनिर्माणकौशलमित्यर्थः न उन्मीलितं न चेतसि स्फुरितमित्यर्थः । तच्चित्रमुन्मीलितं तच्छिल्पमुन्मीलतीति च पाठान्तरम् । शार्दूलविक्री-डितं वृत्तम् ॥ ८० ॥

अनेनेति । हे रम्भोरु ! अनेन भवत्या मुखेन जनस्य तुलया तोलनयन्त्रेण धृतस्य तुषारभानोः चन्द्रस्य परिपूरणाय ताराः नक्ष-त्राणि प्रतिमानखण्डाः स्फुरन्ति दीप्यन्ते । नूनम् उत्प्रेक्षे । हिरण्यादेस्तुलनायां न्यूनस्य क्षुद्रपरिमाणेन पूरणं कृत्वा यथा समी-करणं तथात्रापीति भावः । उपजातिवृत्तम् ॥ ८१ ॥

गोत्रे इति । हे सुतनु सुन्दरि ! यत् यतः पद्ममेव योनिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एकाग्रां यद्दधति भगवत्युष्णभानौ च भक्तिं
तत् प्रापुस्ते सुतनु ! वदनौपम्यमम्भोरुहाणि ।८२॥

सीता । (सेरावनतमुखी ।) अज्जउत्त ! कधं उण संपुण्ण-मण्डलमेरिसं चन्दमवमच्चिअ (ढ) कलामेत्तं भअवदा भूद-णाहेण चूडामणीकिदं आसी । (२२)

रामः । (सप्रहासम् ।) प्रिये जानकि ! त्रयाणामपि जग-तामुपजीव्यो(ण)ऽयममृतदीधितिः । यदि पुनः समग्रमेनं मौलिना पिनाकपाणिरधारयिष्यत्, अङ्ग ! शिवनिर्माल्य-मनुपभोग्य (त) एवायमभविष्यत् ।

---

(२२) आर्यपुत्र ! कथं पुनः सम्पूर्णमण्डलमीदृशं चन्द्रमवमत्य कलामात्रं भगवता भूतनाथेन चूडामणीकृतमासीत् ।

उद्भवक्षेत्रं यस्य तथोक्तः एष भगवान् ब्रह्मा गोत्रे कुले पद्मानामिति शेषः साक्षात् स्वयम् अजनि उत्पन्नः, यत् यतः शय्योत्थायं शय्याया उत्थाय विकसित्वैवेति भावः अखिलं समस्तम् अहः दिनं व्याप्येत्यर्थः द्विरेफान् भ्रमरान् प्रीणयन्ति तोषयन्ति, यच्च भगवति उष्णभानौ सूर्ये एकाग्रां भक्तिम् अनुरागं दधति धारयन्ति, तत् तस्मात् अम्भोरुहाणि पद्मानि ते तव वदनौपम्यं मुखसादृश्यं प्रापुः । सगोत्रत्वात् विधातुरनुकम्पा परोपकारानुष्ठानं सूर्यभक्तिश्चेति त्रयं पद्मानां तव मुखसादृश्यलाभकारणमिति भावः । मन्दाक्रान्तावृत्तम् ॥ ८२ ॥

(ढ) अवमत्य अवगणय्य ।

(ण) उपजीव्यः जीवनकारणमिति भावः ।

(त) अङ्गेत्यामन्त्रणे । शिवनिर्माल्यं शिवस्य निर्माल्यं त्यक्त-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सर्वे हसन्ति ।)

रामः । किञ्च भवत्यापि मासप्रमितो दृश्यत एवा-
यम् ।

पीयूषाश्रपणं जगत्त्रयदृशामालातलेखालवो
विश्वोन्माथहुताशनस्य ककुभामुद्घाटनी कुञ्चिका ।
वीरेषु प्रथमा च पुष्पधनुषो रेखा मृगाक्षीमुख-
श्रीणाञ्च प्रतिराजवीजमधिकानन्दी नवश्चन्द्रमाः ॥८३॥

सीता । (अनुमोदमाना ।) अज्जउत्त ! परिपुण्णा गुणिणो

पुष्पादि । अप्राज्ञं शिवनिर्माल्यमित्यनेन शिवनिर्माल्यस्य उपभोग-
निषेधात् ।

पीयूषेति । नवः चन्द्रमाः नवोदितचन्द्रः जगत्त्रयस्य दृशां
नयनानां पीयूषाश्रपणम् अमृतस्थाली, विश्वेषाम् उन्माथः उन्मथ-
नकर्त्ता काम इति भावः स एव हुताशनः अग्निः तस्य आलात-
अङ्गारः तस्य लेखानां राजीनां लवः कणः बिन्दुरित्यर्थः । ककुभां
दिशाम् उद्घाट्यते अनयेति उद्घाटनी परिष्कारकरणी कुञ्चिका
मार्जनीत्यर्थः । वीरेषु मध्ये पुष्पधनुषः कामस्य प्रथमा आद्या रेखा
जगति के के वीराः सन्तीति गणनायां काम एव सर्वप्रथमो वीर
इति प्रकाशनार्थं प्रथमकल्पितः बिन्दुविशेष इति भावः । मृगा-
क्षीणां सुन्दरीणां या मुखश्रियः तासां प्रतिराजः प्रतिपक्षो
राजा तस्य बीजं कारणम् अतएव अधिकं यथा तथा आनन्दय-
तीति अधिकानन्दी दृश्यते इति पूर्वगद्यस्येत्यन्वयः । शार्दूल-
विक्रीडितं वृत्तम् ॥ ८३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जहिं कहिं पि सोहन्ति । खोणा उण सीस(घ)मारुहन्ति त्ति हरजड़ाचन्दो ञेव्व पढमं णिदंसनं (द) । (२३)

रामः । (विहस्य ।) देवी महाकुलक्षत्रियसम्भवे ! एवमेतत् ।

सेतूपक्रमसंभ्रमाहृतगिरिप्रक्षेपवेगोच्छल-
न्निःशेषाम्बुपरिस्फुटोदरदरीगम्भीरिमा सागरः ।
चक्रे गोष्पदवद्विलङ्घितवतोऽप्यन्तर्भयं मारुतेः
पूर्णत्वादतिरिच्यते हि महतस्तुच्छस्य दुर्लङ्घता ॥८४॥

---

(२३) आर्यपुत्र ! परिपूर्णा गुणिनो यस्मिन् कस्मिन्नपि शोभन्ते ॥ क्षीणाः पुनः शीर्षमारोहन्तीति हरजटाचन्द्र एव प्रथमं निदर्शनम् ॥

(घ) शीर्षं शिरः ।

(द) निदर्शनं दृष्टान्तः । क्षुद्राणाम् उपरिस्थितिं विना अदर्शनात् शोभाविरहः, पूर्णानान्तु सर्वत्रैव दृश्यत्वात् सर्वदैव शोभेति भावः ।

सेतोति । सेतोः बन्धविशेषस्य उपक्रमे प्रारम्भे संभ्रमेण त्वरया आहृतानां गिरीणां प्रक्षेपात् यो वेगः तेन उच्छलन्ति उद्गच्छन्तिः निःशेषाणि समग्राणि यानि अम्बूनि जलानि तैः क्षेत्रभिः परिस्फुटः सुव्यक्तः उदरमेव दरी गुहा तस्या गम्भीरिमा गाम्भीर्यं यस्य तथाभूतः सागरः गोष्पदवत् गोपदपरिमितजलाधारवत् विलङ्घितवतः अपि मारुतेः हनूमतः अन्तर्भयं मनसि भयं चक्रे कृतवान् जनयामासेत्यर्थः । हि यतः महतः तुच्छस्य शून्यस्येत्यर्थः दुर्लङ्घता पूर्णत्वात् अतिरिच्यते अतिरिक्ता भवति । शार्दूलविक्रीडितं वृत्तम् ॥ ८४ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(नेपथ्ये ।)

देव ! त्वर्यतां त्वर्यताम् । सन्निधत्ते (ध) खलु भगवद्-शिष्टगृहीतो मङ्गलाभिषेकमुहूर्त्तः (न) ।

रामः । (आकर्ण्य ।) कथमयोध्यायाः प्रत्यावृत्तो मारुति(प)रस्मांस्त्वरयति ।

सीता । (सहर्षम् ।) अज्जउत्त ! कधं अज्जणाणन्दणो तुवरावेदि । ता भअवं पुप्फअ ! अवणम । मेइणीसंणिहिदगअणमग्गेण गच्छह्म । (अधोऽवलोक्य रामं प्रति ।) अज्जउत्त ! किं उण एदं तरुणजीमूदसामले महीवलए महुमहणवच्छत्थले (फ) कोत्थुभकिरणत्थवअं विअ जलन्तं (ब) लक्खीअदि । (२४)

---

(२४) आर्यपुत्र ! कथमञ्जनानन्दनस्त्वरयति । तद्भगवन् पुष्पक ! अवनम । मेदिनीसन्निहितगगनमार्गेण गच्छामः । आर्यपुत्र ! किं पुनरेतत् तरुणजीमूतश्यामले महीवलये मधुमथनवक्षःस्थले कौस्तुभकिरणस्तवक इव ज्वलल्लक्ष्यते ।

(ध) सन्निधत्ते सन्निहितः भवति ।

(न) मङ्गलाभिषेकमुहूर्त्तः माङ्गलिकाभिषेकसमयः ।

(प) मारुतिः हनूमान् ।

(फ) तरुणेति तरुणः अभिनवः यः जीमूतः मेघः तद्वत् श्यामलं तस्मिन् । महीवलये भूमण्डले । मधुमथनस्य नारायणस्य वक्षःस्थले ।

(ब) ज्वलन् दीप्यमानः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (दृष्ट्वा विभीषणं प्रति ।)

तर्कुटङ्कलिखितार्कमण्डल-
प्रोच्छलत्कणकदम्बभासुरम् ।
शिल्पशालमिव विश्वकर्मणः
किं विभाति मृगतृष्णिकामयम् ॥८५॥

विभीषणः । देव ! स एष

ज्येष्ठामूलीययात्रासरभसकरभीकाम्यकान्तारवर्त्मा
दूरेऽपि ज्योतिरक्ष्णोरपलपति मरुर्जाज्वलज्जाङ्गलश्रीः ।
विश्वद्रीचीभिरस्मिन्निविडमुडुपतेः कान्तिभिः प्रस्रवन्तः
फेनायन्ते निजोष्मक्वथनपरिणमद्बुद्बुदं चन्द्रकान्ताः ॥८६॥

तर्किति । तर्कुः मन्त्रविशेषः तस्य टङ्केन शाणविशेषेण लिखितम् उद्दृष्टं यत् अर्कमण्डलं सूर्यमण्डलं तस्मात् प्रोच्छलता प्रोद्गच्छता कणकदम्बेन कणसमूहेन भासुरं दीप्यमानं विश्वकर्मणः शिल्पशालमिव शिल्पगृहमिव मृगतृष्णिकामयं मरीचिकामयं किम् एतदिति शेषः विभाति राजते ? पुरा सौरं तेजः सोढुमशक्तया सूर्यपत्न्या संज्ञया प्रार्थितः पिता विश्वकर्मा सूर्यं यन्त्रारूढं कृत्वा शाणयन्त्रेण तच्छात् हीनतेजसमकरोदिति पुराणवार्त्ता । रथोद्धतावृत्तम् ॥८५॥

ज्येष्ठेति । ज्येष्ठामूलीयः ज्येष्ठमासः, ज्येष्ठामूलीयमिच्छन्ति मासमाषाढपूर्वमिति हारावली । तत्र यात्रायां प्रयाणे सरभसा सहर्षा काम्युकीति भावः या करभी उष्ट्री तस्याः काम्यं सुहृणीयं कान्तारवर्त्म दुर्गमार्गः यस्य तथाभूतः, ज्येष्ठे च उष्ट्री काम्युकी जायते इति प्रसिद्धिः । जाज्वलन्ती देदीप्यमाना जङ्गलो निर्जलो देशः तस्य इयं जाङ्गली श्रीः शोभा यस्य तथाभूतः, मरुः देशविशेषः दूरेऽपि विप्रकर्षेऽपि अक्ष्णोः नयनयोः ज्योतिः अपलपति हरति दृष्टिप्रतिघातिः-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सर्वे विमानायनतिं नाटयन्ति ।)

रामः । (विलोक्य सीतां प्रति ।) देवि ! दक्षिणेन

सिंहलद्वीपमम्भोधिसंभूतमिदमुत्पलम् ।

माणिक्याचलकिञ्जल्करमणीयमुदीक्ष्यते ॥८७॥

सीता । जहिं कासकुसुमसंकासो अगत्थहंसो (भ) चरइ । (२५)

रामः । (स्मित्वा ।) आं मैथिलि आम् । इहैव रोहणगिरेरुपत्यकायां द्वितीयमायतनं (म) मुनेर्लोपामुद्रावल्लभस्य । स तत्रभवान् (य)

---

(२५) यत्र काशकुसुमसङ्काशोऽगस्त्यहंसश्चरति ।

तेजस्कतया मरोरिति भावः । अस्मिन् मरौ चन्द्रकान्ताः मणिविशेषाः विश्वदीचीभिः विश्वव्यापीनीभिः उडुपतेः चन्द्रस्य क्रान्तिभिः किरणैः प्रस्रवानाः प्रस्रवन्तः सन्तः निजैः अम्भभिः मरुदेशभवैरिति भावः यत् कथनं पाकः तेन परिणमत् उद्गच्छत् बुद्बुदं यस्मिन् तत् यथा तथा फेनायन्ते फेनमुद्गिरन्ति । स्रग्धराछन्दः ॥८६॥

सिंहलेति । सिंहलद्वीपं दक्षिणेन सिंहलद्वीपस्य दक्षिणस्यां दिशि अम्भोधिसम्भूतं समुद्रसञ्जातम् इदं माणिक्यमया अचलाः स्थिराः ये किञ्जल्काः केशराः तैः रमणीयम् उत्पलं पद्मम् उदीक्ष्यते उच्चैः दृश्यते । अनुष्टुप्छन्दः ॥ ८७ ॥

(भ) काशेति काशस्य कुसुमं तस्य सङ्काशः सदृशः । अगस्त्य एव हंसः ।

(म) रोहणगिरेः रोहणाख्यपर्वतस्य । उपत्यकायाम् आसन्नभूमौ, उपत्यकाद्रेरासन्ना भूमिरित्यमरः । आयतनं स्थानम् ।

(य) तत्रभवान् पूज्यः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

बृहत्पात्रप्राप्त्या विततजलमम्भोधिमुदरे
दधावीषद्ग्राह्यं किल कलशजन्मा कुलपतिः ।
यमाराध्यन् विन्ध्याचलशिखरशोथैकभिषजं
विवस्वानाखीनं गगनमविरोधात् कलयति ॥८८॥

अपिच ।

निपीते येनाब्धौ स्तिमितगुरुभिः पक्षपटलैः
प्रयत्नादुड्डीय प्रतिपदमपव्यस्तपतिताः ।
विशन्तः कीलीरं कुहरमशरण्याः शिखरिणः
क्षणं दृष्टास्तस्य स्तुतिषु न गिरां साहसरसः ॥८९॥

बृहदिति । किलेति प्रसिद्धौ कलशजन्मा कुम्भसम्भवः कुलपतिः, मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् । अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृत इत्युक्तलक्षणः मुनिविशेषः अगस्त्य इत्यर्थः इषद्ग्राह्यं गण्डूषमात्रेण ग्रहणीयं बृहतः पात्रस्य आधारस्य अगस्त्योदरस्येति भावः प्राप्त्या लाभेन विततजलं विस्तृततोयम् अम्भोधिं समुद्रम् उदरे दधौ धारयामास । विवस्वान् सूर्यः विन्ध्याचलस्य शिखराणां शृङ्गाणां शोथस्य रोगविशेषस्य अङ्गवृद्धिरूपस्येति भावः एकम् अद्वितीयं भिषजं चिकित्सकं, भिषग्वैद्यौ चिकित्सके इत्यमरः । विनतीकृतविन्ध्याचलमिति भावः । यम् अगस्त्यम् आराध्यन् सेवमानः सन् आखीनम् अश्वैः एकाहगम्यं गगनम् आकाशम् अविरोधात् निर्विघ्नेनेत्यर्थः कलयति पर्यटति । पूर्वसूक्ता पौराणिकी वार्त्तास्य सन्दर्भस्येति विस्तरभयान्न पुनरुक्ता । शिखरिणीवृत्तम् ॥ ८८ ॥

निपीते इति । येन अब्धौ समुद्रे निपीते निःशेषेण पीते सति स्तिमितानि आर्द्राणि अतएव गुरूणि भारवन्तीत्यर्थः तैः पक्षपटलैः पक्षसमूहैः प्रयत्नात् उड्डीय प्रतिपदं पदे पदे अपव्यस्तं विपर्यस्तं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच यत्र शृङ्गारसार्वभौमस्य (र) रत्नसिंहासने सिंहल-द्वीपनाम्नि प्रदोषारम्भेषु (ख)

उदेष्यत्पीयूषद्युतिरुचिकणार्द्राः शशिमणि-
स्थलीनां पन्थानो घनचरणलाक्षालिपिभृतः ।
चकोरैरुड्डीनैर्झटिति कृतशङ्काः प्रतिपदं
पराञ्चः सञ्चारानविनयवतीनां विवृणते ॥९०॥

यथा तथा पतिताः अतएव अपरण्याः रक्षिशून्याः शिखरिणः पर्वताः मैनाकादयः चर्णं कुलीरः कर्कटः तत्सम्बन्धि कौलीरं कुहरं गर्त्तं विशन्तः प्रविशन्तः दृष्टाः जनैरिति शेषः तस्य अगस्त्यस्य स्तुतिषु गिरां वाचां साहसरसः सहसाप्रवृत्त्यनुरागः न ? अपि तु सर्व एव तस्य स्तुतिं कर्तुं प्रवर्त्तन्ते इति भावः यद्वा साहसरसो न साहसावलम्बनं न भवति, वाचस्तस्य स्तुतिं कर्तुं न प्रभवन्तीति भावः । शिखरिणी-वृत्तम् ॥ ८९ ॥

(र) शृङ्गारेति शृङ्गार एव सार्वभौमः सम्राट् तस्य ।

(ख) प्रदोषारम्भेषु प्रदोषो रजनीमुखं तस्य आरम्भेषु, प्रदोषो रजनीमुखमित्यमरः ।

उदेष्यदिति । उदेष्यतः उदयं गमिष्यतः पीयूषद्युतेः अमृतरश्मेः चन्द्रस्य रुचिकणैः शशूखलेशैः आर्द्राः स्रवन्त इति भावः घना सान्द्रा या चरणयोर्लाक्षा अलक्तकरागः तया लिपिम् अक्षरं बिभ्रतीति तथोक्ताः चरणालक्तकचिह्निता इति भावः, उड्डीनैः उत्पतितैः चकोरैः पक्षिविशेषैः झटिति सहसा कृता जनिता शङ्का जगामभयमिति यावत् यान्तु तथोक्ताः, शशिमणिस्थलीनां चन्द्रकान्तमय-भूभागानां पन्थानः मार्गाः अविनयवतीनां दुःशीलानां अभिसारिका-णामिति भावः प्रतिपदं पराञ्चः प्रतीपान् भयात् विपरीतव्यासा-निति भावः सञ्चारान् विवृणते प्रकटयन्ति । शिखरिणीवृत्तम् ॥९०॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(अ यतो दर्शयन् ।) इयमितो मौक्तिकीयानामपामाधारस्ता-स्त्रपर्णी (व) ।

शुक्तिकागर्भसम्बन्धस्तम्भितास्तोयबिन्दवः ।
भ्रमन्ति सुभ्रुवामङ्गादङ्गमस्याः प्रसूतयः ॥९१॥

अपिच ।

युवतिकुचभोगकर्मभिरुद्भूतैः शुक्तिसंपुटधृतानि ।
दधतीह ताम्रपर्ण्याः स्थिरकरकाभावमम्भांसि ॥९२॥

सीता । अज्जउत्त ! जेट्ठेत्ति दक्खिणमत्तएण (ग) भव-

(व) मौक्तिकीयानां मुक्ताप्रसविनीनामिति यावत् अपां जला-नाम् । ताम्रपर्णी नदीभेदः । ताम्रपर्णी मुक्तोत्पत्तिक्षेत्रमिति प्रसिद्धिः ।

शुक्तिकेति । शुक्तिकानां मुक्तास्फोटानां गर्भेषु मध्येषु सम्बन्धेन स्थित्या स्तम्भिताः पिण्डीभूताः घनीभूता इति यावत् अस्याः ताम्र-पर्ण्याः प्रसूतयः समुद्भवाः तोयबिन्दवः मुक्ताफलरूपेण परिणता इति भावः सुभ्रुवां सुन्दरीणाम् अङ्गात् क्रोडात् अङ्गं क्रोडं भ्रमन्ति सुभ्रुवाम् अङ्गानि अलङ्कुर्वन्तीति भावः । अनुष्टुब्वृत्तम् ॥ ९१ ॥

युवतीति । इह ताम्रपर्ण्याः अम्भांसि जलानि उद्भूतैः सञ्जातैः जन्मान्तरीयैरिति भावः युवतीनां कुचाः स्तनाः तेषां भोगः सम्भोगः तदुपर्यवस्थानरूप इति भावः तस्य कर्मभिः यैः कर्मभिः युवतिकुच-भोगः सम्पद्यते तादृशैः सुचरितैः कर्मभिर्हेतुभिरिति भावः शुक्तिरेव संपुटः आवरणविशेषः तत्र धृतानि सन्ति स्थिरकरकाभावं निविड-वर्णोपलत्वं, वर्णोपलस्तु करकेत्यमरः । दधति धारयन्ति ॥ ९२ ॥

(ग) ज्येष्ठेति ज्येष्ठा पत्नीति हेतोः दाक्षिण्यमात्रकेण दक्षिणः अनेकपत्नीषु समरागो नायकविशेषः । तदुक्तं दर्पणे, एषु त्वनेकमहि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वदो सागरस्स भाईरहीपक्खपादो (घ)। पेम्मसव्वस्सणी-सन्दो (स) उण सहजसव्वङ्गमोत्तिआहरणरमणीआए (ह) तस्सपसीए लक्खीअदि। (२६)

रामः। (विहस्यान्यतो दर्शयन्।)

रमयति मलयाचलोऽयमस्मा-
दुपनमता पवनेन मानिनीनाम्।
दयितविनयकूटसाक्षिणीभिः
स खलु सखीभिरदुष्करप्रबोधः ।९३॥

---

(२६) आर्यपुत्र! ज्येष्ठेति दाक्षिण्यमात्रकेण भगवतः सागरस्य भागीरथीपक्षपातः। प्रेमसर्वस्वनिःस्यन्दः पुनः सहजसर्वाङ्गमौक्तिकाभरणरमणीयायास्तस्याः प्रसन्नया लक्ष्यते।

लाभ्य समरागो दक्षिणः कथित इति। तस्य भावः दाक्षिण्यं तदेव दाक्षिण्यमात्रं, ततः स्वार्थे कन्प्रत्ययः। तेन।

(घ) भागीरथ्यां गङ्गायां पक्षपातः अनुग्रहः।

(स) प्रेमा अनुराग एव सर्वस्वं तस्य निःस्यन्दः प्रातः।

(ह) सहजेति सहजं स्वाभाविकं सर्वेषु अङ्गेषु यत् मौक्तिकाभरणं तेन रमणीयायाः।

रमयतीति। अयं मलयाचलः रमयति प्रीणयति अस्मानिति शेषः। अस्मात् मलयाचलात् उपनमता उपगच्छता पवनेन वायुना साधनेन दयितस्य प्रियस्य विनयानां काकुत्स्थानां कूटः राजिः समूह इति यावत् तस्य साक्षिणीभिः साक्षात् द्रष्ट्रीभिः सखीभिः मानिनीनां स खलु निश्चितं प्रबोधः अदुष्करः सुसाध्य इत्यर्थः। पुष्पिताग्राछन्दः ॥ ९३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (अग्रे दर्शयन् ।)

स्वपाणिप्राग्भारप्रबलविततोत्तानसलिल-
स्वयंदृष्टक्रीडत्तिमिनिवहलग्नामिव दृशाम् ।
दधानस्यापीतोज्झितजलनिधेरेतदपरं
पुरो लोपामुद्रासहचरमुनेराश्रमपदम् ॥९४॥

अपिचास्मिन्

चतुरब्धिपानचेष्टादृष्टपिपासे मुनावुदयमाने ।
पाययितुमिवात्मानं विशुध्य सज्जीभवन्त्यापः ॥९५॥

सुग्रीवः । (सस्मितम् ।)

स्वपाणीति । स्वस्य पाणिः करः तस्य प्राग्भारेण विस्तारेण प्रबलम् अत्यन्तं यथा तथा विततं विस्तृतम् उत्तानम् ऊर्ध्वं गतं यत् सलिलं तस्मिन् स्वयं आत्मना दृष्टे क्रीडति तिमिनिवहे लग्ना सम्बद्धा तां दृशां दृशं दधानस्येव जलसङ्घाते पीतानुज्झिते सर्वे तिमिप्रभृतयो नश्यन्तीति अनुकम्प्यं धारयत इव, आपीतः सम्यक् पीतः पश्चात् उज्झितः उद्गीर्णः जलनिधिः येन तथाभूतस्य लोपामुद्रासहचरस्य मुनेरगस्त्यस्य पुरः अग्रतः यत्तत् अपरं द्वितीयं आश्रमपदं तपोवनं दृश्यते इति शेषः । शिखरिणीवृत्तम् ॥ ९४ ॥

चतुरब्धीति । चतुर्णाम् अब्धीनां समुद्राणां पानचेष्टया पानव्यापारेण दृष्टा पिपासा यस्य तादृशे मुनौ अगस्त्ये उदयमाने उद्गच्छति सति आपः जलानि आत्मानं पाययितुमिव विशुध्य निर्मलीभूय सज्जीभवन्ति । अगस्त्योदये जलानि विशदानि भवन्तीति प्रसिद्धिः । उत्प्रेक्षालङ्कारः । आर्यावृत्तम् ॥ ९५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ध्रुवमिह चतुरम्भोनिधिरचितापोशानकर्मणि मुनीन्द्रे ।
भक्ष्यंमन्यानि किमपि चकम्पिरे सप्तभुवनानि ॥९६॥

(सर्वतोऽवलोक्य सहर्षाङ्गतम् ।) अहो चिरेणाद्य चतुर्दशलोकैकदण्डधरे धर्मासनाधिकारिणि(च) रामदेवे दण्डकारण्यगृहमेधिनां (क) तपोधनानामृषयः (ख) ।

रामः । (तलच्छत्रितं विमानवेगनाटितकेनाधोऽवलोक्य ।) कथं हिरण्यहरिणविहारकान्तारस्थलीनामुपरि (ग) प्रतिष्ठामहे (घ) ।

ध्रुवमिति । इह अत्रिनु मुनीन्द्रे मुनिप्रवरे अगस्त्ये चतुर्भिः अम्भोनिधिभिः रचितं कृतं तापोशानकर्म यस्य तथाभूते सति सप्तभुवनानि भूर्भुवःस्वर्जनमहस्तपःसत्यरूपाणि किमपि अनिर्वचनीयरूपेणेत्यर्थः भक्ष्यंमन्यानि आत्मानं भक्ष्यं मन्यन्ते इति तथोक्तानि सन्ति चकम्पिरे कम्पितानि बभूवुः । यस्य चतुःसमुद्रं पेयं तस्य सप्तभुवनं भक्ष्यम् अवश्यमेव सम्भवतीति धियेति भावः ॥ ९६ ॥

(च) धर्मासनाधिकारिणि सिंहासनाधिकारकारिणि ।

(क) दण्डकेति दण्डकारण्ये ये गृहमेधिनः गृहैर्दारैर्मेधन्ते सङ्गच्छन्ते इति तथोक्ताः तेषां, न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते इति यास्कात् गृहशब्देन दारा उच्यन्ते ।

(ख) ऋषयः अभ्युदयाः ।

(ग) हिरण्येति हिरण्यहरिणस्य मायाकल्पितकाञ्चनमृगरूपस्य मारीचस्येति यावत् विहाराः विचरणस्थानानि याः कान्तारस्थल्यः दुर्गमारण्यभूमयः तासाम् ।

(घ) प्रतिष्ठामहे प्रस्थानं कुर्मः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुग्रीवः । (सोपहासम् ।) इयं सा मारीचशरीरोपचार-रचितात्मनो (ङ) दशकण्ठस्य कपटभिक्षुवेषविडम्बना-डम्बरैकमर्मज्ञा (च) पञ्चवटी । (सादरम् ।)

विश्वामित्रमखद्विषे च वपुषा चित्रेण पत्युर्मुखा-
दप्याकृष्टविदेहराजतनयामेत्रारविन्दाय च ।
मारीचाय नमो नमः किमपरं यस्मै कुले रक्षसां
द्वौ वारौ विभुनापि दाशरथिना चक्रे ततक्ष्यं धनुः ॥९७॥

(सीता लज्जते ।)

रामः । (प्रकाशमाचम्य दर्शयन् सीतामपश्यन् ।) देवि !

(ङ) मारीचेति मारीचस्य शरीरस्येव उपहारः उपढौकनं तेन रचितः आत्मा येन तथोक्तस्य ।

(च) कपटेति कपटेन मायाकल्पितेन भिक्षुवेषेण परिव्राजक-वेषेण या विडम्बना वञ्चना तस्या डम्बरस्य विस्तारस्य एका सहि-तीया मर्मज्ञा सारभिज्ञा तत्रज्ञेति यावत् ।

विश्वामित्रेति । विश्वामित्रस्य मखः यज्ञः तं द्वेष्टीति तथोक्ताय च, चित्रेण अङ्कितेन वपुषा शरीरेण आकृष्टवतयेनेति भावः पत्युः रामस्य मुखादपि, अलाभ्यमेतदित्यभिप्रायः । आकृष्टं विदेहराजतनयायाः सीतायाः नेत्रारविन्दं येन तथाभूताय च सीता पतिविरहिणी कृतवते इति भावः, मारीचाय नमः नमः पुनः पुनस्तं प्रणमामीति भावः किमपरम् अन्यं वक्तव्यमिति शेषः । रक्षसां कुले वंशे विभुना दाशरथिनापि रामेणापि यस्मै मारीचाय बहुबाणैर्भिन्नत्वात् द्वौ वारौ धनुः लता विस्तृता ज्या यत्र तादृशं कृतम् । अतिसन्धानात् भङ्गाशङ्कयाशो लवेषु रामेणेति पुनः पुनर्नमस्करणीय इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ९७ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नक्तं रत्नमयूखपाटलमिलत्काकोलकोलाहल-
त्रस्यत्कौशिकभुक्तकन्दरतमाः सोऽयं गिरिः स्मर्यते ।
यत्राकृष्टकुचांशुके मयि रुषा वस्त्राय पत्राणि ते
चिन्वन्त्या वनदेवतास्तरुलतामुच्चैर्व्यधुः कौतुकात् ॥९८॥

सीता । (स्मयमाना कपोतहस्तं (ञ) कृत्वा ।) भअवदीओ जणट्ठाणदेवदाओ ! एसा वो परिचारिआ जाणई पणमदि । (२९)

---

(२७) भगवत्यो जनस्थानदेवताः ! एषा वः परिचारिका जानकी प्रणमति ।

नक्तमिति । नक्तं रात्रौ रत्नानां मयूखाः किरणाः तेषां पाटलः श्वेतरक्तगुणः, श्वेतरक्तस्तु पाटल इत्यमरः । मिलतां सङ्गच्छतां काकोलानां द्रोणकाकानां, द्रोणकाकस्तु काकोल इत्यमरः । कोलाहलः कलरवः ताभ्यां त्रस्यद्भिः त्रिभ्यद्भिः कौशिकैः मेचकैः · पर्वतीयरत्नप्रभया दिवसभ्रमेण काकशब्देन च मेचकानां त्रास इति भावः भुक्तं कन्दरतमः गुहास्थं तिमिरं यस्य तथाभूतः सोऽयं गिरिः प्रसवणः स्मर्यते स्मरणविषयीक्रियते मनेति शेषः । यत्र मयि आकृष्टं कुचयोः स्तनयोः अंशुकं वसनं येन तथाभूते सति रुषा कोपेन वस्त्राय कुचाच्छादनाय पत्राणि चिन्वत्याः ते तव वनदेवताः कौतुकात् कौतुकं कर्त्तुमित्यर्थः तरुलतां तरुस्थितां लताम् उच्चैः व्यधुः विहितवत्यः ऊर्द्ध्वं नीतवत्य इत्यर्थः । यथा त्वया पत्रं चेतुं न शक्यते तथा कृतवत्य इति यावत् । शार्दूलविक्रीडितं वृत्तम् ॥ ९८ ॥

(ञ) कपोतहस्तं कपोतवत् हस्तः तं कृत्वा अञ्जलिं बद्ध्वेत्यर्थः । यद्वा कपोतहस्तः हस्तबन्धविशेषः । उक्तञ्च सङ्गीतसर्वस्वे, पार्श्वद्वयसमाश्लेषात् कपोतः सर्वशीर्षके । विनयोपगमे प्रीते भये सम्भाषणे गुरोः । वक्षःस्थलगतो होषः कल्पितस्तु कपोतवदिति । तम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (अन्यतो दर्शयन् ।) देवि ! वन्दस्व भगवतीमितो गोदावरीम् । (जनान्तिकम् ।)

एतस्याः पुलिनोपकण्ठफलिनीकुञ्जोदरेषु स्रजं
कृत्वा किंशुककोरकैरकरजक्रीडासहिष्णुस्तने ।
दत्त्वा वक्षसि ते मयि प्रहसति प्रौढापराधे तदा
कौमारव्रतभङ्गरोषितमपि स्मेरं तवासीन्मुखम् ॥९९॥

(सीता सलज्जस्मितं मुखमवनमयति, नमति च गोदावरीम् ।)

रामः । (परिष्वज्यावलोकितकेन सखेदम् ।) देवि !

अस्मिन् माल्यवतस्तटीपरिसरे कादम्बिनीडम्बरः
स स्थूलङ्करषो मदश्रुपयसामासीद्वर्षन्नपि ।

एतस्या इति । एतस्याः गोदावर्याः पुलिनं जलनध्यादुत्थितो भूभागः, तोयोत्थितं तत् पुलिनमित्यमरः । तस्य उपकण्ठः समीपं तत्र यत् फलिनीकुञ्जः प्रियङ्गुकाननं, प्रियङ्गुः फलिनी फलीत्यमरः । तस्य उदरेषु मध्येषु किंशुककोरकैः पलाशकलिकाभिः, पलाशे किंशुकः पर्ण इति, कलिका कोरकः पुमानिति चामरः । स्रजं मालां कृत्वा करजक्रीडा नखक्षतं तत्सहिष्णू न भवत इति अकरजक्रीडासहिष्णू, तथाभूतौ स्तनौ यत्र तादृशे ते तव वक्षसि दत्त्वा प्रौढः कृतः अपराधः येन तथाभूते मयि प्रहसति, किंशुककलिका हि वक्ररूपा नखक्षताकारा भवति तथाच यथा तवेयं स्तनोपरि किंशुककलिका शोभते तथा मम नखक्षतानि शोभन्ते इति धिया हास्यकरणेन अपराधिनि सतीति यावत् तदा कौमारव्रतस्य कुमारिकाया व्रतस्य सुरतसम्भोगवर्जनरूपस्येति भावः भङ्गेन रोषितं कोपितमपि तत् मुखं स्मेरं मन्दहसितम् असीत् । शार्दूलविक्रीडितं वृत्तम् ॥ ९९ ॥

अस्मिन्निति । माल्यवतः गिरेः अस्मिन् परिसरे समीपप्रदेशे, पर्य्य-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यद्वारावलितैर्न शाखिभिरपि त्वत्पालितैर्मां तथा
दृष्ट्वा कन्दलितं न केकिभिरपि प्रारब्धि सङ्गीतकम् ॥१००॥

सीता । (मन्युगद्गदकण्ठगन्धिलस्वरा (ज) शुष्कं प्रति ।) विमाणराअ ! सीदम्हि (झ)। ण दलदि ज्जेव वज्जमअं मे हिअअं। तधा वि तुवरेहि। एसा अन्तरीअदु (ञ) दण्डआरण्णविच्छोली । (२८)

---

(२८) विमानराज ! सीताऽस्मि । न दलत्येव वज्रमयं मे हृदयम् । तथापि त्वरस्व । एषा अन्तरीयतां दण्डकारण्यपङ्क्तिः ।

न्तभूः परिसर इत्यमरः । सः वाजन्विगीडम्बरः मेघमालाया आसोगः, कादम्बिनी मेघमालेत्यमरः । अयमर्थश्चापि दृष्टिमकुर्वन्नपि मम अश्रुपयसां नेत्रजलानां स्थूलहरयः अस्थूलं स्थूलं क्रियते अनेनेति तथोक्तः आसीम् । मेघमालादर्शनेन सहिरहार्त्तस्य मम भूयानश्रुपातः समभवदिति भावः । मां तथा दृष्ट्वा रुदन्तं दृष्टेत्यर्थः यस्य कादम्बिनीडम्बरस्य धाराभिः वलितैः वर्द्धितैः त्वया पालितैः परिपोषितैः शाखिभिरपि वृक्षैरपि न कन्दलितं न पल्लवितं, कन्दलं स्यात् पल्लवे च नवाङ्कुरे इति विश्वः । केकिभिः मयूरैरपि सङ्गीतकं न प्रारब्धि न प्रारब्धं मम विरहार्त्तस्य दुःखेन अचेतना वृक्षाः सचेतनास्तिर्यञ्चोऽपि दुःखिता आसन्निति भावः । शार्दूलविक्रीडितं वृत्तम् ॥१००॥

(ज) मन्युगद्गदेति मन्युना दैन्येन, मन्युर्दैन्ये क्रतौ क्रुधीति कोषः । गद्गदे जाड्ययुक्ते कण्ठे गन्धिलः गन्धियुक्तः गन्ध इति भावः स्वरः यस्याः तथाभूता ।

(झ) सीताऽस्मीति सीताशब्दः लाङ्गलपद्धतौ वर्त्तते सा च प्रायशः कठिना तिष्ठति अहञ्च तदुत्पन्नत्वात् कठिनप्रकृतिरेवेति भावः ।

(ञ) अन्तरीयताम् अतिक्रम्यताम् एतद्दर्शनम् अतीव शोककारणमिति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (विमानवेगनाटितकेन सीतां प्रति ।) देवि ! इदमग्रे महाराष्ट्रमण्डलैकमण्डनं (ट) कुण्डिनं नाम नगरम् । इह हि,

अनन्यचुञ्चुश्रीर्मलयवनजन्मायमनिलो
निपीय स्वेदाम्बु स्मरमकरसम्भुक्तविभवम् ।
विदर्भीणां भूरिप्रियतमपरीरम्भरभस-
प्रसङ्गादङ्गानि द्विगुणपुलकस्रञ्जि तनुते ॥१०१॥

किञ्च ।

बिभ्रतीं कैशिकीं वृत्तिं सौरभोद्गारिणीं गिरः ।

(ट) महाराष्ट्रेति महाराष्ट्रस्य देशभेदस्य एकम् अद्वितीयं मुख्यं वा, एके मुख्यान्यत्रेवला इत्यमरः । मण्डनं भूषणम् अलङ्कारभूतमित्यर्थः ।

अनन्येति । अनन्यचुञ्चुश्रीः न अन्येभ्यः चुञ्चा विद्यतेति भावः श्रीः सम्पद्धिर्यस्य तथाभूतः अन्यसङ्गरहित इति भावः, मलयजन्मा मलयपर्वतीयः अयम् अनिलः वायुः विदर्भीणां विदर्भदेशभवानां नारीणां स्मरस्य कामस्य मकरेण वाहनभूतेन चिह्नेन सम्भुक्तः विभवः सम्पद् यस्य तथोक्तं कामावेशजनितसत्वोदयात् सम्भूतमिति भावः स्वेदाम्बु घर्मजलं निपीय शोषयित्वेति यावत् अङ्गानि भूरिर्बहुलः प्रियतमस्य परीरम्भेण आलिङ्गनेन रभसः हर्षः, रभसो वेगहर्षयोरित्यमरः । तत्प्रसङ्गात् तद्वशात् द्विगुणा पुलकान्येव रोमाञ्चा एव स्रजः माला येषु तथोक्तानि तनुते करोतीत्यर्थः । शिखरिणीवृत्तम् ॥१०१॥

बिभ्रतीमिति । दूराध्वानः दूरमार्गवर्त्तिनः विभिन्नदेशीया इत्यर्थः अपि कवयः कौशिकीं वृत्तिं बिभ्रतीं दधानां सौरभोद्गारिणीं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दूराध्वानोऽपि कवयो यस्य रीतिमुपासते ॥१०२॥

विभीषणः । (दक्षिणतो दर्शयन् ।) देव ! प्रणम्यतामयमन्ध्र-विषयलक्ष्म्याः सप्तगोदावरहारकलापैकनायको (ठ) भगवान् भीमेश्वरः (ड) । अयं हि,

तत्कालारभटीविजृम्भणपरिव्राजादिव भ्रश्यता
वामार्द्धेन तदेकशेषचरणं बिभ्रद्वपुर्भैरवम् ।

सुष्ठु सौरभशालिनीभिति यावत् यस्य महाराजस्य गिरः वाचः रीतिं सङ्घटनाविशेषम् उपासते सेवन्ते आश्रयन्तीत्यर्थः । कौशिक्यादिलक्षण-युक्तं दर्पणे । या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसङ्कुला पुष्कलस्वर-गीता । कामोपभोगप्रभवोपचारा सा कौशिकी चारुविलासयुक्ता ॥ शृङ्गारे कौशिकी वीरे सात्वत्यारभटी पुनः । रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारतीति । चतस्रो वृत्तयो ज्ञेयाः सर्वनाट्यस्य मातृकाः ॥ पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् । उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा ॥ वैदर्भी चाथ गौडी च पाञ्चाली नाटिका तथा । माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका । अवृत्तिरल्पवृत्तिर्वा वैदर्भी-रीतिरिष्यते इति । अनुष्टुप्वृत्तम् ॥१०२॥

(ठ) अन्ध्रेति अन्ध्रो नाम विषयः जनपदः तस्य लक्ष्मीः श्रीः तस्याः । गोदावर्य्यः नदीविशेषाः सप्तानां गोदावरीणां समाहारः सप्तगोदावरं तदेव हारकलापः हारश्रेणी तस्य एकः अद्वितीयः नायकः स्वामी मध्यमणिर्वा ।

(ड) भीमेश्वरः भीमो नाम ईश्वरः शिवः । यद्वा भीमो नाम कश्चित् राजा तत्प्रतिष्ठितत्वात् तस्य ईश्वरः ।

तत्कालेति । तत्काले नृत्यसमये या आरभटी वृत्तिः । तद्वचनं दर्पणे । मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः । संयुक्ता बध-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तुल्यं चास्थिभुजङ्गभूषणमसौ भोगीन्द्रकङ्कालकै-
र्बिभ्राणः परमेश्वरो विजयते कल्पान्तकर्मान्तिकः ॥१०३॥

रामः । (कृताञ्जलिः ।)

नृत्यारम्भपरित्रसन्निरिसुतारिक्तार्द्धसम्पूर्त्तये
निर्व्यूढभ्रमिविभ्रमाय जगतामीशाय तुभ्यं नमः ।
यस्यूडाभुजगेश्वरप्रभृतिभिस्तादृग्भ्रमन्तीर्दिशः
पश्यद्भिर्भ्रमघूर्णमाननयनैः शान्तोऽपि न अद्दधे ॥१०४॥

वन्धाद्यैरङ्गतारुभटी मता ॥ वस्तूत्थापनसम्फोटौ संचिप्तिरवपातनम् । इति भेदास्तु चत्वार आरभट्यः प्रकीर्त्तिताः ॥ वस्तूत्थापनहितं वस्तु वस्तूत्थापनमुच्यते । सम्फोटस्तु समावातः क्रुद्धसत्वरयोर्द्वयोः । संचिप्तिर्वस्तुरचना गिल्पैरितरथापि वा । संचिप्तिः स्यान्निद्रौ च नेत्रमेवान्तरश्चरः । प्रवेशतासनिष्क्रान्तिहर्षविद्रवसम्भवम् । अवपातनमित्युक्तमिति । आरम्भो वा तस्या विजृम्भणं वृद्धिः तस्मात् यः परित्रासः भयं तस्मादिव भ्रश्यता वामार्द्धेन गौरीरूपेण तत् एकवेषः एकमात्रावशिष्टः चरणो यस्य तथाभूतं भैरवं भीषणं वपुः शरीरं दधत् दधानः भोगीन्द्रस्य वासुकेः कङ्कालकैः अस्थिभिः तुल्यं समम् अस्थिभुजङ्गमयं भूषणं बिभ्राणः कल्पान्ते सृष्ट्यवसाने कर्मान्तिकः कर्मकर्त्ता संहारक इति भावः असौ परमेश्वरः विजयते सर्वोत्कर्षेण वर्त्तते । शार्दूलविक्रीडितं वृत्तम् ॥ १०३ ॥

नृत्यारम्भेति । नृत्यारम्भे परित्रसन्त्या गिरिसुतया गौर्या रिक्तस्य हीनस्य अर्द्धस्य सम्पूर्त्तये सम्यक् पूरणाय पुनर्गौरीदेहसङ्गमायेति भावः निर्व्यूढः समापितः भ्रमिर्भ्रमणक्रियया भ्रमणं तेन विभ्रमः विलासो येन तथाभूताय जगतां ईशाय तुभ्यं नमः । यस्य चूडायां स्थिता ये भुजगेश्वरप्रभृतयः वासुकिप्रमुखाः तैः सह तादृक् यथा तथा भ्रमन्तीः घूर्णमानाः दिशः पश्यद्भिः अतएव भ्रमेण घूर्णमानानि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

क्रीडानटस्य प्रलयान्धकारैः
कण्ठे निपीते तव नीलकण्ठ ! ।
पृथक्कबन्धं पृथगुत्तमाङ्गं
नृत्यद्भयादैक्षत कालरात्रिः ॥१०५॥

(सर्वे नमन्ति ।)

रामः । (अन्यतो दर्शयन् ।) देवि ! द्रविड़मण्डलमौलिमण्डनमाणिक्यमणिस्तवक(ढ)मिदं काञ्चीनामधेयमायतनं मीनकेतनस्य (ण) । (सीतामपवार्य ।) पृच्छ हि,

स्वेदजलपिच्छिलाभिस्तनुभिर्यूनां च शिथिलमाश्लेषम् ।
विपुलं पुलकशलाकापटलं झटिति प्रतिकरोति ॥१०६॥

नयनानि येषां तैः अनैरिति शेषः शान्तोऽपि अत्यनिष्टोऽपि न ब्रह्मे न निर्णीतः । शार्दूलविक्रीडितं वृत्तम् ॥ १०४ ॥

क्रीडेति । हे नीलकण्ठ ! प्रलयान्धकारैः कल्पान्ततिमिरैः क्रीडानटस्य तव कण्ठे निपीते आच्छादिते इति यावत् कालरात्रिः महाभैरवी भयात् लघक् नृत्यत् कबन्धं पृथक् उत्तमाङ्गं शिरः ऐक्षत दृष्टवती । उपजातिवृत्तम् ॥ १०५ ॥

(ढ) द्रविड़ेति द्रविड़मण्डलस्य द्रविड़देशस्य मौलिमण्डनं शिरोभूषणभूतं माणिक्यमणिस्तवकम् ।

(ण) आयतनं स्थानम् । मीनकेतनस्य कामस्य ।

स्वेदेति । यूनां तरुणानां स्त्रीपुंसानां विपुलं महत् पुलकशलाकापटलं रोमोद्गमपशलाकासमूहः स्वेदजलैः घर्माम्भोभिः पिच्छिलाभिः स्निग्धाभिरिति यावत् तनुभिः शरीरैः आश्लेषम् आलिङ्गनं झटिति शिथिलं प्रतिकरोति । आर्यावृत्तम् ॥ १०६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

अभिमुखपतयालुभिर्ललाट-
श्रमसलिलैरवधूतपत्रलेखः ।
कथयति पुरुषायितं वधूनां
मृदितहिमद्युतिनिर्मलः कपोलः ॥१०७॥

सुग्रीवः । (वामतो दर्शयन् ।) इयमितः शृङ्गारदेवतागर्भगृहमवन्तिविषयसीमन्तमौक्तिकमुज्जयिनी (त) नाम राजधानी । इह हि,

कमितुरभिसृत्वरीणां गौराङ्गीणामिहेन्दुगौरीषु ।
उड्डयमानामिव रजनिषु परमीक्ष्यते छाया ॥१०८॥

अभिमुखेति । अभिमुखे पतयालुभिः पतद्भिः ललाटश्रमसलिलैः भालस्वेदजलैः अवधूता हृता पत्रलेखा पत्रावलीरचना यस्मात् तथाभूतः, मृदितः विशुद्धः निष्कलङ्क इति भावः यो हिमद्युतिश्चन्द्रः तद्वत् निर्मलः वधूनां कपोलः पुरुषायितं विपरीतरतं कथयति प्रकटयतीति यावत् । पुष्पिताग्राद्वृत्तम् ॥ १०७ ॥

(त) शृङ्गारेति । शृङ्गारस्य देवता कामदेव इत्यर्थः तस्या गर्भगृहम् अन्तःपुरभूतम् । अवन्तीति अवन्तिरेव विषयः जनपदः तस्य सीमन्तमौक्तिकं केशरचनारेखालङ्कारमौक्तिकमणिः ।

कमितुरिति । इह उज्जयिन्याम् इन्दुगौरीषु चन्द्रकिरणोज्ज्वलासु रजनिषु रात्रिषु कमितुः कामिनः सकाशे इति शेषः अभिसृत्वरीणाम् अभिसरन्तीनां गौराङ्गीणां गौरवर्णानां नायिकानाम् उड्डयमानानामिव पक्षिणामिव छाया परं केवलम् ईक्ष्यते दृश्यते जनैरिति शेषः न तु शरीरम् । यतो गौराङ्ग्यस्ताश्चन्द्रकिरणैरपहृता इति भावः । आर्याद्वृत्तम् ॥ १०८ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

अधस्तात् सौधानामिह हि चरतामिन्दुकिरणान्
घनोदञ्चच्चञ्चूपुटनिहितनेत्रा युवतयः ।
चकोराणां ज्योत्स्नारसकुतुपकौतूहलकृता-
मुदीक्षन्ते नश्यत्तिमिरविशदाभोगमुदरम् ॥१०९॥

अपिच ।

इह युवतिवदनकान्तिभिराप्यायिततुन्दपरिमृजः शेते ।
भुक्तापभुक्तहिमरुचिमरीचिरन्तःपुरचकोरः ॥११०॥

विभीषणः । इहैवायमलकायाः शाखानगरगौरवभाजि

अधस्तादिति । इह उज्जयिन्यां युवतयः सौधानां हर्म्याणाम् अधस्तात् अधोभागे इन्दुकिरणान् चन्द्रमयूखान् चरतां सेवमानानां पिबतामिति यावत्, ज्योत्स्ना एव रसः तस्य कुतुपश्चर्मघटः, कुतः क्षत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमानित्यमरः । तस्मिन् कौतूहलं कुर्वन्तीति तथोक्तानां चकोराणां पक्षिभेदानां घनं वारंवारं यथा तथा उदञ्चति विकसति चञ्चूपुटे निहितं निवेशितं नेत्रं याभिः तथोक्ताः सत्यः नश्यत् तिमिरं यस्मात् तथाभूतः विशदः निर्मलः आभोगः यस्य तादृशम् उदरं चकोराणामिति पूर्वेणान्वयः उदीक्षन्ते पश्यन्ति । शिखरिणीवृत्तम् ॥ १०९ ॥

इहेति । इह उज्जयिन्याम् अन्तःपुरचकोरः अन्तःपुरोवर्त्ती चकोरः भुक्ता अपभुक्ताः त्यक्ताः अर्द्धभुक्ता वा हिमरुचेश्चन्द्रस्य मरीचयः येन तथाभूतोऽपि युवतीनां वदनकान्तिभिः आप्यायितः स्फीतः परिमृष्ट इत्यर्थः अतएव तुन्दपरिमृजः अलसः सन् शेते स्वपिति ॥ ११० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्रिपुरदहनाधिष्ठानप्रतिष्ठो भगवान् महाकालनाथः (थ)।
अयं हि,

उद्दामभ्रमिवेगविस्तृतजटावल्लीप्रणालीपतत्-
स्वर्गङ्गाजलदण्डिकावलयितं निर्माय तत्पञ्जरम् ।
संभ्राम्यद्भुजदण्डपक्षपटलद्वन्द्वेन हंसायित-
स्त्रैलोक्यव्ययनाटिकानयनटः स्वामी जगत्त्रायताम् ॥१११॥

रामः । (प्राञ्जलिः ।)

नमस्तुभ्यं देवासुरमुकुटमाणिक्यकिरण-
प्रणालीसंभेदस्नपितचरणाय स्मरजिते ।

(थ) अलकायाः कुबेरनगर्याः । यक्षानगरस्य गौरवं भजते इति तथोक्तायाम् । त्रिपुरेति त्रिपुरदहनस्य हरस्य अधिष्ठानेन आविर्भावेन प्रतिष्ठा यस्य तथोक्तः । महाकालनाथः तदाख्या शिवमूर्त्तिः ।

उद्दामेति । उद्दामा उच्छृङ्खला या भ्रमिः नर्त्तनभ्रमणं तद्वेगेन विस्तृता प्रसृता जटावल्ली एव प्रणाली जलनिर्गमपथः तस्याः पतन्ती या स्वर्गङ्गा तस्या जलान्येव दण्डिकाः शलाकाः ताभिः वलयितं वेष्टितं तत् पञ्जरं हंसपञ्जरमिति भावः निर्माय संभ्राम्यत् भुजदण्ड एव पक्षपटलद्वन्द्वं तेन हंसायितं हंसवत् आचरितं यत् त्रैलोक्यं तस्य व्ययः नाश एव नाटिका नाट्यं तस्या नये अभिनये नटः स्वामी महाकालः जगत् त्रायतां रक्षतु । शार्दूलविक्रीडितं वृत्तम् ॥ १११ ॥

नम इति । देवासुराणां मुकुटेषु किरीटेषु यानि माणिक्यानि तेषां किरणा एव प्रणालीसंभेदाः जलनिर्गमपथनिःसृतपयांसीति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

महाकल्पस्वाहाकृतभुवनचक्रेऽपि नयने
निरोद्धुं भूयस्तत्प्रसरमिव कामं हुतवते ॥११२॥

किञ्च ।

वेगादगाद् देव ! तव त्रिनेत्र !
युग्मेतरस्मान्नयनात् कृशानुः ।
कामे तु सम्मोहनशस्त्रहस्ते
स्वाहामनुध्याय चिरं जडोऽभूत् ॥११३॥

(सर्वे नमन्ति ।)

सीताः । (विहस्य ।) अहो तत्यभवदो ससहरसेहरस्स

भावः तैः स्नपितौ स्नानं कारितौ चरणौ यस्य तथोक्ताय, महाकल्पेन महाप्रलयेन स्वाहाकृतं हुतं भुवनचक्रं जगन्मण्डलं यस्मिन् तादृशेऽपि नयने नेत्रे तृतीये इति शेषः भूयः पुनः तस्य नयनस्य भस्मीकृतभुवनस्येति भावः प्रसरं विजृम्भणं निरोद्धुमिव कामं हुतवते होमविषयं कृतवते स्मरजिते शङ्कराय तुभ्यं नमः । शिखरिणीवृत्तम् ॥ ११२ ॥

वेगादिति । हे देव ! त्रिनेत्र ! तव युग्मेतरस्मात् तृतीयादित्यर्थः नयनात् कृशानुः अग्निः वेगात् अगात् उद्बभूवेत्यर्थः निर्जगामेति यावत् । तु किन्तु सम्मोहनं नाम शस्त्रं हस्ते यस्य तथाभूते कामे स्वाहां निजपत्नीम् अनुध्याय स्मृत्वा चिरं जडः मन्थरः निष्क्रिय इति यावत् अभूत् कामबाणविद्धः सन् पत्नीं स्वाहां स्मरन् विमूढ आसीदिति भावः, अथच कामं दग्ध्वा चिरेण शान्तिमलभतेति भावः । इन्द्रवज्रावृत्तम् ॥ ११३ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कवलिदचउद्दसभुवणस्स (द) वि ण पलाइदा अक्खिभु-
भुक्खा (ध) जेण भअवं मअणो वि विआलिअग्गासी-
किदो (न)। (२९)

(सर्वे हसन्ति।)

रामः। (सविमर्शम्।) अस्य हि भगवतः
बाणीभूतपुराणपूरुषधृतिप्रत्याशया धाविते
विद्राति स्फुरदाशुशुक्षणिकणक्लान्ते शकुन्तेश्वरे।
नम्रीनम्रभुजङ्गपुङ्गवगुणव्याकृष्टबाणासन-
चिह्नस्य पुरद्रुहो विजयते सन्धानसीमाश्रमः॥११४॥

---

(२९) अहो तत्रभवतः शशधरशेखरस्य कवलितचतुर्दशभुवनस्यापि न पलायिता अक्षिभुभुक्षा येन भगवान् मदनोऽपि विकालिकग्रासी-कृतः।

(द) शशधरशेखरस्य चन्द्रशेखरस्य। कवलितेति कवलितानि ग्रस्तानि चतुर्दश भुवनानि येन तादृशस्य।

(ध) पलायिता निवृत्ता। अक्षिभुभुक्षा दृष्टिक्षुधा।

(न) विकालिकग्रासीकृतः विकाले असमये भवः विकालिकः स चासौ ग्रासश्चेति तथा विकालिकग्रासः अविकालिकग्रासो विका-लिकग्रासः कृत इति तथोक्तः। अथवा मध्याह्ने कृताहारस्य वैकाले यथा यत्किञ्चित् स्वल्पभोजनं तथा देवस्यापि सर्वजगद्भक्षितवतः कामदेहरूपस्वल्पद्रव्यभक्षणमिति भावः।

बाणीति। बाणीभूतस्य शरीभूतस्य पुराणपूरुषस्य नारायणस्य धृतौ धारणे वा प्रत्याशा तया धाविते चलिते किन्तु स्फुरद्भिः आशु-शुक्षणैः नेत्रानलस्य, वह्निः शिखावानाशुशुक्षणिरित्यमरः। कणैः क्लान्ते दहनभयात् आर्ते इति भावः शकुन्तेश्वरे पक्षिराजे गरुडे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(अन्यतो दर्शयन् ।) इयं च कलचुरिकुलनरेन्द्रसाधारणाग्रमहिषी (फ) माहिष्मती नाम चेदिमण्डलमुण्डमाला (ब) नगरी । इह हि;

आश्लेषचुम्बनरतोत्सवकौतुकादि-
क्रीडादुरोदरपणप्रतिभूरनङ्गः ।
भोगस्तु यद्यपि जये च पराजये च
यूनोर्मनस्तदपि वाञ्छति जेतुमेव ॥११५॥

विद्राति अपगच्छति सति नम्रः नतः गरुड़ापातभयादिति भावः उन्नम्रः उन्नतमस्तकः गरुड़ापगमनादिति भावः यो भुजङ्गपुङ्गवः सर्पराजः वासुकिः स एव गुणः मौर्वी तेन व्याकृष्टं यत् वाणासनं शरासनं धनुः तेन चिह्नम् अङ्कं येन तथाभूतस्य पुरद्रुहः त्रिपुरारेः सन्धानं शरसंयोजनं तदेव सीमा यस्य तथाभूतः श्रमः विजयते सर्वोत्कर्षेण वर्त्तते । त्रिपुरदाहे विष्णुः शरः वासुकिश्च गुणो वृत्त इति पुराणवार्त्ता । शार्दूलविक्रीड़ितं वृत्तम् ॥ ११४ ॥

(फ) कलचुरीति कलचुरिकुलं तदाख्यं क्षत्रियकुलं तत्र ये नरेन्द्राः राजानः तेषां साधारणी अग्रमहिषी ज्येष्ठा महिषी ।

(ब) चेदिमण्डलस्य चेदिराज्यस्य मुण्डमाला शिरोभूषणभूतेत्यर्थः ।

आश्लेषेति । अनङ्गः कामः आश्लेषः आलिङ्गनं चुम्बनं रतोत्सवकौतुकं सुरतोत्सवासक्तिः एते आदयो यस्याः तादृशी या क्रीडा सैव दुरोदरपणः द्यूतक्रीड़ायाः जयपराजययोः शुल्कं, दुरोदरो द्यूतकरे पणे द्यूते दुरोदरमित्यमरः । तस्य प्रतिभूः लग्नकः विश्वासस्थानमिति यावत्, यद्यपि जये च पराजये च भोगः सुखम् उभयसङ्गजनितमिति भावः । भोगः सुखे इत्यमरः । तु अवधारणा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विमानवेगं रूपयित्वा।) देवि!

देव्या भूमेर्मृगमदमसीमण्डनं सिद्धसिन्धोः
सम्प्रीचीयं जयति यमुना या तटैकाग्रवृत्तीन्।
प्रेमोत्कर्षादिव पितृपतेर्भ्रातुराच्छिद्य हस्ता-
दस्ताबाधं गमयति पितुर्मण्डलं चण्डभानोः॥११६॥

लक्ष्मणः। (दूरमङ्गुल्या दर्शयन्।)

त्रिपुरहरकिरीटक्रीडितैः क्रीडयद्भि-
र्भुवनममृतभानोर्बालमित्रैः पयोभिः।
सगरसुतचितायाः पावनी तोयराशे-
रियमियमवमग्ने जाह्नवी निह्नुते नः॥११७॥

र्थकमव्ययम्। तदपि तथापि यूनोः तरुणयोः स्त्रीपुंसयोः मनः जेतुमेव न तु पराजेतुं वाञ्छति अभिलषति। वसन्ततिलकं वृत्तम् ॥ ११५ ॥

देव्या इति। भूमेर्देव्याः मृगमदः कस्तूरी एव मसी तया मण्डनं भूषणं, सिद्धसिन्धोः स्वर्गङ्गायाः सम्प्रीची सहचरी इयं यमुना जयति सर्वोत्कर्षेण प्रवहति। या यमुना तटैकाग्रवृत्तीन् एकाग्रमनसा तटवर्त्तिनः जनानिति शेषः प्रेमोत्कर्षादिव स्नेहातिशयादिव भ्रातुः पितृपतेः यमस्य हस्तात् आच्छिद्य आलम्ब्य अस्ताबाधं निर्विघ्नं यथा तथा पितुः चण्डभानोः सूर्यस्य मण्डलं लोकमिति भावः गमयति प्रेरयति। गङ्गायमुनायाः सङ्गमे मृतानां यमयातना नास्ति प्रत्युत सूर्यलोकप्राप्तिरिति भावः। मन्दाक्रान्तावृत्तम् ॥ ११६ ॥

त्रिपुरेति। त्रिपुरहरस्य शम्भोः किरीटे क्रीडितैः क्रीडनैः अमृतभानोश्चन्द्रस्य बालमित्रैः बाल्यबन्धुभिः भुवनं जगत् क्रीडयद्भिः प्रीणयद्भिरिति भावः पयोभिः सलिलैः सगरसुतानां चिता अग्नि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (सहर्षम् ।)

गौरीविभज्यमानार्द्धसङ्कीर्णहरमूर्द्धनि ।

अम्ब ! द्विगुणगम्भीरे ! भागीरथि ! नमोऽस्तु ते ॥११८॥

(सीतां प्रति ।) देवि ! वन्दस्व ।

देवस्याम्बुजसम्भवस्य भवनादम्भोधिमागामुका

सेयं मौलिविभूषणं भगवतो भर्गस्य भागीरथी ।

उद्यानानपहाय विग्रहमिह स्रोतःप्रतीपानपि

स्रोतस्तीव्रतरत्वरा गमयति द्राग्ब्रह्मलोकं जनान् ॥११९॥

धानक्षेत्रं कपिलकोपानलेन दहनस्थानमिति यावत् तस्याः तोयराशेः सगरस्य पावनी पवित्रकारिणी अम्बे पुरतः इयम् इयम्, सम्मुखे द्विरुक्तिः । जाह्नवी गङ्गा नः अस्माकम् अघं पापं निहन्ति नाशयति । पुरा सगरेण राज्ञा अश्वमेधे प्रक्रान्ते देवेन्द्रस्तस्याश्वं हृत्वा कपिलसन्निधौ स्थापयामास । सगरपुत्रैश्च तदन्वेषणपरैः पृथिवीं खनद्भिः सोऽश्वः कपिलसन्निधाने दृष्टः । ततश्च तैस्ताडितो मुनिस्तान् कोपानलेन ददाह । अथ सगरप्रपौत्रेण भगीरथेन बहुभिस्तपोभिर्गङ्गां समानीय तान् प्रपितामहान् सगरसुतान् उद्धारेति पुराणवार्त्ता । मालिनीवृत्तम् ॥ ११७ ॥

गौरीति । हे अम्ब मातः भागीरथि ! गौर्या विभज्यमानम् अर्द्धं यस्य तादृशे अतएव सङ्कीर्णे स्त्रीभूते हरस्य मूर्द्धनि अर्द्धनारीश्वरमूर्त्तेरीश्वरभागस्य शिरसीत्यर्थः, द्विगुणं द्विराहत्तं गम्भीरं गाम्भीर्यं यस्याः तत्सम्बुद्धौ । अविस्तृते प्रदेशे हि नद्यः सङ्कीर्णाः किन्तु समधिकगम्भीरा भवन्तीति भावः । ते तुभ्यं नमः अस्तु, त्वां प्रणमामीत्यर्थः । अनुष्टुब्वृत्तम् ॥ ११८ ॥

देवस्येति । अम्बुजसम्भवस्य देवस्य ब्रह्मण इत्यर्थः, भवनात् अम्भोधिं समुद्रम् आगामुका आगमनशीला भगवतः भर्गस्य हरस्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सीता । (कृताञ्जलिः ।) एसा णिअस्सोतसिङ्गलासंदाणि-
दतिहुअणे (भ) मन्दाइणि ! वन्दिज्जसि । (३०)

(सर्वे नमन्ति ।)

लक्ष्मणः । (अन्यतो दर्शयन् ।)

धनाधिनाथप्रणयानुरोधा-
दभग्नकैलासनिकेतनस्य ।
देवस्य कल्पान्तकपालपाणे-
र्वाराणसी नाम पुरी पुरस्तात् ॥१२०॥

---

(३०) एषा निजस्रोतःशृङ्गलासन्दानितत्रिभुवने ! मन्दाकिनि ! वन्द्यसे ।

मौलिविभूषणं शिरोभूषणभूता सा इयं भागीरथी । इह भागीरथ्यां विग्रहं कलेवरम् अपहाय त्यक्त्वा उद्दयातान् ऊर्ध्वं गतान् स्रोतसः प्रवाहस्य प्रतीपान् प्रतिकूलगामिनोऽपि जनान्, स्रोतसो निम्नगामित्वात् ऊर्ध्वगमनसम्भवमिति विरोधालङ्कारः । अस्या अलौकिकमाहात्म्यात् तत्परिहार इति बोध्यम् । स्रोतसः अपि तीव्रतरा त्वरा यस्याः तथाभूता सती द्राक् झटिति, द्राग् झटित्यञ्जसाञ्जायेत्यमरः । ब्रह्मलोकं गमयति नयति । शार्दूलविक्रीडितं वृत्तम् ॥ ११९ ॥

(भ) निजेति निजस्रोत एव शृङ्खला तया सन्दानितं बद्धं त्रिभुवनं यया तथोक्ता तत्सम्बुद्धौ ।

धनाधिनाथेति । पुरस्तात् अग्रतः धनाधिनाथस्य कुबेरस्य यः प्रणयः तस्य अनुरोधात् अभग्नम् अत्यक्तं कैलास एव निकेतनं येन तथाभूतस्य कल्पान्ते सृष्ट्यवसाने कपालमेव पाणौ यस्य तथोक्तस्य देवस्य शम्भोः वाराणसी नाम पुरी नगरी दृश्यते इति शेषः । उपजातिवृत्तम् ॥ १२० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । (सहर्षमवलोक्य ।)

प्लवमानैरपारोऽयं जनैः संसारसागरः ।
द्वीपे वाराणसीनाम्नि विश्रान्तैरिह तीर्यते ॥१२१॥

अपि चैनां नित्यमध्यास्ते (म) भगवान् ।
कण्ठच्छायनिपीतपन्नगफणारत्नौघमात्रस्थिती
हारे निर्भयपार्वतीभुजलताबन्धोल्लसत्कन्धरः ।
तत्सर्वाङ्गविरामवामनतमैरेव स्वरैः सामगं
बिभ्रद् ब्रह्मशिरः शिवाय जगतामेणाङ्कचूडामणिः ॥१२२॥

(अन्यतो दर्शयन्, सीतां प्रति ।) देवि ! दृश्यतामितः ।

प्लवमानैरिति । अयं संसार एव सागरः प्लवमानैः सन्तरद्भिः जलैः अपारः पारयितुमशक्यः तर्त्तुमशक्य इति यावत् । किन्तु इह वाराणसीनाम्नि द्वीपे विश्रान्तैः सद्भिः तीर्यते तर्त्तुं शक्यते । वाराणसी मुक्तिक्षेत्रमिति भावः । अनुष्टुब्वृत्तम् ॥ १२१ ॥

(म) एनां वाराणसीम् । अध्यास्ते अधितिष्ठति ।

कण्ठच्छायेति । कण्ठस्य छाया कण्ठच्छायं कालकूटभक्षणात् नीलगलप्रतिबिम्बमित्यर्थः, तेन निपीतः निःशेषेण आच्छादितः पन्नगस्य भुजङ्गस्य वासुकेरिति भावः फणारत्नानां ओघः समूहः तन्मात्रेण स्थितिर्यस्य तथाभूते हारे सति निर्भयायाः पार्वत्याः भुजलताबन्धेन उल्लसन्ती कन्धरा ग्रीवा यस्य तथोक्तः अन्यदा शिरोरत्नदीप्त्या वासुकीसद्भावज्ञानेन भयमिति भावः । सर्वेषाम् अङ्गानां विरामेण क्षयेण वामनतमैरेव अतिनीचैरेव स्वरैः सामगं सामवेदगायनं तत् ब्रह्मणः शिरः मुखं बिभ्रत् दधानः एणाङ्कचूडामणिः चन्द्रशेखरः जगतां शिवाय मङ्गलाय अस्त्विति शेषः । शार्दूलविक्रीडितं वृत्तम् ॥१२२॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नवोन्मीलन्मौर्वीकिणनिकरकार्कश्यसदय-
प्रदत्तस्त्वत्पाणौ किमपि निविड़ं पीड़यति मे ।
कृतार्थोऽयं यस्यां समजनि करः सैव पुरतः
पुरी पूर्वेषां ते नयनमियमालानयति नः ॥१२१॥

सीता । (सस्मितानुरागं साचीकृताक्षी रामं पश्यन्ती पुरीं प्रति ।) अम्ब मिहिले ! वन्दिज्जसि । गुरुजणे वि वन्दणं मे विण्णवेसि । (३१)

रामः । (सुपीवविभीषणौ प्रति ।) वयस्यौ ! इयं सा जानकीं प्रजायमानाया (य) भगवत्या भूमेरिष्टमन्दिरम् (र) मिथिला ।

---

(३१) अम्ब मिथिले ! वन्द्यसे । गुरुजनेऽपि वन्दनं मे विज्ञापयिष्यसि ।

नवेति । यस्याः पुर्यां नवं यथा तथा उन्मीलन् उद्भवन् मौर्वीकिणनिकरः मौर्वी हरधनुर्गुणः तस्याः किणकिनरः व्रणावुदसमूहः तस्य कार्कश्यात् काठिन्यात् सदयं यथा तथा प्रदत्तः त्वत्पाणिं पहीतुमिति शेषः मे मम अयं करः तव पाणौ करे किमपि अनिर्वचनीयं यथा तथा निविड़ं दृढ़ं पीड़यति सति कृतार्थः समजनि सञ्जातः, सैव इयं ते तव पूर्वेषां पूर्वपुरुषाणां पुरी नगरी मिथिलेति यावत् पुरतः अग्रतः नः अस्माकं नयनम् आलानयति बध्नाति तत्र दृष्टिर्लगतीति भावः । शिखरिणीवृत्तम् ॥ १२२ ॥

(य) प्रजायमानायाः जनयन्त्याः, अन्तर्भूतण्यर्थोऽयं प्रयोगः ।

(र) अरिष्टमन्दिरं सूतिकागृहम्, अरिष्टं सूतिकागृहमित्यमरः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सुग्रीवविभीषणौ । (सकौतुकसस्मितम् ।) यत्र भगवतः पार्वतीजीवितेश्वरस्य धनुर्धनुरन्तेवासिनावजगवभार्गवौ भञ्जतो भवतः सहपांशुक्रीडादीर्घसखीयं वीरलक्ष्मीः (ल)।

रामः । (सलज्जस्मितमन्यतो दर्शयन् सीतां प्रति ।) देवि ! इयं पुनस्ततोऽपि पुरस्ताच्चम्पा नाम गौड़ानां विनयमधुरशृङ्गारविभ्रमरमणीया मकरकेतनकुमारव्रतचर्यातपोवनमिव (व) राजधानी । (अपवार्य च ।) इह हि,

रोमाञ्चोच्छ्वसदङ्गसन्धिनिविड़ैरालिङ्गनैर्यामिनीं
ग्रैषीकृत्य विहस्यते निजरहस्यातुर्यमेणीदृशः ।
यष्टिस्थे सपदि प्रदीपमुकुले दग्ध्वा दशां मल्लिका-
तैले प्रज्वलति स्तृणोति वसतीर्यन्नाभिदग्धं तमः ॥१२४॥

(ल) पार्वतीजीवितेश्वरस्य गौरीनाथस्य । धनुरिति धनुश्च धनुरन्तेवासी च धनुर्वेदशिष्यश्च तौ । अजगवेति अजगवं पिनाकः, पिनाकोऽजगवं धनुरित्यमरः । भार्गवः परशुरामः तौ । भञ्जतः भग्नौ कुर्वतः भवतः तव । सहपांशुक्रीड़ायां सहधूलिखेलने दीर्घसखी चिरसहचरी । वीरलक्ष्मीः वीरश्रीः ।

(व) विनयेति विनयेन शिष्टाचारेण मधुरः मनोहरः यः शृङ्गारविभ्रमः तेन रमणीया । मकरकेतनेति मकरकेतन एव कुमारः तस्य व्रतचर्यायाः नियमानुष्ठानस्य तपोवनमिव विनयमधुरशृङ्गारविभ्रमशालित्वादिति भावः ।

रोमाञ्चेति । एणीदृशः मृगनयनाः कामिन्यः रोमाञ्चेन उच्छ्वसता उद्भवता अङ्गसन्धिना निविड़ैः सान्द्रैरिति भावः आलिङ्गनैः यामिनीं रजनीं ग्रैषीकृत्य किञ्चिदवशिष्टां कृत्वा निजं रहस्यातुर्यं निगूढ़निधुवनवैदग्धं विहस्यते प्रकटयन्ति । यत् यतः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लक्ष्मणः । (अपे दर्शयन् ।) एते भगवत्यौ भूमिदेवानां मूलायतनमन्तर्वेदीं पूर्वेण कृष्णागुरुमलयजमयमङ्गराग-मिवान्योन्यस्य (ग) कुर्वाणे कलिन्दकन्यामन्दाकिन्यौ (घ) संगच्छेते ।

हिमालयोत्सङ्गसदाधिवासतो
जातेव पाण्डुः प्रतिभाति जाह्नवी ।
निदाघभानोः पितुरङ्कलालनात्
कृतेव कालौ यमुना च दृश्यते ॥१२५॥

सपदि झटिति यष्टिस्थे प्रदीपाधारदण्डवर्त्तिनि प्रदीपसुकुले प्रदीपाङ्कुरे दशां वर्त्तिं दग्ध्वा मल्लिकातैले मल्लिकापुष्पवासितगन्धतैले इत्यर्थः प्रज्वलति सति तमः नाभिदग्धं नाभिप्रभायां सत् वसतोः वेश्मानि, वसती रात्रिवेश्मनोरित्यमरः । स्तृणोति आच्छादयति । समस्तरजनीं दशायां दग्धायां मल्लिकाभ्यन्तरे दीपे प्रज्वलति सति गृहाभ्यन्तरे उपरिभागे एव आलोकः अधोभागे पुनरन्धकार इति समस्तरजनीं व्याप्य कामिनीनां क्रीडाचातुर्यं प्रकटितमिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १२४ ॥

(ग) भूमिदेवानां ब्राह्मणानां मूलायतनं मूलस्थानम् । अन्तर्वेदीं तदाख्यं प्रदेशं, पूर्वेण इति योगे द्वितीया । कृष्णागुरु कृष्णवर्णम् अगुरु गन्धद्रव्यविशेषः मलयजं चन्दनं तन्मयम् अङ्गरागम् अङ्ग-विलेपनम् । अन्योन्यस्य परस्परस्य ।

(घ) कालिन्देति कालिन्दकन्या कलिन्दः सूर्यः तस्य कन्या यमुनेत्यर्थः, मन्दाकिनी गङ्गा ते ।

हिमालयेति जाह्नवी गङ्गा हिमालयस्य उत्सङ्गे क्रोडे सदा अधिवासतः सततावस्थानात् पाण्डुः शुभ्रा जातेव प्रतिभाति । यमुना

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(विभाव्य च ।)

बलिद्विषः पादनखांशुराजिभिः
स्मरारिमौलीन्दुमरीचिवीचिभिः ।
हिमाद्रिनिःस्यन्दरसैः पदे पदे
विवर्द्धते वैबुधसैन्धवी रुचिः ॥१२६॥

अपिच ।

प्रयागः सर्वतीर्थेभ्यस्तीर्थमुच्चैस्तरामयम् ।
संसाराब्धेः परं पारमिच्छद्भिरवलोक्यते ॥१२७॥

रामः । (सादरम् ।) किमुच्यते ।

सत्यमेव प्रयागोऽयं मोक्षद्वारमुदीर्य्यते ।
देव्यौ यस्याभितो गङ्गायमुने वहतः श्रियम् ॥१२८॥

च पितुः निदाघभानोः उष्णरश्मेः अङ्के क्रोडे लालनात् हेतोः काली कृष्णवर्णा कृतेव दृश्यते । अनवरतसूर्य्यकिरणसन्तापात् कृष्णत्वमिति भावः । वंशस्थविलं वृत्तं, वदन्ति वंशस्थविलं जतौ जरा-विति तल्लक्षणात् ॥ १२५ ॥

बलिद्विष इति । बलिद्विषः वामनदेवस्य पादनखानाम् अंशुराजिभिः किरणसमूहैः, स्मरारेर्हरस्य यः मौलीन्दुः शिरोभूषणं चन्द्रः तस्य मरीचिराजिभिः मयूखनिचयैः तथा हिमाद्रेः निःस्यन्द, प्रस्रवणं तस्य रसैः पदे पदे प्रतिपदं वैबुधसैन्धवी देवनदीसम्बन्धिनी रुचिः कान्तिः विवर्द्धते वृद्धिं गच्छति ॥ १२६ ॥

प्रयाग इति । अयं प्रयागः सर्वतीर्थेभ्यः सर्वेभ्यः पुण्यक्षेत्रेभ्यः उच्चैस्तराम् अतिशयेन उच्चैः तीर्थम् । इह प्रयागे तिष्ठन्तीति तथोक्तैः जनैः संसाराब्धेः भवसागरस्य परं पारम् अवलोक्यते दृश्यते । अवस्था विमुक्ता भवन्तीति भावः । अनुष्टुब्वृत्तम् ॥१२७॥

सत्यमिति । अयं प्रयागः मोक्षस्य निर्वाणस्य द्वारम् उदीर्य्यते

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(सीतां प्रति ।) देवि ! प्रणम्यतामितः ।

श्यामो नाम वटः सोऽयमेतस्याद्भुतकर्मणः ।
छायामप्यधिवास्तव्यैः परं ज्योतिर्निषेव्यते ॥१२९॥

(सर्वे प्रणमन्ति ।)

रामः । (विमानवेगनाटितकेन सहर्षम् ।)

यूपाङ्कुरप्रकरदन्तुरतीरलेखा-
संख्यायमानमनुसन्ततिसप्ततन्तुः ।
इक्ष्वाकुराजमहिषीपदपद्मलक्ष्मी-
र्देव्या भुवो भगवती सरयूरियं नः ॥१३०॥

कीर्त्यते सत्यमेव यथार्थमेव । देव्यौ गङ्गायमुने यस्य प्रयागस्य अभितः उपरि स्थिरं शोभां वहतः गच्छतः । अनुष्टुब्वृत्तम् ॥१२८॥

श्याम इति । सः प्रसिद्धः अयं श्यामो नाम वटः दृश्यते इति शेषः । अद्भुतम् आश्चर्यं कर्म यस्य तथोक्तस्य एतस्य अस्य छायामपि अधिवास्तव्यैः अधिवासिभिः जनैः परं ज्योतिः तेजः निषेव्यते प्राप्यते छायानिषेवणेन शैत्यप्राप्तिर्भवति अत्र तु तेजःप्राप्तिरिति विरोधालङ्कारः अतएवाश्चर्यकर्मत्वमस्य, ब्रह्मप्राप्तिरिति परिहार इति बोध्यम् । अनुष्टुब्वृत्तम् ॥ १२९ ॥

यूपाङ्कुरेति । यूपाः यज्ञीयपशुबन्धनदारुविशेषाः ते एव अङ्कुराः प्ररोहाः तेषां प्रकरेण समूहेन दन्तुरा उद्गतदन्ता इव याः तीरलेखाः तटसीमानः ताभिः संख्यायमानाः एकद्वित्रादिगणनाविषयीक्रियमाणाः मनुसन्ततीनां मनुवंशीयनृपतीनां सप्ततन्तवः यज्ञाः यस्याः तथोक्ता, भुवः पृथिव्या देव्याः इक्ष्वाकुराजमहिषीपदस्य पद्मलक्ष्मीः पद्मवसनश्रीः इयं भगवती नः अस्माकं सरयूः नाम नदी दृश्यते इति शेषः । वसन्ततिलकं वृत्तम् ॥ १३० ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इयं च भगवत्ययोध्या
गगनगतास्मदुदीक्षणकुतूहलोत्तानपृथुलनिःस्यन्दैः ।
उन्नालस्थलकुवलयवनमिव जनलोचनैः क्रियते ॥१३१॥

(सर्वे नमस्यन्ति ।)

सुग्रीवविभीषणौ । (निर्वर्ण्य ।)
वृन्तैरिव क्रतुसहस्रभुवां फलाना-
मालोक्य यूपनिकरैर्मधुरामयोध्याम् ।
राज्ञामिह प्रवसतां च विचिन्त्य सिद्धिं
देवः शचीसहचरोऽपि न रोचते नः ॥१३२॥

रामः । (तौ प्रति ।) वयस्यौ !

गगनेति । गगनगतानां विमानवर्त्तिनामिति भावः अस्माकम् उदीक्षणे ऊर्ध्वनिरीक्षणे यत् कुतूहलं तेन उत्तानानि उन्नमितानि पृथुलानि विस्तारितत्वात् विशालानि निःस्यन्दानि निश्चलानि च तैः जनानां लोचनैः नेत्रैः उन्नालानां उन्नतनालानां स्थलकुवलयानां स्थलीयनीलोत्पलानां वनमिव क्रियते, अयोध्येति गद्यस्थं कर्मकारकम् ॥ १३१ ॥

वृन्तैरिति । क्रतुसहस्रभुवां यज्ञसहस्रसम्भूतानां, सम्प्रतन्तुर्मखः क्रतुरित्यमरः । फलानां वृन्तैः यूपनिकरैः यूपसङ्घैः मधुरां मनोहारिणीम् अयोध्याम् आलोक्य इह अयोध्यायां प्रवसतां राज्ञाम् इक्ष्वाकुवंशीयानामिति शेषः सिद्धिं जन्मसाफल्यं विचिन्त्य च शचीसहचरः देवः इन्द्रोऽपि नः अस्मभ्यं न रोचते, न तं कृतार्थं गणयाम इति भावः । वसन्ततिलकं वृत्तम् ॥ १३२ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ईदृशाः प्रागजायन्त राजानो यदिहान्वये।
तद्वशिष्ठचरोरैन्द्राबार्हस्पत्यस्य वैभवम् ॥१३३॥

(पुरोऽवलोक्य सहर्षोल्लासम्।) कथं स एवायं भगवान् प्रकल्पितात्मदभिषेकसंभारो भरतशत्रुघ्नाभ्यां सह वशिष्ठो मां प्रतीक्षमाणस्तिष्ठति। (पुष्पकं प्रति।) विमानराज! समवतीर्य्यतामस्यां ककुत्स्थकुलोपकारिकायाम् (स)।

(सर्वे विमानावतरणं नाटयन्ति।)

(ततः प्रविशति पटाक्षेपेण (ह) वशिष्ठो भरतशत्रुघ्नौ च।)

वशिष्ठः।

चक्रे लङ्केश्वरपरिभवच्छेदनिष्णातदोष्णा
यद्वत्सेन त्रिजगदभयं तन्न चित्रीयते नः।
बालेनाजौ विगलितवतो वीर्य्यनिर्य्यासराशे-
र्यत् पिण्याकः स मुनिरसुना निर्मितो जामदग्न्यः ॥१३४॥

ईदृशा इति। इह अस्मिन् अन्वये वंशे यत् ईदृशाः महात्मान इति भावः राजानः प्राक् पूर्वम् अजायन्त, तत् इन्द्रश्च बृहस्पतिश्च तौ इन्द्राबृहस्पती तौ देवते यस्य तथाभूतस्य वशिष्ठचरोः वशिष्ठदेवस्य मन्त्रसंस्कृतपायसविशेषस्य वैभवं सामर्थ्यम्। वशिष्ठस्य मन्त्रप्रभावेणैव मत्पूर्वजाः महतीं सिद्धिं प्रापुरिति भावः। अनुष्टुब्वृत्तम् ॥१३३॥

(स) ककुत्स्थकुलेति ककुत्स्थकुलस्य उपकारिका राजगृहं तस्यां, राजसदनमुपकार्य्योपकारिकेत्यमरः।

(ह) पटाक्षेपेण पटस्य जवनिकाया आक्षेपेण अपसारणेन।

चक्रे इति। लङ्केश्वरस्य रावणस्य परिभवः पराजयः छेदः न केवलं परिभवः विनाशश्चेत्यर्थः ताभ्यां निष्णातः ख्यातः दोर्वा दोर्यस्य तथाभूतेन वत्सेन रामेण त्रिजगत् त्रिभुवनं यत् अभयं भयशून्यम्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(राममवलोक्य सहर्षम् ।)

भल्लावलूनदशकन्धरकण्ठपीठ-
सीमासमाप्तभुजविक्रमकर्मकाण्डः ।
दिष्ट्या जगद्विजयमाङ्गलिकैर्यशोभिः
सोऽयं पुनर्नयनवर्त्मनि रामचन्द्रः ॥१२५॥

रामः । (ससंभ्रममुपसृत्य वशिष्ठपादावुपगृह्य च ।)

रघुब्रह्मक्रियाचार्यं पुराणब्रह्मवादिनम् ।
ब्रह्मर्षिं ब्रह्मजन्मानमेष रामोऽभिवादये ॥१२६॥

अगदमिति पाठे अगदं रोगशून्यं चक्रे कृतं, तत् नः अस्माकं न चित्रीयते न चमत्कारोति, भुजबाहुप्रकोष्ठा दोरित्यमरः । बालेन शिशुना अमुना रामेण आजौ युद्धे स मुनिः जामदग्न्यः परशुरामः विगलितवतः वीर्यसारसमूहस्य यत् पिण्डाकारः कल्कः निर्मितः कृतः निर्वीर्यः कृत इति भावः तत् परं चित्रीयते इत्यन्वयः । मन्दाक्रान्ता-वृत्तम् ॥ १२४ ॥

भल्लेति । भल्लेन अस्त्रविशेषेण अवलूनं छिन्नं यत् दशकन्धरस्य रावणस्य कण्ठपीठं तस्य सीमा अवसानं तया समाप्तः शेषतां गतः भुजयोर्विक्रमस्य कर्मकाण्डः कर्मसमूहः यस्य तथाभूतः, जगतां विजयेन माङ्गलिकैः मङ्गलमयैः यशोभिः उपलक्षित इति विशेषणे तृतीया । सोऽयं रामचन्द्रः दिष्ट्या भाग्येन पुनः नयनयोः वर्त्मनि पथि वर्त्तते इति शेषः । वसन्ततिलकं वृत्तम् ॥ १२५ ॥

रघुति । रघूणां ब्रह्मक्रिया वैदिककर्मानुष्ठानं तस्य आचार्यः गुरुः तं, पुराणब्रह्मवादिनं प्राचीनं वेदविदं ब्रह्मजन्मानं ब्रह्मपुत्रं, ब्रह्मर्षिं वशिष्ठम् एष रामोऽहं अभिवादये प्रणमामि । अनुष्टुब्-वृत्तम् ॥ १२६ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वशिष्ठः । (सादरमालिङ्ग्य ।) वत्स रामभद्र ! का तुभ्यमाशीः (च) ।

आदाय प्रतिपक्षकीर्त्तिनिवहान् ब्रह्माण्डभूषान्तरे
निर्विघ्नं धमता नितान्तमुदितैः स्वैरेव तेजोऽग्निभिः ।
तत्तादृक्पुटपाकशोधितमिव प्राप्तं गुणोत्कर्षिणा
पिण्डस्थं च महत्तरं च भवता निःचारतारं यशः ॥१३७॥

अपिच ।

त्रिजगदङ्गनलङ्घनजाङ्घिकै-
स्तव यशोभिरतीव पवित्रिताः ।
प्रथमपार्थिवपुङ्गवकीर्त्तयो
विबुधसिन्धुजलैरिव सिन्धवः ॥१३८॥

(च) आशीः आशीर्वादः प्रयुज्यते भवेति शेषः ।

आदायेति । ब्रह्माण्डमेव भूषा आवर्त्तनघटिका, तेजसावर्त्तनी भूषेत्यमरः । तस्या अभ्यन्तरे मध्ये प्रतिपक्षाणां शत्रूणां कीर्त्तिनिवहान् यशोराशीन् नितान्तम् अत्यन्तमुदितैः स्वैरेव निजैरेव तेजोऽग्निभिः प्रतापानलैः निर्विघ्नं यथा तथा धमता पूरयता गुणोत्कर्षिणा गुणोत्कर्षशालिना भवता तत् प्रसिद्धं तादृक् तथाविधं पुटपाकः पुटे स्वत्तिकामवावरणपात्रविशेषे पाकः तेन शोधितमिव दृषीकृत्य उज्ज्वलीकृतमिव पिण्डस्थं एकीभूतञ्च महत्तरञ्च अतिमहच्च निःचारतारं निःचारं निर्दोषं तारम् उज्ज्वलञ्च यशः प्राप्तम् अतः का नाम आशीः तुभ्यं प्रदीयते, आशिषां सर्वस्यैव फलस्य भवता प्राप्तत्वादिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १३७ ॥

त्रिजगदिति । त्रिजगत् त्रिभुवनमेव अङ्गनम् अजिरं तस्य लङ्घने जाङ्घिकैः प्रशस्तजङ्घावद्भिः द्रुतगामिभिरिति यावत् तव यशोभिः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तथापीदमस्तु ·

जगदालोकधौरेयौ सूर्याचन्द्रमसाविव ।
पुत्रौ गोत्रस्य गोप्तारौ जनय स्वभुजाविव ॥१३९॥

(सीता मुनिं वन्दते ।)

वशिष्ठः । वत्से ! जनकवंशसुवासिनि ! (क) युवयोः साधारणीमेव रामस्य वयमाशिषमवोचाम ।

सीता । (सहर्षमात्मगतम् ।) अम्मो णिस्सावत्तअं मे अज्ज उत्तस्स घरणित्तणं हुविस्सदि । (३२)

लक्ष्मणः । सगरगोत्रगुरो मैत्रावरुणे ! सौमित्रिरभिवादयते ।

---

(३२) अम्मो निःसागत्यं मे आर्यपुत्रस्य गृहिणीत्वं भविष्यति ।

विबुधानां देवानां सिन्धुः मन्दाकिनी तस्या जलैः सिन्धवः समुद्रा इव, देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियामित्यमरः । प्रथमपार्थिवानाम् आदिनृपतीनां पुङ्खाः श्रेष्ठाः सगरादयः तेषां कीर्त्तयः यशांसि अतीव अतिमात्रं पवित्रिताः पवित्राः कृताः । द्रुतविलम्बितं वृत्तं, द्रुतविलम्बितमाह नभौ भराविति तल्लक्षणात् ॥ १३८ ॥

जगदिति । जगताम् आलोके उद्द्योते धौरेयौ धुरन्धरौ, धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धरा इत्यमरः । सूर्याचन्द्रमसाविव स्वभुजाविव गोत्रस्य कुलस्य गोप्तारौ रक्षितारौ पुत्रौ पुत्रद्वयं जनय उत्पादय । अनुष्टुब्वृत्तम् ॥ १३९ ॥

(क) जनकेति जनकवंशे सुवासिनी सुष्ठु वासकारिणी तत्सम्बुद्धौ, चिरस्थी तु सुवासिनीत्यमरः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वशिष्ठः । वत्स लक्ष्मण ! आशिषां विषयमतिक्रम्य वर्त्तसे ।

वीरमिन्द्रजितं जित्वा दिष्ट्या वर्द्धयतो जगत् ।
अभवे दक्षिणीयस्ते गीर्वाणग्रामणीरपि ॥१४०॥
तथापि यूयं सर्वेऽपि द्वौ द्वौ जनयतात्मजौ ।
यैरादिराजवंशोऽयमष्टशाखः प्ररोहति ॥१४१॥

रामः । (सहर्षं कृताञ्जलिः ।) भगवन् ! परमनुगृहीतमिक्ष्वाकुकुलम् ।

भरतः । (रामं प्रति ।) आर्य ! शून्यभवनप्रकोष्ठैकरक्षापदाति(ख)र्भरतः प्रणमति ।

रामः । (सहर्षमालिङ्ग्य ।) वत्स भरत !

आत्मानमिन्दुकरमेदुरचन्द्रकान्त-

वीरमिति । वीरम् इन्द्रजितं जित्वा दिष्ट्या भाग्येन जगत् वर्द्धयतः ते तव गीर्वाणानां देवानां ग्रामणीः अधीश्वरः इन्द्रः इत्यर्थः अभवे दक्षिणीयः दत्ताभयदक्षिणः इति यावत् । अनुष्टुब्वृत्तम् ॥१४०॥

तथापीति । तथापि भवतः आशीर्विषयातिक्रमणेऽपीत्यर्थः यूयं सर्वेऽपि द्वौ द्वौ आत्मजौ पुत्रौ जनयत उत्पादयत । यैः आत्मजैः अयम् आदिराजस्य मनोः वंशः अष्टौ शाखा यस्य तथाभूतः अष्टधा विभक्तः सन्नित्यर्थः प्ररोहति वर्द्धते । अनुष्टुब्वृत्तम् ॥ १४१ ॥

(ख) शून्येति शून्यं भवता विरहितमिति भावः यत् भवनं गृहं तस्य प्रकोष्ठः बाह्यप्रदेशः द्वारसन्निहितोपवेशनस्थानमिति यावत् तस्य एका केवला रक्षा तस्याः पदातिः ।

आत्मानमिति । इन्दोश्चन्द्रस्य करेण किरणेन मेदुरः स्निग्धः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्तम्भोज्ज्वलं वितर मे हृदि निर्वृणोमि ।
न भ्रातृसङ्गमसुखासिकया जहाति
विष्णोः सकौस्तुभमुरस्यपलापि लक्ष्मीः ॥१४२॥

भरतः । (सीतां प्रति ।) देवि ! प्रणमामि ।

सीता । वच्छ भरद ! उह्णकरकिरणणिउरम्बचुम्बिअकमलखण्डं विअ चिरं मे णअणं आणन्देहि (ग) । (३३)

(लक्ष्मणो भरतं वन्दते ।)

भरतः ।

---

(३३) वत्स भरत ! उष्णकरकिरणनिकुरम्बचुम्बितकमलखण्डमिव चिरं मे नयनमानन्दय ।

यस्चन्द्रकान्तस्तम्भः तद्वत् उज्ज्वलः तम् आत्मानं स्वदेहं मे मम हृदि वक्षसि वितर अर्पय, निर्वृणोमि निर्वृतिं शीतलतामिति भावः लभे इत्यर्थः, सुखीभवामीति यावत् । तथाहि, लक्ष्मीः चपलापि चञ्चलापि भ्रातृसङ्गमसुखासिकया भ्रात्रा सङ्गमः भ्रातृसङ्गमः तेन या सुखासिका सुखावस्थानं सुखानुभव इति यावत् तया हेतुना विष्णोर्नारायणस्य सकौस्तुभं कौस्तुभाख्यरत्नभूषितमित्यर्थः उरः वक्षःस्थलं न जहाति न त्यजति । कौस्तुभस्य लक्ष्म्या भ्रातृत्वमेकसमुद्रसमुद्भूतत्वादिति भावः । वैधर्म्येण दृष्टान्तालङ्कारः । तदुक्तं दर्पणे, दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनमिति । वसन्ततिलकं वृत्तम् ॥ १४२ ॥

(ग) उष्णकरेति उष्णकरस्य सूर्य्यस्य किरणनिकुरम्बेन मयूखनिचयेन चुम्बितं स्पृष्टं कमलखण्डमिव पद्मशकलमिव, यथा सूर्य्यदर्शनेन कमलमानन्दमनुभवति तथा मम नेत्रं त्वद्दर्शनेनेति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वत्स लक्ष्मण ! सोत्कण्ठं चिरात् परिरभस्व माम् ।
भ्रातुरङ्गानि चन्दनेष्वप्यरोचकी ॥१४३॥

(निर्भरं परिरभ्य ।) हन्त रघुवंशयशस्तड़ागयूपदण्डेन (घ) लक्ष्मणबाहुना परिचिप्यमाण(ङ)शिरेण शीतलीकृतोऽस्मि ।

इन्दोः कलाकलापेन पङ्क्तिक्रमनिवेशिना ।
सर्वदुःखापनोदाय सौदर्याणां भुजाः कृताः ॥१४४॥

शत्रुघ्नः । (रामं प्रति ।) आर्य ! पादुकाभृत्यानुभृत्यः (च) शत्रुघ्नः प्रणमति ।

वत्सेति । हे वत्स लक्ष्मण ! सोत्कण्ठं त्वदालिङ्गनोत्सुकमिति भावः मां चिरात् बहुकालात् परं दीर्घकालं वा परिरभस्व आलिङ्ग, भ्रातुः अङ्गानि भ्रातुरालुः अद्दधानः अनुरागेण दधान इति यावत् जनः चन्दनेषु अपि अरोचकी अनभिलाषी भवतीति शेषः भ्रातुरङ्गसंसर्गस्य चन्दनरससंसर्गादपि सुखकरत्वादिति भावः । अनुष्टुब्वृत्तम् ॥ १४३ ॥

(घ) हन्त हर्षे । रघुवंशेति रघुवंशस्य यश एव तड़ागः सरोवरं तस्य यूपदण्डः रैकाठ इति प्रसिद्धः तेन ।

(ङ) परिचिप्यमाणः आवेष्ट्यमानः आलिङ्ग्यमान इति यावत् ।

इन्दोरिति । पङ्क्तिक्रमेण श्रेणीक्रमेण निविशतीति तथोक्तेन इन्दोश्चन्द्रस्य कलाकलापेन कलासमूहेन सर्वेषां दुःखानाम् अपनोदाय निराकरणार्थं सौदर्याणां भ्रातॄणां भुजाः कृताः निर्मिताः विधात्रेति शेषः । अत्र विभावजानामपि सौदरत्वेनाभिधानं निरतिशयसौभ्रातृद्योतनायेति बोध्यम् । अनुष्टुब्वृत्तम् ॥ १४४ ॥

(च) पादुकेति पादुकाभृत्यः भरतः तस्य अनुभृत्यः कनिष्ठभृत्य इत्यर्थः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रामः । गाढमालिङ्ग्य ।) कथमाद्यन्त्या लक्ष्मणमनुभवामि (ख) । (अपवार्य सीतायै दर्शयन् ।)

एतत्तदेव मुखमक्षतचन्द्रबिम्ब-
संवादकमवलोकय लक्ष्मणस्य ।
गीर्वाणवारणकरार्गलकर्कशौ मां
तावेव लक्ष्मणभुजौ तु परिष्वजाते ॥१४५॥

(शत्रुघ्नः सीतां प्रणमति ।)

सीता । तेलोक्कसल्लुद्धरणगोरविदेहिं चरिदेहिं लक्खणसरिसो होहि । वच्छ सत्तुहण ! अज्जाजणो कहिं । (३४)

---

(३४) त्रैलोक्यशल्योद्धरणगौरवितैश्चरितैर्लक्ष्मणसदृशो भव । वत्स शत्रुघ्न ! आर्यजनः कुत्र ।

(ख) आद्यन्त्या पुनरपीति यावत् । शत्रुघ्नस्य लक्ष्मणानुजत्वेन लक्ष्मणालिङ्गनमिव शत्रुघ्नालिङ्गनमिति भावः ।

एतदिति । एतत् तदेव अक्षतं परिपूर्णं यत् चन्द्रबिम्बं चन्द्रमण्डलं तस्य संवादकम् अनुरूपं लक्ष्मणस्य मुखम् अवलोकय पश्य । यादृशो लक्ष्मणस्तादृश एव शत्रुघ्न इति भावः । गीर्वाणवारणस्य ऐरावतस्य करः शुण्ड एव अर्गलं कवाटप्रसरणप्रतिबन्धार्थं लौहमयः काष्ठमयो वा दण्डविशेषः तद्वत् कर्कशौ कठिनौ तावेव लक्ष्मणस्य भुजौ बाहू मां परिष्वजाते तु आलिङ्गतः किम् । वसन्ततिलकं वृत्तम् ॥ १४५ ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शत्रुघ्नः । कृतमङ्गलोपचारो मध्यमाम्बाभवने (ज) भवतीं प्रतीक्षते । (उपसृत्य लक्ष्मणं प्रणमति ।)

लक्ष्मणः । (सहर्षमालिङ्ग्य ।) वत्स ! दिष्ट्या दीर्घायुषि त्वयि दीप्यमाने न वयमेकाकिनमार्यभरतं परित्यज्य गताः ।

रामः । (सुमित्रां प्रति ।) भगवन् ! एतौ लङ्काकिष्किन्धयोरधिपती विभीषणसुग्रीवौ भगवन्तं प्रणमतः ।

वशिष्ठः । विकर्त्तनपुलस्त्यकुलकीर्त्तितोरणमालावलम्बनस्तम्भाविमौ (झ) चिरस्य भूयास्ताम् ।

रामः । (भरतं प्रति ।) वत्स ! वन्दस्व महात्मानावेतौ पौलस्त्यसावित्रौ (ञ) ।

(भरतशत्रुघ्नविभीषणसुग्रीवा मिथो यथोचितमाचरन्ति ।)

वशिष्ठः । (सहर्षम् ।) दिष्ट्या चतुर्दशभिः परिवत्सरैः

(ज) कृतेति कृतः अनुष्ठितः मङ्गलोपचारः माङ्गलिकसमाधानं येन तथाभूतः । मध्यमा अम्बा माता केकयी तस्या भवनं गृहं तस्मिन् ।

(झ) विकर्त्तनेति विकर्त्तनः सूर्यः पुलस्त्यः देवर्षिविशेषः तयोः कुलयोः कीर्त्तिरेव तोरणमाला बहिर्द्वारस्थक् तस्या अवलम्बनाय धारणाय स्तम्भौ तत्स्वरूपावित्यर्थः विकर्त्तनकुलतोरणस्तम्भः सुग्रीवः, पुलस्त्यकुलतोरणस्तम्भो विभीषण इति भावः ।

(ञ) पौलस्त्यसावित्रौ पुलस्त्यनन्दनः विभीषणः, सवितः सूर्यस्य अपत्यं पुमान् सावित्रः सुग्रीवः तौ ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पुनः समुदयमानं दशरथकुटुम्बमीक्षामहे (ट)। (सविमर्श-स्मितम् ।)

जेतारं दशकन्धरस्य जितवानेवार्जुनं भार्गव-
स्तं रामो यदि काकपक्षकधरस्तत् पूरितेयं कथा ।
अर्घं कल्पयतस्तु बालचरितात्तत्प्रक्रियागौरवा-
दन्येयं कविता तथापि जगतस्तोषाय वर्त्तिष्यते ॥१४६॥

(रामं प्रति ।) वत्स! माङ्गलिकलग्नमतिक्रामति (ठ)।

तदिदं रघुसिंहानां सिंहासनमलङ्कुरु ।
राजन्वन्तः प्रतन्वन्तु मुदमुत्तरकोशलाः ॥१४७॥

(ट) समुदयमानं सम्यक् वर्द्धमानम् । दशरथकुटुम्बं दशरथस्य परिवारम् । ईक्षामहे पश्यामः ।

जेतारमिति । भार्गवः परशुरामः दशकन्धरस्य रावणस्य जेतारम् अर्जुनं कार्त्तवीर्य्यार्जुनं जितवानेव । काकपक्षकधरः शिखण्डकधारी शिशुरिति भावः । बालानान्तु शिखा प्रोक्ता काकपक्षः शिखण्डक इत्यमरः । रामः यदि तं भार्गवं जितवानिति पूर्वेणान्वयः तत् तदा इयं कथा जयवार्त्ता पूरिता समाप्तिं गता परशुरामजयेनैव रावणादीनां सर्वेषां जयस्य सिद्धत्वादिति भावः । तथापि बालचरितात् तस्य रावणवधादेः प्रक्रियायाः प्रकरणस्य गौरवात् गुरुत्वात् अर्घं कल्पयतः रचयतः रावणवधादिकमिति भावः कवेरिति शेषः अन्या अपरा इयं कविता जगतः तोषाय वर्त्तिष्यते भविष्यति । शार्दूलविक्रीडितं वृत्तम् ॥ १४६ ॥

(ठ) माङ्गलिकलग्नं शुभसमयः अभिषेकस्येति शेषः । अतिक्रामति अतिगच्छति ।

तदिति । तत् तस्मात् रघुसिंहानाम् इदं सिंहासनम् अलङ्कुरु

CC-0. Bhagavad Ramanuja National Research Institute, Mèlukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(रामस्तथा करोति । वशिष्ठ ऐन्द्रेण (ड) महाभिषेकेण मन्त्रपूर्वकमभिषिञ्चति । अन्ये तूच्चावचमभिषेकं (ढ) नाटयित्वा पञ्चाङ्गचुम्बितभूमयः (ण) प्रणमन्ति । नेपथ्ये मङ्गलगीतिर्नान्दीवाद्यानि च ।)

वशिष्ठः । (सहर्षम् ।) वत्स रामभद्र ! सम्प्रति,

उदयदुदयद्धर्मस्कन्धे धुरं त्वयि बिभ्रति
क्व नु परिभवौ दृष्टादृष्टौ प्रजाः परिचिन्वते ।
अपि खलु यथा जीवात्मानः प्रभोः परमात्मनो
दिशि दिशि दिशामष्टौ नाथास्तवैव विभीषिकाः ॥१४८॥

अधिष्ठानेनेति भावः । उत्तरकोशलाः कोशलाख्यजनपदस्य उत्तरविभागाः राजन्वन्तः प्रशस्तराजयुक्ताः सन्तः मुदम् आनन्दं प्रतन्वन्तु विस्तारयन्तु महोत्सवादिकं कुर्वन्त्विति यावत् । अनुष्टुब्वृत्तम् ॥१४७॥

(ड) ऐन्द्रेण इन्द्रसम्बन्धिना इन्द्रो यथाभिषिक्तः तवेति भावः ।

(ढ) उच्चावचम् अनेकविधम् ।

(ण) अञ्चाङ्केति पञ्चभिः अङ्गैः हस्तद्वयपदद्वयमूर्द्धभिरित्यर्थः चुम्बिता स्पृष्टा भूमिः यैः तथाभूताः ।

उदयनिति । उदयन् उदयन् अतिशयेन वृद्धिं गच्छन्नित्यर्थः धर्म एव स्कन्धः यस्य यस्माद्वा तस्मिन् त्वयि धुरं राज्यभारं बिभ्रति वहति सति प्रजाः जनाः, प्रजा स्यात् सन्ततौ जने इत्यमरः । दृष्टादृष्टौ दृष्टः शत्रुचक्रजातः अदृष्टः अनावृष्ट्यादिसमुद्भवः तौ परिभवौ दुःखे इति यावत्, अदृष्टं वञ्चितोयादि दृष्टं स्वपरचक्रजमित्यमरः । क्व नु कुत्र खलु परिचिन्वते जानन्ति ? नैव कुत्रापि जानन्तीत्यर्थः । तथाहि प्रभोः निग्रहानुग्रहसमर्थस्य परमात्मनः ईश्वरस्य जीवात्मानः यथा, तथा दिशि दिशि प्रतिदिशम् अष्टौ नाथाः इन्द्रादयो दिक्पाला इत्यर्थः अपि प्रभोः तवैव विभीषिकाः खलु लोकानां भयप्रदर्शनानि एव । यद्वा प्रपञ्चा एव यथा परमात्मनः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

(रामो लज्जते ।)

विभीषणः । (कृताञ्जलिर्जानुभ्यां प्रणिपत्य ।) देव !

लङ्का च पुष्पकमिदं च विमानमार्य्याद्
यक्षेश्वरादपहृतं दशकन्धरेण ।
एकां भवानदित मह्यमथेदमन्य-
दाज्ञापत द्रुतमुपेतु पतिं निधीनाम् ॥१४९॥

रामः । (वशिष्ठेनानुज्ञातः पुष्पकं प्रति ।) विमानराज ! प्रथमस्वामिनं प्रथमपौलस्त्य(त)मुपतिष्ठस्व ।

वशिष्ठः । (सहर्षप्रसादम् ।) रामभद्र ! किं ते भूयः प्रियं करोमि ।

रामः । भगवन् ! किमतः परमपि प्रियमस्ति । भगवत्प्रसादात्

प्रपञ्चा जीवास्तथा इन्द्रादयो दिगीश्वरास्तवैवांशरूपास्तत्कार्यमेव जगद्रक्षणं कुर्वन्तीति भावः । अतः तव राज्ये न दृष्टादृष्टभयावकाश इति पर्य्यवसितम् । हरिणीवृत्तम् ॥ १४८ ॥

लङ्केति । दशकन्धरेण रावणेन आर्य्यात् ज्येष्ठभ्रातुः यक्षेश्वरात् कुबेरात् लङ्का च इदं पुष्पकं विमानञ्च अपहृतम् । पूर्वं धनपतिः लङ्कायामधिराज्यमकरोत् । ततश्च रावणेन तं ज्येष्ठभ्रातरं पराजित्य दूरीकृत्य च स्वयं लङ्का तदीयं पुष्पकञ्चाधिकृतमिति पुराणवार्त्ता । भवान् एकां लङ्कां मह्यम् अदित दत्तवान् । अथ इदम् अन्यत् पुष्पकमित्यर्थः द्रुतं शीघ्रं निधीनां पतिं धनेश्वरम् उपेतु प्राप्नोतु आज्ञापय । वसन्ततिलकं वृत्तम् ॥ १४९ ॥

(त) प्रथमपौलस्त्यं ज्येष्ठपुलस्त्यनन्दनम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तातात्रामधिमौलि मौक्तिकमणिं कृत्वा महापोत्रिणो
दंष्ट्राविन्ध्यविलासपत्रशबरी दृष्टा भृशं मेदिनी ।
सेतुर्दक्षिणपश्चिमौ जलनिधी सीमन्तयन्नर्पितः
कल्पान्तं च कृतं च विश्वमदशग्रीवोपसर्गं जगत् ॥१५०॥

तथापीदमस्तु ।

समुन्मीलत्सूक्तस्तवकमकरन्दैः श्रवणयो-
रविश्रम्यद्धारासवनमुपचिन्वन्तु कवयः ।
न शब्दब्रह्मोत्थं परिमलमनाघ्राय न जनः
कवीनां गम्भीरे वचसि गुणदोषौ रचयतु ॥१५१॥

तातात्रामिति । तातस्य पितुः आत्राम् अधिमौलि मौलौ, विभक्त्यर्थेऽव्ययीभावः । शिरसीत्यर्थः मौक्तिकमणिं मुक्ताहारं कृत्वा मुक्तामालामिव गृहीत्वेति यावत् महापोत्रिणः महावराहस्य दंष्ट्रेव यो विन्ध्यः पर्वतविशेषः स एव विलासपत्रं विलासार्थं पत्र-रचना यस्याः तथाभूता शबरी भिल्लजातीया स्त्रीव मेदिनी पृथ्वी भृशम् अतिशयेन दृष्टा अवलोकिता चाण्डालनारीव पृथिवी पितुराज्ञया परित्यक्तेति भावः । दक्षिणपश्चिमौ जलनिधी समुद्रौ सीमन्तयन् द्विधा कुर्वन् सेतुः अर्पितः रचित इत्यर्थः । विश्वं समस्तं जगत् कल्पान्तं व्याप्य आप्रलयमित्यर्थः नास्ति दशग्रीव एव उपसर्गः व्याधिविशेषः यत्र तत् यद्वा नास्ति दशग्रीवस्य उपसर्गः उपद्रवः यस्मिन् तथाभूतं कृतञ्च । शार्दूलविक्रीडितं वृत्तम् ॥ १५० ॥

समुन्मीलदिति । कवयः समुन्मीलन् विकासं गच्छन् यः सूक्त-स्तवकः सुवचनगुच्छः मदीयचरितविषय इति भावः तस्य मकरन्दैः रसैः श्रवणयोः कर्णयोः अविश्रम्यत् विश्राममगच्छत् अविरतमित्यर्थः धारासवनं धारास्नानम् उपचिन्वन्तु कुर्वन्तु । जनः लोकः शब्दरूपात् ब्रह्मणः वेदात्, वेदस्तत्त्वं तपो ब्रह्मेत्यमरः । रामायणस्य पञ्चमवेदत्वे-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपिच ।

देवस्यात्मभुवः कमण्डलुजलस्रोतांसि मन्दाकिनी-
गङ्गाभोगवतीमयानि पुनते यावत्त्रिलोकीमिमाम् ।
तावद्वीरयशोरसायनमधुस्यन्दः कवीनामयं
जागर्त्तु श्रुतिशष्कुलीवलयितव्योमावगाही गुणः ॥१५२॥

(इति निष्क्रान्ताः सर्वे ।)

इति नायकानन्दो नाम सप्तमोऽङ्कः ।

इति महाकविश्रीमुरारिविरचितमनर्घराघवं नाम
नाटकं समाप्तम् ।

नाभिधानादिति भावः । उत्थितं परिमलं सौरभं तदालोचनास्वादमिति भावः अनाघ्राय अननुभूयेत्यर्थः कवीनां गम्भीरे दुरवगाहे वचसि गुणदोषौ न विरचयतु च न ददातु च । शिखरिणीवृत्तम् ॥१५१॥

देवस्येति । मन्दाकिनीगङ्गाभोगवतीमयानि देवस्य आत्मभूवः ब्रह्मणः कमण्डलुजलस्रोतांसि, मन्दाकिनी देवलोके, गङ्गा मर्त्यलोके, भोगवती पाताले इति बोध्यम् । यावत् इमां त्रिलोकीं पुनते पवित्राणि कुर्वन्ति, तावत् अयं वीराणां यश एव रसायनं पुष्टिकरमहौषधविशेषः तस्य मधुस्यन्दः मधुस्रवः श्रुतिशष्कुल्या श्रोत्रविवरेण वलयितम् अवच्छिन्नं यत् व्योम आकाशं तदवगाही कवीनां गुणः रचनाविशेषमाधुर्यमित्यर्थः जागर्त्तु तिष्ठत्विति यावत् । शार्दूलविक्रीडितं वृत्तं, सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥ १५२ ॥

इति श्रीजीवानन्दविद्यासागरभट्टाचार्येण कृता
अनर्घराघवसप्तमाङ्कव्याख्या समाप्ता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अनर्घराघवनाटकान्तर्गतानां प्राकृतानां संस्कृतानि ।

५७पृष्ठे—५पङ्क्तौ । आर्य शुनःशेफ ! किमथास्यं भीषणं च वर्त्तते ।

५७पृ०—९प० । अद्य राम इति कोऽपि क्षत्रियकुमार आगत इति श्रुत्वा कुतूहलेन धावतस्तपोवनपर्य्यन्तपरिस्थिता प्रस्तरपुत्तिका सत्यमानुषीभूय ममैव सम्मुखं परापतिता । तां प्रेक्ष्य उत्तरासङ्गवस्त्रमपयुज्झित्वा पलायितोऽस्मि ।

५८पृ०—३प० । तद्रक्षत मामार्य एतस्या दुष्टराक्षस्या मुखात् ।

५८पृ०—७प० । या जनकवंशपुरोहितस्य तत्रभवतः शतानन्दस्य जननी । ततस्ततः ।

५९पृ०—१प० । अहो आश्चर्यम् । आर्यस्य प्रसादेन पुनरपि जीवलोके प्रविष्टोऽस्मि । तथापि शङ्काज्वरोऽद्यापि न मां परित्यजति । तदार्य शुनःशेफ ! मुहूर्त्तं विश्रम्यताम् ।

५९पृ०—८प० । कथं विषयतृगतृष्णास्वच्छन्दतया भगवतो हरेरपि हरिणता विडम्यते ।

६०पृ०—६प० । मन्ये एतस्या एव सुनिष्टहिण्याः पुण्यपरिणामोऽत्र रामभद्रस्य प्रवासे कारणम् ।

६०पृ०—९प० । आर्य ! द्वितीयमपि श्रोतुमनेन तव वचनेन पर्य्युत्सुकोऽस्मि ।

(६२पृ०—१प० । अहो स्थविरभल्लूकस्य मन्त्रोपन्यासः परिहासकुशलता च । ततस्ततः ।

६३पृ०—७प० । आर्य ! योऽसौ मारुतिस्तेतामल्ल इति श्रूयते ।

६३पृ०—१०प० । आर्य ! यथा तथा भवतु । स्वामी स्वामेव । तं परित्यज्य तत्सदृशस्तादृशस्य महानुभावस्य प्रतिकूलपरिग्रहः ।

६४पृ०—७प० । ऊम् । तदुचितमेव गुरुपुत्रः सत्रह्मचारी वानुवर्त्तते । ततस्ततः ।

६५पृ०—३प० । कथमपरिहीनमित्रधर्मोऽपि स राक्षसः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

६६पृ०—५प० । नागसहस्रबला स्त्री अस्तीत्यश्रुतपूर्वं खल्वेतत् । ततस्ततः ।

६६पृ०—९प० । जाने रामभद्र इति कोऽपि राक्षसानामुपर्यवतीर्णः खल्वसौ ।

६७पृ०—३प० । मन्ये मन्त्रमयीभिरस्त्रदेवताभिः समं बलातिबले शक्ती अपि रामे संक्रमिष्यतः ।

६७पृ०—६प० । आर्य ! ननु भणामि यदि निजा एव शक्तयो निजा एवास्त्रविद्याः । तत् किमित्यात्मनो विघ्नोपशमे राघवस्य गौरवमुत्पादयति तत्रभवान् कौशिकः । अथवा प्राधुण्यहस्तेन सर्पमारणं खल्वेतत् ।

६९पृ०—१प० । आर्य ! शोभनं मन्त्रयसे । अन्यदपि किमपि प्रष्टुकामोऽस्मि ।

६९पृ०—४प० । सर्वथा निगूढमपि वानराणां षाड्गुण्यं कथमार्येण प्रतिपन्नम् ।

७१पृ०—७प० । अहमपि क्षत्रियकुमारयोर्दर्शनं उत्कण्ठितोऽस्मि । तत् कथय कुत्र प्रेक्षे ।

१२०पृ०—१०प० । आर्य ! प्रणमामि ।

१२०पृ०—१२प० । आर्य ! चिरेण कुतो यूयम् ।

१२१पृ०—४प० । अथ किम् । आर्य ! प्रभवं नामधेयं च तयोः श्रोतुमस्ति मे कौतूहलम् ।

१२२पृ०—१प० । यथास्मद्गृहे भर्तृदारिका सीता अस्मिंश्च नाथवंशे श्रुतकीर्त्तिश्च । कथं महाकुलप्रसूता एतेऽपि कुमारकाः । कुतोऽस्माकमीदृशं भागधेयम् ।

१२२पृ०—८प० । ततस्ततः ।

१२३पृ०—१प० । आर्य ! सर्वजनमनीषितानुकूलमिव तत्रभवतः शतानन्दस्य वचनम् ।

१२३पृ०—५प० । तत् किं मन्यध्वे शङ्करशरासनारोपणव्यवसायेन राजर्षेर्जनकस्य प्रतिज्ञासाहसं निर्वाहयिष्यति राघवः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

१२४पृ०—५प० । आर्य ! प्रवृत्तिविशेषलक्षणेन दुर्मनायमानमानं पञ्चालिकाकेलिव्यापारेण विनोदयन्तीं भर्तृदारिकां प्रेक्ष्य उद्विग्नया कारणं प्रतिपत्तुमागतया आर्यस्य दर्शनेन मया विस्मृतमेतेन पुनस्ते राक्षसनामग्रहणेन स्मारितानि ।

१२५पृ०—३प० । श्रुतोऽस्मार्यः । यथा किल सीतादेवीं प्रार्थयितुं दशग्रीवपुरोहित आगत इति ।

१२५पृ०—६प० । आर्य ! एवमेतत् । अर्जकोऽसीति मिथिलीकृतलज्जा सम्प्रत्येवानुभूतं किमपि निवेदयामि ।

१२६पृ०—७प० । ततश्च पुनःपुनरपि तामिः कञ्चुकाभिर्निबध्यमाना लज्जितुमपि लज्जते ।

१२७पृ०—१प० । आर्य ! रमणीय मन्त्रयसे । सर्वस्याप्यनुभवसंवादिनी ते वाक् ।

१२८पृ०—१प० । भवतु । तत्र किमपि युष्माभिः श्रुतम् ।

१२८पृ०—५प० । तदा कृतार्थो रावणो देवीं परिणयते ।

१२९पृ०—१प० । एवं भवतु । आर्य ! सम्प्रति कुत्र तौ रामलक्ष्मणौ ।

१८०पृ०—६प० । अम्मडे ! सौम्यसुन्दरयिवाहनेपथलक्ष्मीविच्छर्दितकान्तिप्राग्भाराणि रघुकुलकुमाराणां मुखपुण्डरीकाणि प्रेक्षमाणा गुणुद्धितेनापि मायामानुषीभावेन कृतार्थीकृतास्मि । अहो सा तादृशी गुणानां प्रकृतिर्या विपद्यहस्रपतितापि सुखयति ।

१८१पृ०—५प० । कथमिदैवाकृतकथिखरमणीये मातामहः । अहो दुःखिष्टया दग्धकार्य्याणाम् । यदिदानीं प्रजागरकृशलोचनः प्रतिक्षणवृद्धाप्रसारितकुण्डलकुरुरटदृढहृदयस्थितकठिनकार्यभारोऽन्य इव कोऽपि दृश्यते । अथवा रामान्योऽपि गुरुको मन्त्रिभावो विशेषेण साहसैकरसव्यवसायस्य चरणचरितस्वामाकं स्वामिनो रावणस्य । जानामि मामेव प्रतिपालयंस्तिष्ठति । यावदेनमुपसर्पामि । आर्य ! वन्दे ।

१८२पृ०—७प० । आर्य ! दशरथे आगते कुमाराणां गोदानमङ्गले च संवृत्ते तावन्मया प्राप्तं मिथिलानगरम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri.

१८३पृ०—८प० । आर्य ! एवमेतत् । स मया तत्र ब्राह्मणो वशिष्ठमहर्षेरपि स्फुरन् दृष्टः ।

१८३पृ०—१प० । अथ किम् ।

१८५पृ०—८प० । आर्य ! न खलु मोट्टिमं परिहरतोऽन्य उपायो लक्ष्यते ।

१८७पृ०—२प० । यथा निरूपितं मातामहेन । अहो कालस्य माहात्म्यम् । यदिदानीं त्रिभुवनजयलक्ष्मीलीलावन्दीकारे महाराजरावणेऽप्येवं मन्त्रयते ।

१८८पृ०—१प० । कः सन्देहस्तस्मिन् विवाहमहोत्सवे सर्वं मया प्रत्यक्षीकृतम् ।

१८९पृ०—१प० । आर्य ! किमिदानीं युक्तम् ।

१८९पृ०—९प० । कथं क्षत्रियपोतको वालिनिग्रहेऽपि सहायः समीह्यते । ततस्ततः ।

१९१पृ०—६प० । आर्य ! किं तत् संविधानकम् ।

१९२पृ०—१प० । अहो दृष्टकृत्यस्य कुटिलता । ततस्ततः ।

१९३पृ०—३प० । आर्य ! उपनतस्यैवं क्रियते ।

१९४पृ०—१प० । हृम् । अन्यद्भणामि । अथैवं वारिष्यति रामभद्रः ।

१९४पृ०—६प० । अन्यदपि किमप्यनर्थान्तरमत्र प्रतितमिति तर्कयामि ।

१९४पृ०—९प० । मया जनकनगराविष्क्रान्तया श्रुतम्, यथा चुस्त्रीकण्ठशरासनस्य दशरथेर्मातृश्वर्येण सकलक्षत्रियकृतान्तः परशुरामः परागत इति ।

१९६पृ०—१प० । अहो दुग्धमुखे तस्मिन् क्षत्रियपुत्रक एवं सम्भावयति मातामहः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri

CC-0. Bhagavan Mahaviira Jain Research Institute, Muktakote Collection.